तथाहि—**वसन्तपुरे अरिमर्दनो** नाम राजा, तस्य चातीवनिपुणस्तात्कालिकमतिमान् **दण्डिनामा** द्वारपालोऽस्ति, तस्य मतिकौशलकथा राज्ञः पुरस्तात्केनाप्यकारि, यथा हे देव! तव वेत्रिणो दण्डिनो मतिर्वरीयसी, येनासौ क्वापि विषमेऽपि कार्ये न मुह्यतीत्याकर्ण्य तन्मतिकौशल-विलोकनाय जातकौतुकेन भूपेन स **दण्डी** सभायामाकारितः, प्रोक्तं च— 'हे **दण्डिन्** ! गृहाणेमां मम महिषीम्, अस्याः पयश्चामुष्य मार्जारस्य प्रत्यहं पायनीयम्' इत्युक्ते **दण्ड्यपि** सद्यः प्रसूतां सद्यस्कां कुण्डोध्नीं प्रभूतपयःप्रदां लघीयसीं रक्तलोचनामतीवरम्यां तां महिषीं तं च बिडालमादाय गृहमागतः, सप्तदिनानि भूपानुशासनमनुष्ठितवान् । प्राप्तेऽथाष्टमेऽहनि **दण्डिना** भार्याऽभाणि,- 'प्रिये! पश्य राज्ञो मतिवैकल्यं! यदमृतोपममेतत्पयो बिडालस्य पाय्यते । अथ विलोकय मन्मतिमित्युदीर्य भृशमुष्णीकृत्य तत्पयो मार्जारपुरो ढौकितं, बिडालोऽप्यतितप्तेन तेन पयसा दग्धवदनोऽनश्यत्, आनीयमानोऽपि दग्धत्वान्नैति स्म । एवं कतिचिद्दिवसानानीयते, परं दग्धवदनो नायाति । एवं स तथा भीतो यथा शीतेऽपि पयसि ढौकिते नाऽऽयाति । **दण्डिना** च तन्महिषीक्षीरं स्वयमनुदिनं व्यापार्यते, मार्जाराय चोच्छिष्टमन्नतक्रादि दीयते । एवं च कियत्सु दिवसेषु गतेषु राज्ञा **दण्डी** पृष्टः— 'भो **दण्डिन्** ! मदाज्ञां त्वं करोषि वा न?' **दण्डि**नोचे 'देव ! स बिडालः पयो न पिबति, तेन जाने तस्य किमपि रोगादि जातमित्युक्तो राजा स्वयं बिडालस्वरूपमालोक्य जातविस्मयो **दण्डिन**माह- 'भो **दण्डिन्**! अहं तुष्टोऽस्मि, प्रदत्तैषा [मया ते] महिषी, परं सत्यं वद, कुतोऽयमोतुः पयो न पिबती'त्युक्ते **दण्ड्यपि** स्वमतिकल्पितं बिडालव्यतिकरं कथितवान् । ततस्तन्नैपुण्यप्रीतेन भूपतिनापि ग्रामादिदानेन सन्मानास्पदं विधाय विसृष्टो दण्डी स्वधाम जगाम। **इति दण्डिनामप्रतिहारकथा ॥ ४ ॥**

१. पुनर् - HRDAB ॥ २. तुला- एकटा छला गोनू झा २८ ॥

॥ ५ ॥ कलिकालविरुद्धाचरणे युधिष्ठिरकथा[1] ॥

प्रायः कलियुगे सर्वापि लोकस्थितिर्विरुद्धा, यतः—

धर्मः पर्वगतस्तपः प्रचलितं सत्यं च दूरे गतं,
पृथ्वी मन्दफला नृपाश्च कुटिला मेघास्तथा निर्जलाः ॥
लोकः स्त्रीषु रतः स्त्रियोऽतिचपला लौल्यं गता ब्राह्मणाः ।
साधुः सीदति दुर्जनो विलसति प्रायः प्रविष्टे कलौ ॥ १ ॥

अत्रार्थे च **पुराणोक्ता युधिष्ठिर**नृपकथा यथा—

प्रायो विरुद्धाचरणं कलौ युगे तटाकगोकाकलुलायकूपगम्।
स्वरूपमालोक्य युधिष्ठिरोऽन्यथा-व्रताशयोऽभूत् श्रुतिवाग् यदिदृशी ॥ २ ॥

तथाहि—अन्यदा सर्वत्र विरुद्धाचरणकारणं स्वागमं ज्ञापयितुं विहितविप्रयवनरूपः **कलिकालो भीमार्जुननकुलसहदेवैः** सहोदरैः सहोद्याने क्रीडतो धर्ममयमूर्त्तिधर्मपुत्रस्य स्वस्वरूपमदीदृशत् । तं च दृष्ट्वा जातविस्मयो राजा दध्यावहो किमिदं चित्रं ! यदसौ पुमान् विप्रवेषं यवनवेषं च बिभर्त्ति! इति संशयानं राजानं सोऽवादीत्— 'हे राजन् ! किमनेन ममानुचितवेषरचनादर्शनेनाश्चर्यं मन्यसे? चेदाश्चर्यं दिदृक्षुरसि तदा चतुर्ष्वपि दिग्देशेषु स्वसहोदरान् प्रेषयेत्युक्तो राजाऽपि स्वयं तत्रैवोपविश्य तदुक्तं कृतवान् । ततो **भीमः** पूर्वस्यां दिशि व्रजन् सान्द्रदर्भहरिततृणाङ्कुरविहितोल्लासे निम्नगाप्रदेशे द्वादशभिर्मुखैर्निरङ्कुशं तृणदर्भादि चरन्तं महिषमुदीक्ष्य दध्यावहो एवं द्वादशभिर्मुखैश्चरतोऽप्यमुष्य महिषस्य जठरपूर्त्तिर्न जायते! महच्चित्रमिदमिति मन्यमानो **भीमः** पश्चाद्बवले ।

तथा **अर्जुनो**ऽपि दक्षिणस्यां दिशि गच्छन् सद्यःप्रसूतायाः स्ववत्सिकायाः स्तनेभ्यः स्तन्यं धयन्तीमेकां गां विलोक्येति चिन्तितवान्—अहो! यद् एषा **गौः** स्ववत्सिकाया अपि स्तनान् धयतीति महान्तं विस्मयं मनसि वहन् व्याजुघोट । **नकुलो**ऽपि पश्चिमायां दिशि चलन्नेकस्मिन्नशोकतरुशाखाप्रलम्बिते कनकशिलाकामणिमुक्तादिसुन्दरे पञ्जरे कलहंसैः सेव्यमानंवायसं विलोक्येति ध्यातवानहो पक्षिचाण्डालमपि काकं राजहंसाः सेवन्ते, इत्यद्भुतं विभावयन् पश्चाद्बलितः । स तथा च **सहदेवो**ऽपि कौबेर्यां दिशि पर्यटन्नेकस्मिन् प्रदेशे गतस्तत्र चोभयपार्श्व-योस्तटाकद्वयं, मध्ये चैकं तटाकम् । अथ दूरस्थयोरपि पार्श्वस्थयोस्तयोर्द्वयोस्तटाकयोरपि तरङ्गाः परस्परं तयोरेव मध्ये पतन्ति स्म, मध्यस्थे सरसि च बिन्दुमात्रमपि जलं न पततीति निरीक्ष्य स दध्यौ, दूरस्थयोरप्येतयोः सरसोस्तरङ्गाः समीपगमपि सरो विमुच्य तयोरेव मध्ये पतन्तीति महदाश्चर्यं चिन्तयन् स चलितः । तदा ते सर्वेऽपि युगपद्**युधिष्ठिर**पार्श्वमाजग्मुः, तेषु च स्वस्वदृष्टमुक्तवत्सु स पुमान् पुनरप्याह— 'हे राजन्नागच्छ इतोऽप्यधिकं चित्रं दर्शयामी'त्युक्तो

१. तुला-**उपदेशसारे** ॥

राजा तेन सहैकमुपकण्ठमुक्तसप्तकुम्भं कूपं प्राप्तः। मूर्द्धाबद्धपादत्राणं कण्टकविद्धचरणमेकं नरं निरवर्णयत्।

उपकूपागतेन तेन एककुम्भनिष्कासितवारिणा अन्ये षडपि कुम्भा भृताः, परं तैः षड्भिरपि कुम्भैः स एकोऽपि कुम्भो न भृतः । इति विलोक्य विस्मयवन्तं तं राजानं संहृतकूपादिरूपो दिव्यस्वरूपः कोऽपि देवः प्रकटीभूय प्रणम्य प्रोचिवान्— "राजन्नहं **कलिकालः**, सर्वं चेदं युष्माकं मयैव दर्शितं, शृणु चैतच्चित्रस्वरूपं—द्वादशमुखमहिषदर्शनादतः परं द्वादशधा दण्डैर्द्रव्यमाददानानामपि राज्ञां गृहे बुभुक्षैव । गोदर्शनात्सुताद्रव्यं पितरावनुजीविष्यतः। कनकपञ्जरे काकदर्शनान्नीचकुलोत्पन्नान् भूपानुत्तमाः सेविष्यन्ति, तटाकदर्शनादनासन्नस्थमपि पत्नीपक्षं वित्तादिभिस्तोषयिष्यन्ति लोकाः, न चासन्नस्थमपि बान्धवादिपरिवारं, मस्तकबद्धपदत्राणदर्शनात्पत्न्य शिरसि चटिष्यन्ति, कुम्भदर्शनादेकेनापि पित्रा षण्णां सप्तानामष्टानां नवानाम-धिकानां वा सुतानां भरणं पोषणं विधास्यते, [परं] न तैः सर्वैरपि पितुः, इति विरुद्धाचारादिकारणमहं कलिकालः समागां, तेन पुण्यमूर्त्तेर्धर्मपुत्रस्य तव पापरसमये मम समये स्थातुं नोचितमिति विज्ञप्य तस्मिंस्तिरोहिते **युधिष्ठिरो** गृहितव्रतः स्वार्थमसाधयदिति॥ **इति कलिकालविरुद्धाचरणे युधिष्ठिरनृपकथा ॥ ५॥**

॥ ६ ॥ स्त्रीचरित्रे श्रेष्ठिनीकथा ॥

अवगतकलाकलापैरपि पुरुषैर्निंतम्बिनीनां [1]हृदयं न ज्ञायते, यतः—

जलमज्झे मच्छपयं, आगासे पंखिआण पयपंती ।
महिलाण हिअयमग्गो, तिण्णिवि दुक्खेण लक्खंति ॥ १ ॥ [गाथा]

सदप्यात्मनो दूषणं रमण्यः क्षणेन निराकुर्वन्ति, यतः—

दुश्चिन्त्यं चरितं स्त्रीणां, यथा श्रेष्ठिप्रिया व्यधात् ।
ततोऽहं जागृतेत्युक्ति-युक्त्यात्मानमदूषणम् ॥ २ ॥

तथाहि—**क्षितितिलके** पुरे **गुणसुन्दरो** भूपतिरस्ति, स च मध्ये प्रयुक्तविषज्ञानार्थमादौ भोजनं मयूराय दर्शयति, पश्चाच्च स्वयं भुङ्क्ते, यतो मयूराद्युपायेनान्नादिषु विषमवगम्यते। उक्तं च—

[2]विषदुष्टाशनस्वादात्, काकः क्षामस्वरो भवेत् ।
लीयते मक्षिका नात्र, विलीना च विपद्यते ॥ ३ ॥
अन्नं सविषमाघ्राय, भृङ्गः कूजति चाधिकम् ।
सारिका सविषेऽन्ने तु, विक्रोशति तथा शुकः ॥ ४ ॥
विषान्नदर्शनान्नेत्रे, चकोरस्य विरज्यतः ।
म्रियते कोकिलो मत्तः, क्रौञ्चो माद्यति तत्क्षणात् ॥ ५ ॥

---

१ हार्दं-RSH ॥ २ तुला-**उपदेशप्रासाद** २/व्या. २३ ॥

नकुलो हृष्टलोमा स्या—न्मयूरश्च प्रमोदते ।
अस्य चाऽऽलोकमात्रेण, विषं मन्दायते क्षणात् ॥ ६ ॥
उद्वेगं याति मार्जारः, पुरिषं कुरुते कपिः ।
गतिः स्खलति हंसस्य, ताम्रचूडो विरौति च ॥ ७ ॥

तेन तस्य राज्ञः स कलापी कनकशृङ्खलामण्डितगलचरणस्तत्र स्वैरं भ्रमति । अन्यदा तत्र निवासिनो **धन**श्रेष्ठिनः प्रिया गुर्विणी सञ्जाततन्मयूराऽऽमिषभक्षणदोहदा तं मयूरं विपाद्य रहसि भक्षितवती । तेन च राज्ञा भोजनाऽवसरे बहुविलोकनादप्यलब्धे तस्मिन् कलापिनि तच्छुद्ध्यै वाद्यमानं पटहं 'सप्तदिनैरहं तच्छुद्धिं करिष्यामी'ति वादिनी नापितप्रिया पस्पर्श । अथ सा पुरे भ्रमन्ती **धन**श्रेष्ठिगृहे गता, मायया च तां पृच्छति स्म 'हे पुत्रि ! तवाऽऽधानमस्ति, तेन ते को दोहदो जातः ?' साऽपि दोहदोत्पत्तिमयूरामिषभक्षणावधिस्ववृत्तान्तमचीकथत् । तया नापितप्रियया तच्छुद्धौ निवेदितायां राजा स्माह- 'नाऽहमिदं मन्ये, श्रेष्ठिप्रियैतदकृत्यं न करोति, किञ्च यद्यहं स्वयं शृणोमि तदा मन्ये,' इति वादिनं राजानमादाय सापि तत्र गता । राजानं च भित्तिपश्चाद्विमुच्य मध्ये गत्वा सा तां प्राह- 'हे पुत्रि ! कथं त्वया स मयूरोऽमारी'त्युक्ता श्रेष्ठिन्यभाषिष्ट— 'घण्टिकाशृङ्खलाद्युत्तार्य ग्रीवां भङ्क्त्वा तन्मांसमभक्षयं, तत्पिच्छ-चञ्चु-चरणाऽस्थीनि च भूमौ निक्षिप्तानि' इति वादिन्यां तस्यां नापितप्रिया राजानमुद्दि-श्येत्यवादीत्, 'शृणु रे भित्ते! भाट्कृतिमिति निशम्य चकिता श्रेष्ठिनी दध्यौ, नूनमनया कोऽपि सङ्केतः कृतः, तेन स्वदोषमपाकर्त्तुमुत्पन्नधीस्तदनु किमिति तया पृष्टा साऽभाषिष्ट-'ततोऽहं जागृता'। तदनु सावदत् 'तर्हि किमसौ स्वप्नः ?' तदा श्रेष्ठिनी ब्रूते 'हे मातरेतदकृत्यं किं वयं कुर्मः ?' इति तया स्वदोषे निराकृते राजा गृहमागत्य नापितप्रियां नक्रच्छेदादिपुरस्सरं विडम्ब्य पुरान्निष्कासितवान् ॥ **इति स्त्रीचरित्रे श्रेष्ठिनीकथा** ॥ ६ ॥

॥ ७ ॥ वैरग्रहणे अमरसुन्दरीकथा ॥

दम्भेन हि यादृशं वैरमादीयते न तादृशं वैरं प्रबलैरपि बलैः, श्रेष्ठिसुतावत् । यतः— वैरमादीयते प्राय-श्छलैर्न प्रबलैर्बलैः । यथा श्रेष्ठिसुता हार-वैरं दत्त्वा हयौ ललौ ॥ १ ॥

तथाहि—**भूभूषणे** पुरे **रत्नसार**श्रेष्ठिनो **गुणसारः** सुतोऽस्ति । स च गुरुसमीपादाकर्णित-स्वैरिणीदुःशीलविलसितः पितृभ्यां प्रेरितोऽपि पाणिग्रहणं न करोति । यतः—

दुर्जनदूषितमनसां, पुंसां स्वजनेऽपि नास्ति विश्वासः ।
बालः पयसा दग्धो, दध्यपि फूत्कृत्य खलु पिबति ॥ २ ॥

ततो विहितबाढनिर्बन्धाभ्यां पितृभ्यां **रत्नपुर**वासिनोऽमरदत्तस्य श्रेष्ठिनः पुत्रीं**अमर**सुन्दरी-कन्यां परिणायितः स्वपुत्रः''। परं स तस्या आनयनार्थमुक्तो वक्ति— हे तात! अहं तां परीक्ष्यैवानेऽऽष्यामीति कृतसार्थवाहरूपो गृहीतविविधभाण्डो **रत्नपुर**मागत्य श्वसुरापणाभ्यर्णे

गृहीताट्टस्तस्थौ । तत्र च स **पुरन्दरपुरागतेनैकेन मन्मथसंज्ञेन** सार्थवाहेन सौहार्दमकरोत् । अथान्यदा पितुराकारणवशादागता**ममरसुन्दरी** निभाल्य स्मरपीडितोऽयं मन्मथः सार्थवाहो **गुणसारं** बभाषे 'हे मित्र ! केयममरीव वरीयसी कुमारी?' सोऽप्यवादीदस्य श्रेष्ठिनः सा सुतास्तीत्युदिते स पुनः प्राह, 'हे मित्र ! त्वमेव मे विश्रम्भभाजनं, यतः—

शोकारातिपरित्राणं, प्रीतिविश्रम्भभाजनम् । केन रत्नमिदं सृष्टं, मित्रमित्यक्षरद्वयम् ॥ ३ ॥

तेन त्वां वच्मि, यदीयं मामीहते तदा द्वात्रिंशन्मणिमयमिमं **रत्नावलि**नामानं हारमस्यै यच्छामि। सोऽपि वरमनेनोपायेनास्याः परीक्षा भवितेति हृदि ध्यात्वा कृतकार्यान्तरदम्भस्तद्गृहं गत्वा तस्यै यदुक्तमुक्तवान्। सापि शीलरक्षापुरस्सरं हारग्रहणोपायं मनसि निश्चित्योचे 'तदुक्तं विधास्ये, परमेकवारमेव मिलिष्यामि।' अथ गुणसारोदितां तां तत्प्रतिज्ञामङ्गीकृत्य सार्थवाहोऽपि सङ्केतदिने विहितवसनाभरणाडम्बरस्ताम्बूलसुरभितमुखः सायं तत्रागात् । साप्यात्मानुकारिवयोवसनाभरणरूपस्वरूपामेकां निजामनुचरीमादौ त्वया **रत्नावली**हारो गृहीतव्यस्तदनु च तेन सह सम्भोगो विधेयः, कृतसम्भोगया च त्वया ततो द्रुतं निवर्त्तनीयमिति शिक्षां दत्त्वा तत्पार्श्वे प्रैषीत् । अथ सोऽपि स्मरान्धस्तामम**रसुन्दरी**मेव मेने । यतः—

दिवा पश्यति नोलूकः, काको नक्तं न पश्यति ।
अपूर्वः कोऽपि कामान्धो, दिवा नक्तं न पश्यति ॥ ४ ॥

साप्यादत्तहारा विविधविलासैस्तेन सह रन्त्वा ततो द्रुतं निर्ययौ । एतद्व्यतिकरं सर्वमपि गुणसारः प्रच्छन्नवृत्त्या स्थितो विलोक्य दध्यावहो अस्या धीः! यदनया स्वशीलमरक्षि, हारोऽप्यादायीति । तच्चातुरीचमत्कृतः संहृतव्यापारोऽसौ निजगृहमागात् । ततोऽसौ गृहानीतया तया सह भोगान् भुञ्जन् दिनान्यनैषीत्। अन्यदैकत्र शयने सुप्तेन तेन स्वकरेण तस्मिन् हारे समाकृष्टे सति सा स्माह 'हे प्राणेश हारमिमं मा कर्ष त्रुटिष्यत्यसौ महामूल्यो हारः' इत्याकर्ण्य सोऽवदत् 'हे सुभ्रु ! हारा भूयांसः ! येन अन्यः कोऽपि दास्याद्युपायेन मुषणीयः' इति श्रुत्वा सा दध्यावहो किमसौ तन्मद्विलसितं दृष्टवान्? उत केनाप्युक्तमस्य पुरस्तात्? अथवा भवत्वेतत्, परमेतन्मर्मप्रकाशनवैरं छलेनादास्ये । इति निश्चित्य द्रुतं प्रारब्धवार्तान्तरेण तां रात्रिं निर्गमय्यान्येद्युस्तमापृच्छ्य सा निजपितुर्गृहमगात् । ततोऽसौ कृतपुरुषवेषा बहून् हयानादाय स्वपतिपुरमागता, तत्र च तुरगान् विक्रीय तन्नाणकपरावर्त्तनाय स्वश्वसुरहट्टे समागता । तत्रोपविष्टेन स्वपतिना सोचे- 'भोः सुभग! त्वया किं विक्रीतं?' तयोचे 'हया' इति । 'अथ सन्ति तुरगाः?' इति **गुणसारेणो**क्ते साऽवादीत् महामूल्यमश्वद्वयमधुनाप्यस्ति । ततो गुणसारस्तदश्वविलोकनाय तत्पटकुटिमागत्य समस्तशस्तलक्षणा-वुच्चैःश्रवःसोदराविवातीवसुन्दरौ तावश्वौ

दृष्ट्वा मूल्येन याचितवान् । साह-'अनयोर्मूल्यमिदमेव, यः कश्चित्स्वमुखे थूत्कर्त्तुं दास्यति तस्मै एतौ हयौ दास्यामीति निश्चितम्, किं चेदं गुह्यमहं कस्यापि पुरो न वक्ष्ये, अत्रार्थे च पित्रादीनां शपथः ।' अथ तत्तुरगलुब्धेन तेनापि तत्कारितम् । ततो गृहीतहयो **गुणसारः** स्वगृहं जगाम, सा च पितृनिकेतनं, पुनः श्वसुरगृहमागता । अथान्यदा त्रोटितबन्धनयोस्तयोरश्वयोर्बन्धनाय निशीथे शयनादुत्तिष्ठन्तं स्वपतिमऽभाषिष्ट 'हे प्राणेश किमुत्तिष्ठसि?' सोऽवादीत् 'त्रोटितबन्धनाविमौ मे हयौ मुधा मरिष्यतः,' इति निशम्य सोचे— 'हे प्रिय! म्रियेतामिमौ तुरङ्गौ, हया भूयांसो, येनान्यः कश्चिन्मुखे थूत्करिष्यति स पुनस्तुरगौ दास्यतीति । ततस्त्रपावनम्राननं स्वनाथं सा पुनः प्रोचे-'हे प्रिय! त्वं हारवृत्तान्तं कथं जानासि?' ततस्तेन स्वविलसिते कथिते सति सापि स्वचेष्टितं स्पष्टमभाषिष्ट । **गुणसारो**ऽपि प्रियाप्रावीण्यप्रीणितमनास्तया सह भुक्तभोगः प्रान्ते पुण्यपथमाराधितवान् ॥ इति छलेन **स्ववैरग्रहणेऽमरसुन्दरीकथा ॥ ७ ॥**

॥ ८ ॥ दुष्टचिन्तने विनीतासपत्नीकथा ॥

अपकारिण्यपि नरे सुधीः पापं न चिन्तयेत्, अपकर्त्तारो हि स्वयमेव स्वकृतमित्र-द्रोहादिफलं लभन्ते । यतः—

अपकारिषु माऽपायं चिन्तयस्व कदाचन। स्वयमेव पतिष्यन्ति, तीरजाता इव द्रुमाः ॥ १ ॥

अत्रार्थे च चतुःसपत्नीकथा यथा—

अन्यस्मै चिन्तितं पापं निपतेन्निजमूर्द्धनि।
विषमोदकदात्र्यो य-त्सपत्न्यः पञ्चतामगुः ॥ २ ॥

तथा—**धन्यपुर**नामपुरे **धनसारः** श्रेष्ठी वसति स्म, स च भूरितरविभवमदोन्मादादनुक्रमेण परिणितचतुष्पत्नीदौर्भाग्योद्विग्नः परदेशमगात् । तत्र चामररमणीमिव सुरूपां, गङ्गामापगामिव विमलस्वरूपां, रतिमिव प्रमुदितकन्दर्पां, श्रियमिव प्रीणितपुरुषोत्तमदर्पां, गौरीमिव मनोहरां, भारतीमिव चतुरचित्तवित्तपश्यतोहरां, सर्वलक्षणलक्षितां विनीतां **विनीतानाम्नीं धनदत्त**श्रेष्ठिसुतां परिणीय स्वधामाजगाम । तत्र च चतसृणामपि तासां दौर्भाग्यभाजां पुरातनपत्नीनां पृथक् पृथक् गृहभोजनवसनादिचिन्तां विधाय तामिति शिक्षितवान्, 'हे भद्रे! इमास्तव सपत्न्यः पापीयस्यः सन्ति, तेनैताभिर्दत्तमन्नपक्वान्न-क्षीरनीरफलपुष्पपत्रादि भवत्या नादनीयं, त्वया चैतासां देयमिति' पतिशिक्षाविचक्षणैकाकिन्येव स्वपतिना समं सा यौवनसुखमन्वभूत् । अन्यदा सपत्नीमात्सर्यनिघ्नाभिस्ताभिस्तन्मारणाय स्वस्वौकसि परस्परमकथयित्वैव विषमोदकाश्चक्रिरे ।

अथ तासु च वृद्धा सपत्नी गृहितविषमोदका विनीताधामागत्य मायया मधुरैर्वाक्यै-स्तामूचे, 'हे भगिनि! गृहाणैनं मत्पितृगृहादागतं मनोमोदकं मोदकम् । तत् श्रुत्वा

तयाप्यासनाभ्युत्थानादिप्रतिपत्तिपूर्वकं मोदको गृहीतः, एवं तया मोदके गृहीते सति सा स्वावासमाविशत् । अथ द्वितीययापि सपत्न्या तथैवोदीर्य दत्तं मोदकमादायैषा वृद्धसपत्नीदत्तं तस्यै ददौ । सापि तमादाय हृष्टमनाः स्वसद्मनि गता । ततस्तृतीयया चतुर्थ्यापि तथैव कृते एषापि द्वितीयादत्तं तृतीयस्यै, तृतीयादत्तं च चतुर्थ्यै दत्तवती । ततोऽसौ चतुर्थ्या दत्तं मोदकमादाय वृद्धसपत्नीगृहे गत्वा मधुरैर्वचोभिश्च तां तोषयित्वा मोदकं च दत्त्वा स्वगृहमागता । अथ ताः सर्वा अप्यज्ञातमिथःस्वरूपा मोदकभक्षणेन स्वयमेव पञ्चतां प्रापुः । विनीतापि ज्ञातसपत्नीमरण-स्वरूपा पापपराङ्मुखा विशेषतः पतिप्रतिपत्तिपरायणा धर्ममाराध्य सुगतिभाग् बभूव ॥ **इति परस्मै पापं न चिन्तनीयमित्यर्थे विनीतासपत्नीकथा ॥ ८ ॥**

॥ ९ ॥ स्त्रीचरित्रोद्विग्नजितशत्रुनृपकथा ॥

भाविभद्राः केऽपि पुमांसः सुन्दरीणां चरितं निरीक्ष्य गृहवासोद्विग्नाः पुण्यपराः स्युः, ये च ज्ञातदुःशीलां महिलां न त्यजन्ति तेऽवश्यं सुखैस्त्यज्यन्ते । यतः—

मित्रं शाठ्यरतं कलत्रमसतीं पुत्रं कुलध्वंसिनं ।
मूर्खं मन्त्रिणमुत्सुकं नरपतिं वैद्यं प्रमादास्पदम् ॥
देवं रागयुतं गुरुं विषयिणं धर्मं दयावर्जितं ।
यो नैव त्यजति प्रमोहवशगः स त्यज्यते श्रेयसा ॥ १ ॥

तेन ज्ञातस्त्रीचरित्रैः पुरुषैरवश्यं विरतैर्भाव्यम् । अत्रार्थे कथा यथा—

निरीक्ष्य चरितं स्त्रीणां, धन्याः स्युर्विरताशयाः ।
यथा श्रेष्ठिसुतानक्रं, चौरास्ये वीक्ष्य पार्थिवः ॥ २ ॥

तथाहि—**वरसाल**नामनगरे **रत्नसार**स्य श्रेष्ठिनो **गुणाकर**नामा पुत्रः, स च लोकव्यव-हाराऽकुशलः पशुरिवावर्द्धिष्ट । अन्यदा तमेतादृशमेव धनस्पर्द्धितधनदः पिता **रत्नपुर**वासिनो **दत्ता**ख्यस्य नगरश्रेष्ठिनो रम्भामिवातिरूपवतीं **रूपवती**नामकन्यां विवाहितवान् । ततोऽसौ पितृभ्यां प्रेरितोऽपि लोकस्थितिविकलः पत्न्याऽऽनयनार्थं न याति । तदा च स अतीव मुग्धः पित्रा प्रावीण्याय **प्रीतिसुन्दरी**पण्याङ्गनाया गृहे मुक्तः । यतः—

देशाटनं पण्डितमित्रता च, पण्याङ्गना राजसभाप्रवेशः ।
अनेकशास्त्रार्थविचारणं च, चातुर्यमूलानि भवन्ति पञ्च ॥ १ ॥

तत्र चासौ शिक्षितचातुरिकः पित्राज्ञयैकेन सुबुद्धिना **सुबुद्धि**नाममित्रेण सह **रत्नपुरं** ययौ, तत्र च **दत्तेन** श्रेष्ठिना अभियान-स्नानाऽ-शन-वसनादिना स निजजामाता सन्मानितः । स चैतावन्तं कालं पितृगृहे स्थिता मत्पत्नी किं शीलं पालितवती न वेति पश्याम्यस्य विचेष्टितमिति ध्यात्वा वासभवने दम्भनिद्रया यावत् स्वपिति । तावत् सज्जितशृङ्गारा सा

रूपवत्यपि वासगृहमागता, तं च सुप्तं निभाल्य मुदिता सती ततो द्रुतं निरगात्, तत्पृष्टे च सोऽपि । [अथ सा] दूतीमुखात् स्वजारं चौरं शूलाधिरोपितं मत्वा तदभ्यर्णमागात्। तदा किञ्चिज्जीवन् स तस्करस्तामालोक्य प्रोचे, हे प्रिये! मुखमुदञ्चय करोमि तवाऽधरचुम्बनं, येन सुखेन मत्प्राणा यान्तीत्यभिहिता सा तदुक्तं कर्तुमुद्यता । यदा च तन्मुखे तस्या नक्रमायातं तदैव स प्राणैर्मुमुचे। तदा च तीक्ष्णतरतदीयदशनखण्डितं तस्या नक्रं चौरमुखे एवास्थात् ।

तदाचैतत्वरूपमालोक्येतस्तत्पतिः शनैर्निर्वृत्य स्वास्पदमागत्य तथैव सुप्तः । साऽपि स्वैरिणीशिरोमणिः श्रवद्रुधिरा मुखं पिधाय गृहागता स्वदोषमपाकर्तुं पूच्चक्रे, धावत धावत रे जना! अनेन मत्पतिना पापिना मदनागमनात्कुपितेन मत्रासा छिन्ना, किं करोम्यबलाहमेकाकिनी? इति सत्यस्वरूपविलोकनेन क्रुद्धस्तत्पिता **जितशत्रुनृपज्ञापनपुरस्सरं** स्वजामातरं शूलाधिरोपाय समादिशत्। ज्ञाततत्प्रबन्धः **सुबुद्धिरपि** तत्र समेत्य स्वमित्रमभाषत, 'हे मित्र! किमिदं?' सोऽपि बाढं बद्धहस्तोऽशेषं रात्रिवृत्तान्तं मित्रायावादीत् । ततः

सुबुद्धिना विज्ञप्तो **जितशत्रुरपि** तस्करमुखान्निर्गतं तन्नक्रं विलोक्य दध्यावहो स्त्रीचरित्रं! यतः—

अन्नं रमइ निरिक्खइ, अन्नं चिंतेइ भासए अन्नं ।
अन्नस्स देइ दोसं, कवडकुडी कामिणी विअडा ॥ ४ ॥

तेन धिगस्तु नितम्बिनीं, यतः—

नितम्बिन्यः पतिं पुत्रं, पितरं भ्रातरं क्षणात् ।
आरोपयन्त्यकार्येऽपि, दुर्वृत्ताः प्राणसंशये ॥ ५ ॥ [योगशास्त्रे २/८६]

इत्यादिस्त्रीदौःशील्योद्विग्नो **गुणाकरं** बन्धनाद्विमोच्य सुताय दत्तराज्यमारो **दत्तश्रेष्ठि-गुणाकरसुबुद्धिप्रमुखैर्लोकैः** सह गृहीतदीक्षो राजा मोक्षमार्गमसाधयत् ॥ **इति स्त्रीचरित्रोद्विग्न-जितशत्रुनृपकथा ॥ ९ ॥**

॥ १० ॥ नियमपालने श्रीकरणकथा ॥

प्राणान्तेऽपि सन्तः स्वमर्यादां न मुञ्चन्ति, यतः-

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा, न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ १ ॥

अत्रार्थे श्रेष्ठिपुत्रकथा यथा—

सन्तो नियममर्यादां, त्यजन्ति न हि जातुचित् ।
हित्वार्हन्तं यथा देवं, नानंसीदन्यमिभ्यभूः ॥ २ ॥

श्रीमन्दिरे पुरे **श्रीदत्तश्रेष्ठिनः श्रीकरणनामा** सुतोऽस्ति, स च शैशवेऽप्येकदा

गुरुसन्निधावर्हद्गुणश्रवणसमुत्पन्नप्रमोदोऽर्हन्तं देवं विहायान्यं देवं न नमस्यामीति नियममग्रहीत्। तस्य चैनं नियमं सभायां सुरेन्द्रेण भूयो भूयः प्रशंसितमश्रद्दधानः कोऽपि नाकी ज्वर-शूलशिरोऽर्त्ति-श्वासादीन् महारोगांस्तस्य शरीरे विकृत्य कृतविप्ररूपस्तत्रागत्य तत्पितरं प्रोचिवान्। **श्रीदत्तो**ऽपि तमप्राक्षीदहो नैमित्तिक! ज्योतिषं विलोकय कथय मत्पुत्रस्य किमस्ति? सोऽपि तद्विदधे स तदेव वेत्ति। यतः—

वैद्या वदन्ति कफपित्तमरुद्विकारं, ज्योतिर्विदो ग्रहगणादिनिमित्तदोषम्।
भूतोपसर्गमथ मन्त्रविदो वदन्ति कर्मेति शुद्धमतयो यतयो गृणन्ति ॥ ३ ॥

तेन स क्षणं विमृश्य प्राह हे 'श्रेष्ठिन्नामी स्वभावोत्पन्ना रोगाः, किंतु बहिर्गच्छतानेन विराधितः क्षेत्रपालोऽमुं पीडयति, तेन यदि पूजोपहारनमस्कारादिना तमसावाराधयति तदास्य पीडोपशान्तिः, अन्यथा प्राणप्रणाशः।'

इदं तद्वचः पित्रोक्तमाकर्ण्य **श्रीकरणः** स्माह 'हे तात! चेत्प्राणा यान्ति तदाद्यैव यान्ति परमर्हन्तं विहायान्यस्मै देवाय मनसापि न नमस्यामि, पूजादिनां का कथा?' इतितस्मिन्वदति तवैव, एकेन दुष्टेन सर्पेण दष्टः कुमारो मुमूर्छ। विप्रोऽपि तद्गृहान्निर्गत्य गृहीतसर्पकरण्डो योगिरूपेणागत्याभ्यधादहो शेषनागवंशोत्पन्नोऽयं मद्भुजङ्गोऽशेषानामयांश्च हन्ति, तेन वन्द्यतामसाविति। अथ लब्धसंज्ञाय पुत्राय पित्रोक्तं, पुत्रः प्रोचे 'हे तातैतद्वचो मम न रोचते, तेन यथाकर्म भवतु' इति ब्रुवाणं तं **श्रीकरणं** दृढप्रतिज्ञं विज्ञाय इन्द्रकृतप्रशंसां च निवेद्य दत्तमहामूल्यहारो प्रणम्य स सुरः सुरलोकमगात्। **श्रीकरणो**ऽपि स्वं नियममाराध्य प्रान्ते स्वीकृतचारित्रो निर्वाणसुखं भेजे ॥ **इति नियमपालने श्रीकरणकथा** ॥ १० ॥

॥ ११ ॥ मित्रमतिविषये श्रीधरकथा ॥

मित्रं विना दुःसाध्यमपि कार्यं कः करोति? बुद्धिमन्तं सुहृदं विना सुखावाप्तिर्न स्यात्। यतः—

कुतस्तस्यास्तु राज्यश्रीः, कुतस्तस्य मृगेक्षणा।
यस्य शूरं विनीतं च, मित्रं नास्ति विचक्षणम् ॥ १ ॥

तेन सुहृदो हि दुःसाध्यानि कृत्यानि सृजन्ति, अत्रार्थे **वणिक्कथा** यथा—

भक्तिभुक्तिमहासत्रं, मित्रं जयति सर्वदा
सुहृद्बुद्ध्या सुखं भेजे, विप्रपत्नी यथा वणिक् ॥२॥

तथाहि- [**श्रीपुर**निवासिनं] मातृमुखमुख्यं **श्रीधर**नामानं द्विजन्मानं पितृगृहात्स्वप्रेयसी-मादाय स्वगृहे गच्छन्तं मार्गे कावपि स्वर्णकारवणिजौ तरुणौ सुहृदावपश्यताम्। तयोरेको वणिक् सौन्दर्यभृङ्गारां सज्जितशृङ्गारां जातरागां तत्प्रियां प्रेक्ष्य मन्मथमथितमनाः स्वमित्रमभणत्, 'हे मित्रेमां मम मेलये'त्युक्ते [स्वर्णकारो]ऽन्येन पथा [तेन सह] तद्रथाग्रतो भूत्वा तत्पथ्येवैकस्याः

प्रपाया मध्ये वणिजमुपावेश्य स्वयं च स्वर्णकारो हस्तविन्यस्तकपोलश्चरणोल्लिखितभूतलोऽतीवदुर्मना विलक्षस्तद्बहिस्तस्थौ ।

तदा सापि धनिकेन सारथिना प्रेर्यमाणं रथमारूढा तमेव वणिजं ध्यायन्ती तत्राययौ, ज्ञातोपायया तया [स्वर्णकारो] वैलक्ष्यनिदानं पृष्टः, स प्रोचे 'हे सुभ्रु ! अहमपि भवतीमिव सुभगामापन्नसत्वां स्वप्रियामादाय स्वगृहे गच्छन्नभवं, किञ्चासन्नप्रसवा सा मे पत्नी जातप्रसवपीडाऽस्यां प्रपायां सुप्तास्ति, किञ्चान्या कापि नारी नास्ति, याऽस्याः प्रसवप्रतिचर्यां करोति, किञ्चास्मिन् क्षणे स्त्रीणां प्रतिचर्या स्त्रियैव विधीयते, तेनाहं वीक्षापन्नोऽस्मि किं करोमि वराकोऽहमिति।' अहं विधास्ये तत्प्रतिचर्यामत्र का चिन्तेत्यभिधाय सा प्रपां प्रविश्य तेन वणिजा सह विविधभङ्ग्या विहितसम्भोगां पुना रथारूढां तां तत्पतिः प्राह 'हे प्रिये! तस्याः किं जातं? सुतः सुता वा? सा स्माह—

बलिहारी उस मित्तकी, जीसके मित्त छयल्ल ॥
बेटा हुवा न बेटडी, हांके बेल बयल्ल ॥ १ ॥

'बेटा हुवा' इति पदात्सुतं मन्यमानः **श्रीधरस्तामादाय** गृहमागात्, तावपि च स्वधाम गता ॥ **इति मित्रमतिविषये कथा ॥ ११ ॥**

॥ १२॥ शास्त्राभ्यासे श्री हेमाचार्यकथा ॥

स्वशास्त्राऽभ्यासो हि पुरुषजन्मनः फलं, यतः—

नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता ।
खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं न नीतं यशः ॥
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये ।
जन्मैतद्गतमेव निष्फलमहो शून्यालये दीपवत् ॥१॥

तेनास्तामात्मीयः शास्त्राभ्यासः, परेषामपि **बौद्ध-नैयायिक-सांख्यादीनामपि** शास्त्रसंग्रहः शुभः। अत्रार्थे **श्रीहेमाचार्यकथा** यथा—

परशास्त्रग्रहोऽपि स्यात्, शुभो यत्सिद्धभूपतिः ।
अत्र द्रोणेति भणना-त्तोषितो हेमसूरिभिः ॥ २ ॥

[१]तथाहि—**अणहिल्लपुरपत्तने श्रीसिद्धराजजयसिंहे** राज्यं कुर्वत्यन्यदाकलिकालसर्वज्ञैः **श्रीहेमचन्द्राचार्यैर्**वाच्यमानं **पाण्डवचरित्र**माकर्ण्य दुर्मुखै**स्त्रिमुखै**र्विज्ञप्तो राजा, 'हे देव! पञ्चापि पाण्डवा **हिमालये** सिद्धिमगुरिति **वेदव्यास**वाक्यमसौ **हेमाचार्यः शत्रुञ्जये** सिद्धास्ते इति *कथनेन दूषयतीत्यसमञ्जसम्'।*

१. तुल्याप्रायम्-उपदेशप्रासादे व्या० २६५ । प्रभावकचरित्रे पृ. १८८ ॥

ततो राज्ञाहूताः **श्रीहेमसूरयो** भूपसभां प्रापुः, हे भगवन्नधुना वणिजां पुरः किं व्याख्यायते ?' इति पृष्टाः पाण्डवचरित्रमिति प्रोचिवांसोऽनूचानः। तत्र च पाण्डवाः कथं क्व सिद्धा इति पुनः पृष्टाः प्रोचुर्गुरवः स्वीकृतजैनचारित्रास्तप्तदुस्तपसोऽनशनेन **सिद्धाद्रौ** सिद्धा इति। [तत् श्रुत्वा राज्ञा कथितं] हे सूरे! **पाण्डवास्तु हिमाचले** हिमेन सिद्धा इति **व्यासवाक्यप्रामाण्याद्भवद्वाक्यमप्रामाणमितीरिता** गुरवः प्रोचिरे हे राजेन्द्र! शृणु **भारतीं** भारतीं, तथाहि—समरभूमौ पार्थशरधोरणीविद्धं भूमिनिपतितमाजन्मशीलितदानशीलं **कर्ण**नरेन्द्रं दृष्ट्वा तद्दातृत्वपरीक्षार्थं किंचिद्देहीति वदन्नुपतस्थे कृतविप्ररूपो **विश्वरूपः**। **श्रीकर्णो**ऽप्यन्यत्किञ्चिन्नास्तीति विचिन्त्य यावत्स्वयमादत्तेन पाषाणेन स्वर्णरेखाञ्चितान् स्वदन्तान् पातयितुमुद्यतस्तावत्तुष्टोऽस्मीति वदन् प्रादुरासीत्**पुरुषोत्तमः** [यतः—

याचकार्थे धनं क्षिप्तं, स्वदारागतयौवनम् ।
स्वामिकार्ये गताः प्राणा, अन्ते दृष्ट्वा हि साधवः॥ १ ॥

तं दृष्ट्वा **कर्णः प्राह**] हे परमेश्वर! तव दर्शनेन सिद्धोऽस्मि, परं यदि तुष्टोऽसि तदा यत्र कोऽपि न दग्धस्तत्र मां ज्वालयेरिति वादिनं मृतं श्रीकर्णमादायान्यत्र तादृशं स्थानमलभमानो **हरिः** पयोधौ स्तम्भोपमस्य गिरेः शृंगं तादृशं मत्वा यावत्**कर्ण**चितां कर्त्तुमुद्यतस्तावदिति गगनवाणी जाता—

अत्र **द्रोण**शतं दग्धं, **पाण्डवानां** शतत्रयम् ।
दुर्योधनसहस्रं च, **कर्ण**संख्या न विद्यते ॥ ३ ॥

तेन यदि **पाण्डवानां** शतत्रयी तत्र दग्धा, तदास्माकमपि पञ्च **पाण्डवाः शत्रुञ्जये** सिद्धाः, श्रीमतामपि पञ्च **पाण्डवा हिमालये** सिद्धा इति किमसमञ्जसमित्युक्त्वा तुष्टेन राज्ञा विसृष्टाः सूरयः प्रतिश्रयमगुः ॥ **इति परशास्त्राभ्यासे हेमाचार्यकथा** ॥ १२ ॥

॥ १३ ॥ दानविषये श्री भोजकथा ॥

विदुरवाग्विलासैः प्रमुदितमनसः किं न यच्छन्ति दानशौण्डाः ? अत्रार्थे **भोजराजकथा**—

पाण्डित्यपीनं वचनं निशम्य, न दीयते किं किल दानशौण्डैः ।
लक्षत्रयं द्वौ करिणौ दशाश्वान्, दत्ते स्म भोजः श्रुतजानुदघ्नः ॥ १ ॥

तथाहि—सकलभूपालमालामालितो राजपाट्यां व्रजन् **धारा**धिपः **श्रीभोज**राजो नदीमुत्तीर्यायान्तं मूर्द्धारोपितदारुभारं जीर्णवस्त्रमेकं द्विजन्मानं प्रति नदीजलमुद्दिश्येति व्याजहार-'कियन्मात्रं जलं विप्र ?' सोऽवादीत्-'जानुदघ्नं नराधिप !' ॥ भूपोऽवदत् 'तदा केयमवस्था ते'। सोऽवोचत्- 'न सर्वत्र भवादृशाः' ॥ २ ॥ जानुदघ्नमित्यद्भुतप्रयोगचमत्कृतेन भूपेनास्मै लक्षमेकं कोशाधिपतेर्दापितं, तदनासितो दुर्मनाः सुमनाः पुनरेत्य राजदानगुणमात्मनश्चाभाग्येन तदनासिं बिभणिषुरिति बभाण—

'राजन् कनकधाराभि-स्त्वयि वर्षति वारिदे। अभाग्यच्छत्रसञ्छन्ने, मयि नायान्ति बिन्दवः ॥ ३ ॥

राज्ञापि पुनरिति श्रुत्वा लक्षद्वयं दापितं, तदप्यप्राप्नुवन् पुनस्तथैवाभिधत्ते स्म—

'त्वयि वर्षति पर्जन्ये, सर्वे पल्लविता द्रुमाः। अस्माकंमर्कवृक्षाणां[1] पूर्वपत्रेऽपि संशयः ॥ ४ ॥

राज्ञा पुनस्तथैव लक्षत्रयं दापितं। [परं तदनाप्तितः] स पुनस्तथैत्य कोशाधिपतेः कार्पण्यं राज्ञश्चौदार्यं दर्शयन्निति न्यगदत्—

एककस्य परमेकमुद्यमं, निस्त्रपत्वमपरस्य च[2] स्तुमः।
नित्यमुष्णमहसा निरस्यते, नित्यमन्धतमसं प्रधावति ॥ ५ ॥

इति तत्कवित्वकलाकौशलेन सकर्णशिरोमणे**र्भोज**स्य चित्तं चमच्चक्रे । यतः—

कवीश्वराणां वचसां विनोदै-र्द्रवन्ति विद्यानिधयो न चान्ये ।
चन्द्रोपला एव करैर्हिमांशो-र्द्रवन्ति नूनं दृषदो न चान्ये ॥ ६ ॥

तेनातीवतुष्टः **श्रीभोजस्तस्मै** कवये स्वयमेवैतद् वितीर्णवान्, तद्यथा—

लक्षं लक्षं पुनर्लक्षं, द्वौ गजौ दश वाजिनः।
दत्तं श्रीभोजराजेन, जानुदघ्नप्रभाषिणे ॥ ७ ॥

इति कविकलायां दानविषये श्रीभोजराजकथा ॥ १३ ॥

॥ १४ ॥ शीलपालने शीलवती कथा ॥

पतिप्रवासादिव्यसने स्त्रीणां शीलं दुष्पालनीयं । यतः—

यात्राजागरदूरनीरभरणं मातुर्गृहेऽवस्थिति-
र्वस्त्रार्थं रजकोपसर्पणमथो सच्चर्चिकामेलिका ॥
स्थानभ्रंशसखीविवाहगमनं भर्तुः प्रवासादयो।
व्यापाराः खलु शीलजीवितहराः प्रायः सतीनामपि ॥ १ ॥

[तेन धन्यतमास्ताः काश्चिन्मृगीदृशो या राजामात्यादिकदाग्रहदुर्व्यसने पतिता अपि स्वशीलं शीलयन्ति।] अत्रार्थे **शीलवतीकथा**—

धन्याः स्त्रियो दुर्व्यसनेऽपि सौवं, रक्षन्ति शीलं खलु शीलवत्या ॥
द्विजातिसेनापतिमन्त्रिभूपान्, प्रक्षिप्य पेट्यामवितं स्वशीलम् ॥ २ ॥

तथाहि-**श्रीनिवासे** पुरे **पृथिवीराजे** राज्ञि राज्यं कुर्वति तन्निवासी **समुद्रदत्त**श्रेष्ठी **शीलवतीं** स्वप्रियां गृहे विमुच्य **सोमभूतिना** विप्रेण सुहृदा परदेशमगात् । ततः स्वपुरोत्सुकस्य द्विजस्य हस्ते श्रेष्ठी सालङ्कारं लेखं पत्न्यै प्राहिणोत् । अथ स्वपतिमित्रं **सोमभूति**मागतमाकर्ण्य **शीलवत्यपि** प्रियोदन्तं प्रष्टुम् तद्गृहं गता । सोऽपि रहसि समागतां तां विलोक्य स्मरातुरस्त-

१ मर्कपत्राणां-RS ॥ २ वा-AHRS ॥

त्पतिक्षेमप्रवृत्तिमभिधायेत्यभणत्, 'हे कृशोदरि सुन्दरि ! अधुना तावन्मया [सह] रमस्व पश्चात्त्वत्पतिलेखाद्यमर्पयामी'तीरिता सा स्वशीलं रक्षितुं सञ्जातबुद्धिर्विभावरीप्रथमे यामे मदौकसि समागच्छेरिति तमुदीर्य सेनाधिपतिमगात् । हे देव ! मत्पतिदत्तलेखादिकमसौ विप्रो नार्पयती'त्युक्तः सोऽपि तदवलोकनात्स्मरवांस्तामवादीत्, 'हे सुभ्रु! तावन्मदुक्तं कुरु, पश्चात्तद्दापयिष्यामी'त्युक्ता सा तस्मै द्वितीयं यामं प्रोच्य मन्त्रिणमगात्।

तथैवोक्तवते तस्मै अपि तृतीयप्रहरमभिधाय वासभवने स्थिताय भूपाय सा विप्रादीनां चेष्टितं गत्वाभाषिष्ट । तथैव प्रार्थयते भूपाय तुर्यं यामं निवेद्य 'तुर्ये यामेऽहमाकारणीया' इति पतिमात्रा सङ्केतं विधाय रिक्ते स्वावासे सायं सा तस्थौ। तदैव प्रथमप्रहरे समायान्तं विप्रं स्नानादिनोपचरन्त्यां तस्यां सेनापतिराययौ । आगते चास्मिंश्चकितं विप्रं सा मंजूषावक्षारके चिक्षेप, सेनापतिमन्त्रिणावपि चैवम् । तथैव पतिमात्राहूता सा भूपं तत्र निक्षिप्य प्रभाते रुदन्ती कुटुम्बेनेत्यवादि, किं रोदिसि? साप्याह कल्ये मद्भर्त्तुरक्षेमवार्त्तागता, इति श्रुत्वा तत्स्वजनै राजामात्यसेनापतीन् स्वस्वगेहेष्वलभमानैर्विज्ञप्तो राजपुत्रः, देव समुद्रदत्तश्रेष्ठी अपुत्रः परदेशे मृतस्तेन तद्विभवो गृह्यताम्!' सोऽपि तत्र गतोऽन्यत्किमप्यपश्यन् दृढदत्ततालकां तां मंजूषामादाय सौधान्तस्तस्यामुद्घाटितायां राजादयश्चत्वारोऽपि निर्ययुः । ततोऽनर्थमूलं तं विप्रं शीलवतीगिरा जीवन्तं देशान्निष्कास्य काश्यपीपतिः शीलवतीशिरोरत्नं तां **शीलवतीं** स्वसारमिवाभरणादिभिः सत्कृत्य सुबहुमानास्पदं कृतवान्॥ **इति शीलवतीकथा ॥ १४ ॥**

॥ १५ ॥ दुष्टचिन्तने विप्रकथा ॥

परस्मिंश्चिन्तितं पापमात्मनि समुपैति । अत्रार्थे **श्रीधराऽङ्ग**विप्रकथा यथा—

चिन्तितं दुरितमन्यजने स्या-द्वज्रवद्विषममात्मनि नूनम् ।
श्रीधरे विधृतबाढविरोधः, कर्णकर्त्तनमवाप यदङ्गः॥ १ ॥

तथाहि-**वरुण**ग्रामेऽतीवमूर्खमतीवदुःस्थं **श्रीधरा**ख्यं द्विजमन्यदा तद्दयितावादीत्, हे नाथ! राजसेवां विधेहि, तां विना दौःस्थ्यं न याति, यतः—

इक्षुक्षेत्रं समुद्रश्च, पाषाणयोनिरेव च ।
प्रसादो भूभुजां चैव, क्षणात् घ्नन्ति दरिद्रताम् ॥ १ ॥

सोऽवदत्प्रिये ! तत्राऽहं किं वच्मि? साऽवोचदिति ब्रूयाः-

धर्मे जय पापे क्षय, ए वातनो स्यो लेखो।
श्रीधर बोले सुण हो राजन् न जाणो तो करि देखो ॥ १ ॥

अथ प्रत्यहमित्युक्तवते श्रीधरायान्यदा तुष्टो राजा प्रत्यहमेकं दिनारं ददौ, कथितवांश्च तस्मै अमी वर्णाः सभायामागत्य त्वया नित्यं मत्कर्णे वाच्याः। एवमुक्तः सोऽप्यहर्निशं तत्रा-

१. RSP। श्च योनिपोषणमेव च - मु.॥

गत्य नृपकर्णे तान् वर्णान् वदति स्म । अथ तस्मै मत्सरवानङ्गाह्वोऽपरो द्विजन्मेति विरुद्धं दध्यौ। अहो! विदुषि मयि सत्यपि राजप्रसादमयं मूर्खो भुनक्ति, तेन तत्कुर्वे येनायं सभायामपि नैति । इति मत्वा चतुष्पथे गच्छन्तं श्रीधरं प्रति अङ्गो जगौ, हे विद्वन् ! राजकर्णे वदता भवता मुखं वस्त्रेण भृशं पिधेयं, यतस्तव श्वासे लग्ने राजा रोषं यास्यतीति विप्रतारितो विप्रस्तथैव विदधे ।

अन्यदा अङ्गो भूपं बभाषे, हे देवासौ **श्रीधरो** मद्यं पिबति, तेन च युष्मत्कर्णे वदन् स स्ववदनं पिदधाति । द्वितीयस्मिन् दिवसे तथैव सृजते तस्मै धृतकोपो भूपो वस्त्राभरण-सुवर्णादिना सत्कृत्यैकं मुद्रितं पत्रं प्रदाय जगौ, एतदन्तर्लिखितं मत्सूनुस्ते दास्यतीति। अथैवं वस्त्राभरणभूषितस्य गच्छतः **श्रीधरस्य** मार्गे स अङ्गोमिलितो जगौ 'कोऽयमद्याडम्बरः?' श्रीधरोऽवादीद्भवत्प्रसादा-त्सञ्जातोऽसौ विशेषतो राजप्रसादः । तत् श्रुत्वा तेनोक्तं तर्हि तु ममापि किंचिद्वितरेतिवादिने अङ्गाय तत्पत्रं वितीर्य **श्रीधरः** स्वगृहमगात्। अथ अङ्गानीतं तत्पत्रं विलोक्य राजपुत्रेणान्तर्लिखितत्वात्सद्यः कृतनक्रकर्णच्छेदोऽगः स्वगृहं ययौ । अथान्येद्युस्तथैवैत्य वदन्तं **श्रीधरं** विलोक्य भूपोऽप्राक्षीत्, हे विप्र ! क्व तत्पत्रं ? सोऽवादीत् हे देव ! मार्गे मिलितायांगाय तद्दत्तम्। इत्याकर्ण्य राज्ञाकारितोंऽगः पृष्टश्च, सोऽपि पिहिताननः स्वचेष्टितं पापं कथितवान्, ततो राजा **श्रीधरं** विशेषेण प्रसादास्पदं विहितवान् ॥ **इति परद्रोहो न करणीय इत्यर्थे विप्रकथा ॥ १५ ॥**

॥ १६ ॥ बुद्धिविषये शीलवतीकथा ॥

व्यसनवारिधौ मज्जतां वपुष्मतां निस्ताराय तरणी धीरेव, यतः-

बुद्धिर्भूपसभाप्रसिद्धिजननी बुद्धिर्विपद्धारिणी ।
बुद्धिः शिल्पकलाकलापकुशला बुद्धिर्यशःसारिणी ॥
बुद्धिर्दुर्घटमानकृत्यकरणी बुद्धिर्गुणाधारिणी ।
बुद्धिर्मुक्तिपदप्रयाणपदवी बुद्धिः प्रथाकारिणी ॥ १ ॥

तेन काश्चित् स्त्रियोऽपि धिया स्वशीलसम्पदं रक्षन्ति, अत्रार्थे **शीलवतीकथा** यथा—

विपदम्भोधिनिस्तार-कारिणी कथिता मतिः ॥
बुद्ध्या शीलं च वित्तं चारक्षत् शीलवती यतः ॥ २ ॥

तथाहि—**मथुरा**पुर्यां **गुणसागर**श्रेष्ठिनः सौभाग्यपराभूतमन्मथो **मन्मथा**भिधपुत्रो **राजगृह**वासिनो **लक्ष्मीसार**श्रेष्ठिनः **शीलवती**नामपुत्रीं परिणीतवान् । अन्यदा परदेशं यियासुरसौ *निशि स्वप्रियामिति प्रोचे—'प्रिये मयि प्रस्थिते यदि तव किञ्चिद्धनं विलोक्यते तदा मत्पर्यङ्का-*धस्तात् सुवर्णमणिरजतकुम्भाः सन्ति, तन्मध्यादादाय स्वैरं विलसनीयमिति । अथ तदैव

तत्रागतः **करको** नाम कोऽपि, तस्करस्तत्सर्वं शृण्वन् **शीलवती**रूपलुब्धश्चिन्तितवान् अहो यदि सधनामेनां धियाहमादास्ये तदा वरम् । अथ **वसन्तपुरे** प्राप्तस्य **मन्मथस्य** पार्श्वात्तत्स्वभावरुचिरूपवर्णव्यवसायादिकमधिगम्य स चौरः कतिचिदहोभिः कूटलेखमादाय **गुणसागर**गृहमगात् । कथितवांश्च हे श्रेष्ठिन्नहं **मन्मथ**स्यानुचरोऽस्मि, तेन चायं लेखः प्रेषितोऽस्ति, स्वपत्नी चाहूतास्तीति प्रोच्य रहसि पर्यङ्काधो निधिरस्तीत्यभिज्ञानपूर्वकं **शीलवती**मूचे, 'हे भद्रे! सर्वं निध्यादिकमादाय त्वं प्रेयसाकारितासि'। अथ पुत्रवर्णसवर्णलेखात्तत्सर्वं सत्यं मन्वानेन तत्पित्रा प्रहितां रत्नादिनिधियुतां करभारूढां तां लात्वा रात्रावन्यस्मिन् पथि चलन्तं तस्करं सावादीत्, '**वसन्तपुरं** तूत्तरस्यां दिश्यस्ति, असौ च पन्था याम्यायां दिशि याति, तेन नैष तन्मार्गः' । 'भद्रे ! प्राध्वरेऽध्वनि चौरभीतिरस्ति, तेन तद्वर्त्मपरावर्त्तं विधाय तत्र यास्यामी'ति ब्रुवाणे चौरे प्रातरभूत्।

अथ करभात्तामुत्तार्य चौरोऽवोचत् हे सुन्दरि ! नाहं तव पत्युरनुचरः, किन्तु चौरोऽस्मि, तेन त्वां हृत्वा स्वपल्लीं यास्यामीत्याकर्ण्य शीलरक्षादक्षा सावादीत्, हे सुभग ! धनस्त्रीलुब्धः पल्लीशस्त्वां निहत्य मामिदं च धनमादास्यति तेन व्रजान्यत्र क्वापि वरे पुरे, यत्र स्वैरं सुखमनुभवाव इति तया प्रेरितोऽयं **राजगृह**मायया । सापि नगरश्रेष्ठिमिषात्स्वपितरं **लक्ष्मीसागरं** पृच्छन्ती करभारूढा प्रतोलीमागता । सोदरैः पित्रा च पृष्टा त्वं श्वसुरालयादनाकारिता चैकाकिनी किमागतेति चकितैस्तैरालिङ्ग्य सौधान्तर्नीता सावोचत् हे 'तात ! करभस्थां द्रव्यगोणीमादाय बहिःस्थो मदनुचरोऽन्नादिना सन्तोष्य विसृज्यताम्' मुषितोऽहमनयेति वीक्षापत्रे तस्मिन् गते सा यथाजातं स्वोदन्तमभिधाय स्वप्रेयांसं मनसि स्मरन्ती सुखेन पितृगृहे स्थिता।

अथ मन्मथोऽपि गृहागतोऽवगतस्वप्रियावृत्तान्तः पितरावनापृच्छ्य तया विना किं प्राणैरित्युद्विग्नः क्रकचमोचनाय गङ्गामागतः, तत्स्वामिना विलम्बय षण्मासमित्युक्त्वा स रक्षितस्तत्र तस्थौ । इतस्तथैव तत्रागतेन चौरेण स्वदुःखनिदाने कथिते स दध्यावहो मम स्त्रियोऽपि मतिर्यया शीलं वित्तं च रक्षितम् । ततो गङ्गास्वामिने स्ववृत्तान्तं निवेद्य चौरेण युतोऽसौ **राजगृह**मागतः, ततोऽसौ धनादिना तं चौरं सन्मान्य **विसर्ज्य** च स्वप्रियामादाय स्वपुरमाययौ, स्नुषामतिमुदितौ स्वपितरौ च प्रमोद्याराधितधर्मः स सद्गतिमाससाद ॥ **इति बुद्धिविषये शीलवतीकथा ॥ १६ ॥**

॥ १७ ॥ कलहकौशले पुण्यसारश्रेष्ठिस्नुषाकथा ॥

श्रुतविभवबलादौ क्वापि पुरुषैर्गर्वो न विधेयः, यतः—

धनिभ्यो धनिनः सन्ति, वादिभ्यः सन्ति वादिनः।
बलिभ्यो बलिनः सन्ति, तस्मादर्पं त्यजेद् बुधः ॥ १ ॥

कलहकरणशक्तिरूपोऽपि स्मयो न विधेयः, अत्रार्थे **सोढि-श्रेष्ठिस्नुषाकथा**, यथा—

न गर्वः सर्वथा कार्यः, क्वापि केनापि धीमता।
यत् श्रेष्ठिस्नुषया जिग्ये, सोढिः कलहकारिणी ॥ १ ॥

तथाहि—**वृद्धनगर**निवासिनी **सोढि**नाम्नी नागरब्राह्मणी कलिकलया सर्वत्र लब्धप्रसिद्धिः कलहबलेन नगर-पुर-ग्रामादिषु सर्वत्र लोकं जयन्ती वादिवृन्ददर्पसर्पगारुडरत्ने श्रीमति **पत्तने** समेत्य चिरं जयेत्याशीर्वादपुरस्सरं **सिद्धराज**मिदमवादीत्, 'हे नरेन्द्र! युष्मत्पुरे कोऽप्यस्ति नरो वा नारी वा? यो मया सह कलिं करोति, न चेत्तदा मम दिग्विजयप्रशस्तिकायामिदं नगरमहमजैषमिति लिखित्वार्पय?' तत् श्रुत्वा राज्ञोक्तं— 'हे भद्रे ! स्थिरा भव, कलिं कारयिष्यामि' इति तां प्रोच्य राज्ञा स्वपुरं तत्प्रतिज्ञापटुं पटहं वाद्यमानं **श्रीमति**नामस्वस्नुषाज्ञया **पुण्यसार**श्रेष्ठी स्पृशति स्म। [पटहवादकैर्विज्ञप्तो राजाश्रेष्ठिनमाकार्य तद्विषये पृष्टवान्], 'स्नुषाऽऽज्ञयाऽहं पटहमस्प्राक्षम्' इति श्रेष्ठिना विज्ञप्ते राज्ञा समाहूता यानस्थिता श्रीमत्यपि उपभूपमुपेत्य यथास्थानस्थिता **सोढि**मूचे, 'हे **सोढे** ! यदि कलिं करोषि तदा कलेर्जनकः कः?' कलेश्च भेदाः कतीति वद, ततः साऽपि [चिन्तयति] अहो ! इयन्तं कालं तु केनाप्यदः पृष्टं नास्ति, किञ्च अहं तु वाग्भिरेव कलिं करोमि, कलेर्जनक-प्रकारांश्च न वेद्मि, इयं तु वेत्ति, तेनैषा मनिषिणीति विचिन्त्याऽनयाहं जितेति वदन्ती सा **श्रीमत्याः** पादौ प्राणमत्, [आह च]- 'हे धीमति ! त्वं मद्गुरुस्थाने, तेन वदस्वोक्तनिर्णयमित्युक्ता श्रीमती प्राह—

रागबाप खुंखार भणीजें, कथाबाप हुंकार सुणीजे
प्रीतिबाप जीकार कहीजें, कलहबाप तुंकार भणीजें ॥ १ ॥ [भेदान्तरमपि]
भेदान्तरमपि लेहेणाकी जड मांगणा, रोगों की जड खांसी ॥
दालिदकी जड खांउं खाउं, लडाइकी जड हांसी ॥ २ ॥

स च कलिः षड्विधः, द्वैघटिकः, प्राहरिकः, दैवसिकः, चातुर्मासिकः, वार्षिकः, आजन्मिकश्च । तथाहि—एकस्थाल्यां भुञ्जानानामाद्यः, एकस्मिन् पर्यङ्के शयानानां द्वितीयः, भाटकेनैकस्मिन् शकटे स्थित्वा गच्छतां तृतीयः, मिथः सम्भूय विहितवार्षिककृषीणां तुरीयः, सम्भूयविहितोभयकृषीणां पञ्चमः दम्पतीनां च षष्ठ इति । तदुक्तिरञ्जिता सोढिस्तत्पादौ प्रणम्य त्यक्तगर्वा स्वपुरं ययौ, वस्त्राभरणादिना भूपेन सन्मानिता **श्रीमत्यपि** स्वौकसि समागात् ॥ **इति कलहकौशले पुण्यसारश्रेष्ठिस्नुषाकथा ॥ १७ ॥**

॥ १८ ॥ बुद्धिविषये मन्त्रिकथा ॥

अधीतशास्त्रैरपि पुरुषैर्विद्यायाः स्मयो न विधेयः, यतः—

मा वहउ कोइ गव्वं, इत्थ जये पंडिओ अहं चेव ।
आसवण्णु मईओ, तरतमजोगेण मतिविहवा ॥ १ ॥

तेनाधिकतरविद्या-बल-विभवैश्वर्यवर्ये विश्वे कोऽभिमानः ? अत्रार्थे **तापसीकथा**-

विश्वे सहस्रशः सन्ति, धीधनेभ्योऽपि धीधनाः।
यतस्तां तापसीं बुद्ध्या, धीमतीं सचिवोऽजयत् ॥ २ ॥

तथाहि—**स्तम्भतीर्थ**वासिनो **भूधर**द्विजस्य रूपपराभूतकमला **कमला**नामदुहिता बालत्वे एव विधवाभूत्। सा चैकशःश्रुतधारिणी सञ्जातविद्याऽखर्वगर्वा करगृहीतकनककच्चोलका तापसी बभूव।

किञ्च यो ममाश्रुतं श्रावयति तस्येमं कच्चोलकं ददामि, यदि च श्रुतं श्रावयति तदैतन्मितं स्वर्णं तत्पार्श्वाद् गृह्णामीति वदन्ती सर्वत्र बभ्राम । अथान्यदैकशःश्रुतावधारिणी भूरिजनानां सद्यस्ककवीनामपि जयेनोपार्जितेन विभवेनार्थि-दीन-भिक्षाचरादीन् प्रीणयन्तीं विहितवस्त्राद्याडम्बरां वादिगर्वापहारिणि **पत्तने** चतुष्पथादिषु भ्रमन्तीं तां निरीक्ष्य **श्रीकर्ण**राजो मन्त्रिणं केयमिति पृच्छति स्म । स्वचराद् विज्ञाय तादृशं तापसीस्वरूपं वदन्तं तं भूपः पुनरूचे 'हे मन्त्रिन्नस्ति कोऽप्युपायोऽस्या गर्वसर्वस्वापहारी ?' ततो राज्ञः पुरस्ताद् ओमित्यभिधाय तामाकार्य सचिवः प्रोचे, 'हे भद्रे! किं तव सर्वं शास्त्रमायाति?' स्वमतिसौन्दर्योत्पन्नगर्वा साप्यवोचदोमिति । ततस्तद्गर्वपर्वतपविनिभया धियैकां गाथां सचिवः प्राह—

'तुह जणओ मह पिउणो, धारेइ अणूणगं सयसहस्सं ।
अह जाणसु ता दिज्जउ, अहवा मम खोरयं देसु ॥ ३ ॥

यदीयं गाथा तवायाति तर्हि त्वमेव साक्षिणी, तेन सुवर्णटङ्कानामेकं लक्षं देहि, नो चेत्कच्चोलकं मुञ्च' इत्युक्ते इतो व्याघ्र इतस्तटीति सङ्कटे पतिता सा खोरकं (कच्चोलकं) मन्त्रिपुरो विमुच्योचे 'हे स्वामिन्नसौ दम्भो मयाथ कदापि न विधेयः,' [तत् श्रुत्वोपालम्भपूर्वकं] पौरसाक्षिकं मन्त्रिणा प्रत्यर्पितं स्वखोरकमादाय मुक्तस्मया सा क्वापि तीर्थे कृततपा स्वार्थं साधितवती **॥ इति मतिविषये मन्त्रिकथा ॥ १८ ॥**

॥ १९ ॥ स्त्रीपराभवे गङ्गदत्तकथा ॥

स्त्रीपरिग्रहो हि नराणां क्लेशाय, येन तदाधीन एव नरो राजसेवन-परदेशगमनरणप्रविशन-दुराचाररचन-परयाचनप्रमुखपराभवान् सहते । यतः—

दानादानरतैः सदैव शिशुकैराकृष्टजीर्णाम्बरा ।
क्रोशद्भिः क्षुधितैर्नरैर्न विधुरा दृश्येत चेद्गेहिनी ॥
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं ।
को देहीति वदेत्स्वकीयजठरस्यार्थे मनस्वी पुमान् ॥ १ ॥

---

१. पराभवं - AHRS ॥

तेन तदा दूरे तिष्ठन्तु नराः, तिर्यञ्चोऽपि स्त्रीपराभवं सोढुमशक्ताः,. अत्रार्थे **गङ्गदत्तोत्थापित-वृषभकथा** यथा—

प्रोच्यते स्त्रीपराभूति-स्तिरश्चामपि दुस्सहा। विवाहं कारयिष्यामि, श्रुत्वेत्युत्तस्थिवान् वृषः ॥ २ ॥

तथाहि— **धनसुन्दरे** पुरे निःशेषोदारसुन्दरः **सुन्दरः** क्ष्मापतिः परदेशादागताय प्रत्यहमष्टोत्तरशतनव्यकाव्यैः स्तुवते **गङ्गदत्ताय** कवये तुष्टमना दीनाराणामष्टोतरशतमनिशं यच्छति स्म।

एतद्व्यतिकरं चावलोक्य मत्सरिणस्तत्पुरवासिनः कवयः कुपिताः, यदहो अस्मासु सत्स्वसौ सदा राजदानमाप्नोति, तेन सूत्र्यतां कोऽप्युपायो येनासौ कलाविकलो भवेदिति चिन्तयत्सु तेष्वेकः **श्रीदत्त**द्विजोऽवोचत्, यदसावपरिणीतस्तेन चेदस्य दुश्चारिणी कलि-कारिणी वाचाटा गेहिनी स्यात्तदा तयोद्विग्नस्यास्य कला विलीयते, तेन यस्या माता कलिकारिणी स्यात् सा दुहिता विलोक्यतां, मातृसदृश्येव सुता । यतः—

जिसी कणक तिस्यउ रोटलो, जिसउ बाप तिसउ बेटडो।
जिसउ घडउ तिसी ठिकरी, जिसी माता तिसी दीकरी ॥ ३ ॥

इत्यालोच्य तैः कस्याश्चित्कुठारब्राह्मण्याः सुतां तादृशीं विलोक्य गङ्गदत्तो विज्ञप्तः, 'हे द्विजोत्तम! गेहिनीं विना न सुतः, यतः—

ग्रामो नास्ति कुतः सीमा ? धर्मो नास्ति कुतः सुखम् ?
दानं नास्ति कुतः कीर्त्ति - र्भार्या नास्ति कुतः सुतः ? ॥ ४ ॥

पुत्रं विना च न स्वर्गाद्यवाप्तिः, यतः—

अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च।
तस्मात्पुत्रमुखं दृष्ट्वा, स्वर्गं गच्छन्ति मानवाः ॥ ५ ॥

किञ्चेहापि मज्जन-भोजन-शयनाद्युपभोगोऽपि स्त्रियं विना नोचितः, तेनामुष्मिकसुखाय धनयौवनसफलीकारं पाणिग्रहणं विधेहि ?' इति बाढकदाग्रहादसौ तैरनिच्छन्नपि तां परिणायितः। ततो गृहनिर्वाहचिन्तया तया च कलिकरणेन व्याकुलस्य तस्य कविकला श्यामपक्षेण शशिकलेव दिने दिने हीयते स्म। क्रमेण निष्कलोऽसौ दुःस्थो जातः। ततो निर्वाहाय पृष्टिवाहं वृषभमादाय धान्यादिविक्रयं कुर्वाणस्य तस्यैकदा दुर्दमकर्दमे चतुष्पथेऽसौ गलिर्बलिवर्दो न्यपतत् । तदा च स दुष्टवृषः पुच्छचर्बण-नक्रबन्धन-पाषाणहनन-यष्टिताडन-कशामारणादिभिर्भूयोभिरप्युपायैर्यदा नोत्तिष्ठति तदा स्वस्त्रीचरित्रोद्विग्नः स द्विजो वृषभकर्णे इति कथितवान् 'हे वृषभ! चेदुत्तिष्ठसि तदोत्तिष्ठ, न चेत्तवापि मत्पत्नीतुल्यायाः स्त्रियः पाणिग्रहणं कारयिष्यामि।

इति कथिते काकतालीय-घूणाक्षरीय-ऽजाकृपाणीयन्यायेनोत्थितं बलिवर्दं विलोक्य वातायनस्थः **सुन्दरो** दध्यौ, अहो! कदर्थितोऽप्यसौ वृषभो नोदस्थात्, किन्तु कर्णजप्ते(ल्पे)न मन्त्रेणोत्तस्थौ, तेन काप्यस्य मन्त्रशक्तिरस्तीति विचार्य विप्रमाकार्य प्रोचे— 'हे विप्र! यत्पीडितोऽप्यसौ वृषभो नोत्थितः, श्रवणजप्ते(ल्पे)न च येन मन्त्रेणोत्थितः, तं मन्त्रं मत्पुरो भण'। दौःस्थ्येन सञ्जातदुरवस्थावशेन राजादिभिरनुपलक्षितस्त्रपानम्राननः स सर्वं वृषभोत्थापनान्तं स्ववृत्तान्तं निवेद्य रचितस्वस्त्रीचरित्रं लोकभाषानुगमिदमेकं छन्दो भणति स्म—

कुकट्ठ अने कूहाडि पडि पापणीज घोरे, जूठा सम जे करे दहिं देखतां चोरे।
घरमांहे घरघरे प्रीत परघरसुं मांडे, छोरुने आछोटे पहोर पाछले खांडे।
वाटें कां नदीएं घणुं बोले विस विंटाए ।
गंगदत्त कविअण कहे एह रांडथी किम छुटायें ॥ ६ ॥

इति निशम्य सम्यगुपलक्षितं तं सुखास्पदं विधाय स्त्रीपराभवोद्विग्नो राजा स्वार्थं विधत्ते स्म ॥ **इति स्त्रीपराभवे गङ्गदत्तद्विजकथा ॥ १९ ॥**

॥ २० ॥ दानविषये अङ्कुराजकथा ॥

चिरं जयन्ति कवयो, येषां वाक्कामगवीव सदर्थसार्थं प्रसूते । यतः—

बलिहारी कविअणतणी, जस मुख अमीअ झरंत ।
जिण पीधे हयडुं ठरे, श्रवणे अमीय श्रवंत ॥ १ ॥

तेन कविकलाप्रीणिता दानशौण्डाः किं न प्रयच्छन्ति? अत्रार्थे **सुमुख-द्विजा-ऽङ्कुराजकथा**। यथा—

यच्छन्ति किं न दातार-स्तुष्टा वाग्भिर्मनस्विनाम् ।
देव! त्वदिति काव्येन नाऽङ्कुः किं कवये ददौ ॥ २ ॥

तथाहि— **उज्जयिनीपुर्यां** कविकलाकौशलेनाऽधरीकृतकविः **सुमुखो** नाम त्रयीमुखो वसति स्म। स चातीवदुःस्थितो **वृद्धनगरे** स्वौदार्यगुणकठिनकुठारनिष्कन्दितकर्णगुणाङ्कुरमङ्कुराजं याचनार्थमाययौ । तत्र जीर्णशीर्णवस्त्रपदत्राणाद्यनर्हवेषः स राजदर्शनमलभमानोऽर्द्धदुग्धाऽर्द्धवारिभृतमेकं कुम्भमादाय पट्टराज्ञीदासीनां पानीयाहरणवर्त्मनि तस्थौ ।

अथाऽऽयान्तीभिर्दासीभिर्घटे किमिदमिति पृष्टे क्षीरोदधिनीरमिति सोऽवदत् । ततः स्वयं तन्नीरं निरीक्ष्य ताः प्रोचुः 'हे विप्र! किं भवांस्तत्र गतोऽभूत्?' ओमिति तेनोक्ते ताः स्वस्वामिन्यै तं वृत्तान्तमचीकथन्। राज्ञ्याऽपि भोजनार्थमायातो राजा विज्ञप्तः, 'हे देव ! कोऽपि विप्रः क्षीरसमुद्रान्नीरमादायेहागतोऽस्ति, स चेदत्रायाति तदा पृच्छ्यते तत्र सुप्तयोः कमला-कमलाधीशयोः कुशलम् । ततो भोजनानन्तरमास्थानीस्थितो राजा ततः स्थानात्तं द्विजमजूहवत् । सोऽपि

शिर:स्थितघटो जीर्णपटो दत्ताशीर्वाद: समेत्यान्त:सभं तस्थौ । 'कुत: समागा?' इति राज्ञा पृष्ट: क्षीरनीरधेरिति सोऽभ्यधात् । 'तत्र सकलत्रस्य भगवतश्चक्रपाणेरस्ति कुशलमि'तीरित: स पुन: प्राह-'हे राजेन्द्र तत्र स्वजनकविनाशविधुरां स्वप्रेयसीमेवं पुरुषोत्तम: प्रमोदयति—

देव ! त्वद्वरवाजिराजिचरणप्रोत्सर्पितै: पांसुभि: ।
पूर्णस्य स्वपितुर्विनाशविधुरामूचे मुरारि: प्रियाम् ॥
गन्ताङ्को: करवालकालकवलक्रोडीकृताऽरिप्रिया-
बाष्पै: प्रत्युत वृद्धिमम्बुधिरयं मा ताम्य मुग्धे! मुधा ॥ ३ ॥

इति तत्कविकलाकौशलेन चमत्कृतोऽङ्कुश्चिन्तितवान्, अहो असावेकेनापि काव्येन मम सैन्याधिक्यं शौर्यं वैरिविनाशं च वर्णितवान्, तेनास्याद्भुता कविशक्तिरिति ध्यात्वा राजा तमाह 'हे कविकुलकोटीरहीर! अस्मिन् काव्ये कति वर्णा: ?' स उचे 'हे राजेन्द्र! **शार्दूलविक्रीडित**मिदं छन्द:, तेन तत्र षट्सप्ततिरक्षराणि।' ततो यथा मम सेनाधिक्यं भवतावर्णि तथा तवाप्यस्तु, इत्यभिधाय राजाबहुरजत-कनक-मणि-मौक्तिका-ऽऽभरण-पट्टकुलादिदानपूर्वं काव्यवर्णमितवाजि-गज-ग्रामाधिपत्यमस्मै वितीर्णवान् । **सुमुखोऽपि** राजमानितोऽयमिति पौरै: पूजित: प्रतिष्ठास्पदं बभूव ॥ **इति दानविषये अङ्कुराजकथा ॥ २० ॥**

॥ २१ ॥ सत्यप्रश्ने युधिष्ठिर कथा ॥

आसतां मनुजा:, मनश्चिन्तितेऽर्थे कथिते देवा अपि प्राप्ततोषा: प्रत्यक्षीभूय वरं प्रयच्छन्ति। अत्रार्थे **पुराणोक्तयुधिष्ठिरनृपकथा**, यथा—

प्रत्युत्तरे सत्यतरे प्रदत्ते, भवन्ति देवा अपि तोषभाज:।
युधिष्ठिरेणोक्तवति स्वरूपे, सत्ये द्रुतं तत्सहजा जिजीवु: ॥ १ ॥

तथाहि— द्यूतेन हारितराज्यो द्वादशाब्दीवनवासमङ्गीकृत्य सौदरैर्मात्रा पत्न्या च सह धर्मपुत्रो **हस्तिनागपुरान्निर्ययौ** । स च विकटामटवीमटन् उत्कटपिपासाव्याकुलो **भीम**मभणत्, 'हे किर्मीरनिषूदन! अहं तृषितोऽस्मि, तेन पानीयमानीयताम्।' **वृकोदरो**ऽपि स्वसहोदरस्य भूयसीं पिपासामजानन्निति नर्माकरोत्—

'वक्त्राम्भोजे सरस्वत्यधिवसति सदा शोण एवाधरस्ते,
बाहु: काकुस्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्र:।
वाहिन्य: पार्श्वमेता: कथमपि भवतो नैव मुञ्चन्त्यजस्रं,
स्वच्छेन्तर्मानसेऽस्मिन् कथमवनिपते! तेम्बुपानाभिलाष: ?'॥ २ ॥

इति श्रुत्वा नर्मणाऽलमिति **युधिष्ठिरेण** प्रेरितो **भीमो**ऽपि शब्दपातिसायक इव सारसकोककुलक्रेङ्कारमनुगच्छन् क्वापि प्रदेशे शीतलजलपूर्णां कूपिकामेत्य यावत्पद्मिनीपत्रपुटेन पानीयमादातुमुद्युक्तोऽभूत्तावत्तत्र वर्णचतुष्टयात्मकोऽयं ध्वनिः प्रादुरासीत्- 'को मोदते'? अनुत्पन्नप्रत्युत्तरो वृकोदरो मूर्च्छया छन्नचैतन्यस्तन्नीरतीरे न्यपतत्। **भीमस्य** किं भूयान् विलम्बोऽभूदिति साशङ्कः **कपिध्वजस्तत्पदपद्धत्यनुसारेणागच्छन् भीमं** तथावस्थमपश्यत् । आदौ ज्यायांसं भ्रातारमम्भसा प्रीणयामि, पश्चादस्य मूर्च्छाविगमोपायं विधास्ये इति ध्यात्वा यावज्जलायोद्यतोऽजनि तावत्पुनरपि चतुर्वर्णात्मकोऽसौ ध्वनिराविरासीत् 'किमाश्चर्यम्'? इति ।

एवमर्जुनेऽपि तथैव पतिते परयोरपि सहोदरयोरागतयोः सतोरनुक्रमतोऽमी वर्णाः प्रकटीबभूवुः, 'का वार्त्ता? कः पथः स्मृतः?' तयोरपि पतितयोः सतोः सर्वेषां सोदराणा-मनागमनादतीवखिन्ने युधिष्ठिरेऽपि तत्पदानुसृत्या तत्रागत्य तस्थुषि पूर्णोऽप्यसौ श्लोकः प्रादुरभूत्—

को मोदते? किमाश्चर्यं ? का वार्त्ता? कः पथः स्मृतः ? ।
ब्रूहि त्वं धर्मराजेन्द्र! मृता जीवन्ति बान्धवाः ॥ ३ ॥

इति श्रुत्वा स दध्यौ नूनमेतत्प्रत्युत्तरेऽनुत्पन्नेऽमी मत्सहोदराः केनचिज्जलचरेण सुरेण पातिताः, तेनैतत्प्रतिवचो विधायोत्थापयामि स्वसहोदरानिति मत्वा चतुर्णामपि प्रश्नानां प्रतिवचो धर्मपुत्रोऽभिदधौ—

'पञ्चमेऽहनि षष्ठे वा, शाकं पचति स्वगृहे ।
अनृणी चाऽप्रवासी च, स वारिचर! मोदते ॥ ४ ॥
अहर्निशं हि भूतानि, नीयन्ते यमवेश्मनि ।
शेषाः स्थातुं समीहन्ते किमाश्चर्यमतः परम्? ॥ ५ ॥
अस्मिन् महामोहमये कटाहे, सूर्याऽग्निना रात्रिदिनेन्धनेन ।
पक्षादिदर्वीपरिघट्टनेन, भूतानि कालः पचतीति वार्त्ता ॥ ६ ॥
तर्कोऽप्रतिष्ठः श्रुतयोऽपि भिन्ना, नासावृषिर्यस्य वचो न भिन्नम्।
धर्मस्य तत्त्वं निहितं गुहायां, महाजनो येन गतः स पन्थाः ॥ ७ ॥'

युधिष्ठिरेणेत्युक्तवति श्लोकानुक्रमतोऽखिलेषु **भीमादिषु** सुधासिक्तेष्विवोत्थितेषु प्राप्तस्वप्रश्नसत्योत्तरः सोऽपि कौतुकी देवो 'विषमे [सङ्कटे]ऽहं स्मर्त्तव्य' इति वरमस्मै राज्ञे वितीर्य तिरोदधे । राजापि ससोदरः समागत्य स्वजननीक्रमौ प्राणमत् ॥ **इति सत्यप्रश्नविषये पुराणोक्ता युधिष्ठिरनृपकथा ॥ २१ ॥**

॥ २२ ॥ स्त्रीचरित्रे मुकुन्दकथा ॥

विहितवेदोऽपि भगवांश्चतुर्मुखोऽपि स्त्रीचरित्रं ज्ञातुमसमर्थः, यतः—

महिलाकूडचरित्तं, बंभ पुण पार न जोडइ ।
दिनि डरपइ दोरडइ, रयणि विसहरफण मोडइ ॥ १॥
उंदरथी ऊधसइ, कानि धरि केसरि साहइ ।
उंबरि चढती अडवडइ, चढइ डुंगरि अणिआलइ ॥ २॥
सात समुद्द लीला तरइ, सुक्की नई बुड्डवि मरइ ।
रामकवीसर इम कवइ, स्त्रीविसास मत को करइ ॥ ३॥

अत्रार्थे **मुकुन्दश्रेष्ठि-पत्नीकथा** यथा—

दुश्चिन्त्यं चरितं स्त्रीणां, यतः श्रेष्ठिप्रिया पुरा ।
कूपे निक्षिप्य पाषाणं, स्वदोषं धनिके न्यधात् ॥ ४ ॥

तथाहि— **बोदरग्रामे केशवमुकुन्दनामानौ** द्वौ सोदरौ श्रेष्ठिनौ वसतः स्म। तयोश्च लघीयसो **मुकुन्दस्य सुरूपा** नाम जाया, अपरस्य च **रूपिणी**नामगृहिणी स्तः।

तथा च **मुकुन्दः** स्वगृहादासन्नवर्त्तिनि स्वहट्टे शेते, तत्प्रियापि च गृहकृत्यं विधाय रात्रौ शयनाय तत्रैव हट्टे प्रत्यहं याति । परं स्वैरिणी सा **सुरूपा** प्रदोषे एव पतिविपणिशयन-दम्भेन गृहान्निर्गत्य स्वैरं निरङ्कुशेन स्वाभिमतोपपतिना चिरं रंत्वा कदाचित्प्रथमे कदापि द्वितीये कदापि तृतीये यामिनी यामे तत्र समायाति । [अथ **मुकुन्द**स्तामाह-] 'हे प्रिये! किं तव भूयान् विलम्बोऽहर्निशं जायते?' इति पृष्टा साभाषिष्ट- 'हे प्रियतम! किं करोमि? ज्येष्ठजाया ज्यायसी, अहं तु लघीयसी, तेन सा सर्वमपि गृहकृत्यं कर्त्तुं मामेव प्रेरयति, ततः खण्डन-पेषण-दलन-चतुष्पदबन्धनादीनि भूरीणि कृत्यानि कुर्वत्या मम विलम्बो भवति, ततोऽन्येद्युर्**मुकुन्दो** विजने भ्रातृजायामूचे 'हे रूपिणि! गृहकृत्यानि सृजन्त्या मम पत्न्या योऽत्र विलम्बो भवति स विलम्बस्त्वया वारणीयः, द्रुतं च तत्र प्रेष्या।' सोचे— 'हे सुभग! अहं त्विमां सायमेव प्रेषयामि'। सोऽवोचदेवं तदाऽद्याऽस्याः स्वैरिण्याः शिक्षां दास्यामीति निर्णीय भृशं जटितशृंखलो हट्टाऽन्तः शेते स्म।

तदा च तथैव निशि समेता सा पुंश्चली कपाटमुद्घाटयेति मुकुन्दमवादीत्, यदा च जागृदपि स रुषितो न वक्ति तदा मद्वचोऽनेन नाऽऽकर्णितमिति मत्वा तया पुनस्तथैवोक्तो **मुकुन्दो**ऽवदत्, 'हे कुलटे! सर्वं चिरमाचरितं [तव चरितं] ज्ञातं, तेनाद्य बहिरेव तिष्ठ, प्रातस्त्वत्पितृ-बन्धुसमक्षं त्वां विडम्ब्य गृहान्निष्कास्य चान्यां परिणेष्यामि'। 'हे नाथ! इयन्तं कालं कृतं ममापराधं सहस्व, अतःपरं न करिष्ये,' इति पुनस्तयोक्तेऽप्यसौ मूर्खो यदा कपाटं नोद्घाटयति, तदा स्वदोषमपाकर्त्तुमुत्पन्नमतिः सा 'कूपे पतामी'ति बाढमभिधाय हट्टपुरोवर्त्तिनि कूपे महान्तमेकं पाषाणं निक्षिप्य स्वयं च हट्टभित्तौ मक्षिकेव निलीय तस्थौ।

तदा तद्धाट्कृतिं श्रुत्वा स दध्यौ नूनमेषा कूपे पतिता, तेन प्रातरस्माकं राजदण्डो भवितेति चकितात्मा यावद् हट्टान्निर्गत्य कूपमभिधावति, तावत्सा स्वैरिणी हट्टान्तः प्रविश्य कपाटं पिदधे । हट्टान्तर्गतां तां विज्ञाय तेनागत्य कपाटमुद्घाटयेत्युक्ता सा प्रोचे— 'हे शठ!

स्वैरं रन्त्वाऽधुना समागतोऽसि? तेन प्रातर्भवच्चरित्रं सर्वलोकानां पुरः प्रकटीकरिष्यामि' इति स्त्रीचरित्रसङ्कटे पतितः सोऽवदत्— 'प्रिये! तव विरुद्धं किमप्यहं न वक्ष्ये, इत्यर्थे भूयांसः शपथाः'! ततस्तयोद्घाटिते कपाटे सोऽन्तः प्रविवेश । ततः परं सा सुरूपापि मुक्तस्वैरविहारा भर्त्तरि धृतदृढस्नेहा गृहवासमपालयत् ॥ **इति स्त्रीचरित्रे मुकुन्दपत्नीकथा ॥ २२ ॥**

॥ २३ ॥ मित्रद्रोहे शृगालकथा ॥

कृतघ्नं [नरं] धिगस्तु यः शुनोऽपि तुलां न लभते ।·यतः-

अशनमात्रकृतज्ञतया गुरो-र्न पिशुनोऽपि शुनो लभते तुलाम्।
अपि बहूपकृते सखिता खले, न खलु खेलति खे लतिका यथा ॥ १ ॥ [द्रुतविलम्बितम्]

तेन स्वमित्राद्युपकारमवमत्य मित्रपराङ्मुखाय खलाय [1]दैवमपि वैपरीत्यं भजते, अत्रार्थे **पञ्चाख्यानकथा,** यथा-

हिताय यो हितो नैव, तस्माद्दैवं [2]पराङ्मुखम्।
मृगाय प्रहितं शस्त्रं, गोमायोर्मस्तकेऽपतत् ॥ २ ॥

तथाहि— **शालिग्रामा**दासन्नवर्त्तिनि **पुराणनामवने** शृगाल-हरिण-काकास्त्रयोऽमी सुहृदो वसन्ति स्म। तेषु च स्वस्वभक्ष्यस्थानकथनेन मिथःकृतभक्तिष्वेकदा काकेन निवेदिते यत्रक्षेत्रे यवांश्चरितुं हरिणो ययौ । हरिणभक्षितान् यवान् विज्ञाय द्वितीयेऽहनि क्षेत्रपतिप्रगुणितपाशे यवांश्चरितुं गच्छन् मृगो न्यपतत्। तदा च तदन्वेषणायागतः काकस्तं तथावस्थं विलोक्य मित्रपीडापीडितः स्वमित्रं गोमायुमुपेत्येति प्रतिपादितवान्— 'हे मित्र! पाशान्तःपतितमावयो-र्मित्रमेणं तीक्ष्णतरैः स्वदन्ताग्रैः पाशं छित्त्वा कष्टान्मोचय'। [तत् श्रुत्वा] मित्रद्रोही स दध्यावहो हरिणः कस्य मित्रं? किं कृत्यं च ममास्य मोचनेन? मृतस्यास्य पिशितेन दिनद्वयं त्रयं वा तृप्तिर्भविता मत्वा शृगालोऽवोचत् 'हे काक! वार्द्धक्येन जर्जरदशनोऽहं पाशं छेत्तुं नाऽलम्। तेनेत्युक्ते वायसः कुरङ्गाभ्यर्णमुपेत्य स्माह- 'हे मित्र! क्षेत्रपतावुपेते श्वासं निरुद्ध्य पाशच्छोटनान्तं यावत्त्वं मृत इव भूयाः, यदा च छोटितबन्धनं त्वां हित्वा स दूरे याति, तदा शनैरुत्थाय भृशं त्वरेथा' इति शिक्षां प्रदायैकस्मिन्नासन्नतरावुपविष्टे द्विके [3]प्रातराशाय गृहीतभक्तोंऽसस्थितकुठारः क्षेत्राधिपतिरागात्, तं च मृगं मृतं विज्ञायैकस्मिन्नश्मनि भक्तं विमुच्य तद्बन्धनानि शनैरपाकार्षीत्।

तदा च सर्वथा छिन्नपाशं तं कुरङ्गं ज्ञात्वा स वायसस्तद्भक्तोपरिष्टादुपाविशत् । अथ सर्वथा निर्जीवं तं मृगं मत्वा यावत्स द्विकोड्डायनाय याति, तावत्तं दूरगं मत्वा हरिणः फालां दत्त्वा दधावे, धावते च तस्मै हरिणाय कुपितेन हालिकेन प्रहितेन तेन पर्शुना स्वमित्रमृगमांस-लुब्धस्यान्तरालजालान्तःस्थितस्य मित्रद्रोहिणः शृगालस्य शिरः पुस्फोट, स्फुटितशिराश्च परासुरभूत्। तौ च काकहरिणौ स्वास्पदं प्राप्तौ मिथो भक्तिं कुर्वाणौ सुखिनौ बभूवतुः ॥ **इति मित्रद्रोहे शृगालकथा ॥ २३ ॥**

१. दैवोऽपि - AHS ॥ २. °दैवः प° AHS ॥ ३. प्रातःकाले भोजनाय ॥

॥ २४ ॥ मतिविषये शृगालकथा

स्वपरार्थपरम्पराप्रपञ्चने पटीयसी पेशलप्रज्ञैव । यत :—

श्रियं प्रसूते विपदं रुणद्धि, स्वं पापपुञ्जैर्मलिनं प्रमार्ष्टि ।
संस्कारयोगाच्च परं पुनीते, शुद्धा हि बुद्धिः किल कामधेनुः ॥ १ ॥

तेन बलवतां कोटिभिरपि स्वबलेन यत्कृत्यं न विधीयते, तदेकेनापि धीमता स्वधिया विधीयते । अत्रार्थे **पञ्चाख्यानकथा** यथा-

[1]बलतो महती बुद्धि-स्तत्कालं जायते यदि ।
विगोपितौ कपिव्याघ्रौ, शृंगालेन बलं विना ॥ २ ॥

तथाहि— **अतिभीमनामारण्ये कुरण्टाह्वः** शृगाल आसीत्। तं च कुरण्टा नाम तत्पत्नी गर्भिणी सत्यवादीत्— 'हे स्वामिन्नहं गर्भिण्यस्मि, तेन प्रसूतये स्थानं विलोकय' सोऽभण-द्विलोकयन्नस्मि।

अथैकदा सा स्वपतिना सहारण्ये भ्रमन्ती व्याघ्रगुहान्तिकं प्राप्ता । सा पतिं प्राह— 'हे स्वामिन्नागतप्रसवसमयाऽहमितः पदमपि गन्तुं न शक्नोमि,' सोऽवददस्यां गुहायां प्रसूष्व, तया च तथैव विहिते शृगालस्तामशिक्षयत्,-'हे कुरण्टे! मन्नाम **रणभञ्जने**ति वाच्यं, त्वन्नाम [2]चारिवज्राग्निरिति वक्ष्येः। व्याघ्रे चागते शिशू रुदितौ कार्यौ। रोदननिदानं च पृष्टा क्षुधितौ स्त इति वदेः'। इति तामनुशास्य बहिःस्थः स पुच्छाच्छोटनेन पाटितभूपीठं व्याघ्रमायान्तमालोक्य **कुरण्टा**मवदत्— 'हे अरिवज्राग्ने! कथं रुदतः शिशुकौ?' सा स्माह— 'हे रणभञ्जन! बालकौ क्षुधितौ स्तः।' स प्राह— 'तर्हि मौनं कारय समागच्छन् भावी व्याघ्रः, तत्पिशितेनेमावर्भकौ तोषयिष्यामीति श्रुत्वा व्याघ्रो दध्यौ यदसौ कोऽपि महान् श्वापदो ज्ञायते, यतोऽनयोरभिधे अपि दुस्सहे, ततो नास्त्यनया गुहया कृत्यमिति मत्वा स द्रुतं पश्चाद्ववले।

सर्वमप्येतद्व्यतिकरं विलोक्यैकः कपिस्तरोरुत्तीर्य पृष्टतो गत्वा व्याघ्रमूचे,- 'हे शार्दूल! मा याहि, पश्चाद्वलस्व, नासौ कोऽप्यन्यः श्वापदः, किन्त्वेतौ शृगालौ दम्पती स्तः, अनेन धूर्तशृगालेन धिया त्वं वञ्चितोऽसि' । व्याघ्रो व्याजहार, नाहमेष्यामि, भवानपि कोऽपि तदीयोऽनुचरोऽस्ति, तेन मां मारयित्वा त्वं प्रणश्य यास्यसि । तदा कपिः प्रोचे तर्ह्यावयोः कण्ठावेकेन पाशेन नियन्त्र्य तत्र गमिष्यावः, शार्दूलेनापि तत्प्रतिपन्नम्। ततश्चैकेन पाशेन कीलितगलावेवायान्तौ विलोक्य शृगालो दध्यौ, नूनं दृष्टमच्चेष्टितेन दुरात्मना कपिनाऽयमाऽऽनीत इति विचार्य तथैव कुरण्टां प्राह, तयापि तथैवोक्ते सोऽवदन्मौनं विधेहि, प्राणप्रियो मम मित्रं वनौका व्याघ्रमादायाधुनैवागच्छन् भविष्यतीति श्रुत्वा शार्दूलो जीवग्राहं प्राणशत्, तद्गलकीलितः कपिरपि कण्टकजालान्तर्भग्नवपुरसुखास्पदं जज्ञे । ततः स कुरण्टोऽपि निष्कण्टकत्वेन तस्यामेव गुहायां बालकौ प्रपाल्य स्वाश्रयमाससाद ॥ **इति मतिविषये शृगालकथा ॥ २४ ॥**

१. तुला- बलथी बुद्धि आगली, जो उपजइ तत्काल । वानरसिंह बिगोविया, एणि एकलडइ आज ॥ इति प्रीतिविमलगणिकृत चम्पकश्रेष्ठिकथायां पृ. १६॥ २. चाऽग्निवश्रा AHR ॥

॥ २५ ॥ मर्मकथने वल्मिकोदरसर्पकथा ॥

ते धन्या ये परमर्माणि पिदधति, यतः—

कप्पासह सारिच्छडा, विरला जणणी जणंति ।
निअअंगह कड्ढेवि गुण, परगुज्झह ढंकंति ॥ १ ॥

परमर्मप्रकाशने हि तेन विरोधः, यतः—

संतेहिं असंतेहिं, परस्स किं जंपिएहिं दोसेहिं ।
अप्पा पडइ किलेसे, सो हु अमित्तो कओ होइ ॥ २ ॥

तेनाऽऽस्तां परमर्मप्रकाशनं, स्वजातीयानामपि मर्मकथनेऽनर्थपरम्परा । अत्रार्थे **पञ्चाख्यान-कथा** यथा—

ये परस्परमर्माणि, प्रवदन्ति नराधमाः । ते स्वयं निधनं यान्ति वल्मिकोदरसर्पवत् ॥ ३ ॥

तथाहि— **प्रतिष्ठानपुरे शौर्यसुन्दरनामराजा, सुन्दरीनाम्नी** च तस्य राज्ञी, दुर्विनीतेनाऽश्वेनाऽन्येद्युररण्ये राजा निन्ये, तत्रैकस्य तरोरधः श्रमवशान्निर्भरं प्रसुप्तस्य तस्य मुखे मनुष्य[मुख]वासि-जातिसम्भवो भुजगः प्राविशत् । ततः पश्चादागतेन कटकेन राजा स्वौकस्यानीतो जठरस्थाऽहिसम्भवया पीडया शौर्यसौभाग्योद्यमनाशपुरस्सरं दिने दिने क्षामः समजनि । महावैद्योपदिष्टैर्बहुभिरप्युप-चारैरजातसमाधिः स्वजीवितोद्विग्नः सपरिजनः स राजा करपत्रमोचनाय गङ्गामधिगच्छन् वर्त्मन्येकस्य वटस्याधस्तात्सुष्वाप ।

तदा चैकान्ते निर्भरं निद्राणे तस्मिन् पवनभक्षणाय मुखे निर्गतमहिं निकटवर्त्तिवल्मि-कान्निर्गतो भुजङ्गो बभाषे— 'रे पापिष्ठ सर्पाधम! मा विनाशयैनं पञ्चमलोकपालं, निर्गच्छ तस्योदरात्, किं करोमि? सकाङ्क्षिकेन कटुकचिर्भटीमूलेन भवद्विनाशोपायं जानन्नस्मि, परं स कोऽपि नास्ति यत्पुरो वदामि।' इति श्रुत्वोदरसर्पस्तमवादीत् 'रे पापिष्ठ! किं करोम्यहमपि बिलक्षिप्तेनोष्णतैलेन भवन्तं निहत्य भवन्निकटवर्त्तिनो निधेरादानं विदन्नस्मि, परं स कोऽपि निकटवर्त्ती नास्ति यत्पुरः कथयामि'। एवमनयोः परस्परं वदतोर्मर्म निशम्य नृपनिकटवर्त्तिनी राज्ञी तेनैव विधिनोदरसर्पं निहत्य राजानं नीरुजं विदधे, तेनैव च विधिना वल्मिकफणिनं विनाश्य च निधानमाददे ॥ **इति मर्मकथने वल्मिकोदरसर्पकथा ॥ २५ ॥**

इति पं॰ श्रीकमलविजयगणिशिष्य श्रीहेमविजयगणिविरचिते

कथारत्नाकरे प्रथमस्तरङ्गः समाप्तः

॥ श्रीरस्तु ॥

---

१ वाल्मि॰ AHRS एवमग्रेऽपि ॥ २ AHRSD। मध्यमलोम्नु. ॥

॥ २ ॥ द्वितीयस्तरङ्गः ॥

॥ २६ ॥ सत्त्वविषये धरनृपकथा ॥

सहजं साहसं वहद्भिः पुरुषैर्विषममपि कृत्यं क्रियते । यतः—

घटो जन्मस्थानं मृगपरिजनो भूर्जवसनं, वने वासः कन्दैरशनमतिदुःस्थं वपुरपि।
इतीदृक्षोऽगस्त्यो यदपिबदपारं जलनिधिं, क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे॥ १ ॥

तेन स्वार्थसिद्धिमभिलषता नरेण सत्त्ववतैव भाव्यम् । अत्रार्थे **धरनृपकथा** यथा—

दुःसाध्यमप्याशु समेति सिद्धिं, कार्यं क्षणात्सत्त्ववतां नराणाम्।
बलिं सृजन्नात्मशिरो धरोऽभू-न्न किं चतुःसिद्धिधुराधुरीणः ? ॥ २॥

तथाहि— **क्षितिरत्न**पुरे निःशेषसत्त्ववतां शेखरो **धरो** नामाऽवनिपतिः, स चैकदा खलूरिकायां तुरगान् वाहयित्वैकस्याऽशोकतरोरधः स्थितो जीर्णवस्त्रपदत्राणं करकृतदृतिमेकमनेकदेशदर्शिनं सन्देशहारकं पुरो यान्तं [नरं] विलोक्य 'कुतः समागाः?' इति अप्राक्षीत्। स उवाच— 'हे देव **नभःकुलिनी**कूलवर्त्तिनोऽनुकूलनगरादागां ।' 'किमप्याश्चर्यम् अपश्य' इति व्याहृतः स पुनः प्रोचे 'हे राजेन्द्र! तत्र दृष्टमद्भुतमाकर्णय, तत्र च गङ्गाया एकस्मिंस्तीरे प्रतिराकमेकोपरिलिखितचतुःसुरीरूपा सुरूपा शिला जलतलाज्जलोपरिष्टादायाति, तथैवैकयामं जलोपरि स्थित्वाधस्ताद् गच्छति । तदा च जलादेवं ध्वनिराविर्भवति, यः कश्चिद् द्वात्रिंशल्लक्षणो नरोऽत्र स्वशिरोबलिं करोति स इमां शिलामाप्नोति । कश्चिन्नरस्तरंस्तामादातुं याति सोऽन्तरेव स्तम्भित इव तिष्ठति'।

इमं व्यतिकरं च विलोक्य लोकश्चिन्तयति को निरक्षरो दृषत्खण्डायाऽऽत्मानं बलिं करोति? इति मत्वा खिन्ना जना यान्ति, नवीनाश्चायान्तीति श्रुत्वा **धरो** दध्यौ सत्त्वेन सिद्धिः, यतः—

साहसियां लच्छी मिलइ, न हु कायरपुरिसाहं।
कानहिं कुंडल रणझणइ, कज्जल पुण नयणाहं ॥ ३ ॥

किञ्च दिव्योऽसौ प्रभावः, तं विना दृषत्तरणस्य जलाच्च व्यक्तध्वनिनिस्सरणस्यानुपपत्तेः, तेन तत्र गत्वा पश्यामि तदद्भुतमिति मत्वा तं दूतं विसृज्य साहससहायः स राजा अनुकूलपुरे ययौ।

तत्र च तदाश्चर्यं निरीक्ष्य स राजा 'अस्याः शिलायाः कृते स्वं बलिं कुर्वन्नस्मी'त्यभिधाय यावत्कण्ठे करवालं क्षिपति तावदाकाशगामिनी **बहुरूपिणी कामितार्थदायिनी परकायप्रवेशिनी** चेति देवीचतुष्टयं प्रकटीभूय स्वस्वगुणोक्तिपूर्वं तमुवाच,-' हे राजेन्द्र! साहसं मा विधेहि, तुष्टाः स्मस्तव सत्त्वगुणेनेति'। ताभिः सिद्धिभिः साधितसर्वसमीहितो **धरो** नाम राजा गृहमागत्य चिरं पालितराज्यः प्रान्ते सुगतिमाप ॥ **इति सत्त्वविषये धरनृपकथा** ॥ २६ ॥

॥ २७ ॥ सत्यवचने पुराणोक्ता द्रौपदीकथा ॥

सुखैषिणः प्राणान्तेऽपि मृषा न भाषन्ते, यतः—

राज्यं यातु श्रियो यान्तु, यान्तु प्राणा विनश्वराः।
या मया स्वमुखेनोक्ता, वाचा मा यातु शाश्वती ॥ १ ॥

किं चासत्यवचनाल्लोकेऽप्यविश्वासः, यतः—

असत्यमप्रत्ययमूलकारणं, कुवासनासद्म समृद्धिवारणम्।
विपत्रिदानं परवञ्चनोर्जितं, कृतापराधं कृतिभिर्विवर्जितम् ॥ २ ॥

तेन समीचीनवचनमुच्चरतां विश्वासकीर्त्तिकौमुदि धवलयति विश्वोदरम् । यतः—

विश्वासायतनं विपत्तिदलनं देवैः कृताराधनं ।
मुक्तेः पथ्यदनं जलाग्निशमनं व्याघ्रोरगस्तम्भनम् ॥
श्रेयःसंवननं समृद्धिजननं सौजन्यसञ्जीवनं।
कीर्तेः केलिवनं प्रभावभवनं सत्यं वचः पावनम् ॥ ३ ॥

सत्यवादिनां वाऽचिन्त्यो महिमा, अत्रार्थे **पुराणोक्ता** महासती द्रौपदीकथा यथा—

अचिन्त्यमाहात्म्यकरं महान्तो, वचः समीचीनमुदीरयन्ति।
यल्लोकवाक् पाण्डुसुतप्रियायां, सत्यं वदन्त्यां फलति स्म चूतः ॥ ४ ॥

तथाहि—

हस्तिनागपुरे भीमादिभिः सहोदरैः स्व-स्ववारके महासती**द्रौपद्या** च सार्द्धं सुखं सेवमानैः सह राज्यं पालयति **युधिष्ठिरनृपे** भोगाननुभवति सति एकदा माघमासे तीर्थयात्रायै गगनमार्गे गच्छन्तोऽष्टाशीतिसहस्राणि मुनयो **हस्तिनागपुरोद्यानमवातरन्** । वनपालादवगततदागमनेन राज्ञा पारणार्थमभ्यर्थितास्ते ऋषयो बभाषिरे,— 'हे धर्मपुत्र! अद्यदिनसम्भवैः सहकारफलैश्चेत्पारणं कारयसि तदा तवौकसि पारयामो नान्यथेति'। राजाभिदधे— हे साधवः! समयं विना दुर्लभानि रसालफलानि, तेनान्येन परमान्नाऽऽदिना स्वरुचितेन भोजनेन पारयत' तस्मिन्नेव क्षणे स्वैरं भ्रमन् कौतुकप्रियो **नारदमुनिरेत्य** राजानं व्याजहार,- 'हे राजेन्द्र! यदि भवत्पट्टराज्ञी सतीशिरोरत्नं **द्रौपदी** पौरपूर्णायां पर्षदि पञ्च सत्यान्यभिधत्ते तदा समयं विनाप्याम्रफलानि प्रादुर्भवन्ति'।

राज्ञापि तदङ्गीकृतेऽन्तःसभां समेतां **द्रौपदीं नारदो**ऽवादीत्—

पञ्चतुष्टिः सतीत्वं च, सम्बन्धे चातिशुद्धता ।
पत्यौ प्रेम मनस्तुष्टिः, सत्यपञ्चकमुच्यताम् ॥ ५ ॥

इत्युक्ते मृषोक्तिभीरुर्**द्रौपदी** सती दुष्प्रकाश्यमपि स्वचरित्रं पौरपुरः प्रकटयन्ती श्लोकपञ्चकेन-पञ्चापि सत्यानि वदति स्म, तद्यथा—

१. तुला- विक्रमचरित्रे शुभशीलगणिकृते सर्ग ११ ॥

सुरूपाः पञ्च योद्धारः, पाण्डवाः पतयो मम।
तथापि कुरुते वाञ्छां, मनः षष्ठेऽपि नारद! ॥ ६ ॥
रहो नास्ति क्षणो नास्ति, नास्ति प्रार्थयिता नरः।
तेन नारद! नारीणां, सतीत्वमुपजायते ॥ ७ ॥
सुरूपं पुरुषं दृष्ट्वा, पितरं भ्रातरं सुतम् ।
योनिः क्लिद्यति नारीणा-मामपात्रमिवाम्भसा ॥ ८ ॥
वर्षा कष्टतरः कालो, जीवनाहेतुवल्लभः।
तेन नारद! नारीणां। भर्त्ता भर्त्तेति वल्लभः ॥ ९ ॥
नाऽग्निस्तृप्यति काष्ठानां, नाऽऽपगानां महोदधिः।
नान्तकः सर्वभूतानां, न पुंसां वामलोचना ॥ १० ॥

तस्यामित्थं वदन्त्यां प्रथमे सत्ये अङ्कुरो द्वितीये पत्राणि, तृतीये शाखाः, चतुर्थे मञ्जर्यः, पञ्चमे च पचेलिमानि चूतफलानि प्रादुरभूवन्। तदा पुनरपि स्त्रीपुंसोर्मिथः[1] सङ्गे दोषं दर्शयन्ती **द्रौपदी** प्रोवाच—

अग्निकुण्डसमा नारी, घृतकुम्भसमो नरः।
तेन नारद! नारीणां संसर्गं परिवर्जयेत् ॥ ११ ॥

सर्वे पौरास्तदाकर्ण्य स्वधामान्यगुः। ऋषयोऽपि तैराग्रैर्यथारुचिविहितपारणाः स्वस्थानं जग्मुः। राजाऽपि तेन यथारुचिकारितेन पारणेनाऽऽत्मानं धन्यं मन्यमानश्चिरं राज्यमन्वशात् ॥ **इति सत्यवचने द्रौपदीकथा** ॥ २७ ॥

॥ २८ ॥ कलिकालविषये भूधरद्विजकथा ॥

प्रकटितपापमार्गे कलियुगे सर्वं विपरीतं । यतः—

सीदन्ति सन्तो विलसन्त्यसन्तः, पुत्रा म्रियन्ते जनकश्चिरायुः।
परेषु तोषः स्वजनेषु रोषः, पश्यन्तु लोकाः! कलिकौतुकानि ॥ १ ॥

विषमतरग्रीष्म इव दुस्सहो हि कलिः, यतः—

विधत्ते यत्तोषं जडपरिचितेर्गोःपतिकराः।
कठोरा जायन्ते कथमपि न तृष्णा विरमति॥
मुदे दोषारम्भो भुवि भवति वैरस्य घटना।
किमेष ग्रीष्मर्तुः किमुत कलिकालः प्रसरति ?॥ २ ॥

१-स्त्रीपुंसयोर्मिं -AHRS ॥

तेन सुकृतं कृतवतामपि कलिरनर्थाय भवति। अत्रार्थे द्विजकथा यथा—

कलौ नीतिप्रवृत्तानां, प्रायोऽनर्थपरम्परा। दुःख्यभूच्चिर्भटीमूले, द्रव्यमोक्ता यथा द्विजः ॥ ३ ॥

तथाहि— कलिकाले **मथुरा**पुरीतो माहेश्वरसङ्घो **द्वारिकाया** यात्रार्थं निर्ययौ। मार्गे चाऽटन्तो यात्रिका **रत्नपुर**परिसरे [1]निर्धनिकेभ्यः क्षेत्रेभ्यो यथेष्टं शाकाद्यर्थं पत्राणि फलानि पुष्पाणि चाऽऽददिरे।

तांश्च तथाकुर्वतो विलोक्य नीतिमार्गधरस्य भूधरस्य द्विजस्य सारथिः स्वामिनं स्माह— 'हे देवाऽहमपि यात्रिकलोक इव चिर्भटीफलान्याददे, **भूधरो**ऽभिदधे स्वाम्यदत्तं भवता किमपि फलादि नाऽऽदेयं, चेदादित्सुस्तदा चिर्भटीफलमूल्यं मूले बद्ध्वा समादत्स्व' तेन च तथैव कृते पुरासन्ने एकस्मिन् प्रदेशे सङ्घे चोत्तीर्णे यावत्स सारथिरन्नं पचति तावद्भूधरस्तानि फलानि छेत्तुमुपचक्रमे। इतस्तया क्षुरिकया कृत्तकण्ठं श्रवद्रक्तं स्वकरस्थं सद्यःप्रसूतमेकमर्भकं, पुरस्तादेकां च रमणीं स द्विजोऽपश्यत्। तदा मुक्तकेशा हृदयस्थलमाघ्नाना विलापपरायणा बाष्पायित-लोचना सा सुलोचना तं द्विजमुवाच— 'रे पापिष्ठ! रे कर्मचाण्डाल! चाण्डालानामप्यकृत्यमिदं बालहत्याकर्म त्वमकार्षीः, किंच [2]निरागसो ममैनं शिशुं निहत्येदानीं क्व यास्यसीति विलपन्त्या कुपितया तया विज्ञप्तस्य राज्ञः पुरुषैर्यष्टिमुष्ट्यादिभिर्निहत्य बाढं बद्ध्वा कण्ठबन्धितबालं तं द्विजं पुरस्तादानीतं विलोक्य कुपितो राजा प्रोवाच, शूलायां निवेश्यतामसौ कर्मचाण्डालः, इति श्रुत्वाऽपि स द्विजः विहित स्मितः अजनि, तं विप्रं कृतस्मितं वीक्ष्य **मतिनिधिना** मन्त्रिणा चिन्तितमहो सर्वोऽपि मरणाद्बिभेति, असौ तु किं हृष्यतीति मत्वा 'वद स्मितहेतुमि'ति मन्त्रिप्रोक्तः स द्विजो यथाजातं स्ववृत्तान्तं सर्वमचीकथत् ।

यावत् राजा चिर्भटीमूलात्तद्धनमादाय तत्सर्वमपि विप्रोक्तं प्रत्येति, तावत्र बालं न चाबलां, परं कण्ठबद्धफलं तं द्विजं पुरस्ताच्चैकं देवमपश्यत् । किमेतदिति विस्मयवन्तं तं नृपं स देवोऽवादीत्, हे देवाहं पापमूर्त्तिः **कलिकालः** तेन पुण्यवन्तं न्यायवन्तं पीडयामि, अमुना चातीवविरुद्धाचरणनिकाये मद्राज्ये वसता मद्वैरिणः कृतयुगस्य कृत्यमकारि, ततश्च कुपितेन मयायं पीडितः । उक्तं च—

कलियुगमध्योत्पन्नाः, कृतयुगमध्यानुसारिणः कस्मात्।
इति क्रोपादिव कलिना पीड्यन्ते साधवः सततम् ॥ ४ ॥

इत्याकर्ण्य राज्ञा विसृष्टो **भूधरः** स्वधाम जगाम ॥ **इति कलिकाले भूधरद्विजकथा** ॥ २८ ॥

---

१. 'न धणीयाता' इति गूर्जरभाषायाम् ॥ २. RSI निरागसमेनं मे शिशुं - मु. ॥

॥ २९ ॥ रात्रौ मन्त्रणात्यागे श्रीवररुचिद्विजकथा ॥

[1]मन्त्रणस्थानं बहुद्वारादिदोषरहितमेव वरीयस्तरं, यतः—

मन्त्रस्थानमनाकाश-मेकद्वारमसङ्कटम्। निःशंकादि च कर्त्तव्यं, दूरसंस्थैरयामिकम् ॥ १ ॥
मन्त्रस्थाने बहुस्तम्भे कदाचिल्लीयते परः। सगवाक्षे प्रतिध्वान-श्रुतिः स्यात्प्रतिभित्तिके ॥ २ ॥

शून्याधोभूमिके स्थाने, गत्वा वा काननान्तरे।
मन्त्रयेत्सम्मुखं सार्द्धं, मन्त्रिभिः पञ्चभिस्त्रिभिः ॥ ३ ॥

तेनेदृशेऽपि मन्त्रस्थाने दिवैव विलोक्य मन्त्रो विधेयो, रात्रौ तु सर्वथा न कर्त्तव्यः। अत्रार्थे **वररुचिकथा**,

दिवा निरीक्ष्य वक्तव्यं, रात्रौ नैव च नैव च। सञ्चरन्ति महाधूर्ता, वटे वररुचिर्यथा ॥ ४ ॥

तथाहि— **घटकग्रामवासिनोऽचल**श्रेष्ठिनो **विमलनामा** सुतोऽतीवनिपुणो नापितानुचरेण युतो धनोपार्जनाय परदेशमगात् । स च **विमलो** भाग्योदयेनोपार्जितप्रभूतवित्तो गृहं प्रतिचलन्नेकस्मिन्नरण्ये प्राप्तः । तदा चिरपोषितोऽपि नापितस्तद्धनलुब्धस्तन्मारणोपायं चिन्तितवान्। पापमूलं लोभं धिगस्तु । यतः—

मूलं मोहविषद्रुमस्य सुकृताम्भोराशिकुम्भोद्भवः।
क्रोधाग्नेररणिः प्रतापतरणिप्रच्छादने तोयदः॥
क्रीडासद्म कलेर्विवेकशशिनः स्वर्भाणुरापन्नदी-
सिन्धुः कीर्त्तिलताकलापकलभो लोभः पराभूयताम् ॥ ५ ॥

तथैकदा लोभाभिभूतोऽसौ पापिनापितस्तस्यैकस्य तरोरधः सुप्तस्य केशपाशं पादेनाऽऽक्रम्य मारणाय हृदयोपरि तस्थौ । तदा प्रबुद्धो **विमलस्तं** तथोद्यतमूचे— 'हे भद्र! सर्वमिदं धनादि गृहाण, मां च मा मारय', ततो नापितः प्राह— 'अहं भवन्तमवश्यं हनिष्यामि, तेनान्यत्किमपि वद' ततो 'यद्येवं तर्हि मत्पितुः 'अप्रशिखेति' वर्णचतुष्टयं देयमि'त्युदीर्य स्थितं तं निहत्य तद्विभवमादाय गृहागतस्तत्पित्रा पुत्रोदन्तं पृष्टः स नापितोऽभाषिष्ट— 'हे श्रेष्ठिन्! पथि तस्करैस्तव सुतोऽमारि, कण्ठगतजीवितेन तेन तुभ्यम् 'अप्रशिख' इति वर्णचतुष्टयी दत्तास्ति'। **अचलो**ऽपि तान्यक्षराण्यादाय गृहागतः कृतपुत्रोर्ध्वदेहिकः कोविदैर्विचार्यमाणमपि यदा तदर्थं नाऽज्ञासीत्तदा पुत्रमरणवार्त्ताकथनपुरस्सरं राजानं व्यज्ञपयत् ।

राजापि ग्रामदानादिना मानितान् स्वान् पञ्चशतपण्डितान् बभाषे- 'भोः पण्डिताश्चेत् षण्मासान्तरे तदर्थो भवद्भिर्नाभिधास्यते, तदा सकुटुम्बानां युष्माकं निग्रहं विधास्यामि । ततस्तेऽपि

१. तुला- भोजप्रबन्धे - अधिकारः पू ॥ २. तथोद्यतं तमूचे RS॥

विद्वांसस्तदर्थमजानन्तोऽन्यत्र नगरादौ तदर्थाऽवगमार्थं सर्वास्वपि दिक्षु जग्मुः । तेष्वेको **वररुचि**नामा द्विजो बहुदिनानि सर्वत्र भ्रान्त्वा स्वग्राममागच्छन्नेकस्य वटस्य कोटरे निशि तस्थौ। तदा तद्वटाधिष्ठायकवटवासिनं [व्यन्तरं तत्पत्नी] वटवासिनी प्राह— 'हे नाथ! कथय चैकां कथां', सोऽवादीत् प्रिये **घटक**ग्रामे 'सुगममपि अप्रशिखे' त्यक्षराणामर्थं विद्वांसो न विदन्ति । तेन कुपितो राजा सर्वानपि तानेकीकृत्योषसि हनिष्यति । तत्र तत्पुत्र-कलत्र-मित्रादीनां रुदन-करुणस्वरविलापादिकौतुकानि भविष्यन्ति।

तेन च प्रातस्तत्र गमिष्यामि'। सा स्माह— 'हे नाथ! कोऽर्थस्तेषामक्षराणां?' 'रात्रौ न वक्तव्यमिति नाभिधास्ये', तेनेत्युक्ते परितो विलोक्य बाढं निर्बन्धेन पृष्टस्तया सोऽभाषिष्ट।

'अ' इति अनेन तव पुत्रस्य, 'प्र' इति, प्रसुप्तस्य वनान्तरे।
'शि' इति, शिखामाक्रम्य पादेन, 'ख इति' खड्गेन निहतं शिरः ॥ १ ॥

इति तदर्थं तत्रस्थो **वररुचि**रश्रौषीत् । ततः स्वपुरमागत्य श्रेष्ठिनं तं च नापितमाहूय राजाग्रे तमर्थं स कथितवान् । स राजापि तमर्थं सत्यं विज्ञाय तं दिवाकीर्त्तिं न्यग्रहीत् । **अचलोऽपि** तत्सर्वं पुत्रधनमादाय स्वधामाजगाम। ॥ **इति रात्रौ मन्त्रो न कर्त्तव्य इत्यर्थे वररुचिद्विजकथा** ॥ २९ ॥

॥ ३० ॥ मैत्रीविषये सुरूप-सुरसेनकथा ॥

प्रभूतैरपि पुण्यैः सन्मित्रं दुष्प्राप्यं, यतः—

येन तेन सुकृतेन कर्मणा, भूतले हि सुलभा विभूतयः।
दुर्लभानि सुकृतानि तानि यै-र्लभ्यते पुरुषरत्नमुत्तमम् ॥ १ ॥

यतः सन्मित्रप्रसादतो राज्यभोगादिसामग्री सुकरा, यतः—

सम्पत्तिप्रकरस्तदीयसदनाऽऽकाशे पतङ्गायते।
चातुर्यं च तदीयदेहविटपिप्रान्ते विहङ्गायते ॥
भोगस्तत्करकेलिपङ्कुरुहिणीक्रोडे च भृङ्गायते।
मित्रं दक्षतमं यदीयनिकटारण्ये कुरङ्गायते ॥ २ ॥

अत्रार्थे मित्रद्वयकथा—

सिद्ध्यन्ति तस्य कार्याणि, सहृदो यस्य धीधनाः।
भेजे राजसुतो मित्रात्, फोफलश्रेष्ठिनः स्नुषाम् ॥ ३ ॥

तथाहि— **रम्यमन्दिरे** पुरे **रूपसेनो** नाम राजा, **सुरसेनो नाम** च तत्पुत्रो वसति स्म । तत्पुरवासिनो **मल्लश्रेष्ठिनः** सूनुः **सुरूपो नाम** राजसुतेन मैत्रीमसूत्रयत् । अथ तौ शयनभोजन-मज्जनयानोपवेशनादि सर्वं सहैव सृजन्तौ कालं गमयामासतुः । मित्रं विना प्राणान् धर्त्तुमक्षमं

१A सुरसेनो नाम. मु. P. ॥

मत्वा राज्ञा प्रेषितं **सुरसेन**मादाय पित्रा प्रेरितः **सुरूपो** यानपात्रमारुह्य **रत्नद्वीपं** प्रत्यचालीत्। तदा च पयोधावागच्छत्प्रवहणोपरिस्थितामेकां सुरवधूमिव रमणीयां रमणीमालोक्य राजसूनुः स्मरवानभूत्। साऽपि तमालोक्य कामकदर्थिता सती चापमुक्तबाणवेगजित्वरे यानपात्रे स्थिता वलितग्रीवं पश्यन्ती तस्मै स्ववेणीं च दर्शयन्ती स्वस्थानं ययौ ।

सुरूपोऽपि स्वेप्सितपदं प्राप्य व्यापारेण धनमर्जयन् दिने दिने क्षीयमानं स्वमित्रं दौर्बल्यनिदानमप्राक्षीत् । तेनापि स्वस्वरूपे कथिते **सुरूपः** पुनरप्यभाणीत्— 'हे **मित्र** ! तया यान्त्या यदुक्तं कृतं चेष्टादिकं तद्वद ' स स्माह- 'अन्यत् किमपि न जाने, परं सा स्ववेणीमदीदृशत्'। [तत् श्रुत्वा तेनोक्तं]— 'हे बन्धो! तया वेणीदर्शनेन **वेणीपुरपत्तन**मिति स्वपुरमज्ञापि तेन स्वस्थो भव अवश्यं तुभ्यं तां मेलयिष्यामि । **सुरूपो**ऽपि **वेणीपुरपत्तने** गत्वा तद्देहशुद्ध्यै नगरदेवतापूजावसरे स्वमित्रं देवकुले न्यवीविशत् । सोऽपि तत्रस्थस्तत्रायान्तीर्बह्वीः कुरङ्गीदृशीः पश्यन् क्रमागतां तामपश्यत् । सापि तमुपलक्ष्य तदग्रे नागवल्लिदलानि तदुपरि च क्रमुकं विमुच्य गृहमगात् ।

सुरसेनेनैत्य तत्स्वरूपे कथिते **सुरूपः** प्रोचे— '**ताम्बूलिकपाटके फोफलश्रेष्ठिनः** स्नुषाऽस्मीति तया ज्ञापितम् । तेन हे सुहृत्! त्वं स्वस्थो भव, अधुना तया सह तव द्रुतं सङ्गमो भविष्यति'इति निवेद्य **सुरूपः** स्वबुद्धिं विधाय **फोफलश्रेष्ठिना** सह व्यापारसम्बन्धं व्यधात्। ततोऽन्यदा राजसुतो भोजनाय श्रेष्ठिनो गृहे गतो गृहविलोकनव्याजेन गृहान्तर्भ्रमन्नेकां पिहितकपाटामपवरिकां विलोक्य तन्निकटस्थामेकां कामिनीं कपाटपिधानप्रवृत्तिमप्राक्षीत्। श्रेष्ठिनः स्नुषा पतिप्रवासे परपुरुषमपश्यन्ती विजने स्थिताऽस्तीति तयोक्ते स कौतुकव्याजेन द्वारमुद्घाट्य तां निभाल्योपलक्षयति स्म। साऽपि स्मरसोदरमेनमागतं निरीक्ष्य मुमुदे ।

ततः **सो**ऽप्येतत्स्वरूपं **सुरूपाय** निरूपितवान् । **सुरूपो**ऽपि कूटलेखदर्शनपुरस्सरं श्रेष्ठिनमभाषिष्ट, श्रेष्ठिन्नहं कष्टि स्वबन्धुं सहसोत्पन्नकार्यवशात्परद्वीपं प्रेषयन्नस्मि, तेनास्य लघीयसो बन्धोर्गृहिणी यदि **मन्निकटे** तिष्ठेत्तदा मम शोभा न स्यात्, तेन युष्माकमोकसि तावदेषा तिष्ठतु यावन्मद्बन्धुरेति, श्रेष्ठिनाप्यदः प्रतिपन्नम्। ततः **सुरूपो**ऽपि प्रदोषे कृतस्त्रीवेषं **सुरसेनं** श्रेष्ठिस्नुषासमीपे **मुमोच** । ततस्तन्मित्रचातुरीचमत्कृता सापि चञ्चलाक्षी सूर्योदयम-[प्य]जानाना तेन सह स्वैरं भोगान् भुञ्जाना कालमनैषीत् । एवं च सत्येकदा एकपदे तत्पतिरागतः स्त्रीवेषं तमवलोक्य कामातुरो रात्रौ तद्भोगेच्छया स्ववशां व्याजहार । सोचे— 'हे प्राणेशाऽसौ **सुरूप**श्रेष्ठिनो बन्धुदयितास्ति, किं चैषाप्यहमिवान्यं पुमांसं नेहते, तेनात्रार्थे भवता कदाग्रहो न विधेयः'।, सोऽवादीत्— 'यदीयमिदं मदुक्तं न विधास्यति तदा बलात्कारेणापीमामहं भोक्ष्ये', इति तन्निर्णयं मत्वा सा इतो व्याघ्र इतस्तटीति सङ्कटे पतिता तस्मै तदुक्तमुक्तवती।

सोऽपि प्रोचे— 'हे सुभ्रु! यदि त्वन्निवारितोऽसौ न तिष्ठति तदा समायातु, समयोचितं विधास्ये', इत्युदीर्य राजसूः प्रगुणीभूय तस्थौ । स श्रेष्ठिसुतोऽपि यावन्निकटे समेति तावत्तेन

गुप्तरक्षितया क्षुरिकया तं व्यापाद्य तद्गृहिण्यभाणि— 'हे सुभ्रु! त्वत्पतिरसौ दवरकेण बद्ध्वा गवाक्षेणाधस्तान्मुच्यते, पश्चादहमपि तथैवोत्तरिष्यामि । प्रातश्च परिजनेन पृष्टेति भणेर्यन्मत्पतिः **सुरूपश्रेष्ठिबन्धुपत्नीमादाय** निश्येवानश्यत्। ततस्तथैव विहिते क्वाप्यन्धकूपे तं निक्षिप्य रात्रावेव **सुरूपसमीपं** समेत्य यथाजातं रात्रिवृत्तान्तमभणत्। अथ **सुरूपो**ऽपि **फोफलश्रेष्ठिनं** प्रातरागत्य न्यगदत्— 'हे श्रेष्ठिन्नद्य निशि मद्बन्धुरागतस्तेन स्नुषां प्रेष्यतां, श्रेष्ठ्यपि स्वस्नुषामुखादवगतस्वपुत्रप्रवृत्तिमभिज्ञायाऽभिधत्ते स्म— 'किञ्चैतत्स्वरूपमहं वेद्मि तथा च त्वमेव वेत्सि, तथा च यद्यन्यः कोऽपि ज्ञास्यति तदावयोर्द्वयोरपि राजदण्डः, तेन रहोवृत्त्यैव भवत्स्नुषास्थाने मत्स्नुषां गृह्यतामित्युदीर्य बहुस्वर्णवितरणपूर्वं तेन दत्तां स्नुषामादाय **सुरूपः** स्वमित्रेण युतः स्वपुरमगात्। **सुरसेनोऽपि** तया सह सांसारिकं सुखमनुभूय प्रान्ते **सुरूपेण** स्वपत्न्या च सहितो दीक्षामादायाऽऽलोचितदुष्कर्मा सुगतिमाससाद ॥ **इति मैत्र्ये सुरूपसुरसेनकथा ॥ ३० ॥**

॥ ३१ ॥ उपदेशमहिमायां योगित्रयकथा ॥

कथां निशम्य पापपरायणानामपि धर्मबुद्धिः स्यात्। [यतः—]

शीतांशोरपि शीतला गतमला दुग्धाब्धिफेनादपि।
श्रीखण्डादपि पाण्डुराऽतिमधुरा पीयूषपूरादपि॥
गाङ्गेयादपि तोषकृत् प्रमदकृत् सत्सङ्गरङ्गादपि।
स्यान्नैव प्रतिबोधकृत् श्रुतिमतां केषां कथानां प्रथा॥ १॥

नानाऽऽश्चर्यसन्निवेशं जनितान्यभावनिर्देशं सदुपदेशं निशम्य प्रायो जिघांसूनामपि प्रीतिरुत्पद्यते। अत्रार्थे गणिकया मार्यमाणेन माणवकेन द्विजेन कथिता **योगित्रयकथा** यथा—

प्रायः स्युः सत्कथां श्रुत्वा-ऽसन्तः पापपराङ्मुखाः।
योगित्रयकथां श्रुत्वा, वेश्यया मुमुचे द्विजः ॥ २ ॥

तथाहि— **चन्द्रपुरवासी दामोदरो** नाम द्विजो **रोहणाचलस्वामिनो** राज्ञः पार्श्वाद्रत्नपञ्चकमादाय स्वोरुदेशे निधाय च पथि गच्छन्**महापुर्यां कामसेनायां** वेश्यायामासक्तोऽभूत्। सपादकोटिकनकमूल्यमेकं मणिं च विक्रीय, तेन धनेन भोगाननुभवन् वर्षद्वयान्ते धनकारणं पृष्टस्तया स द्विजो यथाजातमवादीत् । अथैकदा प्रसुप्तस्य तस्य हृदि समारुह्य तन्मणिजिघृक्षया शस्त्रेण मारयितुमुद्यतां तां पापां 'मदुक्तामेकां कथां शृणु, तदनु स्वरुचितं कुर्या' इत्यधःस्थितो द्विजः कथां कथयति, तथाहि— **वसन्तपुराधिपस्य विजयसेनस्य** राज्ञश्चन्द्रसेनः सूनुरन्येद्युरुद्याने वाहान् वाहयित्वा सहकारतरोरधः स्थितः, '**क्व क्व** किं किमद्भुतं दृष्टवान्? इति कमपि *बहुदेशदर्शिनं व्रजन्तम् पथि पथिकमप्राक्षीत्, सोऽपि नरेन्द्रसूनुं प्रणम्य पुरस्तादुपविश्य मौक्तिकैरिव* तं कुमारं वर्धापयन् यथाऽवलोकितं कौतुकं कथयति स्म। हे देव! **देवपुरपुरे पुरन्दरस्य** राज्ञो

रतिरिव रतिदायिनी **रतिसुन्दरी** कन्या, स्मर इव सौभाग्यवांश्च भवान्, इति विविधविषयदर्शिना मया द्वयमद्भुतं दृष्टे । किं च भवदुचितां तां **गन्धपुरस्वामिनः सूकरो** नाम सूनुरद्यतः सप्तमेऽहनि स कुरूपाणां शिरोमणिस्तां परिणेष्यतीति खेदं वहन्नस्मि, तेन त्वं यथोचितं कुरु'। इत्यभीष्टार्थवादिने तस्मै प्रीतिदानं वितीर्य तस्यामेव निशि भूरिधनयुतं तुरङ्गमद्वय-मादाय पित्राद्यैरज्ञातो गृहान्निर्गत्य च **देवपुराधिपमन्त्रिपत्नीमहं** तव भ्रातेति वदन्मन्त्रिगृहं ययौ।

अथ च रहसि यथाजातं स्वरूपमुक्तवता तेन— 'हे भगिनि! तां भूपपुत्रीमेकशो मम दर्शयेत्यभिहिता मन्त्रिपत्नी भोजनार्थमाहूतां रतिसुन्दरीं तस्मै दर्शयामास । अहं तवार्थमागतोऽस्मी-तिवादिनं स्मरप्रतिवादिनं तं निभाल्य स्मरातुरा सती लग्नावसरे सायं पुरगोपुरे गृहीतवाजिना भवता स्थेयमिति सङ्केतं दत्त्वा सा कन्या स्वभवनमभ्येति स्म। सोऽपि लग्नदिने तथैव तिष्ठन् विलम्बं जायमानमवलोक्य द्वावपि वाजिनौ **बलाहकस्य** द्वाःस्थस्य पार्श्वे विमुच्य पुरे प्राविशत्। तस्मिंश्च कुमारेऽन्येन पथा पुरांतः प्रविष्टे सत्यन्येन पथा समेता सा कन्या तमसि सम्यक् तत्स्वरूपमजानाना तत्र स्थितं **बलाहकं** कुमारधिया 'सज्जो भव इतः सद्यो याव' इत्यभ्यधात्।

तदा च तयेत्युक्तो **बलाहको**ऽपि हतमुखो मौनपर एवैकस्मिन् वाजिनि, [1]एकस्मिंश्च वाजिनि कन्या चारुह्य द्वावपि कस्यांचिद्दिशि चलतः स्म। अथ च जाते प्रभाते **बलाहक**मालोक्य सा कन्या परमं विषादमापन्ना स्त्रीजनानुचितं धैर्यमालम्ब्य भोजनसामग्र्यर्थमेकस्मिन्नगरे **बलाहकं** प्रेष्य, स्वयं च पुरुषवेषमाधायैकाकिनी तुरगयुता **धनवासपुरं** प्राप्ता तत्स्वामिनः सेवां विधत्ते स्म। अथ **रतिसुन्दर**कुमार इति नामभाक् सा कन्या [राज्ञा] 'हठेन दत्तां **देवदत्ता**नामराजकन्यां परिणीय पञ्चाब्दीं मे भोगनिषेधोऽस्तीत्यभिधाय च सत्रागाराधिकारं करोति स्म।

तदा च कन्या नष्टेति परिणेतुमागतः **सूकरः, बलाहकेन** समं गतेति **चन्द्रसेनः** पुरादागतस्तामनालोक्य च द्वाःस्थः, एवं ते त्रयोऽपि खेदमापन्ना योगिनो जाताः पर्यटन्तस्ते **धनवासपुरे** सत्रागारे भोजनार्थमुपाविशन्। अथ च परिवेषणार्थमागतया तया तानुपलक्ष्य स्वस्ववैराग्यकारणं पृष्टैस्तैः स्वस्वस्वरूपे कथिते सति रहसि **चन्द्रसेन**माकार्य स्वं स्वरूपं प्रकटीचक्रे। मां परिणेतुमयमागत इति धिया स्वयं परिणीतां राजपुत्रीं **सूकराय**, अनेन सहैकामपि रजनीमध्वनि चलिताऽस्मीति धिया तस्य राज्ञो द्वाःस्थस्य सुतां **बलाहकाय** दापयित्वा, स्वयं च **चन्द्रसेन**स्य गृहिणी बभूव । द्वावपि तौ दम्पती प्रान्ते धर्ममाराध्य सद्गतिभाजावभूतामिति। तेन हे प्रिये! येन सहैकामपि रात्रिमुषिता तस्यापि सा कन्या तोषं चकार, अहं तु त्वया सह वर्षद्वयमुषितवांस्तन्मां कथं मारयसीति तद्वचनैः प्रबुद्धया वेश्यया मुक्तो द्विजः स्वस्थानमगात्।

इति कथायां योगित्रयकथा ॥ ३१ ॥

१ चैकस्मिन् - RP ॥

॥ ३२ ॥ योगिविश्वासकरणे श्रेष्ठिकथा ॥

श्रियां मूलमविश्वासः, यतः—

विज्जामूलं विणओ, लच्छीमूलं तहा अवीसासो।
भवमूलं महिलाओ, दाणमूलं च कित्तीओ ॥ १ ॥

तेन निर्जितचन्दनद्रवलिप्तचन्द्रमूर्त्तिकीर्तिं विश्वविश्वविस्मयकरणैकपटीयसीं हरिप्रेयसीं वाञ्छद्भिः पुरुषैरविश्वासपरैर्भाव्यं, यतः—

श्रियं जगच्चित्तवितीर्णचित्रां कीर्त्तिं दिगन्तप्रतिगामिनीं च।
समीहमानैर्भवितव्यमुच्चै - र्दक्षैरविश्वासरसावधानैः ॥ २ ॥

विशेषतश्च पाखण्डिक-परिव्राजक-पारदारिक-द्यूतकारक-योगिनां भोगि-व्याघ्र-सिंहादि-श्वापदानां च विश्वासो न करणीयः योगिविश्वासकरणे हि श्रेष्ठी परासुरभूत् । यतः—

विश्वासो नोचितो दुष्ट-योगिनां भोगिनामिव ।
योगिदत्तामजां लात्वा, यत्पिता मारितः सुतैः ॥ ३ ॥

तथाहि— **सुवर्णशृङ्खलाख्ये** नगरे महेभ्यो **धनावहनामा** श्रेष्ठी **धनदत्त-धनदेवाभ्यां** तत्सुताभ्यां सहितो धनद इवाऽगारवासोचितं सुखमन्वभूत् ।

अन्यदा जातवार्द्धकं तं श्रेष्ठिनं माघमासे शीतेनातीवकम्पमानमाऽऽलोक्य तत्सुतौ गर्भागारशयनतूलिका-तैलमर्दन-ताम्बूल-तापनादीन् बहून् शीतापनयनोपचारांश्चक्रतुः, तथापि भृशं शीतेनाभिभूयमानं पवनाहतचलपत्रपत्रमिव दिवानिशं कम्पमानं जनकमालोक्य पितृपीडा-पीडितौ तौ खेदं दधतुः। एकदा विपणिमध्यस्थितमपि गर्भागारस्थितमिव, दिगम्बरमपि परिहितपीवरचीवरमिव केवलाकाशस्थायिनमपि तूलिकान्तःस्थायिनमिव, करालेऽपि शीतकाले पाषाणघटितमिव निष्कम्पं भक्षितविजया-ऽहिफेन-कनकबीजादिबहुबलिष्ठद्रव्यं विहितवारुणिपानं, शोणनयनं, जातयाममपि वयःस्थमिवोपचितशरीरं, गिरिकूटमिव स्थूलं, तालमिव तुङ्गं, महिषमिव मांसलं, निकटनिबद्धगलस्तनीनिषेवितं, कौटिल्यकलाविजितभोगिनमेकं योगिनमालोक्य तावूचतुः— 'हे योगिन्! कथमस्मिन् शीतर्त्तौ शीतार्त्तिस्त्वां नाभिभवति' इति त्रिःप्रोक्ते स स्माह— 'हे बालौ! मम हरिततृणमिव चेयमजा सर्वं शीतं चरति, तेन विवसनेऽपि मयि न शीतपराभूतिरेति'। एवं तद्वचनप्रपञ्चपिशाचच्छलितहृदयौ बालकत्वेन च तन्मार्गितसुवर्णशतद्वयमूल्यं दत्त्वा तां गलस्तनीमादाय व्रजतोस्तयोः स योगीति वचनमूचे— 'अहमिव यः केवलाकाशे बहुवातस्थाने चैकवसनः शेते तदीयं शीतमियमत्तीति'। अथ तदुक्तविधेरनुसारतः सप्तभूमिसौधोपरिभूमिकायां पितुः पल्यङ्कं निधाय तत्पादे च तामजां निबध्य चैकमच्छं वस्त्रमुपरि चाच्छाद्य तौ श्रेष्ठिसुतौ श्रेष्ठिनं संवेशयामासतुः। श्रेष्ठ्यपि सुप्त एव तत्र तेन दारुणेन शीतेनाभिभूतः परासुर्बभूव ॥ **इति योगिविश्वासकरणे श्रेष्ठिकथा ॥ ३२ ॥**

---

१. AHP। जरठमपि- मु. ॥ २. अहिफेन = अफीण

॥ ३३ ॥ कामविडम्बनायां कुबेरदत्तकथा ॥

स्वस्ववर्णोचितार्चनविधिनोपशान्तनिरङ्कुशेभ्यः सूर्यादिभ्यः सर्वग्रहेभ्योऽपि पीत-रक्त-श्वेत-नील-श्यामवर्णपूजाविधिना प्रकटितप्राबल्यः कामग्रहः क्रूरतरः, यदागमः—

सव्वगहाणं पभवो, महागहो सव्वदोसपावट्ठी।
कामग्गहो दुरप्पा, जेणभिभूअं जगं सव्वं ॥ १ ॥

तेन शाकिनीडाकिनीभूतप्रेतपिशाचवेतालादिपराभूतानामस्ति प्रतिक्रिया, न तु स्मरवैरिविडम्बितानाम् । यतः—

साइणिडाइणिपमुहा, दोसा नस्संति मंततंतेहिं।
न हु विसमाउहदोसो, नस्सइ बहुमंततंतेहि ॥ २ ॥

यतोऽसौ सङ्कल्पयोनिः सुरासुरनरकिन्नरविद्याधरपुरन्दरानपि विडम्बयति, यतः—

विकलयति कलाकुशलं, हसति शुचिं पण्डितं विडम्बयति।
अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ॥ ३ ॥

तेनानङ्गनटिता निपुणा अपि नराः पिशाचगृहिता इव विश्वेषां विस्मयकरीं नानाविधां चेष्टां कुर्वन्ति। यतः—

कन्दर्पदर्पवशतो महतामपि स्या-द् ग्राहिल्यमन्धितविवेकविलोचनाब्जम्।
स्वर्णं गृहाण वद नाथ! तया किमुक्तं, यान्त्येत्यभीक्ष्णमवदद्वणिजस्तनूजः ॥ ४ ॥

तथाहि— **कुबेर**पुरे कुबेरस्येव नलकूबरः **कुबेरदत्तस्य** व्यवहारिणः **कुबेरचन्द्र**सूनुर्नवोढां कमलामिव प्रीतिकारिणीं **कमलश्रियं** प्रेयसीमोकसि विमुच्य पितृभ्यामनुज्ञातः प्रभूतशकट-वृषभ-करभ-तुरगा-ऽश्वतर-खर-कासरादिबहुसार्थयुतः **सूरसेनां** नगरीं प्राप्तः, तत्रापि भूपेन बहुमानितो बहून् व्यापारान् विधाय स्वप्रियाविरहविधुरो दीपावलिकापर्वोपरि स्वपुरं प्रत्यचालीत्। नवस्नेहे हि विरहोऽग्निरिव दहति । यतः—

[1]**विरहो वसंतमासो, नवनेहो पढमजुव्वणारंभो।**
पंचमगीअस्स झूणी, पंचग्गीं को जणो सहइ ॥ ५ ॥

अथ दीपावलिकापर्व भृशमासन्नं, भूश्च भूयसी, तेन सार्थसार्थे स्वपुरं प्रति गमनं दुष्करं विभाव्य स श्रेष्ठिसुत एकाक्येव तुरगारूढः सार्थाग्रतश्चलन्नन्तरालाऽऽगत**गन्धवत्यां** पुर्यां बहिःस्थिते देवीप्रासादे निषण्णस्तस्मिन्नेवाहनि दीपालिकां विज्ञाय स्वपुरं च दवीयस्तरं मत्वा तां रात्रिं तत्रैवोषितवान्। इतश्च तद्वासि**रूपसेन**श्रेष्ठिस्नुषा रूपपराजितरम्भादिरूपा रतिस्वरूपा **रूपश्री**-स्तस्मिन्नेव देवकुले देवीमर्चयितुं गृहीतपूजोपहारा विहितसकलशृङ्गारा करकलित-कनकभृङ्गारा वर्जितान्यपरिवारा स्वकुलाचाराय निशीथे तत्राभ्येति स्म। कुमारावलोकनेन सञ्जातस्मरस्मय-

१. तुला-माधवानलकामकन्दलाप्रबन्धे ॥

स्मेरनयनां तां सुनयनां निभाल्य कुमारो विस्मृतस्वकलत्रविरहः प्रकटितप्रबल-प्रेमाङ्कुरया चतुरया तया समं निर्व्रीडमक्षक्रीडामकरोत् । शारिपाशकमण्डनपण्डितया तया तथा क्रीडितं, यथा परस्पराऽजितयोस्तयोः क्रीडतोरेव प्रातरजनि। तदा च विभातं जातं विभाव्य स्वौकसि गन्तुमुत्सुकां तां स स्माह— 'हे सुभगे! कदा पुनरावयोः सङ्गम इति?' 'दीपावलिकायामि'ति प्रतिपाद्य गतायां तस्यां स्मरापस्मारपिशाचगृहीतः स श्रेष्ठिसुतः कदा दीपालिका कदा दीपालिकेति भूयोभूयः कथयन् ग्रहिलोऽभूत् ।

कस्त्वमिति पृच्छतां जनानां कदा दीपालिकेति वदतस्तत्रैव परिसरे पर्यटतो विस्मृत-शयना-ऽशन-पानस्य भूतार्त्तस्येवेतस्ततो गच्छतस्तस्य स सार्थोऽपि कतिपयदिनैस्तत्राऽऽययौ। सार्थ-लोकैरपि तैरुपलक्षितो हे स्वामिन्! कथमिह स्थितोऽसीति पृष्टः कदा दीपालिकेति वदन् पिशाचगृहीतोऽयमिति मत्वा हठेन रथान्तर्निधाय परिचरेण स गृहं नीतः- 'हे पुत्र! समाधिरस्ति?' इति पितृभ्यामप्यभिहितः कदा दीपालिकेति वदति स्म। तदनु भूतादिच्छलित इति विज्ञाय पितृभ्यां मन्त्रयन्त्रतन्त्रादिभिरुप-चरितमपि तथाविधमेव स्वपतिं ज्ञात्वा तत्स्त्रिया **कमलश्रिया** पतिपिता प्रोचे— 'हे तात! किं जातं युष्मत्सुतस्येति प्रोक्तः स सर्वं व्यतिकरं व्याकरोत् । चतुःषष्टिकलालब्धलक्षा प्रतिजननयनपरीक्षादक्षा साऽपि श्रितस्मरशोचने हरिणाहङ्कारमोचने प्रियलोचने विलोक्य नैष भूतादिदोषः किन्तु दीपालिकायामावयोः सङ्गम इति द्युसदामपि दत्तप्रमदया कयापि प्रमदया कृतसङ्केतां दीपालिकां सर्वेषामयं पृच्छतीति कामोन्मत्तं स्वपतिं निश्चित्य प्रोचे— 'हे प्राणप्रिय! किमिदमभूदिति, तदा कदा दीपालिकेति तेनोक्तं, प्रात-र्दीपालिकापर्वेति सा स्माऽऽह ।

इति मन्त्राक्षरमिव तद्वचनमाकर्ण्य सज्जीभूतः स प्रियापुरो यथाजातमशेषमुदन्तमुक्तवान्। हे प्रिये! अहमधुनैव तत्र यामीति तेनोक्ते साऽभिदधौ हे सुभग! न दीपालिका नेदीयसी, किं त्वेकादश मासा अन्तराले सन्तीति प्रतिबोधितस्तया समं भोगान् बुभुजे । जातपाटवं कुमारमालोक्य सर्वोऽपि परिवारः स्नुषायां तुतोष । अथाऽन्यदा समुपेयुषि दीपालिकापर्वणि सुवर्णटङ्कानां सहस्रपञ्चकमादाय तुरगारूढ एकाकी सन् **गन्धवत्यां** गत्वा निशीथो दवीयानिति स श्रेष्ठिसुतः सायमेकस्मिन् देवकुले शेते स्म। मार्गश्रान्तस्य तस्य निर्भरं निद्राऽभ्येति स्म, तदा निशीथे तद्दिनकृतसङ्केता समागता सा तं तत्राऽपश्यन्ती सती, 'सा समेताऽभूदिति ममागमनं पृच्छते नराय त्वया निवेदनीयमि'ति तत्रस्थितमेकं योगिनं प्रतिपाद्य स्वं धाम जगाम । इतश्च गतनिद्रः स कुमारो निशीथं व्यतीतं विभाव्य तत्र देवीगृहे गत्वा— 'हे योगिन्निह कापि कामिनी किं *समेताऽभूत्?' इति तत्र स्थितं तमेव योगिनं व्याजहार । स योग्यपि तयोद्दिष्टं तम्* मत्वा ब्रूते स्म- 'इहैका सुन्दरी निशीथे समागता चैकस्य यूनः पन्थानमालोक्य चिरं चेह मम चेत्यादिश्य

स्ववेश्म गतवती'। इति योगिनाभिहितमाकर्ण्य तदसङ्गमात्परमखेदमापन्नः सञ्जातस्मरावेश इतीमं श्लोकं पठति स्म। तथाहि—

सौवर्णकं गृहाणैकं, योगिन् ! योगजुषां वर ।
तया यान्त्यायदादिष्टं तद्वद स्मरशासनम् ॥ १॥

भूयो भूयश्चेमं श्लोकं पठन् प्रतिश्लोकं च योगिपुरः सुवर्णटङ्कं च मुञ्चन् स कुमारो भूतार्त्त इव ग्रहिलोऽजनि। तदा च सुवर्णशतमेकं लात्वा गतेऽपि तस्मिन् योगिनि तथैव कुर्वति तस्मिन् पुरः सुवर्णराशिं च विलोक्य विस्मितपूजकाद् ज्ञातव्यतिकरास्तत्र राजादयः सर्वेऽपि पौराः समागताः, स तु तमेव श्लोकं भणन् पुरः सुवर्णं च मुञ्चँस्तत्रागतान् राजादिपौरानपि कामान्धत्वान्नापश्यत् । यतः—

दिवा पश्यति नोलूको, नक्तं काको न पश्यति।
अपूर्वः कोऽपि कामान्धो, दिवा-नक्तं न पश्यति ॥ २ ॥

तदा च तत्रागतेन **सुबुद्धि**नामाऽत्येन मत्या स्मरविहितोपद्रवं तस्मिन् विज्ञायेति राज्ञः पुरः प्रोचे— 'हे देव! नूनमसौ कयापि स्त्रिया दत्तसङ्केतः कमपि योगिनमत्र स्थितं तदागतिस्वरूपं पृच्छति । तेन सर्वोऽपि पौरीवर्गो यद्येनमेकैकतया पश्यति, तदासौ तन्मध्यात्स्वाभिमतां तां वनितामुदीक्ष्य स्वस्थो भवेदिति'। अथ राज्ञा तथैव कारिते क्रमेण तत्रागतामेकाकिनीं तां निभाल्य पुनर्लब्धसङ्केतसंज्ञः स सकलमपि स्वं व्यतिकरं तस्यै स्माह। साऽपि पेशलालाऽऽपादिभिस्तं सुखयित्वाभ्यधात्— 'हे सुभग! केयं धर्मार्थध्वंसकारिणी कामकदर्थना! इति तस्याः सुधाबन्धुरैर्गिरां भरैरेव परमं संवेगमुद्वहंस्तत्रैव गुरोः समीपे तपस्यामादाय तप्तदुस्तपतपाः सिद्धः ॥ **इति कामविडम्बनायां कुबेरदत्तकथा ॥ ३३ ॥**

॥ ३४ ॥ अविमृश्यकारितायां मूर्खकथा ॥

सर्वत्रापि प्रतीकारं कुर्वतापि भगवता कमलयोनिना मूर्खचित्तसमाधानप्रतीकारो न विदधे, यतः—

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो ।
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गो-गर्दभौ ॥
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं ।
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ १ ॥

बहुभिर्वारितोऽपि हि चिरं विमृश्याऽपि मूर्खः सर्वत्राऽसमञ्जसमेव करोति। अत्रार्थे चैकस्य जटिनस्तापसस्य सम्बन्धः, यतः—

मूर्खशिरं विमृश्याऽपि, विदधात्यसमञ्जसम् ।
धुर्यवक्रविषाणान्त-र्जटिनाऽक्षेपि मस्तकम् ॥ १ ॥

तथाहि—

वटवासग्रामे महेभ्यस्यैकस्य गृहद्वारकुटीरे वर्षासमये स्थितो **बोधिशर्मा** नाम जटी, प्रतिदिनं वृजिनविषाणं वृषभं गृहान्निर्गच्छन्तं गृहान्तश्च प्रविशन्तं विलोक्य इति दध्यौ, किमस्य शृङ्गान्तर्मम शिरो माति न वेति प्रतिदिनं चिन्तयता तेनैकदा वर्षाऽवसाने चरणाय गच्छतस्तस्य वृषभस्य शृङ्गान्तर्मूर्द्धा निदधे। तदा तत्पराभूतो मदोन्मत्तः सोऽपि वृषभस्तथोच्छलितो यथाऽमुष्य जटिनः पाणि-पाद-श्रवण-नासा-नेत्रादि भृशं भग्नं, किं बहुना? जीवशेषः स जटी भूमौ पतितः, प्रोक्तञ्च लोकैर्धिगिमं मन्दमतिमविमृश्यकारिणमिति। तदा च मातृमुखमुख्यः सोऽपि पौरानिति प्रत्यूचे— 'भोः पौराश्चतुरोऽपि मासान् विमृश्य मयैतत्कृत्यमकारि, तदा कथमहमविमृश्यकारीति? ॥ **इत्यविमृश्यकारितायां मूर्खकथा** ॥ ३४ ॥

॥ ३५ ॥ आशायाः प्राधान्ये विक्रमादित्यकथा ॥

लोको हि यथाऽऽशया जीवति न तथा श्री-सरस्वती-कीर्त्तिभोगसम्मतवस्तुसंयोगादिभिः। यतः—

विश्वाश्चर्यनिबन्धनैर्न हि धनैर्नाऽनिन्द्यया विद्यया ।
नाऽनालस्यसभाजनैः परिजनैः प्राज्ञ्येन राज्येन न ।
कामं कामसुखोदयैर्न विषयैर्ना नर्त्तिभिः कीर्तिभिः ।
लोको याति यथा सुखं खलु तथा सत्संशया चाऽऽशया ॥ १ ॥

तेन सर्वत्राप्याऽऽशाया एव प्राधान्यम्, अत्रार्थे श्रीविक्रमादित्यनमस्कृताया आशायाः कथा—

आशामुशन्ति सुधियः, शोभनां सर्ववृत्तिषु ।
श्रियं वाचं च कीर्त्तिं च, हित्वाऽऽशां **विक्रमो**ऽनमत् ॥ २ ॥

तथाहि— एकदा परदुःखकातरः परनारीसहोदरः **श्रीविक्रमादित्य**पृथिवीपतिः शुक्लाश्वापहृतोऽरण्यं प्राप्तः, तत्र च स सहकारतरोरधः स्थितः, अथ त्रियामायाः प्रथमे यामे पुरतो गच्छतीश्चतस्रः सहस्रपत्रनेत्राः प्रेक्ष्य मत्स्वसार एता इति समुत्थाय तासामेकम् जोत्कारमकरोत् साधारणेनैकेन **जोत्कारेण जोत्कारो**ऽयं ममेति ममेति मिथो विवदमानास्ताः समागत्य श्रीविक्रमादित्यमित्यवोचन्— 'सुभग! कस्या असौ **जोत्कारस्त्वया**ऽकारीत्युक्तेन राज्ञा का

१ RS । मूर्खशिरोमणिः - मु. ॥

यूयमिति पृष्टे तन्मध्यादेका काञ्चनीयकुण्डल-कटक-केयूर-कङ्कण-कटीसूत्र-तुलाकोटि-तिलकादिरमणीयाऽऽभरणा कनककान्तिकान्तकरणा मसृणघुसृणसंगतश्रीखण्डमण्डलमण्डित-स्तनादिदेहदेशा स्मितचम्पकपुष्पप्रकरपेशलकेशा तपनीयतन्तुस्यूतकञ्चुकचीवरोत्तरीयादिवर्य-वसनशालिनी करकलितकनक-कलशशालिनी मत्तमत्तङ्गजगामिनी कामिनी समेत्य मौक्तिकैरिव दन्तद्युतिसन्दोहैर्भूपतिं वर्द्धापयन्ती सती ब्रूते स्म— 'हे सुभग! सुरासुरेषु विश्रुता सागरसुता **लक्ष्मी**रहं, मयाधिष्ठिते पुंसि दोषा अपि गुणाः स्युः, यतः—

आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां,
मूकत्वं मितभाषितां वितनुते मौढ्यं भवेदार्जवम्।
पात्रापात्रविचारणैकविरहो यच्छत्युदारात्मतां,
मातर्लक्ष्मि तव प्रसादवशतो दोषा अपि स्युर्गुणाः ॥ ३ ॥

किंच मया विलोकित एव पुमान् गुणरहितोऽपि गुणसहितः स्यात् । यतः—

अगुणमवि गुणड्ढं निंदणिज्जंपि पज्जं, जडमवि मइमंतं मंदसत्तंपि सूरं ।
अकुलमवि कुलीणं रूवहीणंपि रम्मं, नवकमलदलच्छी जं पलोएइ लच्छी ॥ ४ ॥

किं बहुना ? मयि सत्यामेव सर्वं सांसारिकं सुखं, यतः—

तावत्कर्णरसायनं सुखयति श्रोत्रे कवीनां वच-
स्तावन्मुग्धमृगीदृशां स्मितरसश्चेतः समाकर्षति ॥
तावत्पञ्चमकाकलिं कलयितुं कण्ठः समुत्कण्ठते ।
लक्ष्मीर्यावदवेक्षते क्षणमपि प्रेमोर्मिणा चक्षुषा ॥ ५ ॥

तेन जगदुत्तमाया ममैवायं जोत्कारो नाऽन्यासामिति। तयाऽभिहिते राजा व्याजहार, सदैव जगत्यहद्यनिन्द्यपरिजनाया दुर्जनाया नाऽयं भवत्या जोत्कारः, यतः—

वक्षा ते जडधी रसक्षयकरश्चौर्वानलः सोदरः ।
स्थानं कण्टककूटकोटिकमलं मित्रं च हालाहलं ।
गोपेन्द्रः प्रणयी सुत श्वशुततनु-र्ज्येष्ठोऽपि मद्यप्रिय-
स्तत्त्वं केन गुणेन सागरसुते! जोत्कारयोग्या मम॥ ६ ॥

इत्याद्यसङ्ख्यदोषोद्घाटनेनेति तिरस्कृतायां मौनमुपेतायां तस्यां द्वितीया धवलालङ्कार-वस्त्रविलेपनहारिणी कुन्दकुमुदकर्पूरकमनीयकायधारिणी वीणापुस्तकमण्डितकरा कमण्डलुधरा राजहंसगामिनी भामिनी भूपतिमभिधत्ते स्म— 'हे सुभग! सकलजगज्जीवहिताऽहं विधेर्दुहिता **सरस्वती,** मया सेवितः पुमान् भूपादपि समधिकमान्यः स्यात्, यतः—

विद्वत्त्वं च नृपत्वं च, नैव तुल्ये कदाचन ।
स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥ ७ ॥

मया मुक्ताः पुमांसः पशव एव, यतः—

आहार-निद्रा-भय-मैथुनानि, तुल्यानि सार्धं पशुभिर्नराणाम्।
ज्ञानं विशेषः खलु मानुषाणाम्, ज्ञानेन हीनाः पशवो मनुष्याः॥ ८ ॥

किं बहुना? मया निषेविताऽनिषेवितानामयं विशेषः—

नानाशास्त्रसुभाषिताऽमृतरसैः श्रोत्रोत्सवं कुर्वतां,
येषां यान्ति दिनानि पण्डितजनव्यायामखिन्नात्मनाम्।
तेषां जन्म च जीवितं च सफलं तैरेव भूर्भूषिता,
शेषैः किं पशुवद्विवेकविकलैर्भूभारभूतैर्नरैः ॥ ९ ॥

तेनाऽऽबालगोपालादीनामपि मान्याया ममैवायं जोत्कारो, नान्यासामिति तया कथिते भूपोऽभिदधे, यतः—

इभ्यालिं न समीहसेऽर्ककलिकां रोलम्बमालेव या ।
यान्ती यासि हिमाहतेव नलिनी पक्षत्रयाऽनन्तरम्।
धत्से दर्शनिशैव शीतरुचिना वैरं च सौख्येन या।
सा त्वं केन गुणेन सात्त्विकसुते, जोत्कारयोग्या मम॥ १०॥

इत्यादिसद्भूतप्रभूतदोषदूषितायाम् मुद्रितमुखायां तस्यां, तृतीया तथैव भारतीसन्निभाभरणादिभूषिता विश्वत्रयीव्यापिदेहा [कीर्त्तिनामभामिनी] राजानमजल्पत्— 'हे सुभग! जगदानन्दनी दानस्य नन्दनी **कीर्त्तिरहं**, मम वर्णनमात्रेण प्रीणिताः सन्तो दानशौण्डा वाचामगोचरं यच्छन्ति । यतः—

त्वत्कीर्त्या धवलीकृते सुररिपौ सौवास्पदभ्रंसभाक् ।
कृष्णत्वं रिपुराजराजिवदनक्रोडेऽकरोत्क्रीडनम् ॥
शुभ्रत्वात्तदनासिभाक् त्वयि पुनस्तस्थौ सुता तोयधे-
र्नो चेत्तत्र कथं तदत्र च कथं सा सर्वदाश्चर्यकृत् ॥ ११ ॥

इत्थं वाग्देवीदत्तवरेण कविरत्नेन कविना कृतं वृत्तमाकर्ण्य चारूत्तरचमत्कृतचेताः **शातवाहनो** भूपतिर्वर्णप्रमितत्वेन षट्सप्ततिलक्षान् सुवर्णटङ्कान् ददौ, किं बहुना? एकाकिन्यप्यहं त्रिभुवने भ्रमन्त्यपि न बिभेमि । यतः—

उग्रग्राहमुदन्वतो जलमतिक्रामत्यनालम्बने।
व्योम्नि भ्राम्यति सन्ततं क्षितिभृतां प्राग्भारमारोहति ॥

व्याप्तं याति विषाकुलैरहिकुलैः पातालमेकाकिनी,
कीर्त्तिस्ते मदनाभिराम! कृतकं जाने भयं योषिताम् ॥ १२ ॥

तेनाऽशेषलोकगमनशीलाया ममैवायं जोत्कारो नान्यासामिति तया कथिते पृथिवीपतिरवादीत्, यतः—

विश्वेषां वदनानि चुम्बसि सुमस्तोमानिवालिप्रिया ।
सर्वेषां सदनोदरेषु तनुषे वेश्येव वासस्थितिम् ॥
वात्येव प्रकरोषि विश्ववलये स्वेच्छाविहारं च या ।
सा त्वं केन गुणेन कीर्त्तिवनिते! जोत्कारयोग्या मम? ॥ १३ ॥

इत्याद्यभिवादिनेव च दूषितायां तूष्णीं गतायां तस्यां चतुर्थ्यपि तथैव नीलवसनाभरणाभिरामा संसाधितानेककामा राजानमब्रवीत्— 'हे सुभग! सकलसुरसंवासाऽहमाशा, ममैव प्रसादेन सर्वोऽपि जनो जीवति, यतः—

विश्वाश्चर्यनिबन्धनैर्न हि धनैर्नाऽनिन्द्यया विद्यया ।
नानालास्यसुभोजनैः परिजनैः प्राज्येन राज्येन न ॥
कामं कामसुखोदयैर्न विषयैर्ना नर्त्तिभिः कीर्त्तिभिर्-
लोको याति यथा सुखं खलु तथा सच्छंसया चाऽऽशया ॥ १४ ॥

तेन निःशेषजगज्जीवातोर्ममैवायं जोत्कारो, नान्याषामिति तद्वचनं समीचीनं चिरं चेतसि विचिन्त्य चतुरचूडामणिः स नरशिरोमणिस्तामिदं जगाद—

निष्पुत्रान् वरपुत्रलब्धिविधिभिर्निःस्वांश्च वित्तोद्यमै-
र्भूयो भेषजभक्षणैश्च सरुजान् मन्त्रप्रयोगैर्जडान्।
लोकान् या स्वरसैर्वनावनिरुहान् कुल्येव सञ्जीवये-
दाशे! ऽनेन गुणेन जीवितजगज्जोत्कारयोग्या मम ॥ १५ ॥

इति सत्यवादिनं मेदिनीनाथं प्रणम्य प्रकटितसुरीरूपास्ताश्चतस्रोऽपीत्यवदन्, हे देव! **श्री-गीः-कीर्त्याशाभिधाना** वयं चतस्रोऽपि देववध्वः, स्वस्वोत्कर्षनिबन्धनोऽयमस्माकं वादोऽद्य भवता निर्णितस्तेनेयमाशा शेषाणामस्माकमपि मान्येत्यभिधाय तामाशां पुरस्कृत्य राजानं च पुष्पा-ऽऽभरणादिभिः सत्कृत्य स्वर्गं गतासु तासु राजापि प्रभाते स्वपुरमलञ्चकार **॥ इत्याशायाः प्राधान्ये कथा ॥ ३५ ॥**

॥ ३६ ॥ मत्सरे बटुकथा ॥

ऐहिका-ऽऽमुष्मिकाऽर्थकारणं गुणगणं वनमिव वह्निर्मत्सरो भस्मसात्करोति, यतः—

सौहार्दं निकृतिस्तनुं गदगणः प्रज्ञां प्रमादोदयः,
सम्पत्तिं कलहः कलामविनयः शीलं वशासङ्गमः।

मन्दाक्षं मदनः प्रभुत्वमनयः कामित्वमर्थक्षति-
र्हन्ति स्वं व्यसनं तपोऽनुपशमः सर्वान् गुणान् मत्सरः ॥ १ ॥

तेन मत्सरिजनः स्वयमन्येषां चानर्थनिदानम्, अत्रार्थे बटुनामद्विजनिदर्शनं, यतः—

भवन्ति प्रायशः पापाः, सर्वत्र श्रितमत्सराः।
व्यधादन्धं बटुः प्राति-वेश्मिकं मत्सरी द्विजः ॥ २ ॥

तथाहि— **घनघट्टनाम्नि** ग्रामे मत्सरिणामवधिः दौर्गत्यस्य सेवधिः पापकर्मसु पटुर्**बटु**नामा द्विजोऽन्यदा भुजङ्गमेनेव नैःस्व्येन पराभूतः **सम्भलां** स्वमहिलामनुज्ञाप्य धनाभिलाषुकः सन् **टीलाख्ये** भूयसां योगिनां स्थाने गत्वा **सूरनाथ**नामानमेकं योगिनमाराधितवान् । मज्जन-भोजन-शयना-ऽऽसन-संवाहनादिना सम्यग् विनयेन तोषितो द्वादशवर्षान्ते स योग्याह 'हे बाल! तव किं विलोक्यते?' इति ब्रुवाणं योगिनं स वक्ति स्म। हे स्वामिन्नभद्राणां भवनं, व्यसनानां वनं, चिन्तायाः कारणं सकलसुखवारणं मम दौर्गत्यमपाकुरुष्वेति प्रोक्तेन योगिना दीयमानामेकां मूलिकामालोक्य स द्विजस्तन्महिमानमप्राक्षीत्, विधिना पूजिता सुरलतेवेयं मूलिका कामितं दत्ते, द्विगुणं च प्रातिवेश्मिकस्येत्यभिधाय ददानं द्विजो जगौ, हे नाथ ! प्रातिवेश्मिकवेश्मनि श्रियं द्रष्टुं न शक्नोमि, तेनाऽनया ममालमन्यां यच्छेत्युक्तः **सूरनाथः** कथितवान् ।

तव भाग्येनेयमेवाऽर्हतीत्यभिहितस्तां विमुच्य स स्वौकसि गतः, तत्र च स्वप्रियायाः सर्वं मूलिकावृत्तान्तमवक् । हे प्रिय! यथा तव तुष्टिर्भविता तथा करिष्यामीति तया प्रेरितः स चित्रकवल्लीमिव तामानीय तस्यै ददौ। तया तत्प्रियया विधिना पूजितया तयौषध्या मणिसुवर्णादिविभूतिभासुरे सप्तभूमिकसौधे कारिते सति प्रातिवेश्मिकस्य सर्वं द्विगुणं निर्वर्ण्य मत्सरिमुख्यं तं ब्राह्मणाधमं कण्ठपाशेन मर्त्तुमुद्यमं कुर्वाणं सा सम्भला बभाण— हे नाथ! स्वस्थो भव तव रुचितं करोमीत्युदीर्य सा ब्राह्मणी स्वौकसि पञ्चाशत् महान्धकूपान् परिवारं चैकेनाक्ष्णा काणं तयौषध्या विधापयामास । तत्प्रभावाच्च प्रातिवेश्मिकस्य द्विगुणे जाते तस्य सर्वमपि परिवारमन्धत्वात् कूपान्तः पतनेन दुःखिनं विलोक्य स द्विजस्तुष्टः, क्लिष्टकर्मणा तेनोपार्जित-प्रभूतपातकः स कालं कृत्वा नरके ययौ ॥ **इति मत्सरे द्विजकथा ॥ ३६ ॥**

॥ ३७ ॥ नियमपालने नीलकण्ठकथा ॥

जीवितादप्यधिकत्वेन पालितो नियमोऽपुनर्भवाय भवेत्, यतः—

धणमिव चिंतइ धम्मं, जीविअमिव जो वयाइं रक्खेइ ।
सुरतरुमिव सुगुरुपयं, आराहइ तं वरइ सिद्धी ? ॥ १ ॥

स्तोकोऽपि नियमः स्वयं कृतो महानुभावैः पाल्यते, यतः—

पाल्यते नियमः सद्भि-र्मनसाऽपि कृतः स्वयम् ।
प्राव्राजीद्राजपुत्रोऽयं यद्वशात् शबरीयुतः ॥ २ ॥

तथाहि— **सागरोदर**नाम्न्यरण्ये **कालकूटस्य** किरातस्य किन्नरीव कमनीयाङ्गी **सङ्गी**-नामनन्दिनी स्वैरं भ्रमन्ती सत्यन्यदा शरदि सर्वज्ञप्रतिमाकारतया परिणतमदभ्रमालोक्य मूर्च्छिता जातिमस्मार्षीत्। तथाहि—

हर्षपुरे नीलकण्ठस्य विप्रस्य सुता बालविधवा यतिनीनामभ्यर्णे प्रव्रज्य ब्राह्मणत्वेन पाणिपादमुखाद्यवयवधावनप्रशंसया मलमलिनशरीरसिचयत्वेन च यतिधर्मस्य निन्दया नीचैर्गोत्र-कर्मोपार्ज्य भिल्लसुताऽहमभूवमिति । अथ च षष्ठषष्ठेन पारणं, पारणके च प्रासुकपत्रपुष्पफल-कन्दाद्यमाहरणीयं, पत्रादिपतनपरिणतं पानीयं पानीयं, जीवितावधि च शीलं पालनीयं, प्रासुकेनापि पयसा न स्नानं करणीयमित्यभिगृह्य पूर्वाधीतश्रुतवती सा भिल्लसुतैकाकिनी स्वं कुटुम्बं विमुच्य ततो दवीयसो गिरेरेकस्य कन्दरायां स्थिता स्वां प्रतिज्ञामपालयत् । इतश्चान्यदा **विजयसेन**-नगरस्वामिनो **विजयचन्द्रस्य** राज्ञो **विजयसिंहः** सुतो मृगयार्थं तस्मिन्नरण्ये भ्रमन् गुहान्तस्तस्थुषीं स्मरसञ्जीवनौषधीमिव तामपश्यत् । तथा च—

वक्त्रं चन्द्रविलासि पङ्कजपरिहासक्षमे लोचने ।
वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानां चयः ॥
वक्षोजाविभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली ।
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम् ॥ ३ ॥

इत्यादिस्त्रीजनोचितस्वाभाविकमण्डनमण्डिता जातिस्मृतिस्मृतपूर्वाधीतश्रुतपण्डिता भूर्ज-त्वचारचितदुकूला कर्णकृततारताडङ्कानुकुलां मञ्जुगुञ्जाफलग्रथितहारिहारा कलापिकलापप्रकरा लतातन्तुसंयमितकेशहस्ता गैरिकरञ्जितहस्ता साऽपि रतिप्रीतिसहायिनं मदनमिव समायान्तं तं पश्यति स्म।

तदा च रतिमिव कामप्रीतिकारिणीं कमलामिव पुरुषोत्तममनोहारिणीं शचीमिव जयवाहिनीं भवानीमिव सर्वज्ञमनोऽवगाहिनीं वनदेवीमिव सुमनः समेतामेतामुदीक्ष्याऽकृतदारकर्मा कुमारोऽ-प्यस्मिन् जन्मनि इयं गृहिणी शीलं वा पालनीयमिति मनसि नियमं विधाय तस्याः स्वरूप-मपृच्छत् । तया च यथास्थितं कथितं श्रुत्वा तेनाऽपि स्वनियममर्यादायां निवेदितायां सा व्याहरत्। हे सुभग ! मां स्वनगरं नय यथाऽहं यतिनी भवामि, त्वं च यथोचितं कुर्या इति तदुक्तः कुमारोऽप्यवादीत्, हे सुभगे! ममाऽपि गार्हस्थ्ये शीलनिर्वाहो दुष्कर इत्यभिधाय तौ द्वावपि **राजगृहे** नगरे **धर्मघोष**सूरीणामभ्यर्णे गृहीतव्रतौ सिद्धौ ॥ **इति नियमपालने कथा** ॥ ३७ ॥

॥ ३८ ॥ दाने भीमलावणिक्कथा ॥

दातारो दुष्प्रापाः, यतः—

अर्थलुब्धकृतप्रश्रौ, सुलभौ तौ गृहे गृहे ।
दाता चोत्तरदाता च, दुर्लभौ पुरुषावुभौ ॥ १ ॥

तेन शीलादिधर्मपरायणा भूयांसः, दातारस्तु स्तोकाः, यतः—

ये शीलं परिशीलयन्ति ललितं ते सन्ति भूयस्तरा-
स्तप्यन्ते ननु ये सुदुस्तपतपस्ते सन्ति चानेकशः ॥
ते सन्ति प्रचुराश्च भासुरतरं ये भावमाबिभ्रते ।
ये दानं वितरन्ति भूरि करिवत्ते केचिदेवाऽवनौ ॥ २ ॥

किञ्च दातैव दातुमलं, यतः—

यैस्तु दानानि दत्तानि, पुनर्दातुं हि ते क्षमाः।
शुष्कोऽपि हि नदीमार्गः, खन्यते सलिलार्थिभिः ॥ ३ ॥

आस्तामन्या कीर्तिस्फूर्त्तिमूर्तिः स्तुतिः, दातारो हि स्वनामश्रवणेनाऽपि तुष्टा सन्तः संतां: समीहितं यच्छन्ति, यतः—

सन्तोषं यान्ति दातारः, स्वाख्यामात्रश्रुतेरपि ।
भीमलेति निजाह्वान-श्रुतेः सुरस्तुतोष यत् ॥ ४ ॥

तथाहि-**मालवदेशे मण्डपाचलासन्नसेनपुरवासिनौ नेताभीमलानामानौ** पितृपुत्रौ चारणौ मार्गणार्थं देशान्तरे भ्रमन्तावन्यदा मध्याह्ने मध्यमग्रामे प्राप्तौ। तदा च तटाकपालीपिप्पलाधस्तात्सुतं विमुच्य पिता भोजनसामग्रीकृते पुरं प्राविशत्, तदा च वेलाविशेषेण पौरैः समाधिपृच्छापूर्वकं सन्मानितोऽप्ययमकृतभोजन एव समागत्य पुत्रपुरस्तत्कालकृतमेकं दोधकमभाणीत् । तथाहि—

आदर एथ अपार, नगरमांहि ने तो भणइ ।
कुणहि न कीधी सार, भोजनवेला भीमला ॥ ५ ॥ [सोरठा]

चारणिकेन छन्दसा वर्यया च शब्दरचनया रञ्जितेन सुतेन भूयो भणेति प्रेरितः पिता तं दोधकं त्रिरपाठीत् ।

इतश्च तन्नगरनिवासी आगतगतयतियोगियाचकाभ्यागतभिक्षाचराणां भक्तिशक्ति-कृपाभिस्तोषको **भीमलानामा** वणिक् शुभध्यानेन मृतः सुरत्वमापन्नस्तत्र पिप्पले स्थितः स्वनामाङ्कितं पुनः पुनः पठ्यमानं चं दोधकमाकर्ण्येति दध्यौ, अहो! सकलेऽपि पुरे पौरैरभोजितोऽ-सौ चारणः कथञ्चिन्ममावासमेकं कृष्णावासमवगम्य मत्पुरो भूयो भूयो विज्ञपयति, तेनाऽयं मया तोषणीय इति ध्यात्वा प्रकटितस्वरूपः स सुरः सपादकोटिकनकमूल्यं मणिं च तस्मै दत्त्वा तिरोदधे ॥ **इति दाने भीमलानाम वणिक्कथा ॥ ३८ ॥**

॥ ३९ ॥ सत्सङ्गविषये पटुबटुखटु कथा ॥

तानि सुकृतानि दुर्लभानि यैः सत्सङ्गलब्धिः, यतः—

भूतले हि सुलभा विभूतयो, येन तेन सुकृतेन कर्मणा ।
दुर्लभानि सुकृतानि तानि यै-र्लभ्यते पुरुषरत्नमुत्तमम् ॥ १ ॥

तानि च पुरुषरत्नानि जगति कियन्त्येव । यतः—

मनसि वचसि काये पुण्यपीयूषपूर्णा-स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणुं पर्वतीकृत्य नित्यं, निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ? ॥ २ ॥

तेषां सतां सङ्गतिः किं किं न यच्छति ? यतः—

जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥ ३ ॥

किं बहुना ? मरणादपि सत्सङ्गतिः पाति । यतः—

सत्सङ्गसुरवृक्षस्य विभूतिर्भुवनाद्भुता।
अभूत्सुखी पटुः प्राप्य रात्रिभुक्तिव्रतं मुनेः ॥ ४ ॥

तथाहि-**सुखासन**ग्रामे **पटुबटुखटु**नामानः कुटुम्बिनस्त्रयो भ्रातरो भृशं परस्परं प्रीतिभाजो वसन्ति स्म। तेषु च **पटु**नामा ज्येष्ठो भ्राता यतियोगिविप्रतापसकविभट्टारकादिसत्सङ्गरङ्गरङ्गितमनाः क्षेत्रादिकर्षणकृषीवलव्यापारपरायणोऽन्यदा वर्षासु स्वक्षेत्रान्तर्वर्तिकुटीरे स्थितो मेघोपद्रुतमेकं मूर्तिमन्तं धर्ममिव मुनिं कुटिरे रक्षितवान् । स्वस्थीभूतः स च साधुः सत्सङ्गसुरसालस्य फलमिव रात्रि-भोजननियमं तस्मै पटवे दत्त्वाऽन्यत्र विजहार ।

इतश्च तस्यामेव निशि तस्य वेश्मनि पर्वदिवसत्वान्निष्पन्नं चूरिमकं [निष्पादितमासीत्। अथ]रात्रिभोजने कृतनियमत्वेन ज्येष्ठं भ्रातरं तमभुञ्जानं विलोक्य मिथःप्रीतिपरायणत्वेन तत्सोदरेष्वभुक्तवत्सु सत्सु तेषां त्रयाणां गृहिण्योऽप्यभुक्ता एव तस्थुः । अथ चोषसि भोक्तुमुपविष्टास्ते त्रयोऽपि सहोदरा रात्रितमसि भृशोष्णपूपिकानामुपरि पतनेन प्रचण्डमुशलप्रहारैश्चोदूखलान्तःखण्डीभूतस्य सर्पस्य मुखदन्तदंष्ट्रात्वगस्थिपुच्छादि चूरिमकान्तरुदीक्ष्येत्यूचुः, हा धिगस्तु रात्रिंचरानिव रात्रिभुक्तिपरान्, यैस्तु महदप्येतन्नरककूपपातकं पातकं प्रतिदिनमनुष्ठीयते। **बटुखटु**नामानौ द्वौ भ्रातरौ ज्यायांसं भ्रातरमित्यभिदधुः, हे बन्धो! तव प्रसादेन सर्वोऽपि परिवारो जिजीव, यतो जग्धचूरिमकाणामस्माकं क्व जीवितमिति भूयोभूयस्तमभिष्टुत्य तौ धर्माभिमुखत्वं जग्मतुः, पटुरपि सत्सङ्गफलमतीवपेशलं मन्यमानस्तस्यैव मुनेर्दर्शनमीहमानश्चान्यदा पथि गच्छन्तं सुद्रुममिव तं मुनिमुदीक्ष्य स सर्वमप्यात्मनो व्यतिकरं व्याकरोत् । अथ च सपरिवारोऽपि सत्सङ्गसेवापटुः पटुस्तस्य मुनेरन्तिके सम्यक्त्वमूलं द्वादशव्रतात्मकं गृहिधर्ममङ्गीकृत्य सम्यक् प्रपाल्य चानल्पसम्पदमच्युतकल्पं ययौ ॥ **इति सत्सङ्गविषये कथा ॥ ३९ ॥**

॥ ४० ॥ ज्ञाने भीमवणिक्कथा ॥

यशःसुखकारणं हि ज्ञानं, यतः—

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं ।
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ॥
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं ।
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥ १ ॥

तेन ज्ञानाऽभ्यासपराणां स्वर्गादिविचाराः सुविचाराः। यतः—

तृणं ब्रह्मविदः स्वर्ग-स्तृणं शूरस्य जीवितम् ।
विरक्तस्य तृणं नारी, निःस्पृहस्य तृणं जगत् ॥ २ ॥

किं बहुना ? स्तोकादपि ज्ञानादनर्थाः पयोधराज्जगत्तापा इव सत्वरं विलयं यान्ति। यतः—

ज्ञानैकसुरसालस्य सौरभं किमु वर्ण्यते।
विषाऽन्नज्ञातमात्रेण, भ्राता भीमेन रक्षितः ॥ ३ ॥

तथाहि— **शङ्करनाम्नि** ग्रामे धनदाविव धनेश्वरौ, स्ववैद्याविव सुन्दरौ, मदनवसन्ताविव भृशं मिथः प्रीतिमन्तावुभौ **भीमासीमानामानौ** भ्रातरावभूताम्। तयोश्च ज्यायान् ज्ञानार्थी सन् प्रत्यहं पण्डितपरिचयपरायणोऽभूत् । पण्डितानां हि वार्त्ताऽपि सकलशास्त्रमूलं, यतः—

परिचयितव्याः सन्तो यद्यपि कथयन्ति नैकमपि वाक्यम् ।
यास्तेषां स्वैरकथा-स्ता एव भवन्ति शास्त्राणि ॥ ४ ॥

अपि च—

पंडितसरसी गोठडी, मुज मनि परि सोहाइ ।
आलिइं जइ बोलावीएं, माणिक आपी जाय ॥ ५ ॥ [दोहा]

लघीयान् भ्राता तु परिवारवारितोऽपि नीचसङ्गं न मुञ्चति, स्वभावो हि दुस्त्याज्यः, यतः—

जे जस लगइ सहावडा, ते फीट्टइ मरणेण।
सुणहा वंकी पूंछडी, समी न कीजें केण ॥ ६ ॥

अथाऽन्यदा प्रभूतैर्मन्त्रतन्त्रादिभिः प्रपञ्चितचमत्कारेण बहुदृष्टप्रत्ययेन मायामन्दिरेण **सुन्दर**-नामयोगिना **सीमाह्वो** लघुभ्राता मैत्रीमसूत्रयत् । एकदा च भोगिनेव कुटिलगतिना तेन योगिना बहुभिर्बहुमूल्यैः सुवर्णमणिभूषणैर्भूषितः सोऽभाणि, हे बाल! मूलिकामिमां गृहाण येनाऽस्यां निकटस्थायां या युवती त्वां पश्यति, सा त्वां लोहमयस्कान्तमणिरिव न मुञ्चति। अस्याश्चाऽऽदानविधिरसौयत्समादानावसरे गुरुणा सहैकत्र भाजने भोजनं विधीयते। तदनु च गृहीताऽसौ सिद्धिकरीत्यभिधाय स योगी श्यामचतुर्दश्यां निशि सङ्केतं कृतवान्। इतश्च तद्भ्राता **भीमाह्वो**ऽपि पण्डितानां पार्श्वे नानासुभाषितश्रवणेन कालं गमयति स्म। यतः—

गीतशास्त्रविनोदेन, कालो गच्छति धीमताम् ।
व्यसनेन हि मूर्खाणाम्, निद्रया कलहेन वा ॥ ७ ॥

एकदा **बुद्धिसागर**गुरूणामभ्यर्णे स इति सविषान्नज्ञानमशृणोत् । यतः—

दृष्ट्वाऽन्नं सविषं चकोरविहगो धत्ते विरागं दृशो-
र्हंसः कूजति सारिका च वमति क्रोशत्यजस्रं शुकः ॥
काकः क्षामस्वरस्तथा ारभृतः प्राप्नोति मृत्युं क्षणात् ।
क्रौञ्चो माद्यति हर्षवांश्च नकुलः कुर्यात्पुरीषं कपिः ॥ ८ ॥

इदं ज्ञानं वर्यमिति [ध्यात्वा स] मनसि रक्षितवान् । इतश्च तस्मिन् सङ्केते एकं सविषमेकं च निर्विषमेवं मोदकद्वयं विधाय तेन **सीमाह्वेन** सह भोक्तुमुपविष्टस्य तस्य योगिनो मठिकान्तर्भ्रातरं विलोकयन् कुतश्चिदवगततत्स्वरूपो **भीमाह्व**स्तद्व्यतिकरं तत्समीपस्थं च तदैव विहितपुरीषं च कपिं पश्यति स्म। तदा च स विषाऽन्नविचारविदुरः स भीमस्तस्मिन्मोदके विषं विज्ञाय योगिनं जगौ, 'हे योगिन्! किमिदं विधीयते?' [योग्याह] केनचिद्दत्तं मोदकद्वयं भुज्यते, इति वदन् स योगी [**भीमेन**] पानीयप्रयोगेण तस्मिन् मोदके विषं दर्शयित्वा मुष्टियष्ट्यादिभिर्बाढं निहत्य ग्रामान्निष्कासितो, भ्राता च मरणाद्रक्षितः, ततस्तेन **भीमेन** तदनन्तरं विशेषेण ज्ञानाऽभ्यासपरेण जातमिति ॥ **इति ज्ञाने भीमवणिक्कथा** ॥ ४० ॥

॥ ४१ ॥ स्त्रीचरित्रे वासवयोगिकथा ॥

स्त्रियोऽपि हि कपटलम्पटचित्तवृत्तयः स्युः, यतः—

अण्णं रमइ निरिक्खइ, अण्णं चिंतेइ भासए अण्णं।
अण्णस्स देइ दोसो, कवडकुडी कामिणी विअडा ॥ १ ॥

अपि च—

दुरितवनघनालिः शोककासारपालिः, भवकमलमराली पापतोयप्रणाली।
विकटकपटपेटी मोहभूपालचेटी, विषयविषभुजङ्गी दुःखसारा कृशाङ्गी ॥ २ ॥

तेनैतासां दुश्चरितं ज्ञात्वा केऽपि सन्तः संसाराद्विरक्ताः स्युः, यतः—

ज्ञातस्त्रीचरिताः सन्तो[1], विरक्ताः केऽपि तत्क्षणात् ।
यथाऽभूद्विरतो योगी, ज्ञातस्त्रीचरितस्थितिः ॥ ३ ॥

तथाहि—

कुञ्जरासननगरनिकटवर्त्ति**कोटिकूट**गिरिवासी **वासवो** नाम योगी द्विपथ-त्रिपथ-चतुष्पथ-राजपथ-महापथादिषु भ्रमन् '**सती रे सती अम घरि सती**' इति पदं पुनः पुनर्भणन् प्रतिगृहं प्रतिहट्टं भिक्षां याचते। एकदा तन्नगराधिपतेः **सिंहसेनस्य** राज्ञः **सूरेण** मन्त्रिणा तत्पदं

१. सन्तः केऽपि विरक्ता क्षणात् - PD ॥

पठन् स भोजनार्थमाकारितो, ज्ञातं च तद्वचननयनेङ्गितादिना तच्चरितमिति, नूनमस्य स्त्रीरस्ति। तां च चेतसि सतीमिति मन्यमानोऽयं मूढोऽनवसितस्त्रीचरित्रस्तत्पदं पठन् भिक्षार्थं भ्रमति । तेन तामुदीक्ष्यैतस्य स्वकलत्रसतीत्वाहङ्कारमहं निराकरोमीति ध्यात्वा स मन्त्री तं योगिनं ससत्कारं विसृज्य प्रच्छन्नतया स्वचरेण तत्स्थाननिर्णयं विधायाऽन्यदा तत्पृष्ठे गच्छंस्तद्गुहाद्वारं तदुद्घाटनविधिं च ज्ञात्वान्येद्यु-र्वस्त्रालङ्कारविभूषितः गते तस्मिन् योगिनि योगिनः संज्ञयैव तत्प्रियोद्घाटिते गुहाद्वारे गुहान्तः प्रविश्य च तामिति जगौ ।

हे भद्रे! का त्वं? कथं कुतो वाऽनेन योगिना गृहीता चेति पृष्टा सा स्पष्टमाचष्टे, हे सुभग! न जाने काऽहं, कुतश्च कथमनेन चाऽऽनीतेति । किंचैनमेवापश्यं, तेन जानामीयं गुहैव स्थानमयमेव च नरोऽहमेव च नारीति जगत् । किंचाऽद्यैतादृशं त्वां विलोक्य जगत्यन्यत्स्थानमन्ये च पुंमांसोऽन्याश्च स्त्रियः सन्तीति [जाने एवं] पेशलालापपरयोस्तयोः समयोचितं सुखमनुभवतोः स योगी गुहाद्वारे समेत्य पूर्वप्रणीतया गुहोद्घाटनसंज्ञयात्मानमागतमज्ञापयत् । तमागतं मत्वा स्थिरो भवेति च मन्त्रिणमभिधाय तत्कालोत्पन्नस्त्रीचरित्रचतुरा सा योगिनी पूत्कारमकरोत् ।

किमभूदिति योगिना पृष्टा सा स्माऽऽह, हे प्रिये! ममोदरं भृशं तुदति, तेन वक्तुमुत्थातुं द्वारमुद्घाटयितुं च नाहमलम्। किं चाऽद्य निशि स्वप्नान्तर्देवतया ममेत्यभाणि, हे पुत्रि! तवोदरे-ऽद्य महती पीडा भविष्यति [अतः] सप्तपुटपट्टकेन बाढं बद्धनयनः पाणिप्रपञ्चितविपञ्चिकः कलस्वरं प्रगुणितगानश्च तव भर्त्ता यद्येनां गुहां सप्त प्रदक्षिणां ददाति, तदैषा पीडा शान्तिं यास्यति तेन तथा विधेयं यथाऽहं सज्जा सती द्वारोद्घाटनं करोमीत्यभिहिते योगिनि तदुक्तं कुर्वति सति मन्त्रिणि च सुखेन गृहं गते सति तयोद्घाटिते द्वारे च स योगी तया सह पूर्ववत्सुखमन्वभूत्।

अन्यदा विविधवर्णाऽऽकीर्णकन्थाशाली जटामुकुटमाली मृगशृङ्गशोभितनिगरणः सुवर्णमुद्रा-मण्डितश्रवणः वीणावादनविदुरः प्रभूतभस्माभ्यङ्गभासुरो दण्डमण्डितकरकमलः पादुकापेश-लपदयमलः स योगी 'सती रे सती अम घर सती' इति पदं पठन् पुरान्तर्भ्रमंश्च तेन मन्त्रिणा समाहूय किं पठसीति पृष्टोऽवादीत् 'सती रे सती [अम घर सती]' ततस्तदहङ्कारनिराकरणाय मन्त्रिणाऽभाणि **'तुम्ह घर सती ते अम्ह घर हती'** एतद्वचनचमत्कृतो योगी जगौ

'अम्हे वसुं अरण्ये। वने तिहां तुम्हे किहां'

ततः पुनर्मन्त्री ब्रूते स्म

'आंखि पाटा किन्नर वाता । त्यारि अम्हें तिहां'

एतन्निशम्य वज्राहत इव योगी भूमौ पतितो लब्धसंज्ञश्चेति ध्यातवान् । अहो धिगासां मृगनयनानां विलसितम्! या बाल्यादपि यत्नेनैवं रक्षिता साऽपि चेदीदृशी जाता तदाऽन्यासां का गतिरिति स्त्रीषु विशेषेण वैराग्यवान् स योगी कष्टानुष्ठानं विधाय देवोऽजनि । **॥ इति स्त्रीचरित्रे वासवयोगिकथा ॥ ४१ ॥**

॥ ४२ ॥ मूर्खत्वे देवशर्मातापसकथा ॥

मूर्खे हि दोषा एव स्युः, यतः—

पण्डितेषु गुणाः सर्वे, मूर्खे दोषास्तु केवलम् ।
तस्मान्मूर्खसहस्रेण, प्राज्ञ एको न लभ्यते ॥ १ ॥

तेन मूर्खाः स्वयं विहितैरेव दोषैरसुखभाजो भवन्ति । यतः—

केषामात्मकृतैर्दोषै-र्मूर्खाणामसुखोदयः ।
तद्देवशर्मगोमायु-कुट्टिनीनामिवाजनि ॥ २ ॥

यथा-**रामसेनग्रामे** पठितमूर्खाणामग्रणीः प्रभूतवित्तवान् **देवशर्म्मा नामा** तापसः तं च **आषाढभूतिनामैकः** कितवः कैतवेन तद्धनं लिप्सुरन्तेवासीभूय सेवितवान् । अन्यदा ग्रामान्तरं गच्छन्नाषाढभूतिना सहितो **देवशर्म्मा**ऽन्तराले शिष्यस्यान्तिकें[1] मात्रां विमुच्य शरीरचिन्तार्थं गतः ।

ततश्च निवृत्तः सन्नन्तराले युद्धं कुर्वाणयोर्हुण्डयोर्मिथः प्रहारेण भग्नभालयोरन्तराल-गलितशोणितबिन्दुपानेच्छया मध्ये स्थितं जम्बूकं हुडुशिरःप्रहारेण मृतमवलोक्य स **देवशर्म्मेति** पदं चक्रे। 'जम्बूको हुण्डुयुद्धेन' इतश्च तां मात्रामादाय काकनाशं नष्टं तं धूर्त्तमाषाढभूतिमपश्य-न्नितस्ततस्तं च विलोक्य परमं विषादमापन्नः स पुनरपीदं पदं विहितवान् 'वयं **चाषाढभूतिना**।' ततश्चाऽग्रे गच्छन्तं तं मार्गे मिलितः **कुबेरनामैकः** कोलिकः, [सोऽपि कोलिकस्तं] नमस्कृत्य सार्धं विद्यमानायाः स्वप्रियायास्तस्याऽभ्यागतस्य भक्तिं कर्त्तुमादिश्य स्वयं च निकटवर्त्तिनि नगरे गतः, अथ सापि **खन्धिला**नाम तन्महिला स्वैरिणी [सती] धनिकस्याऽन्यत्र गमनं चात्मनो गेहे गमनमुत्सवं मन्यमाना तं **देवशर्मा**णमादाय गृहं गता।

तदा तमतिथिं **देवशर्माणं** शयनासनभोजनमज्जनाऽऽदिभिरुपचर्य, परेण पुंसा कृतसङ्केतां तत्र गमनाय च यथोचितरचितवेषाऽऽभरणां तां वेश्मसमेतस्तत्पतिरवलोक्य प्रोचे, हे स्वैरिणि! हे रण्डे! मामन्यत्र गतं मत्वा जारेण रन्तुं यासि, तेन पश्यैतस्य स्वैराऽऽचारस्य फलमिति तां पादप्रहारमुष्टियष्टिभिर्बाढं निहत्य खट्वापादे च निबध्य विहितवारुणिपानः स कोलिकः शेते स्म। तदा च सञ्जात सङ्केत चारेण जारेण तत्र प्रेषिता नापितपत्नी खन्धिलास्थाने स्वं निबध्य खन्धिलाञ्च जाराऽभ्यर्णे प्राहिणोत्। तदा चाकस्मात्सञ्जातप्रमीलाप्रलयः प्रकुपितः सुरापानविवशश्च स कोलिको भूयोऽपि पत्नीधिया तां निहत्य नक्रच्छेदेन च विडम्ब्य सुप्तः । इतश्च रात्रेश्चतुरोऽपि यामान्निरङ्कुशतया स्वैराचारोचितं सुखं तेनोपपतिना सममनुभूय [निशाशेषे] आगता सा **खन्धिला** नापितपत्न्योक्ता, हे सखि! दुरात्मनानेन तव प्रियेणाहं नक्रच्छेदनपुरस्सरमित्थमत्यर्थं कदर्थिता,

१ AHRPD । 'न्तिके निजवित्तग्रन्थिं विमुच्य मु. ॥ २ नापितया प्रत्यपादि हे सखि! BD ॥

तेन मामपि धिगस्तु, याऽहमिदमसमीक्षितमकार्षमिति स्वं निन्दन्ती नापितपत्नी तया **खन्धिलया** किञ्चित्सञ्चारिकोचितं वितीर्य विसृष्टा सती मुखं पिधाय शनैः शनैः स्वगृहं गत्वा स्वे शयनीये शेते स्म। अथोत्थितः कोलिकः स्वस्त्रियं प्रति प्राह, रे रण्डे! यदि पुनरप्येवं चेंद्विधास्यसि तदावश्यं ते शिरश्छेत्स्यामि ।

अथ प्रभाते हे सूर्यदेव! हे भगवन्! हे लोकपाला! हे दिगीशा! यद्यहं सती भवामि तदा मम नासा सज्जा भवत्वितिवादिनीं पुरःस्थितां सज्जनक्रां तामालोक्य सतीयमिति मन्यमानः कोलिको लोकसाक्षिकं तां स्वां पत्नीं स्तौति स्म। स्वकीयं च निशानिर्मितमवगुणं प्रादुरकरोत् । अथ सा नापितवधूरपि प्रभाते समुत्थितेन मिथ्याकलहकरणकुपितेन नापितेन दर्पणेन हता सती कृत्तनक्रं रक्तं च स्वमम्बरं प्रादुष्कृत्य पूत्कुर्वाणा सर्वानपि पौरानमेलयत् । धिगेनं पापिनं नापितं येनेयमबला निरपराधा च नक्रच्छेदेन कलङ्कितेति वादिनः पादपाणिप्रहारैस्तं नापितं निघ्नतः पौरान् विलोक्य सचिन्तत्वेन गतनिद्रो सम्यग्ज्ञातकोलिकनापितस्त्रीकर्मा देवशर्मा समेत्येत्यब्रवीत्—

जम्बूको हुडुयुद्धेन, वयं चाऽऽषाढभूतिना ।
दूतिका परकार्येण, त्रयो दोषाः स्वयं कृताः ॥ ३ ॥

इमं श्लोकं पठित्वा रात्रिवृत्तान्तमशेषं यथाजातमचीकथत् । एतद्वचनं समीचीनमिति मन्यमानैर्जनैस्ते कोलिकनापितप्रिये पुरान्निष्कासिते, पूजितश्च **देवशर्मा** स्वस्थानमगमत् ॥॥ **इति मूर्खदेवशर्म्मतापसकथा ॥ ४२ ॥**

॥ ४३ ॥ दैवानुकूल्ये राणिकतैलिककथा ॥

किमाकुलत्वेन? जनितशुभाशुभविधौ विधौ ह्यनुकूले सर्वं सुन्दरं, यतः—

भग्नाऽऽशस्य करण्डपिण्डिततनोर्ग्लानेन्द्रियस्य क्षुधा,
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा,
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये व्याकुलम् ॥ १ ॥

तेन मूर्खेणाऽनुचितमपि कृतं कर्मोचितमेव स्यात् । यतः—

अनुकूले विधौ सर्वं, सुन्दरं चाक्रिकेण यत् ।
एकपञ्चाङ्गुलीदर्शी, जितो भट्टो द्विमुष्टितः ॥ २ ॥

तथाहि- लघुकाश्मीरबिरुदधारिणीधारायां नगर्यामेकदा सरस्वतीकण्ठाभरणोऽयमिति बिरुदवान् **भुवनाभरणो** भट्टो **भोज**भूपं पञ्चवर्गपरिहारैः पञ्चशतकाव्यैरभिष्टुत्य पञ्चशतपण्डित-मण्डितां सभामभूषयत्।

तत्पाण्डित्यं जिज्ञासुना राज्ञा चैका समस्या पृष्टा, 'काकः किं वा क्रमेलकः' सद्यः-कविकलाकुशलेन तेनाऽपि द्रुतमेव साऽपूरि ।

येनाऽऽगच्छन् समाख्यातो, येनाऽऽनीतश्च मे पतिः।
प्रथमं सखि! कः पूज्यः, काकः किं वा क्रमेलकः ? ॥ ३ ॥

तदा च भृशं तुष्टेन राज्ञा शततुरग-करित्रय-लक्षत्रयकनकदानेन तोषितो भुवनाभरणो राजदत्तभवनमाभरणीचकार। एकदा पार्थिवपण्डितैः सह वादं चिकिर्षुणा तेन पार्थिवोऽभ्यर्थितः, आत्मपण्डितेषु तेन सह वादं कर्तुं समर्थमपश्यन् राजा रहसि मन्त्रिणमित्यभाणीत् । हे मन्त्रिन्! कोऽपि दैवानुकूल्यवान् पुरुषो गवेष्यतां योऽमुना वादे जयेदिति प्रेरितो मन्त्री पुरान्तर्भ्रमन् दूरादुच्छाल्य तैलं तैलपात्रे क्षिपन्तं काणं **राणिक**नामचाक्रिकमपश्यत् ।

नूनमसौ दैवानुकूल्यवानिति मत्वा मन्त्रिणा स राज्ञोऽभ्यर्णे नीतः, कथितश्च तस्य वृत्तान्तः, अङ्गीकृतवादशक्तौ दिव्यदुकूलकनकाऽऽभरणाऽऽदिना विहितविप्रवेषे तस्मिन् पर्षदि तस्थुषि स भट्टोऽपि वादविधित्सया समेत्य **राणिका**भिमुखं स्थित्वा स्वामेकामङ्गुलीमदर्शयत्। तेनाप्यङ्गुलिद्वये दर्शिते भट्टोऽपि चपेटाऽऽकारतया पञ्चाप्यङ्गुलीर्दर्शितवान्। ततस्तेनाऽपि मुष्टौ दर्शिते चाऽनेन जितं, मया च हारितमसौ महान् पण्डितश्चेति भणन् भट्टस्तं प्रणम्य स्वाऽऽवासं ययौ। किमाभ्याम-भिहितमिति संशीतिमता राज्ञा किं त्वया पृष्टं ? तेन च किमुत्तरमदायीति पृष्टो भट्टोऽभाषिष्ट, मयैकामङ्गुलिं दर्शयता एकैवात्मेति पृष्टम्, अङ्गुलिद्वयदर्शनेन तेन च द्वावात्मानौ, एकः सिद्धात्मा द्वितीयः सांसारिकश्चेति ज्ञापितम्। पञ्चाङ्गुलिदर्शनेन मया पञ्च भूतानि जगतीति ज्ञापितं, मुष्टिं दर्शयता तेन च तैरेकीभूतैरेवभूतैरर्थसिद्धिरिति निवेदितं, तेन हे राजन्! तव पण्डितो मम वचनतिरस्कारित्वेन मां जितवान् । मम मनोभाववेत्तृत्वेन अयं च महान् पण्डितो नमस्काराऽर्ह इति भणन् भट्टो भूपेनाभ्यर्चितो निजनगरमगमत् । अन्यदा राज्ञा स **राणिक**तैली पृष्टः, किं तेन पृष्टं किं च त्वयोत्तरितमिति। स स्माह हे देव! एकामङ्गुलिं दर्शयता तेन ज्ञापितं यत्तवैकं नयनमस्ति तदप्यहं स्फोटयिष्यामि, ततोऽङ्गुलिद्वयदर्शनेन मया ज्ञापितं यत्तवाऽहं नयनद्वयं स्फोटयिष्यामीति । ततस्तेन चपेटां दर्शयता ज्ञापितं यदहं त्वां चपेटया हनिष्यामि, ततो मुष्टिं दर्शयता मया ज्ञापितं यदहं त्वा मुष्टिना हनिष्यामीति निशम्य दैवानुकूल्यमेव सर्वत्र सिद्धिकरमिति मन्यमानेन राज्ञा **राणिको** बहुमानभाजनं चक्रे ॥ **इति दैवानुकूल्ये राणिकतैलिककथा** ॥ ४३ ॥

॥ ४४ ॥ अनुचितकर्मारम्भकरणे कपिकथा ॥

अनुचितकर्मनिर्माणं हि न श्रेयसे, यतः—

विश्वासश्चलचक्षुषां परिचयः पण्याङ्गनानां पुन-
श्चौर्याचारवतां सहाऽनुसरणं मैत्री च मूढात्मनाम् ।
स्नेहो द्यूतकृतां रतिर्दुरतीनां प्रीतिः सुरापायिनां,
संवासः परिपन्थिनामनुचिताऽऽरम्भश्च न श्रेयसे ॥ १ ॥

तेनाऽऽत्मनोऽनुचितं व्यापारं कुर्वतो जन्तोरनर्थाऽऽगमः स्यात् । यतः—

अव्यापारेषु व्यापारं, यः पुमान् कर्तुमिच्छति ।
स एव निधनं याति, कीलोत्पाटीव वानरः ॥ २ ॥

तथाहि—**घोरावासे**ऽरण्ये पञ्चशतवानरीपतिः **पवनपुत्रो** नामा वानरः । अन्यदा तस्मिन्नरण्ये **जितशत्रुणा** राज्ञा प्रेषितैः सूत्रधारैर्महतस्तरोरेकस्य महती शाखा कृत्ता ।

द्विधा विधातुमारब्धायास्तस्या विवरे महान्तमेकं कीलकं निधाय ते सूत्रधारा भोजनार्थमगुः । तद्विवरं च कीलके निहिते व्यात्तमेव तस्थौ । इतश्च ताराभिरिव तारापतिर्वानरीभिः समं स्वैरं रममाणः स **पवनपुत्रनामा** वानरस्तत्र स्थाने समागतः, द्विधाकरणाय कल्पितायां भूमौ पतितायां तस्यां शाखायामुपविष्टश्च । तदा चापल्यवशतस्तेन कपिना तस्मिन् कीलके कर्षिते तद्विवरे तदुपरिस्थितस्य तस्य वृषणद्वयं पुच्छं च प्रविष्टं, मिलितं च सम्पुटं, वृषणद्वयपुच्छकर्षणाय तेन कपिना बले विहिते सर्वं त्रुटितं, तया व्यथया कदर्थितः स कपिः परासुरजनि । तस्य परिवारोऽपि तं मृतमवलोक्याऽन्यत्र ययौ ॥ **इत्यनुचितकर्मारम्भकरणे पवनपुत्रनामकपिकथा ॥ ४४ ॥**

॥ ४५ ॥ सत्त्वे चतुर्मित्रकथा ॥

सत्त्वशेवधीनां पुण्यवतामवधीनां पुंसां सर्वं स्यात्, यतः—

अस्थिष्वर्थाः सुखं मांसे, त्वचि भोगाः स्त्रियोऽक्षिषु ।
स्वरेष्वाज्ञा गतौ यानं, सर्वं सत्त्वे प्रतिष्ठितम् ॥ १ ॥

तेन सम्पदि सत्यामपि सत्त्ववतां पदे पदे सम्पदः स्युः, यतः—

सम्पत्त्युपरि सम्पत्तिः, सत्त्वतः पुण्यशालिनाम् ।
जायते गुणपूर्णानां, चतुर्णां सुहृदामिव ॥ २ ॥

तथाहि—**घनारामे** ग्रामे **ऋषभदत्त-ऋषभदास-जिनदत्त-जिनदास**नामानः श्रावका महेभ्यसूनवश्चत्वारः सहजाताः सहवर्द्धिताः सहपांसुक्रीडिताः पुरुषार्था इव नृपोपाया इव परस्परं प्रीतिभाजः सुहृदः पितृभिः परिणायिताः स्वार्थसाधनतत्परा एकदा संभूय रहसीति मन्त्रयामासुः, यदाऽऽत्मभिर्जनकोपार्जितं वित्तं भुज्यते तदस्माकं नोचितं, यतः—

पिउणो लच्छी भइणी, परलच्छी तह य होइ परदारा ।
तेणं सप्पुरिसाणं, न हु जुज्जइ ताण संभोगो ॥ ३ ॥

तेनाऽन्येषु विषयेषु गत्वा यदि धनमानीय भुज्यते तदा युक्तमिति मन्त्रयित्वा ते चत्वारोऽपि स्वां स्वां पत्नीमनुज्ञाप्य स्वैः स्वैः पितृमुख्यपरिवारैरज्ञाता एव सुकृतमेव शम्बलमिति शरीरपरिहितवसनशेषाश्चरणचारिणः कौबेरीदिशमुद्दिश्य स्वस्वगृहान्निर्ययुः । यामद्वयेन भूयसीं भुवं

१. तुला-कथासरित्सागरे तरङ्ग ६०/श्लोक २८ तः, पञ्चाख्यानबालावबोधे घटक २/१ ॥

जग्मुषां तेषां रवेरुदये महानेकः सार्थवाहसार्थो मिलितः, तदा चाऽशोकतरोरधः स्थितांस्तांस्तत्र क्रीडन्त्यश्चतस्रः सार्थपतेः पुत्र्यः प्रेक्ष्य पितरमिति जगुः, हे पितः! अस्मिन् जन्मनि त्वस्माकममी एव वरा इति तदाग्रहेण तेषां रूपस्वरूपमालोक्य प्रकामं प्रमुदितेन तेन सार्थपतिना तास्तेषां विवाहिताः, ताभ्योऽधिगतगृहभेदानां तेषां करमोचनक्षणे सर्वविष-भूतादिदोषा-ऽग्निभय चौरभयाऽपहारिणीश्चतस्रो मुद्रिकाः सार्थेशेन दत्ताः ।

कियन्तं च कालं ताभिः सुखमनुभूय ताभिरप्यनुज्ञातास्ते तथैव प्रस्थिता **लाभपुरपुरं** प्राप्य तस्योद्याने चैत्ये **श्रीनेमिनाथ**मानम्य सहकारतरोस्तले स्थितेषु तेषु हिमदग्धकमलमिव दिवोदितमिन्दुबिम्बमिव म्लानानऽऽनं दधानस्तत्राऽऽरामिकः स्मैति, तैर्मुखम्लानिकारणं पृष्टः सोऽब्रवीत् हे पुरुषोत्तमा! एक एव मम सुतोऽस्ति, स च भूतेन गृहीतः, तेन चाऽहं दूनोऽस्मि, दयया मुद्रिकाप्रभावेण तत्पुत्रं निर्दोषं विधाय पुरश्चलिष्णूनां तेषां स मालिको रिपुराजिजयकारिणीमेकां वंशयष्टिं दत्ते स्म।

क्रमेण शालदुर्गप्राप्तैस्तै**र्महसेनस्य** राज्ञो दुर्गरोधकराणि भूरीण्यपि रिपुकटकानि तस्या यष्टेः प्रभावेण जितानि । तेनोपकारेण तुष्टः कृतज्ञशिरोमणि**र्महसेनोऽपि** सुरूपाश्चतस्रः स्वसुता राज्यार्धं च तेषां ददौ । अथ च तत्रागतेन केवलिना [कथितं] 'दुर्गतत्वेन दत्तमुनिदाननिदानमिदं सम्पत्तिजृम्भितम् इति आत्मनां पूर्वभवानाकर्ण्य' यथेच्छं सुखमनुभवन्तस्ते बहुकरितुरगरथ-पत्तिपरिकरिताश्चत्वारोऽपि सुहृदः स्वपुरं प्राप्ताः श्रावकधर्मं च चिरं परिपाल्य प्रान्ते गृहीतदीक्षा मोक्षमगुः ॥ **इति सत्त्वे चतुर्मित्रकथा** ॥ ४५ ॥

॥ ४६ ॥ द्यूते पुरन्दरपार्थिवकथा ॥

सर्वेषां दोषाणां खनिः कितवकर्म, यतः—

भक्तिं भनक्ति विनयं विनिहन्ति तृष्णां, पुष्णाति तर्जयति वर्यमजर्यवीर्यम् ।
पूजां पराभवति नीतिमपाकरोति, द्यूतं विदूरयति तद् व्यसनाध्वसूतम् ॥ १ ॥

किं बहुना ? द्यूतकृतां हि पदे पदे विपदः स्युः, यतः—

सर्पक्रीडामिवाऽव्रीडां, द्यूतक्रीडां करोति कः ।
यद्वशात्पार्थिवः प्राप, विपदो हि पदे पदे ॥ २ ॥

तथाहि—**सिद्धपुरे** पुरे **पुरन्दरो** नाम पार्थिवः स चाऽन्यदा **सुन्दरेण** लघीयसा सोदरेण दूरोदरक्रीडां कुर्वन् **सारिण्या** देव्याऽमृतसारण्या वाण्या वारितः । हे नाथ! द्यूतान्नलपाण्डवादयोऽपि भूयांसो भूपाः पदे पदे पराभवं निन्दां च प्रापुः, यतो द्यूतक्रियैा सर्वेषां व्यसनानां मूलं, यतः—

स्थानं शून्यगृहं विटाः सहचराः स्निग्धश्च वेश्याजनः ।
पार्श्वद्याः परमोषिणः परिजनाः कादम्बरीपायिनः ॥

१. AHB । क्रीडा मु. ।

व्यापारश्च परप्रियापरिचयः ख्यातिश्च वित्तव्ययो।
येषां द्यूतकृतां कथामपि कथं कुर्यात्समं तैः सुधीः ॥ ३ ॥

तेन निर्मोकं भुजङ्गम इव मुञ्चेदं दूरोदरम् इत्यादिवचनैस्तया राज्ञ्या मन्त्रिप्रमुखैश्च लोकैर्वारितोऽपि पुरन्दरः शशाङ्कः कलङ्कमिव द्यूतं न जहौ । अन्यदा जितराज्येन तेनाऽनुजेन पुरान्निष्कासितस्तया सारिण्या देव्या **गुणचन्द्रेण** पुत्रेण च युतः स राजा पथि व्रजन् क्वाऽप्यरण्ये [स्वप्रियायुतमेकं भिल्लं ददर्श ।

तेन सार्धं] स्वं शिरस्तस्य च प्रियां पणीकृत्य द्यूते जितां कज्जलैर्जनितामिव श्यामलां, दौर्भाग्यैर्निर्मितामिव कुरूपां, शुनीमिव परुषभाषिणीं, कठोरपादपाणिं, **कुपाणि**नामभिल्लभामिनीं मूर्त्तिमतीं विपदमिवादाय पुरः प्रस्थितः, अथ क्वासौ सपत्नी वैरिणीति विचिन्त्य जलग्रहणमिषेण तां **सारिणीं** कूपान्तः प्रक्षिप्य केनाप्यन्येन सह सा गतेति सा **कुपाणिः** पुरन्दराय जगौ । सोऽपीतस्ततस्तां विलोक्य साक्षादलक्ष्म्येव तया भिल्ल्या सुतेन च सहितोऽध्वनि गच्छन्नेकां महतीं निम्नगां प्राप्य तां भिल्लीं सुतं च युगपत्तारयितुमशक्तः स राजा इति आदौ भिल्लीमादाय नदीं प्रविष्टो मकरेण गलितो, भिल्ली च जलान्तःपतनेन मृता । पुरुषभारेण प्लवितुमसमर्थः स मकरस्तटे लग्नः धीवरैश्च विदारिते तस्योदरे निर्गतः शीतवातैश्च लब्धसंज्ञः स राजा धीवरैर्दासीकृत्य गृहे रक्षितो धीवरकर्माणि चक्रे । अन्यदा मीनग्रहणधिया नदीं प्रविष्टः स पुरन्दरो नदीपूरेण प्लावितो मृत्वा नरकं गतः।

इतश्च जलग्रहणार्थमागतैः सार्थेशनरैर्निष्कासिता ललितशीलजलसारिणी सा **सारिणी** राज्ञी सार्थेशेन पृष्टा सती यथाजातस्वचरित्रवादिनी भगिनीव समीपे रक्षिता । इतश्च स्मरस्येव तस्य सौभाग्येन मोहितया व्योम्नि व्रजन्त्यैकया विद्याधरप्रियया स **गुणचन्द्रो वैताढ्ये** नीतः, बहुविद्यादानपुरस्सरं **सुरसुन्दरी**नामस्वसुतां च दत्त्वा क्रमेण सुन्दरं तस्य पितृव्यं निष्कास्य राज्ये न्यधायि । अन्यदा तत्राऽऽगतेन गृहीतप्रभूतप्राभृतेन राज्ञो मिलनाय व्रजता तेन सार्थेशेन सह स्वपुरं विज्ञाय पुरुषवेषधारिणी सा **सारिणी** भूपसभां प्रविष्टा सती राजानं स्वसुतमुपलक्षयामास।

भूरिषु सभ्येषु सत्स्वपि जननीरागेण तन्मुखं पश्यता भूपेन कोऽयमिति पृष्टेन सार्थेशेन रहसि सत्ये कथिते सति सत्यमियं मम मातेति मुदितो राजा पश्यतामपि पार्षद्यानां पुरः समुत्थाय तत्पादौ प्रणम्य प्रोचिवान्, हे मातः ! प्रकटय स्वरूपं सुखय च मामर्भकमित्यभिहितया नेत्राम्बुभिर्निर्जितसारिण्या तया **सारिण्या** स्वरूपमाविष्कृत्य सुतमूर्धानमुच्चुम्ब्य अशेषे स्ववृत्तान्ते कथिते सति राजाऽप्यात्मनः पितुश्च यथाजातं सर्वव्यतिकरं निवेद्य सुतं च राज्ये निवेश्य *आदत्ततपस्यो मुक्तिमगात्* ॥ ***इति द्यूते पुरन्दरपार्थिवकथा ॥ ४६ ॥***

॥ ४७ ॥ लोभविषये सागरश्रेष्ठिकथा ॥

आस्तामन्येषां गुणानां विस्तारः, पराभूतपीयूषमयूखमहसामपि यशसां नाशं करोति लोभः। यतः—

नाशं यो यशसां करोति रजसां व्रातोऽनिलानामिव ।
त्रासं यो महतां तनोति वयसां पातः शराणामिव ॥
शोभां यो वचसां हिनस्ति पयसां वृष्टिर्घनानामिव ।
त्यक्त्वा कृत्यकरीन्द्रकुम्भशरभं लोभं शुभंयुर्भव ॥ १ ॥

किं बहुना ? सर्वेषां दोषाणां खनिर्लोभ एव। यतः—

आकरः सर्वदोषाणां, गुणग्रसनराक्षसः।
कन्दो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः ॥ २ ॥

तेन लोभादेवानर्थसार्थः समभ्येति । यतः—

पुमाननर्थमाप्नोति, लोभक्षोभितमानसः।
यतो लोभपराभूतः, सागरः सागरेऽपतत् ॥ ३ ॥

तथाहि—सागरतीरवर्त्तिनि **धनसागर**नाम्नि नगरे बहुधनधान्यलक्ष्मीसागरः **सागर**नामा श्रेष्ठी, तस्य च **धनदत्त-धनदेव-धनसार-धनक**ाऽभिधानानां चतुर्णां पुत्राणां **धनश्री-धनदेवी-धनसुरी-धनवती**संज्ञाश्चतस्रः स्नुषाः।

कृपाण इव सुबद्धमुष्टिः, कृतान्त इव क्रूरदृष्टिः, कितव इव विहितविश्ववञ्चनः, काक इव कठोरवचनः, सर्प इव कुटिलगतिः, पामर इव कलहमतिः, सज्वर इव प्रकामाऽनुपशान्त-तृष्णातिरेकः, कामुक इव दूरीकृतविवेको, प्रतिदिनं निन्दितनिखिलनागरः स सागरः कृपणत्वेन पुत्रादिपरिवारस्यापि विश्वासमकुर्वाणः, पीवरचीवरवेषम्बिभ्राणः, सञ्जितशृङ्खलाऽर्गलाऽञ्चितकपाट-प्रकारे वेश्मद्वारे निखातस्थाणुरिव तत्रस्थः स्वयमादत्तदण्डो यम इवाहर्निशं तिष्ठति। का वार्त्ता भिक्षाचराणां ? काकादिभिरपि तत्यजे तस्य द्वारम् । एकदा नभसि व्रजन्त्येका मन्त्रतन्त्रयन्त्रौषधा-दिकलाकुशला **कुशलानाम**योगिनी गवाक्षे तस्थुषीः श्वसुरावासे सुखरहिता म्लानमुखास्तस्य स्नुषा अवलोक्य कौतुकेन तासां पुरस्तादुत्तीर्णा ताभिश्च वितीर्णाऽऽसना गोत्रदेवीव वन्दिता सा समाधिप्रश्नपूर्वकं भवतीनामवैधव्यं भूयादित्याशिषं ददौ । ततः पितृगृहसत्कैः स्वस्वप्रसेवकमध्यस्थितैरवैला-सुरकुसुम-क्रमुक-कर्पूर-कस्तूरी-कुङ्कुम-कक्कोलादिताम्बूल-खर्जूर-खारिक-चारुली-चारबी-बदाम-पस्तिकादिमेवाजाति-शर्करा-मोदकादिपक्वान्नैस्ताभिर्भृशं तोषिता सा योगिनी पाठसिद्धं नभोगति-विद्यामन्त्रं दत्त्वा पक्षिणीवाऽऽकाशमुत्पपात ।

एकदा निशि पत्यादिषु सुप्तेषु ताः स्नुषास्तेन मन्त्रविधिनाऽधिवासिते काष्ठेऽधिरुह्य **रत्नद्वीपं** गताः, स्वैरं च तत्र कृतक्रीडा निशायामेव समेत्य स्वस्वस्थाने शेरते स्म । एवं प्रत्यहमन्येष्वपि

द्वीपवनशैलादिषु गत्वा समागतवतीषु तास्वेकदा पशुचारणादिगृहकर्मकरो **दामलाह्वः** किङ्करः शीतेन पराभूतस्तस्य काष्ठस्य विवरे प्रविष्टः। अथ ता अपि मन्त्राऽधिवासिते तस्मिन्नेव काष्ठेऽधिरुह्य सुवर्णद्वीपं गताः तत्र क्रीडन्तीषु तासु काष्ठतो निर्गतः स **दामलो**ऽपि सुवर्णद्वीपं विलोक्य तुष्टः सुवर्णस्यैकामिष्टिकामादाय तथैव तत्र सुप्तः, ता अपि काष्ठाधिरूढाः समेत्य सुप्ताः। अथ प्रभाते तस्य कनकस्य लाभेन मत्तं पशुचारणादिकर्म तमकुर्वाणं **सागरः** स्माऽऽह, हे पुत्र! कथं न करोषि स्वं कर्म? अथ स्वस्वरूपमकथयता तेन भव्यभोजनादिलो-भितेन स्नुषावृत्तान्ते कथिते शरीरान्तःप्रसृततृष्णाकृष्णाहिगरः स **सागरस्तस्मिन्** काष्ठे सुप्तः अथ तत्रैव काष्ठेऽधिरूढास्ता **रत्नद्वीपं** गत्वा गृहमागताः, सागरोऽपि बहूनि रत्नान्यादाय काष्ठान्तः प्रविष्टः क्षेमेण गृहमागतः। अन्येद्युरन्तःप्रविष्टसागरे तस्मिन् काष्ठेऽधिरूढास्ताः **सुवर्णद्वीपं** गताः, लोभसागरः **सागरो**ऽपि प्रभूतसुवर्णेन काष्ठं भृतवान्। सङ्कीर्णतया दुःखेन स्वयमपि तत्र प्रविष्टवान्। अथ ताः काष्ठाधिरूढाः स्वपुरमागच्छन्त्यः सागरोपरि समेताः, तदा धनश्रीरन्याः प्रत्युवाच, हे सख्यः! कथमद्य काष्ठं द्रुतं न चलति? ताः स्माहुः हे भगिनि! बहुभिर्वासरैरेतत्काष्ठं जीर्णं जातमस्ति, तेनैतत्सागरान्तर्मुच्यतामन्यच्चादीयतामिति, तयापि तथेत्यङ्गीकृते **सागरः** स्माह हे स्नुषा! अहमत्रास्मि, तत् श्रुत्वौषधैर्विनाऽयं व्याधिर्गच्छतीति मत्वा ताः ससागरं तत्काष्ठं सागरान्तः प्रक्षिप्यान्यस्मिन् काष्ठे चाधिरूढाः स्वाऽऽवासे समेताः, सागरान्तः पतितः सागरोऽपि द्विधापि नीचैर्ययौ॥ **इति लोभविषये सागरश्रेष्ठिकथा ॥ ४७ ॥**

॥ ४८ ॥ धनवतां माने घेघा-मेघाकथा ॥

विशिष्टकुलजातानामपि पुंसां धनैरेव महत्त्वं, यतः—

धनैरेव कुलीनाना-मपि मानसमागमः ॥
न हेमपुष्पपुष्पेषु, प्रीतिः पर्युषितेषु यत् ॥ १ ॥

किं बहुना? श्रियं विना पुमांसो न शोभन्ते, यतः—

सरोवरमिवाऽवारि, निष्पत्र इव पादपः।
निर्देवमिव देवौको, नरो नाऽऽभाति निर्धनः ॥ २ ॥

तेन सम्बन्धेऽपि धनादेर्गौरवं, यतः—

समानेऽपि हि सम्बन्धे, मानं धनवतां पुनः।
घेघा-मेघाख्ययोः स्वस्रा, भेदोऽकारि हविःक्षणे ॥ ३ ॥

तथाहि—**अचलग्रामे घेघामेघा**नामानौ द्वौ सहोदरौ, ज्यायान् **घेघाख्यः** पूर्वकृतसुकृतैर्वैश्रमण इव श्रीमान्, लघीयान् **मेघाह्वस्तु** पूर्वकृतदुष्कृतैः श्रमण इवाकिञ्चनः। अन्यदा **मेघाई**संज्ञया तयोः स्वस्रा स्वदारकस्य दारकर्मण्याकारितौ स्वौ सोदरौ।

अथ सुवर्णमणिभूषणभरप्रवरचीवरादिभूषितः स्वभगिनी-भागिनेयी-भगिनीपतीनामुचितमाभरणवसननेपथ्यप्रमुखं प्रभूतं मातुलीयमादाय **घेघाख्यस्तत्राऽऽययौ** । दुर्गतत्वेन सुन्दरेतरवेषः शरीरशेष एव **मेघाख्योऽपि** तत्रागतः । अथ **घेघाख्येन** तत्रागतेन सर्वेऽपि मातुलीये **दत्ते सति** भोजनाऽवसरे तयोर्द्वयोरपि सोदरयोर्निकटस्थयोः पृथक्पृथक्स्थालस्थयोश्च **मेघाई** परिवेषयितुमागता सती ज्यायसो लघीयसश्च स्थाले पक्काऽन्नकूरादिभेदं विधाय घृतस्यापि भेदं चक्रे । तदाऽग्रजस्य स्थाले प्रभूतं घृतमात्मनश्च स्थाले भृशमल्पमवलोक्य **मेघाख्यो** भ्राता मूर्द्धनि स्वं स्थालं निधाय समुत्थाय चैकं दोधकमभ्यधात् ।

अरथने आदर छे घणो, अवर म कारण जोइ ।
घेघा घलहल नामीयें, मेघा टीप न होइ ॥ ४ ॥

इति निशम्य लोकैर्निन्दिता मेघाई । तौ सोदरौ स्वपुरं गतौ **॥ इति धनवतां मान इत्यर्थे घेघामेघाकथा ॥ ४८ ॥**

इति पं॰ श्रीकमलविजयगणिशिष्य पं॰ श्रीहेमविजयगणिविरचिते
श्री कथारत्नाकरे द्वितीयस्तरङ्गः
समाप्तः
॥ श्रीरस्तु ॥

॥ ३ ॥ तृतीयस्तरङ्गः ॥

॥ ४९ ॥ धनमहत्त्वे श्री रामकथा ॥

सौभाग्यादिगुणभूषितोऽपि धनिकत्वेनैव पूज्यः स्यात्, यतः—

गुणगणैः सहितोऽपि हि निर्धनो, भवति भूरिपराभवभाजनम् ।
लुठति किं विरसा न रसातले, स्वगतिरम्यसुमा सुगुणाऽपि हि ॥ १ ॥

किं बहुना ? श्रियमेव सर्वगुणाः श्रयन्ति। यतः—

यस्याऽस्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ २ ॥ [भर्तृहरिशतके]

तेनोत्तमवंशसम्भवानामपि पुंसां विभवैरेव गौरवम्। अत्राऽर्थे लोकोक्ता श्रीरामकथा यथा-

कुलं च शीलं च बलं च तादृग्, मान्यं न यादृग् विभवो हि मान्यः।
श्रीरामचन्द्रेऽपि वने यियासो नैंवातिथेयं गुरुरप्यकार्षीत् ॥ ३ ॥

तथाहि—**अयोध्यायां कैकेयी**प्रार्थितवरविनाशितमनोरथस्य **दशरथस्य** निर्देशेन **सीतालक्ष्मण**युतः **श्रीरामचन्द्रो** वनवासमङ्गीकृत्य नगरीतो निर्गच्छन् **लक्ष्मणम**भाणीत्, हे बन्धो! गुरुपादौ प्रणम्य पुरो गम्यते, **लक्ष्मणः** स्माऽऽह, हे पूज्यपादाः ! शरीरसङ्गतसिचयमात्र-धारिणां केवलं चरणचारिणां प्रतिश्रुतवनवासानां विमुक्तविनीतावासवसतभूमिकसंनिवासानां नाऽऽत्मनामयं गुरुपादप्रणामावसर इति वारितमपि राममागच्छन्तमाकर्ण्य गुरुरिति दध्यौ। नूनमेष वनं व्रजन्नकिञ्चनत्वेन किञ्चिद् यियाचिषुरिवाऽभ्येति । तेनाधुनामुना मिलनं न श्रेय इति मत्वा कायमानान्तः-कुटीरं लीनकाय एव **वसिष्ठो** गुरुर्ध्यानं कुर्वन्नस्तीति स्वशिष्यैस्तत्राऽऽगताय **रामाया**ऽज्ञापयत्। **रामो**ऽपि **लक्ष्मण**वचनं समीचीनं जानंस्ततो वनं प्रत्यचालीत्। बहुकालवन-वासमनुभूय प्रियतमाऽपहारप्रकटितप्रभूताऽपराधकारणं निखिलक्ष्मापालकीर्त्तिकुमुदिनी-प्रोन्मूलनैकवारणं प्रचण्डदोर्दण्डलीलातुलितकैलासं प्रबलप्रचुरपराक्रमं परास्तपौलोमीप्रमुखाऽप्सरो-विलासम् अपारपारावारपरिखापरिकरितलङ्कादुर्गाधिनाथं सर्वत्रसूत्रितसञ्चरन्नक्तञ्चरसञ्चयसनाथं सुरासुरनाथनिकरनिषेवितकारासदनं **दशवदनं** वैरिणं निहत्य स्वकीर्त्तिस्तम्भमिव **विभीषणं** तत्र राज्ये निधाय च अनेकाऽनेकपमदपानीयप्रवाहप्लावितपथः स्वैरविहारिहयहेषारवव्याकुलितताराप्थः प्रचलद्रथचीत्कारचलितदिग्दन्ताबलः प्लवमानानुप्लवपत्तिप्रकरपदप्रहारजर्जरितभुजङ्गमकुलः *प्रभूतवर्यतूर्यरवपूरितरोदसीकन्दरः सुरासुरविद्याधरनरकिन्नरपरिकरसुन्दरः समाक्रान्ताऽखिलदिग्मण्डलः*

प्रणतप्रभूताऽऽखण्डलः निहतनिखिलवैरिवनितावर्गनयननीरनिषिक्तप्रतापपादपमूलः सज्जनजननयनानुकूलो जयश्रीभुजाभासुरकण्ठदेशः सकलसाम्राज्यकमलाकेलिसन्निवेशो नीतिकैरविणीचन्द्रः **श्रीरामचन्द्रः** स्वपुरमागच्छन् **वसिष्ठाऽऽश्रममासन्नं** विज्ञाय सविनयं **सौमित्रिणा** विज्ञप्तः, हे देव! गुरोश्चरणाऽरविन्दवन्दनाय साम्प्रतमयमवसरः ।

तत्रागतः **श्रीरामोऽपि** प्रधानाऽऽसनदानाऽऽदिना भूयसीं प्रतिपत्तिं कुर्वाणं गुरुं प्रत्यवादीत्—

स एव त्वं स एवाऽऽहं, स एवायं त्वदाऽऽश्रमः।
पूर्वं निरादरोऽभूस्त्वं, साम्प्रतं किमु सादरः ? ॥ ४ ॥

रामेणेत्युक्ते प्रभुणा सत्यं वक्तव्यमिति नीतिनिपुणो **वसिष्ठोऽ**प्यभाषिष्ट—

स एव त्वं स एवाऽहं, स एवाऽयं मदाऽऽश्रमः।
पूर्वं तु निर्धनोऽभूस्त्वं, साम्प्रतं हि पुरन्दरः ॥ ५ ॥

तेन हे पृथिवीपुरन्दर! पुनरपि शृणु—

धनमर्जय काकुस्थ!, धनमूलमिदं जगत्।
अन्तरं नैव पश्यामि, निर्धनस्य मृतस्य च ॥ ६ ॥

इति गुरोर्वचनं सम्यग्मन्यमानः **श्रीरामोऽ**पि स्वां पुरीमलञ्चकार ॥ **इति मानकारणं धनमित्यर्थे लौकिकोक्ता श्रीरामकथा ॥ ४९ ॥**

॥ ५० ॥ मूर्खद्विजकथा ॥

मूर्खा हि कार्याकार्यविवेकविकलाः स्युः, यतः—

मूर्खत्वं हि सखे! ममापि रुचितं यस्मिन् यदष्टौ गुणा।
निश्चिन्तो बहुभोजनोऽत्रपमना नक्तंदिवा शायकः॥
कार्याकार्यविचारणान्धबधिरो मानापमाने समः।
प्रायेणाऽऽमयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥ १ ॥

तेन मूर्खाणां चरित्राणि हास्यकारीणि । यतः—

हास्यकृच्चरितं नूनं, बालिशानामहर्निशम्।
पूपिकार्थं श्रितवतो-र्मरणं द्विजयोरिव ॥ २ ॥

तथाहि—**बोडासणग्रामवासिनौ खेताख्यखीमाख्यौ** मूर्खौ त्रयीमुखौ **सुमुखग्रामे** भिक्षार्थं गतौ । तत्र पूपिकापञ्चकं विधाय मिथो भागं विधातुमसमर्थौ सन्तौ तौ यः प्रथमं ब्रूते तस्य पूपिकाद्वयमन्यस्य त्रयं चेति पणं विधाय प्रसारितपाणिपादौ व्यात्तवदननयनौ निरुद्धनिःश्वासोच्छ्वासौ भूमिसुप्तौ तौ तथाऽऽवस्थौ विलोक्य ग्रामीणैर्लोकैर्हा वराकाविमौ मृताविति-वधार्यैकस्यामेव त्रिकाष्ठिकायां निधाय बाढं च निबध्य बलवद्भिश्चतुर्भिराभीरैरुत्पाट्य पुरस्सरेणैकेनाग्रिधरेण सह स्मशाने नीतौ, विवसनौ तौ चितान्तः प्रक्षिप्य तैरग्निर्ज्वालितः।

तदा चाऽतुलज्वलनतापविह्वलौ यथाजातावुद्घाटितमस्तकौ साक्षात्पिशाचाविव चिता-मध्यादुत्थितौ तौ दृष्ट्वा ते पञ्चाऽपि पुरतो नष्टाः, पृष्ठतश्च द्वयं तव त्रयं ममेति वादिनौ तावपि पुराभिमुखं धावितौ । ग्राम्यैरपि यष्टिमुष्टिप्रहारैः प्रकामं निहतौ स्ववृत्तान्तं कथितवन्तौ, धिग्मूर्खचेष्टितमिति लोकैर्निन्दितौ कृपया च दत्तवस्त्रौ तौ स्वस्थानं गतौ ॥ **इति मूर्खद्विजकथा** ॥ ५० ॥

॥ ५१ ॥ लोभे साधवविप्रकथा ॥

विनयप्रतिपत्तिप्रीतिविनाशकारणं हि लोभ एव, यतः—

कोहो पीइं पणासेइ, माणो विणयनासणो ।
माया मित्ताणि नासेइ, लोहो सव्वविणासणो ॥ १ ॥ [दसवै० ८/३८]

तेन लोभपराभूतचित्ता हि किं किं न कुर्वन्ति ? यतः—

यद् दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं।
गाहन्ते गहनं समुद्रमतनुक्लेशां कृषिं कुर्वते॥
सेवन्ते कृपणं पतिं गजघटासङ्घट्टदुःसञ्चरं।
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम् ॥ २ ॥

किं बहुना ? लोभवतामेव क्लेशः । यतः—

के न यान्ति धनलोभपिशाच-ग्रस्तचित्तशिशवोऽसुखमुच्चैः ।
ताम्ररूप्यकनकानि विहाय, ब्राह्मणोऽसुखमवापदतुष्टः ॥ ३ ॥

तथाहि—**सुरसुन्दरग्रामवासिनः** सर्वदा निर्धना **माधवकेशवराघवसाधवनामानश्चत्वारः** सुहृदो द्विजन्मानः पिशाचेनेव दौर्गत्येन परिभूताः सन्तो गृहान्निर्गत्य भुवि भ्रमन्तः **सपाद-लक्षशैलमूलनिवासिनं सिद्धनाथनामानं** योगिनमाराधयामासुः ।

द्वादशवर्षान्ते तेषां विनयप्रतिपत्त्या रञ्जितेन योगिना मूलिका दत्ताः, यत्रैताः पतन्ति तत्र खननीयमित्यभिधाय तेषामेकैका सिद्धिमूलिका दत्ता । सिद्धिमूलिकापाणिषु तेषु कौबेरीं दिशं व्रजत्सु कुत्रापि भूमिप्रदेशे **माधवस्य** हस्तात्सिद्धिमूलिका पतति स्म । तत्र च तेन खनिते निर्गतं ताम्रं, तं च **माधवं** विमुच्य पुरश्चलितेषु तेषु **केशवस्य** हस्तात्सिद्धिमूलिका पतिता । तत्र तेनाऽपि खनिते निर्गतं रूप्यं, तच्च **केशवं** च हित्वाऽग्रतश्चलितयोर्द्वयो **राघवस्य** करात् सिद्धिमूलिका पपात। तत्राऽपि तेन खनिते निर्गतं कनकं विलोक्य **राघवो माधवकेशव-साधवा**नाकार्य त्रीनपि प्रोचे, यथेच्छमेतत्कनकं गृह्यतामनुगृह्यतामयं च स्वसुहृद् **माधवकेशवौ** तु त्यक्ताम्ररूप्यौ तद्वाचमङ्गीचक्रतुः, [परं साधवस्तदप्यगृहीत्वाऽग्रतश्चचाल] । तैर्वारितस्याऽपि प्रभूतलोभाऽभिभूतस्य मणिमाणिक्यहीराऽऽदिबहुमूल्यवस्तुवाञ्छया पुरःप्रस्थितस्य **माहेश्वर-**

मण्डलान्तः पतितस्य तस्य साधवस्य मूर्ध्नि सहस्रभारमयं माहेश्वरं चक्रमपतत् । तेन चक्रभारेण च भृशं पीडितः साधवो-ऽहोरात्रेण परासुरभूत् । ते त्रयोऽपि सुहृदो गृहीतप्रभूतहेमभाराः स्वपुरमागत्य सुखिनो बभूवुः ॥ **इति लोभे साधवविप्रकथा** ॥ ५१ ॥

॥ ५२ ॥ स्त्रीचरित्रं विभाव्य वैराग्यं कर्त्तव्यम् इत्यर्थे भर्तृहरिनृपकथा ॥

योषितो हि कपटपटीयस्यः, यतः—

कवडाणं केलिकुलं, खाणि खेआण मूलमसुहाणं ।
पावाणं पट्टणयं, महिलं अहिलसइ को मूढो ॥ १ ॥

तेनैतासां चित्तवृत्तिं ज्ञातुं न कोऽप्यलं, यतः—

पयोधिपारं सुरशैलाभारं, दम्भोलिसारं पवमानचारम् ।
ज्ञातुं भवेयुर्बहवः समर्थाः सुलोचनानां न च चित्तवृत्तिम् ॥ २ ॥

तथाऽपि स्त्रीणां चरित्रं स्वधिया सम्यग् विज्ञाय केऽपि सुधीशिरोमणयो विरक्ताः स्युः, यतः—

एणीदृशां वीक्ष्य विचेष्टितानि, भवन्ति के नैव विरक्तचिताः ?।
विलोक्य भूयः स्वकमातुलिङ्गं, योगं दधौ भर्तृहरिर्नरेन्द्रः ॥ ३ ॥

तथाहि—**श्रीमत्यामवन्त्यां** नगर्यां सकलशास्त्रपारीणः पुण्यवतां धुरीणः **श्रीभर्तृहरि**-नरेन्द्रः । स च महान्तमप्यन्यमवरोधं हित्वा सौभाग्यपराभूतकमलया **कमलया** देव्या सुखमनुभवति स्म । इतश्च तन्नगरनिवासी कविकलाभार्गवो **भार्गव**नामा द्विजन्मा जन्मदुर्गतो धनाऽभिलाषी समलङ्कृत**सिप्रा**तटं **सिद्धवटं** नित्यमस्तवीत् ।

अन्यदा तत्स्तुतिरञ्जितया तद्वटवासिन्या देव्या वटवासी स्वरमणोऽभाणि, हे प्राणनाथ! स्तुतिकर्तृत्वेन विप्रत्वेन च द्विधाप्यसौ मान्यः, इत्युक्तः स वटवासी जराद्युपद्रवचूरकमेकं बीजपूरकं तस्मै दत्त्वा तिरोदधे । भार्गवोऽपि तमादाय गृहमागत्य च तं भोक्तुमुपविष्टो दध्यौ यदजरस्य सजरस्य वा मम भिक्षैव शरणं, तेनेमं धर्मवतामवधये न्यायसेवधये प्रजाजनकाय **भर्तृहरये** भूमिपतये ददामि, यतो नीतिमति भूमिपतौ सति प्रजा सुखिनी । यतः—

वर्षा नदीनामृतुराट् तरूणा-मर्थो नराणां पतिरङ्गनानाम् ।
न्यायप्रधानश्च नृपः प्रजानां, गतं गतं यौवनमानयन्ति ॥ ४ ॥

इति मत्वा स तं मातुलिङ्गं राज्ञे दत्त्वा तद्गुणं गदितवान् । राजाप्यमृतफलस्येव तस्य दानेन तुष्टो जीविताहँ कनकदानपूर्वं भार्गवं विसृज्येति चिन्तितवान् । राज्ञां हि जरा भूषणं, यतः—

विज्जो राया मंती, समणा पणं च आसवो मग्गो ।
देवो सत्थं दंडी, एए अरहंति जरजुत्ता ॥ ५ ॥

किञ्च स्त्रीणां च जरा विडम्बिनी, यतः—

चन्द्रे लाञ्छनता हिमं हिमगिरौ क्षारं जलं सागरे ।
रुद्धाश्चन्दनपादपा विषधैररम्भोरुहं कण्टकैः ।
स्त्रीरत्नेषु जरा कुचेषु पतनं विद्वत्सु दारिद्रता ।
सर्वं रत्नमुपद्रवेण सहितं दुर्वेधसा निर्मितम्॥ ६ ॥

तेनाऽनेन भक्षितेन मम किं ? स्त्रीणां चाऽतीवसौभाग्यदमिति मत्वा तेन राज्ञा प्राणेभ्योऽप्यभिमतायाः **कमलाया** देव्यास्तत्फलमदायि, तयाऽपि स्वाभिमताय महामात्राय तस्मिन् फले दत्ते स दध्यौ—

अलङ्करोति हि जरा राजामात्यभिषग्यतीन् ।
विडम्बयति पण्यस्त्री-मल्लगायकसेवकान् ॥ ७ ॥

तेनैतत्फलं जराविनाशित्वेन ममाऽभिमतायाः **कामसेनाया** वेश्याया महोपकारकृदिति तेन महामात्रेण दत्तं तत्फलं प्राप्य साऽपि वेश्येति दध्यौ, किमनेन जग्धेन सदैव पातककारिण्या मम? किन्तु विश्वोपकाररसिकस्य भर्तृहरिभूपस्यैतद्यच्छामीति सा सुवर्णस्थालस्थितं प्रवर-पट्टकूलपिहितं पण्याङ्गनापङ्क्तिप्रौढगीयमानाऽतुलमङ्गलं तत्फलं राज्ञः पुरः प्राभृतीचकार। तत्फलं सम्यगुपलक्ष्य पणस्त्रीपरम्परया च तस्य सर्वं वृत्तान्तं विज्ञाय सञ्जाताभङ्गवैराग्यरङ्गरञ्जितहृदयः सहृदयः स राजा सभ्यानां पुरस्तादिदमवादीत् । यतः—

यां चिन्तयामि सततं मयि सा विरक्ता, साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परिखिद्यति काचिदन्या, धिक् तां च तं च मदनं च इमां च मां च ॥ ८॥

इत्यभिधाय बीजपूरवृत्तान्तं च सर्वं सभ्यानां निवेद्य द्विनवतिलक्षग्राममण्डितमालवा-धिपत्यं च तृणमिव विमुच्य भर्तृहरिर्योगमङ्गीचकार ॥ **इति स्त्रीचरित्रं विभाव्य वैराग्यं कर्त्तव्यमित्यर्थे भर्तृहरिनृपकथा** ॥ ५२ ॥

॥ ५३ ॥ वेश्यासङ्गत्यागे कालिदासकथा ॥

खललेखास्विव निःस्नेहासु वेश्यासु कः प्रणयः ? यतः—

कः कोपः कः प्रणयो, नटविटहतमस्तकासु वेश्यासु।
रजकशिलातलसदृशं, यासां जघनं च वदनं च ॥ १ ॥

एता हि श्रीलोभविह्वलाः कुष्ठिभिरपि स्वैरं रमन्ते, यतः—

रत्येवासमसायकः पशुपतिः पुत्र्येव भूमिभृतः।
शच्येवाप्सरसां पतिर्मुररिपुः पुत्र्येव पाथोनिधेः।

१. भीरुवर्गो AH ।

रोहिण्येव सुधामरीचिरवनेः पुत्र्येव पौलस्त्यजि—
द्बाहुभ्यां परिरभ्यते गणिकया वित्तेहया कुष्ट्यपि ॥ २ ॥

किं बहुना ? प्रेमपराङ्मुखाः पण्यस्त्रियः स्वार्थकृते नररत्नमपि विनाशयन्ति । यतः—

पुण्यपाथोजशस्त्रीषु, पण्यस्त्रीषु रमेत कः ।
यत्स्वगर्वकृते वेश्या, कालिदासममारयत् ॥ ३ ॥

तथाहि—धाराधीशः **श्रीभोजधराधीशो**ऽन्यदा राजपाटिकायां क्रीडां कर्तुं व्रजन्नेकस्मिन् पवनेनाऽनाहतपयसि सरसि हंसचक्रवाकबकादिद्विपदाभावेऽपि कम्पमानमेकमम्बुजमालोक्यैकं श्लोकं विधाय विहितविविधविनोदः स्वपुरं प्रविश्य चास्थानीं स्थितो **माघादीनां** स्वकीयानां पञ्चशतपण्डितानां पुरस्तात्तं श्लोकमपाठीत् । यतः—

[1]अनिलस्यागमो नास्ति, द्विपदं नैव दृश्यते॥
वारिमध्ये स्थितं पद्मं, कम्पते केन हेतुना ? ॥ ४ ॥

भोः पण्डिताःपूर्यन्तामसौ समस्येति पृष्टास्ते तां समस्यां नानाभावैः पूरयन्ति स्म। तथापि कविकलाकमलमरालीमण्डितमनोऽम्भोजो **भोजो** न चमच्चक्रे। विहिताऽहोरात्राऽवधिषु तेषु स्वस्वगृहाणि गतेषु राजापि सौधान्तरमगात्। तं वृत्तान्तं सम्यगवधार्य पठितसमस्याश्लोका राजचामरधारिणी कामलतानामपणाङ्गना गृहं गता सती गृहान्तस्तस्थुषे लब्धवाग्देवीवराय कविप्रवराय मनोभावसूचकवाग्विलासाय **कालिदासाय** तां समस्यां जगौ । सरस्वतीप्रसादेन कालिदासेनाऽपि तत्कालमेव कृतं समस्यापूरकश्लोकमधीत्याऽपरेऽहनि राजसभां व्रजन्ती वेश्या दध्यौ। यदमुं श्लोकं कालिदासकृतं राजा ज्ञास्यति तदा प्रसादमस्य विधास्यति, न ममेति मत्वा सा पापा कालिदासं निहत्य भुवोऽन्तर्निधाय सभायां गता । समस्यामपूरयत्सु तेषु पण्डितेषु सा स्माह, हे देव ! समस्यामिमामहं पूरयामीति वादिनीं तां पूरयेति भूपोऽभ्यधात् । साऽवदत्—

पावकोच्छिष्टवर्णोऽयं शर्वरीकृतबन्धनः ।
मोक्षं न लभते कान्ते ! कम्पते तेन हेतुना ॥ ५ ॥

इति चमत्कारिणीं मनोऽभिप्रायानुसारिणी समस्यां ज्ञात्वा वर्णप्रमितत्वेन द्वात्रिंशल्लक्षसुवर्णदानोद्यतं राजानमपरे पण्डिताः प्रोचिरे, हे देव! नैषा समस्याऽनया निरमायि, तत्कथमिति राज्ञोक्ते 'कान्ते' इति सम्बोधनं प्रियतमायाः, तेनास्याः समस्यायाः कर्त्ता कोऽपि पुमानिति तेषां वचनेन स्वनरैर्गवेषयित्वा तस्या गेहान्तरान्निर्गतं मृतं कालिदासं विलोक्य राज्ञा हा पापिनि! पुरुषरत्नविनाशिनि! रण्डे! इत्यादिवचनैर्निन्दयित्वा राज्ञा सा नगरान्निष्कासिता । तेन धनेन च कालिदासस्योर्ध्वदैहिकं विधाय राजा तच्चितास्थाने चैत्यं तत्र च सुवर्णमयीं कालिदासप्रतिमामचीकरत् ॥ **इति वेश्यासङ्गस्त्याज्य इत्यर्थे कालिदासकथा ॥ ५३ ॥**

१. तुला - प्रबन्धचिन्तामणिभाषान्तरे पृ. ११ ॥

॥ ५४ ॥ मूर्खचेष्टिते कथा ॥

ऐहिकाऽऽमुष्मिकश्रियो हि मूर्खाणां न स्युः, यतः-

भृङ्गाः पुष्पमिवागन्धं सरः शुष्कमिवाण्डजाः ।
मृगा इव वनं दग्धं मूर्खं मुञ्चन्ति सम्पदः ॥ १ ॥

तेषां मूर्खाणां चेष्टितं हास्यहेतुरेव, यतः-

मरिष्यसि मृतोऽभूवं जीवन्नसि च जीवितः ।
भट्टेनोक्त इति स्माहा-ऽऽभीरो धिग् मूर्खचेष्टितम् ॥ २ ॥

तथाहि—**जडोदरे** ग्रामे **भरमो** नामाऽऽभीरो मूर्खमुख्यः स चैकदा वटशाखायामपरस्मिन् भागे स्थित्वा तन्मूलं छिन्दन् तत्समीपे गच्छतैकेन भट्टेनाभाणि, हे भद्र! शाखायां कृत्तायां सत्यां पतिष्यसि पतितश्च मरिष्यसि चेत्यभिधाय गते भट्टे कृत्ता शाखा, पतितश्च स दध्यौ, अहो स ज्ञानी, तदुक्तं सत्यमभूत् । तेन पतितोऽहमथ मृतो भवामीति ध्यात्वा व्यात्तवदननयनं निरुद्धश्वासं प्रसारितपाणिपादं तं मृतमिति मत्वा तत्सम्बन्धिनो वल्लवास्तं स्मशाने नीत्वा चिताभ्यर्णे स्नानं कारयन्ति स्म ।

तदा च दैवात्तत्रागतेन तेनैव भट्टेन किं जातमस्येत्यभिहिते मृतोऽसाविति ते चाभीरा बभाषिरे, चेष्टयाऽवसितजीवितचिह्नेन तेन भट्टेनायं जीवन्नस्तीति कथिते समुत्थितः स तैरभाषि, हे बन्धो! किं जातं तवेति, तदा भरमोऽप्यभणत्, अनेनैवोक्तं शाखातःपतिष्यसि, पतितश्च मरिष्यसि, तेन पतितो मृतश्च, अनेनैवोक्तमयं जीवन्नस्तीति जीवितोऽस्मि, नान्यत्किमपि जातमिति निशम्य धिग् त्वां मूर्खमित्यभिधाय ते सर्वेऽपि स्वस्थानमगुः ॥ **इति मूर्खचेष्टिते कथा ॥ ५४ ॥**

॥ ५५ ॥ सपत्नी नाम श्रवणेऽपि रोषे गङ्गाकथा ॥

योषितां हि सपत्नीसम्बन्धे परममसुखं, यतः-

आज्ञाभङ्गो नरेन्द्राणां गुरूणां मानमर्दनम् ।
पृथक् शय्या च नारीणा-मशस्त्रवध उच्यते ॥ १ ॥

किं च सपत्न्यो नाम्नैव भगिन्यो न चार्थतः, यतः-

भौमे मङ्गलनाम वृष्टिकरणे भद्रा कणानां क्षये,
वृद्धिः शीतलिकेति तीव्रपिटके राजा रजःपर्वणि।
मिष्टत्वं लवणे विषे मधुरता जाम्यं सपत्नीजने,
पात्रत्वं च पणाङ्गनासु रुचिरं नाम्नैव नैवार्थतः ॥ २ ॥

किं बहुना ? सपत्नीनां नामाऽपि श्रुतं न प्रीतये, यतः—

सपत्नीदर्शनं दूरे श्रुतं नामाप्यसौख्यदम्।
गङ्गा विप्राय नो तुष्टा श्रुतं शैलसुतेति यत् ॥ ३ ॥

तथाहि—गङ्गोपकण्ठवर्त्तिनि ब्राह्मणाभिरामे **ब्राह्मणपुरग्रामे चतुर्भुजो** नाम द्विजो बहुशास्त्रविशारदोऽपि निर्धनत्वेन विधुरो धरायां धराधीशामात्यसेनापतिसार्थवाहश्रेष्ठिसीमाधीशादीनां विहितमार्गणोऽपि दुर्दैववशेनाप्राप्तधनलेशचिन्तयाञ्चक्रे। किमर्थहीनानां जीवितेन ? यतो दौर्गत्यान्मरणं श्रेयः, यतः-

उत्तिष्ठ क्षणमेकमुद्वह सखे! दौर्गत्यभारं मम।
श्रान्तस्तावदहं चिरान्मरणजं सेवे त्वदीयं सुखम् ।
इत्युक्ते धनवर्जितेन सुधिया गत्वा श्मशाने शबो ।
दौर्गत्यान्मरणं वरं वरमिति ध्यात्वैव तूष्णीं स्थितः ॥ ४ ॥

तेन मरणमपि तीर्थेऽनुष्ठितं परत्रामुत्र शर्मकृदिति ध्यात्वा गङ्गायमुनयोः संगमः परमं तीर्थमिति स तत्र गत्वा गाङ्गैः पयोभिः कृतमज्जनो विमुक्तभोजनो गङ्गाध्यानैकलीनो गङ्गार्पितनयनो यावत्तिष्ठति, तावत्तत्तपोऽनुभावेन शुभ्राभरणवसनविलेपनहारिणी कमनीयकनककमण्डलुधारिणी सुरासुरवृन्दवन्दितक्रमकमला कुन्देन्दुकुमुदकर्पूरपूरधवला सहायातसूर्यसुता जह्नुसुता प्रादुरासीत् **चतुर्भुजो**ऽपि साक्षान्महानन्दश्रियमिव मन्दाकिनीमवलोक्य मुकुलितकरकमलः शिरःश्लिष्ट-सर्वंसहातलः सद्यो विहितमेकं स्वानुष्ठितार्थगर्भं काव्यमपाठीत्-

मातः! शैलसुतासपत्नि! वसुधाशृङ्गारहारावलि! ।
स्वर्गारोहणवैजयन्ति! भवतीं भागीरथीं प्रार्थये ।
त्वत्तीरे वसतस्त्वदम्बुपिबतस्त्वद्वीचिषु प्रेङ्खत-
स्त्वन्नाम स्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥ ५ ॥

इदं काव्यमाकर्ण्य भगवती भागीरथी दध्यौ, अहो मय्यमुष्य महीयसी भक्तिः, यत् सकलार्थसाधनसाधीयसीमपि मामालोक्यापि मत्तटे मरणमेवायमीहते, नान्यत्किमपीति मत्वा सा तमाह, हे भद्र ! यथेच्छं वरं वृणु, तदा च यावत्स वक्ति तावत्तदभाग्यप्रेरिता तत्र स्थिता कलिन्दकन्या जह्नुकन्यामूचे हे परमेश्वरि! भागीरथि! कथमस्मै पापात्मने वरं दत्से ? हे भगवति! यदसौ मयि भृशं भक्तो मत्स्तुतिकर्त्ता चेति द्विजन्मनोऽस्य वरं वितरामीति वादिनीं नभोवाहिनीं रविदुहिताऽभिहितवती—

हे भगवति! किमनया स्तुत्या? यत्र वैरिण्याः सपत्न्या नाम शैलसुतेति, तेनास्य पापस्य मुखमपि वीक्षितुं नौचितीमञ्चतीति यमुनयोक्ता गङ्गापि शैलसुतेति सपत्नीनाम श्रवणात्सञ्जातकोपा धिगिति तं विधाय स्वास्पदमलञ्चकार ॥ **इति सपत्नीनामश्रवणेऽपि रोष इत्यर्थे गङ्गाकथा ॥ ५५ ॥**

॥ ५६ ॥ कविकलायां नीलकण्ठविप्रकथा ॥

अक्षराणि पदानि कविमुखानि च तान्येव, किन्तु कविविशेषप्राप्तानि सुन्दराणि,यतः-

तेहिज अक्षर ते ज पय, जण जण ते हि चवंति ।
कुणहिक कवियण केलवण, अमियरसायण हुंति ॥ १ ॥

तेन कवयो हि प्रभावभाजः, यतः-

पावयणी धम्मकही, वाई नेमित्तिओ तवस्सी य ॥
विज्जा सिद्धो अ कई, अट्ठेव पभावगा भणिआ ॥ २ ॥[प्रवचनसारोद्धारे]

किं बहुना? सर्वेषां हि मान्या एव कवयः, यतः-

वाचां चयैश्चूर्णितचन्द्रिकाणां न वन्दते कः क्रमणौ कवीनाम् ।
यन्नीलकण्ठः कविरीहितार्थं, छायेति काव्यात्प्रसरेरवाप ॥ ३ ॥

तथाहि-**सिन्धुदेशे** प्रवरे **पञ्चपट्टणे नगरे** प्रबलप्रतापपराभूततरुणतरणिः **प्रसरिनाम**-भूपतिरासीत् स चान्यदा विधौ विधुन्तुद इव पूर्वदेशे कुपितो, वनं वनगज इव पूर्वदेशं ध्वंसमानः **समानक**नगरं रुरोध, तत्र च बहुचैत्यानामुपाश्रयाणां सङ्घस्य च विनाशं विलोक्य कृतमिथ्यादृक्स्तुतिनियमोऽपि सङ्घोपरोधेन कविकलाकुशलः शक्तिमान् वादिवृन्दभुजङ्ग-**नीलकण्ठ**नामा विप्रश्रावको नगरान्निर्गत्य **प्रसरिराज्ञः** समीपमभ्यागात् ।

विप्रभक्तत्वेन प्रसरिरपि तमासनदानादिनाऽतीव सत्कृत्य स्वागतप्रश्नपूर्वकं प्राणमत् ।

श्रीसर्वमङ्गलालिङ्गी जटामुकुटमण्डितः ।
भवतां भूतये भूया-न्महादेवो वृषध्वजः ॥ ४ ॥

इति शिष्टार्थेनाऽऽशीर्वादेन स्तुतिमस्तुतिं च दर्शनशुद्धये विधायोपविष्टं तं प्रसरिः प्राह, हे पण्डित! कुतः समागाः? मार्त्तण्डमण्डलादिति तेनोक्ते तत्र किमस्तीति प्रसरिरप्राक्षीत्, हे देव! श्यामाङ्गी **छाया** गौराङ्गी **कान्ति**श्चेति सूर्यस्य द्वे भार्ये, एकदा समीपस्थितां कान्तिं श्रीमान् सहस्ररश्मिरभ्यधात्-

हे छाये ! वद रेऽतमः कथय किं रण्डेऽस्मि घर्मद्युति-
र्ब्रूषे नाम कुतो रिपोस्त्वमपि मे कान्तेः सपत्नीं कुतः।
किं श्यामास्युपगूहितास्मि बलतःकैः पूर्वदिक्पार्थिवैः,
श्यामाङ्गैः प्रसरेः प्रतापशिखिना प्लुष्टैर्व्रजद्भिर्दिवम् ॥ ५॥

इति चतुरचित्तचमत्कारिणा नव्येन काव्येन रञ्जितमना यथेच्छं वरं वृणु इति तं प्रसरिः प्राह। हे देव! पूर्वदेशोपद्रवं विमुच्य स्वदेशं व्रजेत्यभिहितः स राजा बहुकरितुरगमणिकनकपट्टकुलादिना तं सत्कृत्य स्वदेशमागात्। गृहमागतो नीलकण्ठोऽपि प्रकामोपकारित्वेन राज्ञा पौरैर्जनपदैश्च धनादिभिः पूजितश्चिन्तयाञ्चक्रे, यन्मया मिथ्यादृशः स्तुतिरकारि, तदालोचनाकृते व्रतादानमेव [श्रेय] इति [ध्यात्वा] स नीलकण्ठः स्वीकृतव्रतो विहिततपा माहेन्द्रदेवेन्द्रतामाससाद ॥ **इति कविकलायां नीलकण्ठविप्रकथा ॥ ५६ ॥**

॥ ५७ ॥ लोभाभिभूते विडम्बनायां कुट्टिनीकथा ॥

लोभे सति ध्यानमौनादि सर्वमन्तर्गडु एव, यतः-

किं ध्यानैर्मुखसद्मपद्मशशिभिः किं चेन्द्रियाणां जयैः ।
रुद्धेच्छैस्तपसां पुनः प्रतपनैः किं मेदसां शोषणैः ।
किं वाचां जनितश्रमैः परिचयैः किं क्लेशजातैर्व्रतैः ।
श्चेल्लोभोऽखिलदोषपोषणपटु-र्जागर्त्ति चित्तेऽर्त्तिभूः ॥ १ ॥

किं च सर्वेषां पापानां मूलं लोभ एव, यतः-

स्नेहमूलानि दुःखानि रसमूलाश्च व्याधयः ।
लोभमूलानि पापानि त्रीणि त्यक्त्वा सुखी भव ॥ २ ॥

तेनेहापि लोभवशादनर्थपरंपराऽभ्येति, यतः-

लोभाभिभूतान् प्रभवन्ति भूतान् दुःखान्यसंख्यानि पदे पदेऽपि ।
आघ्राय मूलं खलु शङ्कुकर्णा यत्कुट्टिनी लोभवशाद् बभूव ॥ ३ ॥

तथाहि-**लोहाकरे** नगरे **धनदत्त** : सार्थपतिः, तस्य च सौभाग्यजितरम्भा **रम्भा**नामप्रेयसी। तत्कुक्षिप्रभवौ च **गुणचन्द्र-रूपचन्द्र**नामानौ नन्दनौ, अन्यदा प्रिये परदेशे गते सति सा रम्भा **सौभाग्यसुन्दरेण** कस्यापि सार्थपतेः पुत्रेणोपपतिना निरङ्कुशं विषयसुखं सिषेवे । एकदा तद्गृहमागतेनैकेन मुनिना तदीयमेव चरन्तं चरणायुधमालोक्य स्वान्तेवासी भणितः, हे वत्स! योऽमुष्य ताम्रचूडस्य चूडामत्ति, तस्य सप्तमेऽहनि राज्यं, यश्चास्य काकलकं भुङ्क्ते तन्मुखात्प्रतिप्रभाते सपादकोटिकनकमूल्यो मणिः पतति ।

इति तदुदितं सर्वं भित्त्यन्तरे स्थितः स जारस्तत्रैव स्थिता **सुस्थिता**भिधा दासी चाऽशृणोत्। अथ स जारो रम्भां रहसि स्माह, हे सुन्दरि ! यदि तव मया सह कृत्यं, तदैनं निशावेदिनं निहत्य मां भोजय तद्रागसागारान्तर्निमग्रा सापि तदुक्तं प्रतिश्रुत्यैकान्ते तं चरणायुधं विनाश्य घृतादिभिस्तन्मांसं च संस्कृत्य सौभाग्यसुन्दरस्यागममीक्षमाणा प्रातिवेश्मिकवेश्मनि समियाय।

इतश्चाधीत्य भोजनवेलायां गृहमागतौ तत्सुतौ मातरमपश्यंतावन्यद्भोजनं चालभमानौ तस्यैवामिषस्य लेशं भुक्त्वा स्वैरं चिक्रीडतुः । समागते च तस्मिन् जारे मात्रा प्रहितौ तौ पठनार्थं जग्मतुः। भोक्तुमुपविष्टः सोऽपि तस्यामिषस्य मध्ये तौ चूडा-काकलकावदृष्ट्वा सुताभ्यां च जग्धाविति विज्ञाय विहितपरिरम्भां रम्भां जगाद, हे विलासिनि ! तवाहं, मम च त्वमित्यावयोः प्रेम, तेन यदि मम प्राणैस्तव कृत्यं, तदा त्वत्सुतयोरामिषं मां भोजय न चेत्प्राणांस्त्यक्ष्यामि । किञ्च मयि जीवति ते बहवः सूनवः, परं मृतोऽहं क्वेति तन्निर्बन्धबद्धा कामं कामान्धिता सा तदप्यकृत्यमङ्गीचकार । तदा च भित्त्यन्तरे स्थिता सुस्थिता तयोरिममालापमशृणोत् । तस्य मुनेरुक्तं तयोश्च तमालापं सा द्रुतं कलाचार्यशालायां स्थितयोस्तत्सुतयोरवक् । तावपि च तत एव जीवितमादाय नष्टौ गतौ च क्रमेण भूयसीं भुवम् ।

तदा च प्रभाते स्वमुखात्पतितं मणिमालोक्य **गुणचन्द्रो** लघीयसि भ्रातरि सप्तमेऽहनि राज्यं निश्चित्य क्रमेणाऽ**वन्ती**वनमाशिश्राय । शरीरचिन्तार्थं गतो **गुणचन्द्रो** निष्पुत्रस्य मृतस्यावन्तिपते राज्यं भ्रातुः श्रुत्वा स्वयं **रूपसेनाया** रूपजीवाया वेश्मनि गत्वा मुखात्पतित-मणिप्रभावेण सम्पूरितसमीहितस्तया सह सुखं बुभुजे । एकदा राजसेवादिव्यापारैर्विना स्वैरं सुखमनुभवन्तं तं वीक्ष्य कुट्टिन्या प्रेरितया **रूपसेनया** सोऽभाणि, हे नाथ! कथं निर्व्यापारः सन् सुखमनुभवसीत्यादिना तस्या बाढनिर्बन्धेन तेन मणिव्यतिकरे कथिते सति सा कुट्टिनी रेचेण तं काकलकमादाय तं गृहान्निष्किासयामास ।

सोऽपि वनं भ्रमन्नेकत्र मृतस्यैकस्य योगिनश्चतुरः शिष्यान् विवदमानानुदीक्ष्य विवादकारणमप्राक्षीत् । तेऽपि प्रोचिर नभोगामिपादुकायुगं, कामितभोजनदायिपात्रं, प्रतिदिनं लक्षसुवर्णदायिनी कन्था, रिपुविजयकारी चैष दण्डः, इति मृतस्यास्मद्गुरोरेतद्वस्तुचतुष्टयमस्ति। तेन मिथो विभक्तुमशक्तानामस्माकमिमं विवादं त्वं भिन्धि एवं तेषां वचनं निशम्य समुत्पन्नमतिः स स्माह यो मया मुक्तं बाणं प्रथममानयति तस्यैते पादुके, तदनु तस्य चैतत्पात्रं, तदनु तस्य चैषा कन्था, तदनु तस्य चैष दण्ड इति पणं विधाय तन्मुक्तान् बाणानानेतुं युगपद्धावितेषु तेषु स पादुके परिधाय नभोगत्योत्पत्याऽवन्त्यां तस्या एव रूपसेनाया वेश्मनि समेति स्म। पुनरपि तथैव पादुकानां व्यतिकरे कथिते सति तया कुट्टिन्या दूरतरगिरिगुहागतगौरीदेवीनमस्कारदम्भेन मोहितस्तया कुट्टिन्या सहितः पादुकारूढस्तन्नमस्करणाय तत्र गिरौ गतः, तत्राप्यादौ देवकुलान्तस्तस्मिन् प्रविष्टे सा कुट्टिनी पादुकारूढा नभोगत्या स्वस्थानमागात्।

गुणचन्द्रोऽपि ततो निर्गतस्तामविलोक्याऽधनत्वेन तत्रैव वने भ्रमन्नेकदा निशायामेकस्य वटस्य शिरसि तस्थौ । तदा च तत्रागतानां तेषामेव योगिनामेकतमो योगी केनाप्येकेन योगिना सहेति किंवदन्तीं कुर्वन्नभूत् । यदनेन मूलेनाऽऽघ्रातेन पुमान् खरः स्यात्, अनेन चाऽऽघ्रातेन

पुनः पुमानेव स्यात्, इत्याकर्णितप्रभावं मूलद्वयमादाय पुनरपि **गुणचन्द्रो** रूपसेनावेश्मनि गतः। तन्मूलप्रयोगेण च लोभाभिभूतां तां कुट्टिनीं रासभीं विधाय पृष्ठारोपितबहुभारां प्रचण्डदण्डेन निर्दयं तां ताडयन् गृहाल्लात्वा निर्ययौ । मातृशुद्धिविधित्सया समागतां **रूपसेनां** स स्माह, हे सुभगे ! यदनया रण्डयाऽहं भृशमभिभूतः, किं च यदनया मदीयं गृहीतमस्ति तत्सर्वं देहि, तदनु चैनां मुञ्चामीति विवदमानौ तौ राजनरै राज्ञः पुरो नीतौ । राजापि ज्यायांसं स्वसहोदरं विलोक्य सहसा सिंहासनादुत्थाय तत्पादौ च प्रणम्य तमात्मस्थाने न्यवेशयत् । रूपसेनापि तथावस्थं तमवलोक्य लज्जिता तदीयं सर्वं दत्त्वा च कृपया तेन मुक्तया स्वमात्रा सहिता स्वं धाम जगाम । तावपि सहोदरौ चिरकालान्मिथः सङ्गमेन कथितस्वस्वकर्माणौ चिरानुभूतराज्यशर्माणौ यथाविहितधर्ममर्माणौ कलितसुगतियुवतिनिर्माणौ बभूवतुः ॥ **इति लोभाभिभूतामिहापि विडम्बनेत्यर्थे कुट्टिनीकथा** ॥ ५७ ॥

॥ ५८ ॥ मतिविषये कमलाधरविप्रकथा ॥

बुद्धिमानेव नरो नरः प्रोच्यते, यतः-

सुधीः शास्त्रे बली युद्धे वाग्मी दौत्ये क्षमी तपे ॥
दानी वित्ते दृढः कृत्ये वशी गेहे पुमान् पुमान् ॥ १ ॥

किं चाऽधीतैरपि शास्त्रैरमतीनां नार्थसिद्धिः, यतः-

यस्य प्रज्ञा स्वयं नास्ति शास्त्रं तस्य करोति किम् ? ।
लोचनाभ्यां विहीनस्य मुकुरः प्रकरोति किम् ? ॥ २ ॥

तेन पठितैरपि शास्त्रैर्निर्बुद्धित्वेन जडाः सन्तो जना अनर्थभाजः स्युः । यतः-

वरं बुद्धिर्न सा विद्या विद्यातो बुद्धिरुत्तमा ॥
बुद्धिहीनाः क्षयं प्रापु-र्यथा ते सिंहकारकाः ॥ ३ ॥

तथाहि-**पृथिवीभूषणे** पुरे **गदाधरश्रीधरगङ्गाधरलक्ष्मीधरकमलाधरनामानो** द्विजन्मानो मिथः प्रकामं प्रीतिभाजः पञ्च सुहृदः । तेषु चत्वारोऽधीतशास्त्रा अपि विमतयः, पञ्चमस्तु **कमलाधरा**भिधोऽनधीतशास्त्रः, परं मतिमान् ।

एकदा ते पञ्चापि सम्भूय परदेशे प्रस्थिताः, क्रमेण महतीमरण्यानीं प्राप्ताः परस्परमिति जगुः । आत्मानः चत्वारः पण्डिताः, अयं तु मूर्खस्तेन कनकादिलाभेऽपि नास्य भाग इति तं पृथग् विधाय पुरतो गच्छन्तस्ते क्वापि प्रदेशे स्वयं मृतस्य सिंहस्य कङ्कालं विलोक्य स्वस्वविद्यामाहात्म्यविलोकनार्थमिति प्रोचुः । तदा चादिमः स्माह मृतस्यास्य सिंहस्येमान्यस्थीनि यथास्थानं निवेशयामीति मम शक्तिः, ततो द्वितीयोऽवोचत् तथाविधस्य सिंहस्य चर्म सूत्रयामीति मम शक्तिः, ततस्तृतीयः स्माह तादृशस्य सिंहस्य मांसरुधिरादिधातून् विदधामीति मम शक्तिः,

१. तुला- बृहत्कथाकोशे पृ. १०२-१०३, भगवती आ. ११२५, प्रबंधपंचशती पृ. २२३ ॥

ततश्चतुर्थः प्रोचिवान् अहमेनं सिंहं सञ्जीवयामीति मम शक्तिः । इत्यभिधाय पठितबालिशैस्तैस्त्रिभिः स्वस्वोक्ते कृते सति स्वोक्तं कर्त्तुमुद्यतं पठितमूर्खं चतुर्थं विलोक्य मतिमान् पञ्चमः प्राह, हे सुहृदो ! मृतमेनं पञ्चाननं मा सञ्जीवयन्तु किं चासौ जीवितो नाऽऽत्मानं शिवंकर इत्यात्ममित्रोक्तमकुर्वत्सु तेषु मतिमन्मुख्यः स निकटवर्त्तिनमेकं तरुमारुरोह । ततः सञ्जीवितः स केसरी तान् विनाश्य वने विजहार । कमलाधरोऽपि ततः समुत्तीर्य देशान्तरे स्वमतिरञ्जितेभ्यो राजादिभ्यो धनं प्राप्य क्षेमेणाऽगारमागमत् ॥ **इति मतिविषये कमलाधरविप्रकथा** ॥ ५८ ॥

॥ ५९ ॥ भग्ने चित्ते न प्रीतिरित्यर्थे सर्प-विप्रकथा ॥

अवज्ञातो गता हि प्रीतिः पुनर्नैति, यतः-

अवज्ञात्रुटितं प्रेम नवं कर्त्तुं क ईश्वरः ।
सन्धिं न याति स्फुटितं जतुलेपेन मौक्तिकम् ॥ १ ॥

तेन यथा कथञ्चिदवज्ञातो भग्ना प्रीतिर्न पुनर्भवति । यतः-

भग्नचित्ते पुनः पुंसां न भवेत्प्रीतिरुत्तमा ॥
पुच्छच्छेद-सुतध्वंस-भुजङ्गद्विजयोरिव ॥ २ ॥

तथाहि-**वैकुण्ठावासे** नगरे **वैकुण्ठो** नाम सूत्रकण्ठः । स च प्रभाते **भागवतं** सायं च **भारतं** तथा मधुरस्वरेण वाचयति, यथा लोकेषु व्याख्यानं शृण्वत्सु सत्सु तत्स्वरमाधुर्यमोहितः **संमोहन**नामैकः भुजङ्गमस्तद्व्याख्यानमाकर्ण्य तस्य पुरः सुवर्णटङ्कद्वयं विमुच्य याति । एवं प्रत्यहं सुवर्णटङ्कद्वयलाभेन वैकुण्ठोऽपि वैकुण्ठ इव श्रीमानभूत् । एकदा च ग्रामान्तरं गते वैकुण्ठे **महादेवा**भिधाने तत्सुते व्याख्यानं विदधति संमोहनोऽपि पूर्वप्रीत्या तथैवागत्य सुवर्णटङ्कद्वयं विमुच्य याति एकदा च तत्सुतो दध्यौ, यदमुं भुजङ्गमं निहत्यास्य बिलात्सर्वं सुवर्णं गृह्णामि तदा च तथैव सुवर्णं विमुच्य गच्छन्तं तमहिमवलोक्य तन्मारणाय तेन वैकुण्ठपुत्रेण विहितो यष्टिप्रहारः शीघ्रतरगतेस्तस्य सर्पस्य पुच्छच्छेदमकरोत् ।

ततस्तस्यामेव निशि तेन वैरेण कृतान्तेनेव कुपितेन सर्पेण दष्टो महादेवः पञ्चत्वमाप। अथ गृहमागतो वैकुण्ठोऽपि पुत्रमृत्युना दुःखितः पुत्रप्रेत्यक्रियां विधाय तथैव व्याख्यानं कुर्वन् समेतं तं फणिनं निर्वर्ण्य सञ्जातपुत्रमरणस्मरणः क्षामस्वरोऽजनि । तदा च तं वैकुण्ठं तादृशं निध्याय सुवर्णटङ्कं चाऽविमुच्य व्रजन् भुजगो जगौ, हे वैकण्ठ ! तव पुत्रस्य मरणं स्मरति, मम चासौ पुच्छच्छेदः स्मरति । तेनाथ भग्नभावयोरावयोः का प्रीतिः ? यतः-

१. AHR शृण्वानेषु ।

विरक्तचित्तेषु रतिं न कुर्याद्, भग्ना हि शाखा न विलम्बनीया ।
गन्तव्यमन्यत्र विचक्षणेन, पूर्णा मही सुन्दरसुन्दरेण ॥ ३ ॥

अपि च-

स्नेहेऽवज्ञा क्षयः काये, कार्ये मान्द्यं रिपौ स्थितिः ।
गाने कासः पथि श्वासः, कालकूटच्छटा इमाः ॥ ४ ॥

इत्युदीर्य सम्मोहनोऽपि निजं स्थानमगमत् ॥ **इति भग्ने चित्ते न प्रीतिरित्यर्थे सर्पविप्रकथा ॥ ५९ ॥**

॥ ६० ॥ अतिलोभत इहाप्यनर्थे लोहार्गलवेश्या-कथा ॥

पुण्यनैपुण्यलावण्यादयो हि गुणा लोभात्प्रलीयन्ते, यतः-

मूलं मोहविषद्रुमस्य सुकृताम्भोराशिकुम्भोद्भवः ।
क्रोधाग्नेररणिः प्रतापतरणिप्रच्छादने तोयदः ॥
क्रीडासद्म कलेर्विवेकशशिनः स्वर्भाणुरापन्नदी ।
सिन्धुः कीर्त्तिलताकलापकलभो लोभः पराभूयताम् ॥ १ ॥

किञ्च लोभवन्तं स्वामिनं सेवका इव सर्वदोषाः स्वयमायान्ति । यतः-

लोभश्चेदगुणेन किं ? पिशुनता यद्यस्ति किं पातकैः ?।
सत्यं चेत्तपसापि किं ? शुचि मनो यद्यस्ति तीर्थेन किम् ? ।
सौजन्यं यदि किं निजैश्च ? महिमा यद्यस्ति किं मण्डनैः ? ।
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ? ॥ २ ॥

तेन लोभभाजां विपत्तयः, यतः-

तृष्णा हि कृष्णाहिवधूरिवोग्रा, निहन्ति चैतन्यमशेषमाशु ।
लात्वा शशौ लोभवशेन वेश्या, **लोहार्गला** जातवती दरिद्रा ॥ ३ ॥

तथाहि-सागराभ्यर्णवर्त्तिनि **कनकसागरे** नगरे **गुणसारस्य** श्रेष्ठिनः **पुण्यसारः** सुतो द्वादशकनककोटिमादाय पञ्चप्रवहणयुतः प्रभूतवणिक्पुत्रपरिवारयुतो जलधौ **जटिलद्वीपे शालिनीं नगरीं** गतः, तत्र च सौभाग्यभराभिभूतमधुसुताबालया **लोहार्गलया** पण्यमहिलया सह स हि यौवनसारः पुण्यसारः स्वैरं तया सुखमनुभवति स्म । यतः-

यौवनं धनसम्पत्तिः, प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय, किं पुनस्तच्चतुष्टयम् ? ॥ ४ ॥

एवं विषयान् सेवमानोऽसौ ग्रीष्मकाले जलमिव तत्सर्वं द्वादशकनककोटिधनं निधनसाद्विधाय जात इव जातः, तदा च निःस्नेहया तया संमार्जनीरजःप्रयोगेण गृहान्निष्कासितः, ततः स **पुण्यसारः** स्वपरिवारयुतः पुरमागतो धननिधनेन लज्जितः पित्रा तरुणानामिदमर्हतीति

वाग्भिराश्वासितो गृहे तस्थौ, तेन श्रेष्ठिनापि मूल्येन शशशिशुद्वयमादाय शैशवादपि तथा शिक्षितं यथा निशि मुखान्तर्निहितं कनकरजतादिनाणकं तत्प्रभाते प्रयच्छति । तथाविधौ तौ द्वावपि शशावादाय स श्रेष्ठी सुतयुतो यानपात्रेण जटिलद्वीपे **शालिनीं नगरीं** गत्वा स्वयं च वणिक् पुत्रवेषमादाय यदा वेश्या शशौ याचते तदाहं पृष्टव्य इति शिक्षां च दत्त्वा पुत्रं वेश्यावेश्मनि प्राहिणोत् अथ च धनार्थमागतानां तस्याः किङ्करीणां पश्यन्तीनां सतीनां पुरस्ताभ्यां शशाभ्यां मुखाद्वितीर्णं सुवर्णादिधनं स श्रेष्ठिपुत्रो वितरति स्म । ताभ्योऽवगतशशकवृत्तान्ता सा पण्यकान्ता निःस्नेहैरपि सस्नेहैरिव नीरागैरपि सरागैरिव वचनैस्तं मोहयन्ती स्माह, हे नाथ! यौ शशकौ तव कनकादिधनं यच्छतस्तौ मम यच्छेत्युक्ते स ज्ञास्यते इत्यभिधाय स्वस्थाने गत्वा पितुरभ्यधात्, पितापीति शिक्षां ददौ, हे वत्स! शशावत्याग्रहेण याचमानाया वेश्यायास्त्वयेति वाच्यं, यदा मया त्वया सह सर्वं धनं भुक्तं तदा गृहं गतेन निःश्रीकेण मया स्वगोत्रजा देवी विधिनाराधिता, तया च तौ प्रत्यक्षत्रिदशौ शशौ दत्तौ, तेनात्यन्तनिर्धनस्यैव वेश्मनीमौ तिष्ठतो नान्यस्येति [पित्रा शिक्षितं] वदन्तं तं सा स्माह, हे प्राणप्रिय ! तदा मदीयं सर्वमादाय तौ मम देहीत्यभिधाय दत्तमणिमौक्तिककनकरजतताम्रादिसर्वस्वां तृष्णाकृष्णाहिदष्टां तां दुष्टां स पुनरपि प्रोचे, हे प्रिये ! शरीरलग्नमाभरणाद्यपि दत्त्वा सर्वथा निर्धना भव।

यथेमौ तवौकसि तिष्ठत इत्युक्ता सन्तोषमुक्ता सा तदपि दत्त्वा गीततूर्याद्याडम्बरपुरस्सरं तेन दत्तौ तौ शशकौ गृहमनैषीत्. **पुण्यसारोऽपि** प्राक्सञ्जितप्रवहणैः सर्वं तदीयं धनमादाय स्वगृहमगात्। इतश्च लोहार्गलाऽपि तेन श्रेष्ठिना प्राक्वदनान्तर्निहितं धनं शशाभ्यां दत्तं प्राप्य प्रकामं जहर्ष। ततो द्वितीयस्मिन्नहनि याचितौ तौ किमप्यददानौ वीक्ष्य हा धूर्ताप्यहं तेन धूर्तेन मूषितास्मीति विलपन्ती दुःखिनी जाता. **पुण्यसारोऽपि** प्राप्तपितृपदः पुण्यं विधाय सद्गतिभागभूत्। **अतिलोभादिहाप्यनर्थ इत्यर्थे लोहार्गलावेश्याकथा** ॥ ६० ॥

॥ ६१ ॥ खलानां कौशले खला एव विज्ञा इत्यर्थे चौरद्वयकथा ॥

खलानां विलसितमवसितुं हि खला एवास्खलितकौशलाः, यतः-

न सूरिः सुराणां गुरुर्नाऽसुराणां, पुराणां रिपुर्नापि नापि स्वयम्भूः ।
खलानां चरित्रे खला एव विज्ञा, भुजङ्गप्रयातं भुजङ्गा विदन्ति ॥ १ ॥

अपि च-

खलानामेव वैदग्ध्यं, खलानां चरिते खलु ।
चौरेण निहितां स्थालीं, तटाकाच्चौर आददे ॥ २ ॥

तथाहि - **वंशागरे नगरे** तस्करकलाकलापकलितप्रसिद्धिः **सिद्धिसुतो** नाम तस्करः, तस्य चान्येद्युरेकोऽनेकमलिम्लुचचातुर्यकुशलो **मुशलो** नाम चौरोऽभ्यागतोऽभ्येति स्म । मुशलोऽपि

तस्यौकसि विकाले वैकालिकं कुर्वन्नितस्ततो व्यापार्यमाणमेकं सुवर्णस्थालं विलोक्य लातुमना अजनि. **सिद्धिसुतोऽपि** स्थालोपरि चलितचित्तं तं चेष्टया विज्ञाय खट्वोपरि सिक्कके पानीयेनातीवभृतं स्थालं विमुच्याधस्तात्स्वयं सुखं सुष्वाप। अथान्तर्विवरया वंशनलिकयोर्ध्वश्वासेन तत्पानीयं निपीय पानीयरिक्तं तत्स्थालं सुखेनादाय ग्रामपरिसरे सरोन्तर्निधाय च प्रकामं प्रसुप्ते तस्मिन् **मुशले** जातनिद्रान्तः **सिद्धिसुतो**ऽपि तत्र स्थालमनालोक्य मध्ये शीताभ्यां तदुपानद्भ्यां जलान्तर्निमग्नत्वेन शीतलाभ्यां तत्पादाभ्यां च जलान्तर्निहितं स्थालं विज्ञाय तत्पदानुसारेण तस्मात्तटाकात्तत्स्थालमानीय स पुनरपि सुखं शेते स्म । अथ प्रभाते स्वपुरे गन्तुमुद्यतोऽपि बलेन प्रातरशनाय रक्षितो **मुशलो** भोजनावसरे तदेव स्थालमग्रे मुक्तमवलोक्येत्यचिन्तयत् । यदेतत्स्थालं तदेवान्यद्वेति पुनः पुनश्चिन्तयन्तं तं **सिद्धिसुतो**ऽभ्यधात्, हे मित्र ! भोजनं विधेहि, तदेवेदं स्थालं, तदा च विस्मितौ तौ मिथोऽन्योन्यमतिकौशलं कथयतः स्म। अथ स सिद्धिसुतोऽभ्यधात्, हे मित्र! आत्मनां मतिरेवार्थसिद्धिकरी, निर्बुद्धयो हि चौरा नार्थभाजो भवन्ति । यतः-

वाणीविहूणउ वाणीओ, बुद्धिविहुणो चोर ।
चरितविहूणी कामिणी, त्रिणेइ माणस ढोर ॥ ३ ॥

इति मिथो वार्तां विधाय तन्मतिमोहितो मुशलः स्वस्थानमगात् ॥ **इति खलानां कौशले खला एव विज्ञा इत्यर्थे चौरद्वयकथा ॥ ६१ ॥**

॥ ६२ ॥ स्त्री चरित्रे विप्रप्रियाकथा ॥

मृगीदृशो हि दम्भानां गेहं, यतः-

नयरं च नायराणं, जलाण जलहि वणं च वणयाणं।
उडुमग्गो उडुआण, कवडाणं कामिणी ठाणं ॥ १ ॥

तेनैव तासां चरितमवसितुं न शक्यते । यतः-

कला कलयितुं केषां, चरित्रं चलचक्षुषाम् ।
आनन्त्येन जितं येन, सलिलं सलिलौकसाम् ॥ २ ॥

किं बहुना ? संवासिनोऽपि स्त्रीणां चरित्रज्ञाने नालं, यतः-

सुतं विमुच्य ग्रहणे सुरालये त्वद्वन्दनाय प्रतिमामिहानयम् ॥
इत्युक्तियुक्त्या स्वमदूषणं व्यधा-द्विप्रप्रियाहो ! चरितं मृगीदृशाम् ॥ ३ ॥

तथाहि- **हरिवासे** नगरे नागरजातीयो **नारायणनामा** द्विजन्मा, तस्य च कुलटा कपटकोटिकेलिगृहं **गुणिनीनामगेहिनी** । तस्मिन् द्विजन्मनि देशान्तरं गते तत्प्रिया केनापि युना रता स्वैराचारोचितं सुखमन्वभूत् ।

एकदा बहुभिर्वत्सरैर्गृहमागतस्य तस्य प्रियस्य मज्जनभोजनादिभिर्बह्वीं भक्तिं विधाय विकालवेलायां पितृगृहगमनमिषेण पूर्वसङ्केतितेन तेनोपपतिना सह रन्तुमुत्सुका सती स्वकटौ स्वमर्भकमारोप्य क्वापि देवकुले सा गता । अथ सा सुतं भुवि विमुच्य तेन जारेण सह सम्भोगं विधाय गृहमागच्छन्ती कामान्धत्वेनात्यौत्सुक्येन च तत्र मुक्तस्य सुतस्य स्थाने देवप्रतिमामादाय गृहमागता, क्व सुतः ? केयं च प्रतिमेति तेन पत्या पृष्टा सा स्वैरिणी तत्कालसमुत्पन्नया मत्येति प्रत्युत्तरं ददौ, हे नाथ यदा त्वं प्रयाणे प्रस्थितस्तदा मयास्य देवस्य पुरस्तादिति प्रत्यपादि । यदा मम प्राणपतिरेष्यति तदा तद्युताहं त्वां प्रणम्य पूजां च विधाय तेन सह सम्भोगं करिष्यामीति मया नियमः कृतोऽभूत् । तेनोत्सुरत्वात्तवागमनं तत्र च दवीयसि देवौकसि नार्हतीति पूजकस्याभ्यर्णे सुतं ग्रहणे विमुच्येमां प्रतिमामहमानयं, तेनेमां प्रतिमां प्रणम्य द्रुतं पूजय, यथेमां तूर्णं पश्चाद्दत्त्वा सुतमानयामीति तयाभिहितेन तेनापि द्रुतमेव प्रियोक्ते विहिते सति त्वरमाणा सा स्वैरिणी देवौकसि तां प्रतिमां विमुच्य सुतं च लात्वा गृहमगमत्। अहो मयि भक्तिमतीयमिति मन्यमानो नारायणस्तया सह गृहवासमपालयत् ॥ **इति स्त्रीचरिते विप्रप्रियाकथा ॥ ६२ ॥**

॥ ६३ ॥ दम्भोऽपि श्रेयान् इत्यर्थे धृतान्धविप्रकथा ॥

कपटलम्पटाः सन्तो ये धर्ममैत्रीमिच्छन्ति ते मूर्खा एव । यतः-

दम्भेन मैत्रीं कपटेन धर्मं, सुखेन विद्यां परुषेण नारीम् ।
परोपतापेन समृद्धिभावं, वाञ्छन्ति ये व्यक्तमपण्डितास्ते ॥ १ ॥

किंचैतादृशोऽपि दम्भः स्वार्थाय विहितः श्रेयान् । यतः-

सिद्धये निजकार्याणां, भवेद्दम्भोऽपि सुन्दरः ।
जारं व्यापादयामास, धृतान्धो ब्राह्मणो यथा ॥ २ ॥

तथाहि-**वटाराग्रामे चक्रपाणि**नामाऽग्रजन्मा, तस्य **सेहनीनामगेहिनी,** सा च स्वैरिणी **विजयसौभाग्येन** मन्त्रिसूनुनाऽऽसक्ता जलग्रहणमिषेण गता सती ग्रामपरिसरसरसीपालिस्थित-चैत्यमण्डितां **शुण्डा**नामचामुण्डां कमलैरभ्यर्च्येति प्रत्यहमर्थयाञ्चक्रे। हे मातश्चामुण्डे! मम धनिकमन्धयेति प्रार्थनया पूजया च नित्यं विलम्बमानां तां मत्वा तत्पतिस्तत्कारणं गवेषयन् पृष्ठतो गच्छंश्च तां चैत्ये प्रविशन्तीमवलोक्याऽन्यदा प्रभाते तत्प्रथमत एव गत्वा चामुण्डापृष्ठे संलीयाऽतिष्ठत्। तदा च तत्रागत्य तथैव तदेव प्रार्थयन्तीं तां चामुण्डापृष्ठस्थः स चामुण्डेवावक् हे सेहनि! तव भक्तिपूजाविनयैरहं तुष्टास्मि, यथेच्छं वरं वृणुष्वेति निशम्य सापि तदेवैच्छंत । देवी स्माह हे पुत्रि ! यथेच्छं तं घृतं भोजय, भूयसा भुक्तेन घृतेन स तव पतिः सद्य एवान्धो

भविष्यति । अथ सेहन्यपि गृहमागत्य जारेण घृतमानीय पतिं भोजयति । चक्रपाणिरपि यथेच्छं घृतं भुञ्जानः सन् हे प्रिये ! अद्य द्वारं न पश्यामि, अद्य कपाटं न पश्यामि, अद्य भित्तिं न पश्यामि, अद्य स्तम्भं न पश्यामि, अद्य च हे प्रिये ! तव मुखमप्यहं न पश्यामीति वदन् जारानीतं भूरिघृतं च भुञ्जन् महाबलयुतोऽतीवमांसलो जातः, सञ्जातप्रत्ययया तया भृशं प्रभूतेन घृतेन भोज्यते । भुक्तेन घृतेनातीवमांसलः सोऽपि पश्यन्नपि दम्भेन क्रमात् कियद्भिरपि दिनैः सम्पूर्णोन्धोऽजनिष्ट । सापि तं द्वारस्तम्भभित्तिप्रभृतिभिः पदे पदे हन्यमानं सम्यगन्धमज्ञासीत् । अन्यदाऽन्धत्वेन विहितविश्वासे तस्मिन् द्वारदेशे तस्थुष्येव स विजयसौभाग्यस्तस्यौकसि समेतः, तया सह च स्वैरं निरङ्कुशतया विषयाननुभूय निर्गच्छन् स दण्डपाणिनेव तेन चक्रपाणिनाऽत्यर्थं निहतः परासुरभूत् । तं च तथाविधं विधाय चक्रपाणिस्तां स्वैरिणीं [केशेष्वाकृष्य चपेटादिभिः सम्यक् पूजयित्वा] स्माह रे रण्डे पश्यैनं तवोपपतिं यद्यथ पुनरपि स्वैरं विचरसि तदा त्वामप्येनमिव यमवेश्मनि नेष्यामीति वारिता सापि ततः प्रभृति सुन्दरत्वेन तस्थौ। चक्रपाणिरपि तत्प्रभृति लोके घृतान्ध इति विश्रुतः ॥ **इति दम्भोऽपि श्रेयानित्यर्थे घृतान्धविप्रकथा ॥ ६३ ॥**

॥ ६४ ॥ शीले गुणसुन्दरी कथा ॥

सम्पत्तयो हि शीलादेव भवन्ति । यतः-

शीलादेव भवन्ति मानवमरुत्सम्पत्तयः पत्तयः,
शीलादेव भुवि भ्रमन्ति शशभृद्विस्फुर्तयः कीर्तयः ।
शीलादेव नमन्ति पादपुरतः सद्युक्तयः शक्तयः,
शीलादेव पुनन्ति पाणिपुटकं सर्वर्द्धयः सिद्धयः ॥ १ ॥

किं बहुना ? शिवसीमन्तिन्यपि शीलवतां स्वयंवराऽभ्येति, यतः-

वाञ्छभ्यं वितनोति यच्छति यशः पुष्णाति पुण्यप्रथां,
सौन्दर्यं सृजति प्रभां प्रथयति श्रेयःश्रियं सिञ्चति ।
प्रीणाति प्रभुतां धिनोति च धृतिं सूते सुरौकः स्थितिं,
कैवल्यं करसात्करोति ललितं शीलं नृणां शीलितम् ॥ २ ॥

किं चेदं ब्रह्मव्रतं धन्याः काश्चिन्मृगीदृशो व्यसनेऽपि पतिताः पालयन्ति । यतः-

कष्टेऽपि धन्यतमधैर्यनिकायमब्ज-नेत्रा भवन्ति परिशीलितशीललीलाः ।
सार्थेश-किङ्कर-मलिम्लुचसङ्कटेऽपि, पाति स्म शीलमनघं गुणसुन्दरी यत् ॥ ३ ॥

तथाहि-श्रीवासे नगरे श्रीपतिरिव श्रीमान् श्रीदत्तो नाम नगरश्रेष्ठी तस्य च श्रीमती कुक्षिसम्भवो **गुणसुन्दरो** नाम नन्दनः, कृतद्वाससतिकलाभ्यासो द्वादशवार्षिकश्च सोऽन्यदा पितरि भोजनार्थं गृहे गते सति विपणिस्थितो मध्याह्ने-

'रान्ध्यो भातज जे होये ते किम राख्यो जाय'

इति पदद्वयं पुनः पुनः पठन्तं पुरो गच्छन्तमेकं योगिनमालोक्य तत्पृष्ठे दधावे । पुरतस्तदेव पदद्वयं पठन् स योगी, पृष्ठतश्च स कुमारः एवं गच्छतोस्तयोः स योगी क्वापि तिरोदधे। तं योगिनमपश्यंस्तत्पदद्वयं मनस्यवधार्य विपणावागत्य बहु धनमादाय च पित्राद्यैरज्ञात एव पुरान्निर्गत्य विहितयोगिवेषः स एकाक्येव ययौ. गलालिङ्गीतमृगशृङ्गाभरणः पादुकापेशलचरणः करकलित-तुङ्गत्रिशूलः शिरोनिबद्धविविधमूलः प्रभूतभूतिधारी विविधवर्णकन्थाहारी स्फटिकमुद्रामण्डित-श्रवणस्तत्पदद्वयपठनप्रवणः स कुमारयोगी प्रतिनगरं प्रतिपुरं प्रतिग्रामं प्रतिगृहं प्रतिहट्टं च भिक्षार्थं बभ्राम। तत्पितापि ग्रामारामादौ पुत्रं गवेषयन् तत्प्रवृत्तिमप्यप्राप्य सशोको गृहे तस्थौ।

अथैवं भ्रमंस्तत्पदद्वयं च भणन् स कुमारोऽन्यदा **रत्नपुरे** पुरे **पुरन्दरस्य** श्रेष्ठिनो गृहं गतः। तदा भिक्षादानार्थं बहिरागता रूपजितसुरसुन्दरी **गुणसुंदरीनाम** तस्य पुत्री तत्पदद्वयं भणन्तं तं योगिनमवलोक्याग्रेतनं पदद्वयमभाणीत्—

मनहाथी कुशलांकुशे आपो आप रखाइ ॥ १ ॥

इति तयोक्तं तत्पदद्वयमाकर्ण्य स इति दध्यौ, नूनमिमामेव परिणीय तत्पितृगृहे एव मुञ्चामि, तदा च कथमियं स्वमखण्डितं रक्षयिष्यतीति मत्वा मुक्तयोगिवेषं तं गृहमागतं विलोक्य साम्प्रतमेव पुत्रो जात इति मन्यमानाभ्यामिव पितृभ्यां महान् महो निर्ममे। ततो **गुणसुन्दरोऽपि** पितुराज्ञया तामेव परिणीय तत्पितृगृहे एव विमुच्य कतिभिरहोभिः सार्थयुतः सूत्रितसार्थवाहवेषो **रत्नपुरं** ययौ। तत्र च दैवात्सञ्जातदौर्गत्यस्य स्वश्वशुरस्य भाटकगृहीते हट्टे तिष्ठन् सन् स तत्र पूर्वमागतेन **महानन्देन** सार्थवाहेन सह मैत्रीमसूत्रयत्। अथैकदा स्वपितुराकारणार्थमागतां जातयौवनां स्मरसुन्दरीमिव **गुणसुन्दरी**मवलोक्य **महानन्दो**ऽनङ्गवशः सन् गुणसुन्दरमभाणीत्। हे मित्र! यद्यस्य वणिजस्तनूजा मम मिलति, तदास्याः पिता यदीहते तत्प्रयच्छामीति भणितो गुणसुन्दरस्तदुक्तं तस्याः पितुरवोचत्। सोऽपि तदाकर्ण्य वज्राहत इव म्लानमुखो गृहं गतो दौर्मनस्यकारणं बाढं निर्बन्धेन सुतया पृष्टस्तदुक्तं वक्ति स्म। [तत् श्रुत्वा सा जगौ] हे तात ! दौर्मनस्यं जहि विधेहि मदुक्तम्। विहिताकिञ्चन्यनिधनं धनं लक्षत्रयसुवर्णमितमादौ गृहाण किञ्चाहमपि तव कुलस्य मन्दाक्षरदक्षं कृत्यं न करिष्ये; इति निशम्य **धनदत्तो**ऽपि पुत्रीं सतीमतल्लिकां मन्यमानस्तदुक्तं प्रतिश्रुत्य ततो लक्षत्रयसुवर्णटङ्कानादाय तेन सह सायं सङ्केतं ददौ। **महानन्दो**ऽपि विहितस्फारशृङ्गारः सायं तद्गृहमागतः। श्रेष्ठिसुतयाप्यासनमज्जनभोजनादिना बाढमुपचर्य जलस्थाने जलकान्तं मद्यं पायितः, ततो मद्यविवशं तं सापि वरचीवरेण ग्रन्थौ निबद्ध्य गोमयमिव बहिरक्षिपत्। **महानन्दो**ऽपि क्रमेणोत्तीर्णमद्यस्तत्सुखात्सुवर्णाच्च प्रभ्रष्टः प्रकामं विरक्तः सन् योगिवेषमंगीकृत्य करपत्रमोचनार्थं गङ्गायमुनासङ्गमे गतस्तत्तीर्थस्वामिना षण्मासीं विलम्बितस्तत्रैव तिष्ठति स्म।

गुणसुन्दरोऽपि प्रच्छन्नतया तत्र स्थितस्तत्सर्वं विलोक्य तां सीतामिव सतीं जानानः स्वपुरं गतः, ततः स्वजनकमापृच्छ्य तदानयनार्थं **सीकरेण** किङ्करेण युतो **वेगवती**नामकरभीमारूढस्तत्रागतः। क्रमेण जातधनेन धनदत्तेन दत्तबहुवस्त्राभरणां तां स्वप्रेयसीमादाय स निशीथे स्वपुरम्प्रत्यचालीत्। गव्यूतिद्वयमिते पथि गता सा पतिं स्माह, हे नाथ ! **कनकावलि**नामा महामूल्यो मम हारः पल्यङ्कपादे मया विस्मृतः । अथ तं हारमाहर्त्तुं पुरान्तर्गते गुणसुन्दरे तद्रूपमोहितः सीकरोऽपि तां करभीमारूढो गुणसुन्दरीयुतः पुरतोऽचलत् । गुणसुन्दरोऽपि हारं लात्वा तत्रागतस्तत्र किमप्यपश्यन् नूनं सीकरः प्रियामादाय गत इति निश्चित्य महानन्दवदकार्षीत्। अथ प्रभाते वटनिकटस्थितया तया प्रहिते सीकरे कमपि ग्रामं प्रविष्टे सति तामेकाकिनीं कामिनीं धनभृतां तां करभीं चालोक्य वटोपरिस्थितो **मस्करो** नाम तस्करो वटादुत्तीर्य तां करभीमारूढां लात्वा पुरः प्रतस्थे । ग्रामादागतः सीकरोऽपि तत्र तामनालोक्य महानन्द इवाकरोत् । अथ पथि गच्छन्ती सा दैवगतिमचिन्त्यस्वरूपां मन्यमाना स्वशीलरक्षणार्थं तं तस्करं स्माह, हे सुभग ! वरमिदमासीत्, यत्स मम पतिर्गतः, त्वं च देव इव सुन्दरो दैवेन दत्तः, तेनावां **श्रीवासे** नगरे गत्वा तत्र सुखेन स्थास्याव इत्युक्तेन तेन **श्रीवासनगरा**ध्वनि नीयमाना सा करभी द्रुतमेव तत्परिसरमभ्येति स्म। अथ सा तत्र पतिगोत्रजाऽमरीचैत्ये स्वयं स्थित्वा भोज्यकृते च तं पुनः प्राहिणोत् । गते च तस्मिन् सा तां करभीमारूढा श्वशुरवेश्मनि गता । तत्र सा श्वशुरस्य मार्गोदन्तं सर्वं निवेद्य सुखेन तत्र तस्थौ । अथागतस्तस्करस्तामदृष्ट्वा महानन्द इव व्यधात् । अथ ते चत्वारोऽपि तत्र सङ्गताः सन्तः परस्परं पृष्टाश्च स्वस्ववैराग्यकारणं जगुः।

महानन्दादिभिस्तैस्त्रिभिः स्वस्ववृत्तान्ते कथिते सति तां कुशलेनात्मौकसि प्राप्तां मत्वा गुणसुन्दरस्तान् जगौ । हे सुहृदो ! वदताथ कथं करपत्रमोचनं योगिवेषं च विमुञ्चथ। अथ यदि तां पश्यामस्तदा भवदभिमतं कुर्म इति वदद्भिस्तैस्त्रिभिर्योगिभिर्युतः सोऽपि योगिवेषो भुवि भ्रमन् क्रमेण श्रीवासनगरं समेत्य स्वपितुरङ्गणे स्थितस्तत्पदद्वयं पठन् केनापि दीयमानां भिक्षां न जग्राह । अथ तं वृत्तान्तं सम्यगवगम्य बहिरागता सापि स्वपतिमुपलक्ष्याग्रेतनं तत्पदद्वयं च भणित्वा गृहान्तर्गता पतिपितरं प्राह, हे तात ! युष्माकं सुतो बहिः स्थितोऽस्ति, तयेत्युक्तः **श्रीदत्तो**ऽपि स्वपुत्रं गृहान्तरनैषीत् । अथ **गुणसुन्दरो**ऽपि विहितवर्यवेषस्तया परिवेषितेन भोजनेन भोजयित्वा वस्त्रालङ्कारैः कृतसत्कारान् स्वस्वस्थानाय व्यसृक्षीत् ।

अथ पितरि परलोकमुपेयुषि **गुणसुन्दरो**ऽपि गृहभारं स्वीकृत्य तया सह सुखमनुभवन्नन्यदा तत्र समवसृतं केवलिनं प्रणम्याप्राक्षीत् । [हे भगवन् !] कथमस्यां गुणसुन्दर्यां तेषां त्रयाणां रागः ?

तत्पदद्वयं च केनाभाणीति पृष्टः केवली स्माह-**वसन्तपुरे** कस्यापि वणिजो **धनवती** सुता, सा च मातृपितृभ्रातृमातुलैः पृथक् पृथक् वरेभ्यो दत्ता । ते चाऽज्ञातमिथःसमागमास्तां परिणेतुं युगपदाययुः। पित्रा दत्ता कन्या प्रमाणमिति तामेकः परिणीतवान् । सा च **धनवतीयं गुणसुंदरी,** तत्पतिस्त्वमिहापि तत्पतिरभूः, येऽन्ये चास्यां रागवन्तो मृतास्ते महानन्दप्रभृतयस्त्रयोऽत्रापि रागिणोऽभूवन् । तव पूर्वभवमित्रेण केनापि वटवासिना देवेन तत्पदद्वयमभाणि । इति पूर्वसम्बन्धं निशम्य सञ्जातवैराग्योऽसौ गुणसुन्दरीकुक्षिजन्मनि तनुजन्मनि गृहभारमारोप्य गुणसुन्दरीयुतस्तस्यैव केवलिनोऽभ्यर्णे परिव्रज्य शिवमव्राजीत् ॥ **इति शीले गुणसुन्दरीकथा ॥ ६४ ॥**

॥ ६५ ॥ जातिरागो बलियान् इत्यर्थे मूषिकाकथा ॥

स्वकीया जातिस्तु सर्वेषामभिमता, यतः-

निअदेसो निअवेसो, निअजाई निअपहो नियं सत्थं ।
निअमित्तं निअवित्तं, सत्तवि सव्वस्स इट्ठाइं ॥ १ ॥

तत्रापि जातिस्तु जीवानां विशेषात्प्रेयसी, यतः-

जह जणणी बालाणं, बप्पीहाणं जहा य घणमाला ।
भमराणं जह नलिणी, जाई जीवाण तह इट्ठा ॥ २ ॥

अपि च-

सूर्यं भर्त्तारमुत्सृज्य, जीमूतं मारुतं गिरिम् ।
स्वयोनिं मूषिका प्राप्ता, स्वजातिर्दुरतिक्रमा ॥ ३ ॥

तथाहि-**गतभ्रमे** तापसाश्रमे सञ्जातबहुलब्धि**बोधिशर्माभिधस्तापसो** वसति स्म । स चान्येद्युरभ्यर्णवर्त्तिनीं **वर्त्तिनी**नामनदीं स्नानार्थं गतः, तत्र घनतरनीरवाहे तत्प्रवाहे ब्रुडन्तीमेकां मूषिकां विलोक्य कृपया बहिर्निष्कासयामास।

शीतेन कम्पमानां तामुदीक्ष्य तरुणीभूतकरुणः स क्व मुञ्चाम्येनां वराकीं ? किं च मयैव मरणादियं त्राता, तेनेयं मे दुहितेति मत्वा तां लब्धिविशेषवशेन स तापसः कन्यां चकार । यतः-
कर्णान्तायतलोचना शशिमुखी मत्तेभकुम्भस्तनी, बिम्बोष्ठी मृगराजपेशलकटी गाङ्गेयगौरद्युतिः।
श्रोणीभारघना मरालगमना कुन्दावदातद्विजा, तन्वी पेशलपाणिपादयुगला कन्या न केषां मता ?॥४॥

ईदृशीं तामङ्गुल्या समादाय **बोधिशर्मा** स्वमुटजमागत्य तद्विवाहचिन्ताघूर्णितचेतास्तद्वरार्थं सर्वदेववर्यं श्रीसूर्यं स्मृतवान् । तत्स्मरणतः समेतं सूर्यमुद्दिश्य हे पुत्रि ! भगवन्तं भानुमालिनमेनं वरं वृणुष्वेति तेनाभिहिता सा स्माह-हे तात ! असौ पङ्गुस्तापकरः कठोरकरः पर्यटनशीलः सायमस्ताभिलाषी वारुणीसक्तः समेतरवाह इत्यादिबहुदोषैर्दूषितः, किं चास्य छाया कान्तिश्चेति पत्नीद्वयं, तेनास्य पत्नी भूत्वा सपत्नीद्वयसङ्कटे न पतिष्यामीति तया निषिद्धं व्रजन्तं सूर्यं तापसः

स्माह, हे रवे ! अस्ति त्वत्तोऽपि कोऽपि महान् ? इति पृष्टे स जगाद, यो मां पिधत्ते स घनो मत्तोऽपि महानिति प्रतिपाद्य गते सूर्ये स्मृतिमात्रेणोपेयिवांसं मेघमुद्दिश्य स प्राह-

यत्र स्वर्मणिभिः प्रघूर्णितमलं दग्धं च देवद्रुमैः,
शीर्णं सिद्धिभिरस्तमासमनघैर्मन्त्रैरमर्त्यैर्मृतम् ।
कामं कामघटैर्विनष्टमटितं दूरे द्युसच्छ्रेणिभि-
स्त्वं तस्मिन् समये समस्तमनुजाधारोऽसि धाराधर! ॥ ५ ॥

हे दुहितः ! इत्याद्यनेकगुणमण्डितस्यास्य मेघस्य पाणिग्रहणं कुरुष्वेत्युक्ता सा वक्ति स्म । यतः-

हंसा दूरनिवसिनो वसुमती प्रादुर्भवत्कन्दला ।
पद्मानां निधनं जडैः परिचयः पङ्क्तातिरेकः पथि ॥
जाताः स्वैरविहारिणो द्विरसनाः शूरप्रतापक्षयः ।
प्रावृट्कालकरालकेलिकलितस्तन्मूर्त्तिभाजामभूत् ॥ ६ ॥

हे पितः ! इत्यादिदूषणैर्दूषितस्याऽस्य सौदामिनी कामिनी, तेनास्य पत्नी भूत्वा सपत्नीपीडापात्रं न भविष्यामीति तया निराकृतं पश्चाद् व्रजन्तं स जीमूतमूचे । ''हे धाराधर ! त्वत्तोपि कोऽपि प्रभुः ?'' यो मां क्षणाद्विनाशयति स समीरो मत्तोऽपि तरस्वीति प्रतिपाद्य घने गते सति स्मरणादेव समेतं समीरणमुद्दिश्य हे सुते ! जगतामपि जीवातोरस्य समीरणस्य सहचारिणी भवेत्यभिहिता सोचे, हे तात ! सदैवायमनवस्थितो शरीरदुर्गतः सर्वरसशोषकः समस्तद्विजिह्वपोषकः । किं चायं मातरिश्वा तेनामुष्य गृहिणी न भविताऽस्मीति तया दूरिते तस्मिन् 'मयाप्यकम्प्यः पर्वतो मत्तोऽपि महानि' त्यभिधाय च गते पवने स्मृत्यैव समुपेयिवांसं गिरिमुद्दिश्य हे तनुजे ! अस्य पर्वतस्य प्रेयसी भवेति प्रेरिता साऽवक्, हे ताताऽयं प्रभूतपाषाणसङ्गमः सदैवाऽजङ्गमः पुष्कलकन्दरः क्षितिधरः, किं च नाम्राप्ययं ग्रावा, तेनामुं न वरिष्यामीति तया परिहृते तस्मिन् यो मां खनित्वा खण्डशः करोति स मूषको मत्तोऽपि बलवानित्युदीर्य गते गिरौ प्रणिधानादागतं दम्भोलिदशनं गणाधिपवाहनं मत्तसौरभेयलोचनं वृषलोचनं विलोक्य तत्कालं पुलकिताऽङ्गी स्मितमुखी सम्भ्रमात् समुत्थाय तं पाणिना जग्राह, जगाद च **बोधिशर्माणं**, हे तात ! ममाऽयमेवाऽभिमतः प्राणप्रिय इत्यभिहितः सोऽपि बलीयान् जातिस्नेह इति विचार्य तां पुनरपि मूषिकां निर्माय तेन मूषकेण सह प्राहिणोत् ॥ **इति जातिरागो बलीयानित्यर्थे मूषिकाकथा** ॥ ६५ ॥

॥ ६६ ॥ सद्भिः सह वार्ताऽपि वरीयसीत्यर्थे मित्रदत्तकथा ॥

गुणिनां संसर्गः सर्वं यच्छति, यतः-

कीर्त्तिं कन्दलयत्यघं दलयति प्रह्लादमाह्लादय-
त्यायासं निरुणद्धि बुद्धिविभवं सूतेऽतिशेते रिपून् ।

श्रेयः सञ्चिनुते च बन्धुरधियं धत्ते पिधत्ते भयं,
किं किं नाऽमरमेदिनीरुह इवाऽऽसङ्गः सतां यच्छति ॥ १ ॥

किं बहुना ? ये गुणा महतां सङ्गतास्तान् वक्तुं न कोऽप्यलं, यत :-

दत्ते चेद्रसनाः पतिः फणभृतामायुश्च पाथोजभूः ।
स्यैर्यं निर्जरभूधरः सुरगुरुर्गो कौश कौशलं पेशलम् ।
सर्वज्ञत्वमुमापतिश्च रजनीराजः कलाः सङ्कुलाः ।
स्तोतुं तांस्तदयं क्षमेत महतां ये सङ्गताः स्युर्गुणाः ॥ २ ॥

अपि च महद्भिः सह वार्ताऽपि विहिता श्रेयसी, यत :-

महद्भिः सह वार्तापि क्रियमाणा सुखावहा । कणपेषणकृत् श्रेष्ठी, मान्योऽभूद्भूपसंस्तवात् ॥ ३ ॥

तथाहि— **कमलाकरे** नगरे जनार्दन इव श्रीमान् **जनार्दनो** राजा, तत्र च **मित्रदत्तनामा** श्रेष्ठी, स च दैवतः सञ्जातदौर्गत्यो निशि रहसि परकीयकणपेषणं विधाय तन्मूल्येन धनेन रजक-गृहाद्धाटकेनाऽऽदत्तानि वर्यवस्त्राणि परिधाय च प्रत्यहं सायं **जनार्दन**भूपसभामभ्येति स्म। तं च तादृग्वेषं किमप्यब्रुवाणं च विलोक्य कोऽसौ ? किमर्थमिहाऽहर्निशं समेतीति राजाऽपि दध्यौ। एकदा रात्रौ रात्रिचर्यायां भ्रमन् भूपस्तद्गृहमागतस्तं च कणपेषणं कुर्वाणं विलोक्योपलक्ष्य च स्वसौधमाययौ। द्वितीयेऽहनि चाऽऽस्थानीं स्थितो राजा तथैवाऽऽगतं तं निभाल्य तस्य पश्यतो घरट्टभ्रामणरीत्या स्वहस्तमभ्रामयत्। सोऽपि शिरःकम्पनेन राज्ञोक्तमङ्गीकृत्य स्वधाम जगाम। तत्र स्थिताः सचिवादयः सभ्याः किमाभ्यां श्रेष्ठिभूपाभ्यां मिथः सूचितमिति संशीतिमन्तो जाताः।

द्वितीयस्मिन्नहन्यपि तथैवाऽऽयातस्य तस्य भूपोऽङ्गुलित्रयमदीदृशत्। शिरसा भूपाऽभिहितं स्वीकृत्य गते तस्मिन् तयोस्तया संज्ञया विस्मिता भीताश्च बहवो धनवन्तः पौरा गृहं गत्वा तं श्रेष्ठिनमपृच्छन्, हे श्रेष्ठिन् ! राज्ञा किं पृष्टं ? भवता च किमसूचि ? अथ सोऽकथयन्नपि बाढनिर्बन्धेन तैरेकान्ते पृष्टः प्राह, प्रथमेऽहनि तथा करं भ्रामयता राज्ञा समस्तमपि नगरं दण्डयामीत्यहं पृष्टः, मयापि शिरःसंज्ञयैव राज्ञोक्तमुररीकृतम्। द्वितीयेऽहनि चाङ्गुलीत्रयदर्शनेन राज्ञा लक्षत्रयसुवर्णमाददामीति ममापृच्छि, अहमपि शिरःकम्पनेन तथेत्यभिधाम्। इति तदुक्तमाकर्ण्याहो अयं महात्माऽऽत्मनामज्ञातो राज्ञश्चातीवमानाऽऽस्पदमिति मत्वा- हे श्रेष्ठिन्मन्नाग्नि स्तोकं मण्डनीयं, हे श्रेष्ठिन्मन्नाग्नि स्तोकं मण्डनीयमिति वदन्तः सर्वेऽपि पौराः सुवर्णमणिमौक्तिक-रजतवसनवाहनादिभूरितरं धनं पृथक् पृथक् तस्यौकसि ढौकयन्ति स्म। सोऽपि तत्कालमेव तेन धनेन धनी समजनि। अथ तथैवाऽऽगतस्य तस्य राज्ञाऽङ्गुलित्रये दर्शिते तेनाऽङ्गुलीद्वयं दर्शितं, लोकानां च लक्षत्रयस्थाने लक्षद्वयमित्यूचे ।

पुनरपि राज्ञाङ्गुलीद्वये दर्शिते तेनाङ्गुलिरेका दर्शिता, लोकानां च लक्षमेकमुक्तं, इति लोका अपि तथा तथा तद्गृहं धनैः पूरयन्ति स्म। पुनरपि राज्ञाऽङ्गुलिरेका दर्शिता, तेनाऽपि शिरः-

कम्पेन न किमपीत्युक्ते तत्कथमिति पुनर्भूपेनोक्ते सोऽब्रवीत्, हे देवाऽऽगम्यतां ममाऽऽवासे, यथा सर्वं दर्शयामि वच्मि चेति राजा तद्गृहं गतः, तेनाप्यासनदानादिना बहु सत्कृत्य राज्ञः पुरः स्वविजृम्भितं पौरविजृम्भितं चाऽभ्यधायि, तन्मतिकौशलेन रञ्जितो राजा तं सचिवं चकार। एवं **मित्रदत्तो**ऽपि सचिवत्वं प्राप्य विहितधर्माः सुगतिभागभूत्। ॥ **इति सद्भिः सह वार्तापि वरीयसीत्यर्थे मित्रदत्तकथा** ॥ ६६ ॥

॥ ६७ ॥ साहसे विक्रमादित्यकथा ॥

सत्त्वादेव पुरुषार्थसिद्धिः, यतः-

धर्मः सत्त्ववतां धर्म-धारिणां विभवागमः। कामो धनवतां तेन, सत्त्वमेव वयं श्रिताः ॥ १ ॥

किं च व्यापारादिगुणविमुखोऽपि पुरुषः केवलात्सत्त्वादेव सांसारिकं च मौक्तिकं च सुखं प्राप्नोति। यतः-

व्यापाराद्विभवः सुखं धृतिगुणात्पथ्याद्वपुःपाटवं।
सौजन्यात्प्रणयोदयो विनयतो विद्या जयः शौर्यतः॥
वैदग्ध्यं बुधसंस्तवाद्वितरणात्कीर्त्तिर्विवेकाद्गुणः।
संवेगात्पदमव्ययं च सकलं संजायते सत्त्वतः॥ २ ॥

किं बहुना? सत्त्ववतो वैरिणोऽपि दासाः स्युः, यत :-

यान्ति सत्त्ववतां पुंसां वैरिणोऽपि हि दासताम् । किङ्करो विक्रमस्याभू-द्वेतालो वैरवानपि ॥ ३ ॥

तथाहि-**उज्जयिन्यां** नगर्यां श्रीमान् **विक्रमसेनो** नृपः, स च सुतो जातो मां मारयिष्यतीति धिया यां स्वपत्नीमापन्नसत्त्वां वेत्ति तां मारयति।

अथैका **धारिणीनाम्नी** तत्सहचारिणी गर्भिणी सती मारणभयात्प्रणश्याऽभ्यर्णवर्तिनि **वटावासे** ग्रामे **भूपति**संज्ञस्य चारणस्यौकसि गता, तेनाऽपि स्वसेव रक्षिता सा शुभलग्नमुहूर्त-दिनवेलायां मेरुमही मन्दारमिव सुतमसूत, **विक्रमसेनस्य** सुत आदित्योदये जातश्चेति मात्रा **विक्रमादित्य** इत्यभिदधे लोकैश्च **विक्रम** इत्यभ्यधायि । अथ शैशवेऽपि रममाणेन तेन कुट्टितानां डिम्भानां पितृभिरुपालब्धया तया **धारिण्या** हक्कितः स विक्रमः कोदण्डपाणिस्ततः पुरान्निर्गत-स्तत्रैवोषितस्य **धनदेवसार्थ**वाहस्य पत्तिर्भूत्वा क्रमेण तेनैव सार्थेशेन सम**मवन्त्या**-मीयिवान्। तत्र च निशि **धनदेव** देवः पुरो पुरोहितेन सहाऽक्षक्रीडां कुर्वन् शिवाशब्दमाकर्ण्य तमूचे, हे पुरोहित! किमियं वक्तीति पृष्टे स स्माह, हे स्वामिन् ! **सिप्रायां** नद्यां पञ्चरत्नयुतः शबो वहमानो याति।

ततो रत्नान्यादाय मम भक्ष्यं दीयतामितीयं सूचयतीति तयोरालापं[1] भित्त्यन्तरे स्थितो विक्रमो निशम्य चापपाणिस्तत्र गत्वा तानि रत्नान्याऽऽदाय शबं च बहिर्निक्षिप्य तत्रैवाऽऽगत्य तस्थौ। तदा च पुनरपि शिवाशब्दं निशम्य तेनोक्तः पुरोधा अभ्यधात्, रत्नानामाऽऽदाता मम

१. रालापं तत्रोपकार्या पार्श्वस्थितो भि० AHR ।।

दाता प्रातरस्यामवन्त्यां राजा भावीति शिवा वदति । वार्त्तामिमां तां च क्रीडां विधाय तयोः सुप्तयोर्विक्रमो दध्यौ, यदहो रत्नशबज्ञानमस्य पुरोहितस्य सत्यमभूत्। तदेदमपि सत्यं भावीति मत्वा प्रभाते सार्थेशं विमुच्य **विशालायां** कुम्भकारस्य गृहं गतो विक्रमो म्लानमुखीं तन्मातरमवलोक्य विषादहेतुमप्राक्षीत् । सा जगौ हे वत्स! अस्याः पुर्याः पतिर्विक्रमसेनो निष्पुत्रः परासुरभूत्, तस्य च राज्यं लोकानामभाग्येन केनाऽपि दुष्टेन देवेनाऽधिष्ठितं, तेन यः कोऽप्यत्र नवीनो राजा स्थाप्यते तं स देवो मारयति, यदि च राजा न विधीयते तदा स बहून् पौरान् विनाशयतीति भीतैः सचिवाद्यैः पौरैः सम्भूय सर्वस्य पौरवर्गस्य नामाऽङ्किताः पत्रिकाः कृत्वा कुम्भे निक्षिप्ताः सन्ति, तेन वारकेण निर्गतपत्रिको मत्पुत्रोऽद्य राज्ये निधास्यते, निशि च तेन देवेन विनाशयिष्यते चेति मम विषादः, इति तयोक्ते विक्रमः स्माऽऽह हे मातः! यो राजा भवति तस्याऽऽज्ञां किं सृजन्ति सर्वेऽपि पौराः ? ।

तथेति तयोक्ते तत्सुतं निषेध्य तत्स्थाने गतो राज्येऽभिषिक्तश्च विक्रमो नगरगोपुरपालकानाकार्य प्रोचे, भो द्वारपालकाः! कस्यां प्रतोल्यां स देवोऽभ्येति? दक्षिणस्यामिति तैरुक्ते सर्वपौरेभ्यः सर्वसुखभक्षिकापुष्पवासादिभिर्भृतं तद्वर्त्म कारयित्वा वासगेहान्तःस्थपर्यङ्के स्वस्थाने महदेकं तूलिकापिहितं दारुदलं निधाय च विक्रमः स्वयं कृपाणपाणिर्दीपच्छायायां भित्तौ निलीय तस्थौ । तदा च प्रदोषे तत्राऽऽगच्छन् सुखभक्षिकादिभिः प्रमनाः कोऽपि भव्यो भूपोऽद्य राज्ये स्थापित इति चिन्तयन् वासगेहं समेत्य स देवो यावत्पर्यङ्कस्थं तत्काष्ठं पाणिना स्पृशति, तावद्विक्रमेण हक्कितः, रे दुष्ट! बहवो वराकास्त्वया हताः, तत्प्रायश्चित्तं यच्छाम्यसिनाऽनेनेति वदन्तं तं हन्तुं यावत्स धावति तावद्विक्रमस्तमाह, हे देव! मम कियदायुरस्तीति यमं पृष्ट्वा समागच्छ, वर्षशतमायुरित्यागत्य तेनोक्ते पुनर्विक्रमोऽवक् शून्यं न सुन्दरमित्येकेनाऽधिकं न्यूनं वा कारयित्वा समागच्छ, पुनः स स्माह – तेन यमेनाऽधिकं न्यूनं वा न भवति ।

इति तेनाभिहिते करवालकरालो विक्रमो वक्ति स्म– रे वराक ! तेन यमेनाऽपि यदि न्यूनाऽऽधिक्यं कर्तुं न शक्यते तदा भिक्षाचरेण त्वया कथमहं मारयितुमलम्? इति श्रुत्वा देवोऽवादीत् हे पुरुषोत्तम! तव मतिकौशलेन साहसेन च तुभ्यं तुष्टोऽस्मि, याचस्व किञ्चिदित्युक्तः स्फुरद्विक्रमो विक्रमोऽवदत्, स्मृतस्त्वं समागच्छेरित्यभिधाय विसृष्टो वेतालोऽहमिति स्वं नाम प्रतिपाद्य च स्वस्थानं गते तस्मिन् तेन विहितसान्निध्यो विक्रमादित्यो राज्यं चकार ॥ **इति साहसे विक्रमादित्यकथा ॥ ६७ ॥**

॥ ६८ ॥ सत्यं पृच्छताम् असत्यकथने महत्पापम् इत्यर्थे मृगी-मृगयुकथा ॥

असत्यवचनाद्बहवो दोषाः, यतः–

असत्यवचनाद्वैर–विषादाऽप्रत्ययादयः । प्रादुष्यन्ति न के दोषा, कुपथ्याद्व्याधयो यथा ॥ १ ॥

[योगशास्त्रे २/५८]

तदसत्यादेव गुणानां नाशः स्यात्, यतः-

कीर्त्तौ कज्जलकूर्चकं हलमुखं विश्वासविश्वातले। नानाऽनर्थकदर्थनावनघनं कौलीनकेलीगृहम्।
प्रेमप्रौढपयोदपूगपवनं सन्मानमुस्ताङ्कुरे। [1]कोलं कोऽलममर्त्यमर्त्यभयकृन्मिथ्या वचो जल्पितुम्॥

किंच सन्मतिं पृच्छतामसत्यवचनकथने महत्पातकं, यतः-

अशुद्धकथने शुद्धं पृच्छतां पातकं महत्। यतो मृग्यापि नाऽऽदायि, पापमेतत्स्वमूर्द्धनि॥ ३ ॥

तथाहि— **थोरावासे** पुरे **शङ्करो** नाम मृगयुः, स चैकदा चापपाणिः पापर्द्धिः पापर्द्धिकृते वने भ्रमन्नेकां कुरङ्गीं शरगोचरीकृत्य यावत् शरं मुञ्चति, तावत्सा तमूचे, हे भद्र! नवप्रसूताया मम लघवो शिशवो विना मातरं मृतिं यास्यन्ति। मारितायां मयि च स्त्रीहत्या बालहत्या चेति महत्पातकं तव भावि, तेन मां मुञ्च। ततः स जगौ, हे हरिणि ! पातकं भवतु मा वा, परं विना मांसं सकलमपि मम कुटुम्बं म्रियते, तेनाऽवश्यं त्वां मारयिष्यामीति तेनोक्ते साऽभणत्, एकशो मां मुञ्च यथा तेषामर्भकाणां स्तन्यं दत्त्वा मूर्धानं चोच्चुम्ब्य **समेमीति** तयोक्ते सोऽवादीत्-विना शपथं त्वां न मुञ्चामि, यतः पशूनां वचसि को विश्वासः? अथ च सा जगाद, यदि नाऽऽगच्छामि तदा ब्रह्मस्त्रीबालगोहत्यापातकं मम मूर्धनीति तयाभिहिते शङ्करो व्याकरोत्, एतत्पातकमहं न मन्ये, सत्यं पृच्छतामसत्यकथने यत्पातकं स्यात्तत्पातकं यदि स्वीकरोषि तदा व्रज, निजेष्टं च विधेहि।

सा तदपि महत्पातकमङ्गीकृत्य गत्वा स्वोक्तं च विधाय समागता सती शङ्करं जगौ- हे भद्र! सत्यं वद, केनोपायेनाऽहं जीवन्ती व्रजामीति तदुक्तमाकर्ण्य स दध्यौ, यदहो तिरश्चयाऽप्यनया तत्पातकं नाऽऽदायि, किं च सत्यं पृच्छन्त्या अस्या यदाऽहमसत्यं वक्ष्ये, तदा पशोरप्यस्या अहं पशुरिति विमृश्य स तां जगौ, हे हरिणि! मम वामतो गता त्वं जीविष्यसीति सापि तथैव विधाय शिववती सती निजाऽऽस्पदमाससाद ॥ **इति सत्यं पृच्छतामसत्यकथने महत्पापमित्यर्थे मृगीमृगयुकथा** ॥ ६८ ॥

॥ ६९ ॥ मतौ स्मरसुन्दरी-पण्यसुन्दरी-कथा ॥

पण्डितानामप्यगम्यमपठितोऽपि मतिमान् वेत्ति, यतः-

कोटिशः शास्त्रवेत्तार-स्तत्र जानन्ति पण्डिताः ।
वेत्ति वेत्ता यदेकोऽपि मतिकौशलपेशलः ॥ १ ॥

तेन यत्कार्यं कर्त्तुं बलज्ञानविज्ञानवन्तो न शक्नुवन्ति तत्कार्यं मतिमान् हेलया करोति, *यतः-*

न ज्ञानैर्न च विज्ञानै-र्न बलैर्न छलैरपि । केऽपि कुर्वन्ति यत्कार्यं, तत्केचन धियैकया॥ २॥

१. कोलं कोल सदाशयो द्रुतमति भाषीनैव भासते AHR ।

किं बहुना ? सर्वत्र मतिरेव वरीयसी, यतः-

योग्याऽऽदत्तानि यत्पण्य-वधूः पञ्चाऽप्यदापयत् ।
बुद्ध्या द्विजाय रत्नानि, तदहो बुद्धिरुत्तमा ॥ ३ ॥

तथाहि-**आसापाटक**वासी **गङ्गदत्तो** द्विजो **रोहणाचलतः** पञ्च रत्नान्यादाय स्वपुरमागच्छन्नन्तराले **दम्भपुरं** पुरं प्राप्येति दध्यौ, यदेतानि रत्नानि कस्याप्योकसि विमुच्य **तुङ्गगिरि**शृङ्गस्थित**बलदेव**मूर्त्तिं प्रणम्य क्षेमेण गृहं यामीति मत्वा कस्याऽपि वणिजो हट्टे तस्मिन् स्थिते कापि दासी घृतार्थमागता, तेनापि वणिजा परदेशिनस्तस्य विश्वासार्थमधिकं दत्तं घृतमादाय गेहमागतां तां तत्स्वामिनी स्माऽऽह, हे पुत्रि! येनाऽधिकं घृतमदायि, तेन नूनं तस्य हट्टे कोऽपि परदेशी स्थितोऽस्ति ।

तेन अधिकं घृतं वयं नाऽऽदास्याम इत्यभिधाय घृतमिदमधिकं प्रत्यर्पयेत्युक्तया तया तस्मिंस्तस्थुष्येव प्रत्यर्पितं घृतं विलोक्यैतस्या व्यवहारशुद्धिरस्ति, अतोऽस्या गेहे रत्नानि मुञ्चामीति विचार्य तत्पृष्ठलग्नो **गङ्गदत्त**स्तदगारमाजगाम। तत्र तस्मिन् स्थिते भिक्षार्थमागतायैकस्य योगिनः शिष्याय तया तद्विश्वासाय भूयसी भिक्षा दत्ता। शिष्येणाऽऽनीतामधिकां भिक्षामुदीक्ष्य गुरुर्दध्यौ, ध्रुवं तदोकसि कोऽपि परदेशी स्थितोऽस्ति, तेनाऽधिकां भिक्षां वयं नाऽऽदास्याम इत्युदीर्य प्रत्यर्पितां भिक्षां विलोक्य भोज्येऽपि निरीहस्य अस्य योगिनो धामनि रत्नानि मुञ्चामीति मत्वा तत्र च गत्वा, मुधैव न नेति वदतोऽप्यस्य योगिनो बलेन रत्नानि दत्त्वा यात्रां च कृत्वा समेतो योगिनं रत्नानि ययाचे । कोऽहं ? कस्त्वं ? कानि रत्नानि ? इति जल्पता योगिना निराकृतः स मुषितोऽहं मुषितोऽहमिति ब्रुवाणः पुरान्तर्भ्रमन् रत्नाऽऽदानप्रज्ञापटीयसीं **स्मरसुन्दरीं** नाम पण्यसुन्दरीं श्रुत्वा तदाऽऽवासं ययौ । तदुक्तं स्वमसुखं निशम्य परवञ्चनचतुरा सा तमभाणीत्, हे सुभग ! योगिमठिकायां स्थितायां मयि त्वया स्वानि रत्नानि मार्गणीयानीति तमनुशिष्य कर्क्करकपूरितं दत्ततालकं भृशं शोभनं च पेटीपञ्चकमादाय स्वीकृतकुलकामिनीवरनेपथ्या सा तत्र गत्वा योगिनं जगौ, हे नाथ! मदीयानि प्रवहणानि पयोनिधौ भग्नानीति वार्त्ताऽद्य समागता, किञ्च भूरिभिरधमर्णैरिदं मम सर्वं धनमादास्यते, तेन कियद्वासराणीदं मम पेटीपञ्चकं स्वमठिकायां निधीयतामिति वार्त्तां विदधत्यामेव तस्यां पूर्वसङ्केतितः स द्विजोऽप्यागत्य रत्नानि ययाचे ।

योगिना चिन्तितमविश्वासेनेयमिदं घनं धनमादाय पश्चान्मा यात्विति धिया तेन योगिनाऽपि सत्वरमेव तस्मै रत्नानि दत्तानि, तदैव पूर्वसङ्केतितैका तदीया दासी तत्राऽऽगत्य तामिति भणति स्म- हे स्वामिनि ! आत्मनां वाहनानि कुशलेनाऽधुना समागतानि, तदाकर्ण्य सा ननर्त, तां नृत्यन्तीं विलोक्य **गङ्गदत्तो**ऽपि नृत्यति स्म। तदा स्मिताऽऽननं तं योगिनमपि नृत्यन्तं निर्वर्ण्य सा वरवर्णिनी बभाण, वाहनानामागमनादहं, रत्नानां लाभाच्चाऽयं, [इति] यदावां

नृत्यावस्तत्समञ्जसं, परं हे नाथ! कथं त्वं नृत्यसीत्युक्तो योगी जगौ, हे वेश्ये! मयैषा मतिर्नावलब्धेति नृत्यामि। गङ्गदत्तोऽपि महोपकारित्वेन स्मरसुन्दरीं बहुसत्कारभाजनं निर्माय स्वं धाम जगाम ॥ **इति मतौ स्मरसुन्दरीपण्यसुन्दरीकथा ॥ ६९ ॥**

॥ ७० ॥ भाग्योपरि गजराजवणिक्कथा ॥

विषममपि कर्म कुर्वतां भाग्यवतां स्वार्थसिद्धिः यतः-

गहनवनमगारं शस्त्रमम्भोजपुञ्जं, विषममृतं फणीन्द्रो माल्यमब्धिः स्थलं च ।
हुतवहततिरापः केसरी सारमेयः, प्रधनमनघकेलिर्जायते भाग्यभाजाम् ॥ १ ॥

भाग्यादेव सर्वं समञ्जसं, यत :-

विरुद्धं सृजतां पुसां, भाग्याद्भवति शोभनम् ।
प्रस्फोटयन् शिरः प्राप, स्वर्णसिद्धिं यथा वणिक् ॥ २ ॥

तथाहि - **गजपुरे पुरे गजराजो** वणिक्, लोभाऽभिभूतो स च धातुर्वादेन सर्वं धनं निधनं नीत्वा सुवर्णसिद्धिमीहमानः स्वपुरान्निर्गत्य भुवि भ्रमन् **भूमिभूषणे** पुरे सुवर्णसिद्ध्या प्रसिद्धामेकां **मदनमञ्जरी**गणिकामाकर्ण्य तद्गृहकर्माणि कुर्वंस्तस्याः किङ्करत्वं करोति । सा धूर्त्ता तु कस्याऽपि विश्वासमकुर्वाणा तस्य परदेशिनस्तु विशेषतो विश्वासं न विदधे। **गजराजो**ऽपि सुवर्णसिद्धिमिच्छुर्विशेषतो विनयप्रतिपत्तिपरो भवंस्तां तथा वशीचकार, यथा शनैः शनैः सा किमपि तस्य विश्रम्भं व्यधात्।

तथाऽपि सम्पूर्णं विश्वासमकुर्वाणां तां मत्वा सोऽन्येद्युस्तत्परिजनं जगौ, यदहमद्य भित्तिं न पश्यामि, स्तंभं न पश्यामि, द्वारं न पश्यामि, कस्याऽपि मुखं न पश्यामि, स्वं पाणिं चाऽपि न पश्यामीति वदन् **गजराजो** दम्भेन क्रमात्तथाविधां चेष्टां चकार, यथा सा तत्परिजनश्च स्तम्भभित्त्यादौ हन्यमानं तं प्रकाममन्धमज्ञासीत् । अन्धत्वाद्विश्वस्तः सोऽपि क्रमेण सुवर्णसिद्धिकारीण्यौषधानि तद्विधिं च विवेद । माऽसौ पश्यन् भूयादिति धूर्त्तया तया भोक्तुमुपविष्टस्य तस्य स्थाले पुरीषे मुक्ते सति मा पश्यन्तं मामियं जानात्विति व्यंसकविशेषकः सोऽपि सुखभक्षिकायामिव तस्मिन् पुरीषे दक्षिणं पाणिमक्षिपत् । तथा कुर्वन्नसावन्ध इति तया विश्वस्तः, एवं तद्विधिं सर्वं सम्यगवगम्य स स्वपुरमागतस्तेनैव विधिना सुवर्णं कुर्वाणः सुवर्णमपूर्णनिष्पन्नं निध्यायाऽहो ! मे मन्दभाग्यमिति खेदात्पाषाणेनाऽऽस्फालिताद्भालात्सुवर्णरसोपरि निपतितेन शोणितबिन्दुना सम्पूर्णं सुवर्णं जातं निरीक्ष्य स दध्यौ, अहो अस्मिन् कर्मणि कर्त्रा स्वरुधिरेण बलिः करणीयः, स त्वधुना मम स्वभावपतितेन रुधिरेणाजनीति । अथ तथैव सुवर्णं कुर्वाणं तमाकर्ण्य सा वेश्या दध्यौ, अहो तेन व्यंसकेन मुषिताहं, किं च गुरुभागो मया रक्षितोऽस्ति, तेन विना च स कथं कनकं कुर्वन्नस्तीति ध्यात्वा तत्र समेतायास्तस्याः सर्वं स्वविहितं निवेद्य, गुरुत्वेन तेन सत्कृता

सा स्वाऽऽस्पदमासदत् । सोऽपि तेन कनकेन जिनचैत्यादिषु महोत्सवकरणेन कृतसुकृतः स्वार्थमसाधयत् ॥ **इति भाग्योपरि गजराजवणिक्कथा ॥ ७० ॥**

॥ ७१ ॥ भाग्ये राङ्कश्रेष्ठिकथा ॥

समानेऽप्युद्यमे भाग्यमेव फलदं, यतः-

उद्यमं कुर्वतां पुंसां, भाग्यं सर्वत्र कारणम् । समुद्रमथनाल्लेभे, हरिर्लक्ष्मीं हरो विषम् ॥ १ ॥

किं च येन केनापि सञ्चिता सम्पत्तिर्भाग्यवतामेव भोगाय जायते, यतः-

कोटिकासञ्चितं धान्यं, मक्षिकासञ्चितं मधु । कृपणैः सञ्चितं वित्त-मन्यैरेवोपभुज्यते ॥ २ ॥

अपि च-

भोग्या भाग्यवतां सम्पद्, भृङ्गाणामिव पद्मिनी ।
जट्याऽऽनीतरसं प्राप, यतो राङ्काऽभिधो वणिक् ॥ ३ ॥

तथाहि— **धन्यपुरे** पुरे **शिवशर्मनामा** जटी, तस्य चेति पारम्पर्येणाऽऽगतो रसकल्पोऽस्ति, तथाहि— **पुण्याकरे** पर्वते पूर्वस्यां दिश्येका गुहाऽस्ति, तस्या मुख-मध्य-पर्यन्तेषु चोप-वासत्रयकरणेन तत्र रसकूपिका प्राप्यते । तुम्बिकागृहीतस्य तस्य रसस्यैकेन बिन्दुना क्षिप्तेन तप्तो लोहभारो जात्यं जातरूपं स्यादिति । अन्येद्युरनेन कल्पोक्तेन विधिना तैलपक्वमहिषीपुच्छप्रदीपेन दृष्टवर्त्मा **शिवशर्मा** तस्याः कूपिकायास्तुम्बिकायां रसमाददानो रसमध्यात् '**भर राङ्काने नामें**' इति निर्गतं शब्दमशृणोत्। किं मम भाग्येऽसौ रसो लिखितो नास्तीति मत्वा तेन स रसस्तत्रैव निक्षिप्तः, क्षणं विहितविलम्बः पुनरपि रसमाददानः स तथैव शब्दं शुश्राव । एवं च सप्तशस्तदेव शब्दं श्रुत्वा स पुनस्तत्रैव रसं निचिक्षेप । अथ च वस्तुनः स्वभावोऽयमिति मत्वा तुम्बिकायां रसमादाय स्वपुरमागच्छन् स वर्त्मनि प्राप्ते **वल्लभी**ग्रामे कस्यापि वणिजो गृहे तुम्बिकां विमुच्य **प्रभासतीर्थे** यात्रां कर्तुं गतवान् । तेन वणिजाऽपि चुल्लिकोपरि तुम्बिकायां निबद्धायां अधस्तान्निर्गतधूमेन तप्ततुम्बिकातः पतितेनैकेन रसबिन्दुनाधस्तात्स्थितचुल्लिकोपरिस्थितं लोहतप्तिकापात्रं कनकमयं जातं विलोक्य स वणिग् दध्यौ-नूनं तुम्बिकाऽन्तः सिद्धरसोऽस्ति ।

इति मत्वा स्वं गृहं भस्मसाद्विधाय तुम्बिकां चादायान्यस्मिन् गृहे तस्थुषि तस्मिन् वणिजि गृहे समेतः स जटी तस्य गृहं तत्राऽपश्यन् जनैर्दर्शिते तस्य वणिजो धाम समेत्य तुम्बिकां ययाचे। गृहे दग्धे ते तुम्बिकाऽपि दग्धेति तेनाऽभिहितं निशम्य स जटी वणिजमभाणीत्— हे श्रेष्ठिन् ! किं तव नाम? **राङ्काऽऽख्योऽहमिति** तेन वणिजा निगदितमाकर्ण्य रसतो निर्गतो ध्वनिः समीचीनोऽजनीति मत्वा राङ्काऽऽख्यस्य तं सर्वं वृत्तान्तं निवेद्य तेन सत्कृतः स जटी स्वपुरमगात्। राङ्काऽऽख्यः श्रेष्ठ्यपि रसनिष्पन्नं कनकं सप्तक्षेत्र्यामुप्त्वा सद्गतिमीयिवान् ॥ **इति भाग्ये राङ्काख्यश्रेष्ठिकथा ॥ ७१ ॥**

१. AHR पुण्याकरे । २. AHR भरि राङ्काने नामि । ३. AHR पुनः ।

॥ ७२ ॥ भाग्ये महाकविकालिदासकथा ॥

भाग्यभाजां हि सर्वमसम्भाव्यमपि भवति, यतः-

भाग्यात्सम्पद्यते पुंसा-मसम्भाव्यमपि क्षितौ ।
तेरुर्मेरुसमाः शैलाः किं न रामस्य वारिधौ ? ॥ १ ॥
यद्रामो घटयाम्बभूव जलधौ सेतुं धरित्रीधरै-
र्यत्कुम्भप्रभवश्चकार चुलुकं चैकं पतिं पाथसाम्।
यत्पुष्पैर्जितवान् जगत्त्रयमसौ सङ्कल्पयोनिः क्षणा-
द्विघ्नः सुन्दरि ! विश्वविस्मयकरं तद्भाग्यविस्फूर्जितम् ॥ २ ॥

अपि च—

तद्भवेद्भाग्यतः पुंसां, यच्च वाचामगोचरम् ।
येनाऽऽभीरतनूजोऽपि, कालिदासोऽभवत्कविः ॥ ३ ॥

तथाहि— **धारानगर्यां श्रीभोजराजस्य** व्याकरणादिसमस्तशास्त्रनिपुणा प्रत्यक्षा सरस्वतीव **कालीसरस्वती**नाम सुता, सा चैकदा गवाक्षस्थिताऽधस्ताद् गच्छन्तं **माघपण्डितं** प्रोचे, हे तात! पक्वान्याम्राणि गृहाण! तेनाऽप्युत्तरीयाऽञ्चले मण्डिते सति, शीतान्यशीतानि वाऽऽम्राणि यच्छामीति वादिनीं सोऽवोचत्। हे पुत्रि ! शीतानि बहूनि बहुशो भुक्तानि, तेनाऽद्याऽशीतानि देहीति कथिते तया भूमौ निक्षिप्तान्याऽऽम्राणि रेणुभिर्दिग्धत्वेन फूत्कृत्याददानं माघं साऽवक्, हे तात ! किमाऽऽम्राणि भृशमुष्णानि? येन भूयोभूयः फूत्करोषीति हसितो माघो दध्यौ, यदहं गुरुरप्यनया हसितस्तदस्या निरक्षरेण वरेण संयोगं जनयिष्यामीति ध्यात्वा स स्वधाम जगाम ।

अथैकदा राजपुत्रं वणिक्पुत्रं वैश्यवपुत्रं वा पण्डितं पुत्रीकृते वरमानयेति भोजेनोक्तो **माघो** बहुमूर्खे **मरुदेशे** भ्रमन् **सीरसरग्रामाऽभ्यर्णे** पिप्पलस्य शाखायामपरभागे स्थित्वा मूलतच्छिन्दन्तमेकमाभीरमालोक्येति जगौ- हे भद्र ! कृत्तायां शाखायामधः पतिष्यसीति तस्मिन्नभिदधति सति तथैव पतितः स माघं प्राह, हे विप्र ! तव ज्ञानं सत्यम्, **माघो** ध्यातवान्, यद्यसौ वरस्तस्याः स्यात् तदा मम हास्यफलं सा लभेतेति माघस्तमादाय गृहमागत्य च षण्मासीं यावद्रहोदेशे तमाशीर्वादमध्यापयति स्म ।

षण्मासाऽन्ते विप्रो वरः समानीतोऽस्तीति राज्ञो निवेद्य कारितविप्रवेषं भृशमांसलं तं राजसभां नीत्वा भूपायाऽऽशीर्वादं वदेति माघेनोक्तः सभ्यानां क्षोभमसहमानो विस्मृतपूर्वाधीतपदः स आशीर्वादस्थाने 'उशरट' इति जगौ । कोऽयमाशीर्वाद? इति राज्ञोक्ते **माघः** स्माऽऽह हे! स्वामिन्नस्याऽऽशीर्वादस्यायमर्थः—

---

१. B । क्षणात् -R ॥ २. तुला- प्रबन्धचिन्तामणौ विक्रमार्कप्रबन्धे ॥ ३. HRB । द्विजपुत्रं-मु ॥

उमया सहितः शम्भुः शर्वरीकरभूषणः ॥
रक्षां करोतु वः कुर्वन् टणत्कारकरं यशः ॥ ४ ॥

इत्यर्थचातुरीतो महान् पण्डितोऽयमिति जानता राज्ञा दत्तां तां पुत्रीं स शुभेऽहनि महोत्सवैः परिणीतवान् । परिणीता च सा पतिवैज्ञ्यजिज्ञासया तस्मै शोधनोपकरणयुतं शोधनार्थमेकं लिखितं पत्रं दासीकरेण प्रजिघाय। मूर्खशेखरः सोऽपि मात्रादिभिस्तद्रेखा विषमाः प्रेक्ष्य, स्मृत-पूर्वाऽऽचरितसीर-सीतारेखाकारो हरितालेन दूरीकृतबिन्दुमात्रं तत्पत्रं तयैव दास्या सह प्रेषयति स्म। साऽपि तत्पत्रं तादृशं विलोक्यातिमात्रमातृमुखमुख्योऽयं मम मूर्द्धनि भग्नः, अथ कथमनेन सहाऽहं गृहमेधितां पालयिष्यामि ? यतः—

सकृज्जल्पन्ति राजानः, सकृज्जल्पन्ति साधवः।
सकृत्कन्याः प्रदीयन्ते, त्रीण्येतानि सकृत् सकृत् ॥ ५ ॥

एकदा किञ्जातीयोऽयमिति जिज्ञासया चित्रितविविधचित्रे सौधमध्ये तमेकाकिनमासयित्वा विषादवती सा मक्षिकेव भित्त्यन्तरे तस्थौ। तानि चित्राणि पश्यन्नेकत्र विविधवर्णाश्चित्रिता अजाश्चरन्तीरचित्रिता इव निभाल्य स्मृतात्मगलस्तनीवर्गः सोऽपि पूर्वाभ्यासवशात्ताः प्रत्येकं नामग्राहमाजुहाव । तं च तथा ब्रुवाणं विभाव्य वल्लवोऽयमिति तया निषिद्धाऽऽवासप्रवेशो बालिशोऽहमित्यनया प्रियया त्यक्त इति खेदात्**कालीदेवी**संज्ञायाः सरस्वत्याः प्रासादं प्रविश्य पाषाणपाणिः स इति जगौ, हे देवि ! आदौ भवतीं पश्चादात्मानमनेन पाषाणेन खण्डशः करिष्ये, न चेन्मम विद्यादायिनी भवेति वदतस्तस्य भाग्यप्राग्भारैस्तुष्टया तया देव्या मम तव च वचसि न भेद इति दत्तवरो अन्तःसमागतभारतीप्रसादतेजाः स सौधाऽधस्ताद् गच्छन् गवाक्षस्थया कालीसरस्वत्याऽभाणि, हे नाथ ! अस्ति कश्चिद्वाग्विलासः, इति निशम्य सोऽपि तत्रस्थित एव वाग्देवीवरेण अस्तीत्यनुसारेण 'अस्त्युत्तरस्या'मिति **कुमारसम्भवनामकाव्यं**, कश्चिदित्यनुसारेण 'कश्चित्कान्तेति **मेघदूतनामकाव्यं**, वागित्यनुसारेण 'वागर्थाविवे'ति **रघुवंशनामकाव्यं**, विलास इत्यनुसारेण 'विलासवचसां बीज'मिति षड्ऋतुवर्णनं नाम **ऋतुविलास (संहार) काव्यं** चेति महाकाव्यचतुष्टयं विधाय कालिदासोऽहमिति स्वं नाम प्रथयन् कालिदासो महाकविरजनि ॥ **इति भाग्ये महाकविकालिदासकथा ॥ ७२ ॥**

॥ ७३ ॥ अवसरवचने दाने च पुरुषोत्तमविप्र-श्रीभोजकथा ॥

विरुद्धाचारवतामपि कवीनां वचनैः सन्तुष्टा दातारस्तेषां किं किं न यच्छन्ति ? यतः-

यच्छन्ति हृष्टहृदया न हि किं वदान्या, लक्षाश्चतुर्दश विशारदतस्कराय ।
सम्मीलने नयनयोर्न हि किञ्चिदस्ती-त्युक्त्वा प्रहृष्टवदनो विततार भोजः ॥ १ ॥

१. उमया सहितो रुद्रः, शङ्करः शूलपाणियुक् । रक्षतु तव राजेन्द्र !, टणत्कारकरं यशः ॥ १ ॥ इति **विक्रमचरिते** शुभशीलगणिरचिते ॥ २. सीर=हल, सीता=हलरेखा ॥

तथाहि-**धारानगर**निकटवर्त्तिनि **शङ्करणाग्रामे** महीधरविप्रस्य **पुरुषोत्तम**नामा पुत्रो महाकविरपि स च पूर्वकर्मवशेन द्यूतादिव्यसनी, प्रकामं प्रियया **रतिसुन्दरी**संज्ञया वेश्यया प्रहितश्चौर्यार्थं निशीथे **भोजराज**सौधे प्रविश्य **श्रीभोजं** जाग्रन्तं विभाव्य पर्यङ्काधो निलीय तस्थौ। तदा च जातप्रमीलान्तः स्वसम्पदुत्कर्षहर्षप्रकर्षमनाः सुमनाः **श्रीभोज**राज इति पदत्रयं चकार, यतः—

चेतोहरा युवतयः स्वजनोऽनुकूलः। सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः।
गर्जन्ति दन्तिनिवहास्तरलास्तुरङ्गाः।

पुनः पुनरिदं पदत्रयं पठन् शयने चेतस्ततो लुठन् यावदिति स्वसम्पदि प्रकामोत्कर्षवान् भोजभूमिनाथ आसीत्, तावत्पर्यङ्काधःस्थः स दध्यौ, राजा मां मारयतु मुञ्चतु वा, परमवसरो गतो नैष्यतीति राज्ञस्तस्मिन् दर्पसर्पे मन्त्राक्षरमिव सोऽग्रेतनं चतुर्थं चरणमभाणीत् ।

'सम्मीलने नयनयोर्न हि किंचिदस्ति ॥ १ ॥'

श्रुतेनानेन पदेन **भुजङ्गमदर्शनेन प्रदीप** इवोपशान्तगर्वो **भोजो** बभाण कस्त्वमिति, सोऽप्यात्मनः सर्वं व्यतिकरं व्याकरोत् ।

अथ **भोजो**ऽभ्यधात्, हे पुरुषोत्तम ! वैदग्ध्येतरः कोऽयं तव व्यापारः ? हे देव ! नातः परमहमिदमनुचितं विधास्ये, इति वदता तेन सह शास्त्रविनोदैः शेषां शर्वरीं गमयित्वा प्रभाते **श्रीभोजः** स्वकृतं पदत्रयं तत्कृतं चैकं पदं स्वपण्डितानां निवेद्य **वसन्ततिलका**-छन्दःपदवर्णप्रमितत्वेन चतुर्दशलक्षसुवर्णदानपुरस्सरं वस्त्रादिना सत्कृत्य पुरुषोत्तमं स्वपुराय प्राहिणोत्। सोऽपि तेषां सभासदां समक्षं निषिद्धव्यसनदोषः स्ववेश्मन्येति ॥ **इत्यवसर-वचने दाने च पुरुषोत्तमविप्रश्रीभोजकथा** ॥ ७३ ॥

॥ ७४ ॥ मायया स्वकार्यकरणे काकीकथा ॥

माया हि विश्वाससौहार्दाऽऽदिबुहुगुणानां नाशं करोति, यतः—

विश्रम्भं भुजगीव जीवितततुं व्याहन्ति या देहिनां,
या सौहार्दमपाकरोति शुचितां स्पर्शोऽशुचीनामिव॥
या कौटिल्यकलां कलामिव विधोः पुष्णाति पक्षः सित-
स्तां निर्मोकमिवोरगो हि विबुधो मायां न को मुञ्चति ? ॥ १ ॥

किञ्च मायावन्तो महान्तोऽप्यसेवनीयाः स्युः, यतः—

उमाया इव मायायाः, सम्पर्कं मुञ्च मुञ्च रे ।
ईश्वरोऽपि नरो नूनं, यत्सङ्गाद्धीमतां भजेत् ॥ २ ॥

---

१. तुला-भोजप्रबन्धे अधिकारः ४॥ ARB । शङ्करग्रा° मु.॥ २. प्रमीला=तन्द्रा ॥



પ. પૂ. આ. શ્રી ભદ્રસૂરીશ્વરજી મહારાજ



પ. પૂ.આ. શ્રી મુનિચંદ્રસૂરિ મ. સા.



પૂ. મુનિરાજશ્રી વિલાસવિજયજી મહારાજ



પૂ. આ. ભ. શ્રી સિદ્ધિસૂરિ મ. સા.
(બાપજી મ. સા.)



પૂ. મુનિરાજશ્રી જિનચંદ્રવિજયજી મ. સા.



પ. પૂ. આ. શ્રી ઓંકારસૂરીશ્વરજી મહારાજા



પૂ. પ્રવર્તક મુનિરાજશ્રી જયાનંદવિજયજી મ. સા.



પ. પૂ. આ. શ્રી અરવિંદસૂરીશ્વરજી મહારાજા



પ. પૂ. આ. શ્રી યશોવિજયસૂરીશ્વરજી મહારાજા

ईदृश्यपि माया स्वार्थाय विहिता नूनमनर्थं निराकरोति, यतः—

मायाभिः क्रियते यत्तत्, क्रियते न तरस्विभिः ।
काक्या कनकसूत्रेण, कृष्णसर्पो निपातितः ॥ ३ ॥

तथाहि— **अतिगहन**नामवने पिप्पले **तुङ्गतुण्डा**नाम काकी वसति स्म । तदभ्यर्णं **महोदर**दरवासी **काकोद**रस्तस्मिन् पिप्पलेऽधिरुह्य प्रतिवर्षं तस्याः काक्या अपत्यान्यत्ति स्म। स्वाऽपत्यविनाशिनं तमेव विज्ञाय तद्बिलजिज्ञासयाऽऽत्मवैरिजिघृक्षया च कपटेन तस्योपचर्यां चकार। अथ तया बिलान्तर्निक्षिप्तं जीवन्तं मूषकं भेकं चटकं वा प्राप्य 'केनेदं मम भोज्यं दत्तमि'ति तेन सर्पेणोक्ता सा स्माऽऽह, हे नाथ ! वराकी युष्माकं किङ्करी तुङ्गतुण्डानामकाक्यस्मीति दम्भेन सा तं स्वमयं निर्ममे । स्त्रीणां जातावपि दम्भ एव वृत्तिः । यतः—

जीवन्ति सुधियः शास्त्रै-र्व्यापारैर्वणिजां व्रजाः ।
करैर्विश्वम्भराधीशाः, कपटैः कमलेक्षणाः ॥ ४ ॥

अन्यदा मायया मोहितं तमहिं विज्ञाय धूर्ता सा **रत्नसारपुराधिपस्यारिसिंहस्य** राज्ञो मज्जनाय सज्जया सौभाग्यसुन्दर्या देव्या निकटे मुक्तं **कनकसूत्र**संज्ञं हारं लात्वा तस्य सर्पस्य बिलान्तर्निक्षिप्य च स्वयं तस्मिन्नेव परिसरे तस्थौ । तया तत्र निक्षिप्तं हारमालोक्य तदनुसारेणागतैस्तस्य राज्ञो नरैर्हारनिष्कासनार्थं तद्बिलं खनद्भिः प्रथमतो निर्गतं तं सर्पं निहत्य तद्बिलपर्यन्ते पतितं तं हारमादाय च स्वस्वामिनो डुढौके । एवं मृते तस्मिन् सर्पे सा तुङ्गतुण्डा स्वान्यपत्यानि सुखं पालितवती ॥ **इति मायया स्वकार्यकरणे काकीकथा ॥ ७४ ॥**

॥ ७५ ॥ मतिविषये वसुदत्तश्रेष्ठिकथा ॥

व्यापारादौ सर्वत्राऽपि मतिमानेव मान्यः, यतः-

व्यापारे वाङ्मये वादे, विज्ञाने विनये व्रते ।
षट्स्वमीषु वकारेषु, धीमानेव पुरस्सरः ॥ १ ॥

तेन विषममपि कर्म मेधावी लीलया करोति, यतः—

दुःसाध्यमपि कुर्वन्ति, कार्यं किं किं न धीधनाः ? ॥
मुक्तावपनबुद्ध्या यत्, श्रेष्ठिना सचिवो हतः ॥ २ ॥

तथाहि— **मेदिनीमण्डने** नगरे **जयभद्रस्य** भूपस्य **मन्त्रसारो** मन्त्री, स चैकदा विपणीपथे व्रजन् **वसुदत्तस्य** श्रेष्ठिनो **वसुसारं** सुतं शर्करामाददानं विलोक्य तां शर्करामुद्धारकेण वसुसारं स्वदासेनाऽमार्गयत् । वित्तं विना तेनाऽवितीर्णां तां ज्ञात्वा तद्वैरेण कारितकुलवधूवेषां स्वदासीमेकां क्रमुकफलश्रीफलजातिफललवङ्गादिवस्तुग्रहणार्थं तद्विपणौ प्रेष्य तया समं वार्त्तां विदधानं वसुसारं चरैराकलय्य तत्राऽऽगतो मन्त्री स्माऽऽह—

१. RDB । तं प्रति स्वमायां निर्ममे । स्त्रीणां दम्भप्रवृत्तिस्तु सहजैव । यतः -मु. ॥

रे पाप ! रे दुराचार ! पञ्च गृहाणि तु शाकिन्यपि मुञ्चति, त्वं तु वित्तमत्तोऽस्मन्मानुषैरपि परिचयं न त्यजसीति पौरसमक्षं बाढं सन्तर्ज्य राजाऽऽदेशेन मन्त्री तं वधार्थमादिशत् । अथ ज्ञातोदन्तो **वसुदत्तः** सभामागत्य भूपमिति जगौ–हे देव ! सुतोऽनेन कर्मणा मार्यमाणो न दुःखं करोति, परं तेनैव ज्ञातो मुक्ताफलवपनविधिर्निधनं यातीति महान् खेदोऽस्तीति श्रुत्वा राजा तं पश्चादानाय्य किं वेत्सि मुक्ताफलवपनविधिमित्यप्राक्षीत् । तदा तत्र स्वं पितरं विलोक्य कोऽप्ययं पितुः प्रपञ्च इति मत्वा तथेति वदन्तं तं बन्धनाद्विमोच्याऽऽसने चाऽऽसयित्वा, कथं मौक्तिकान्युद्गच्छन्तीति भूपोऽपृच्छत् । हे स्वामिन्निमं विधिं पुस्तकलिखितं वाचयित्वा प्रातर्देवपादानां पुरो वक्ष्ये, इति निवेद्य राज्ञा मुक्तः स गृहमागत्य पित्रा दत्तां शिक्षां चाऽवधार्य प्रभाते गत्वा भूपमभ्यधात्—'ॐ नमो महेश्वराय शङ्कराय सर्वज्ञाय शम्भवे महादेवाय महादेवीदयिताय मुक्ताफलान्युद्यान्तु उद्यान्तु स्वाहा,' अनेन मन्त्रेणाभिमन्त्रितानि स्वातिसलिल-सिक्तानि पवित्रभूमावुप्तान्यविद्धानि मौक्तिकानि नूनमुद्गच्छन्तीति।

किं चान्यं विधिं पश्चात्कथयिष्यामीति निशम्य लोभाऽभिभूतेन भूपेन बहुद्रविणं दत्त्वा **ताम्रपर्णी**नदीतटे स प्रैषि । सोऽपि ततः शुद्धान्यविद्धानि मौक्तिकान्यादाय स्वपुरमागतः। समागते च स्वातिनक्षत्रे मुक्तोप्तियोग्यां भुवं घ्राणेन जिघ्रन् ग्रामाद्बहिर्मध्ये च तामलभमानोऽसौ मन्त्रिणो गृहमागत्येयं भूर्योग्येति भूपमभाणीत् । इमां गृहाणेति राज्ञादिष्टः स सचिवसौधानि तानि मूलतः पातयित्वा लाङ्गूलेन च तां भुवं समीकृत्य तत्र केदारान् विधाय च रहसि राजानं व्याजहे, हे देव! येन जन्माऽवधि परदाराणां सङ्गः कृतो न स्यात्तस्यैव करोमानि मौक्तिकानि प्ररोहन्ति, किं च वयं तु नैतादृशाः, तेनाऽन्यायवतो मम निग्रहकारी श्रीमतां मन्त्री **मन्त्रसारो**ऽत्रार्थे प्रेर्यतामित्यभिहितो भूपो मन्त्रिणं तमाहूय तदुक्तं वक्ति स्म ।

नाहमेतादृशोऽस्मीति वदन्तं मन्त्रिणं स स्माह, हे सचिव ! यदि स्वयमनाचारवानसि तदा कथमाचारपराणां परेषां निग्रहं करोषीति तदुक्तिमाकर्ण्य राज्ञा पृष्टः स राजाऽग्रे सर्वमात्मनो व्यतिकरं जगौ, अहो मयि सत्यप्ययमित्यनीतिं विधत्ते ! इति कुपितेन भूपेन तं मन्त्रिणं निहत्य मन्त्रिपदे **वसुदत्तो** न्यधायि, वसुदत्तोऽपि मन्त्रिपदं प्राप्य मतिमतां प्रधानत्वेन लोकानां राज्ञः स्वीयं चार्थं साधयित्वा प्रान्ते विहितसुकृतः सुगतिमाप ॥ **इति मतिविषये वसुदत्तश्रेष्ठिकथा ॥ ७५ ॥**

इति पं० श्रीकमलविजयगणिशिष्य पं० हेमविजयगणिविरचिते

कथारत्नाकरे तृतीयस्तरङ्गः समाप्तः

॥ श्रीरस्तु ॥

॥ ४॥ चतुर्थस्तरङ्गः ॥

॥ ७६ ॥ वैरिणां विश्वासो न विधेय इत्यर्थे काकघूककथा ॥

सर्वथाऽप्यकरणीयोऽपि विश्वासो विहितविरोधानां विरोधिनां विशेषतो न करणीयः, यतः-

कावउ धेही कुलकलह, वइरीसु वीसास ।
कोटिलूणारउ नयनिजल स्त्रीनि तेष विणास ॥ १ ॥

अपि च-

विश्वासो नैव कर्तव्यः, कदाचित्पूर्ववैरिणाम् ।
काकैः प्रज्वालिता घूका, मायया मित्रतां गतैः ॥ २ ॥

तथाहि— **गम्भीरगिरेर्गम्भीरायां** गुहायां **चण्डतुण्डादयो** बहवो घूकाः ते च समीपवर्त्तिनो **वटकूटस्य** ग्रामस्य सीम्नि स्थितस्य महाशाखस्य वटस्य शाखासु **मण्डितनीडान्** काकांस्तेषां पाकांश्च[1] निशि विनाशयन्ति, इत्यात्मनां विनाशमालोक्यैकदा **कटुस्वरादयः** काकाः सम्भूयेति दध्युः अहो एते चाऽऽत्मनां रिपवो रात्रिञ्चराः, तदा च रात्रौ वयं न पश्यामः, तेनैषामहनि सम्यग् स्थानं निर्णीय कपटेनैतेषून्मूलितेष्वेवाऽऽत्मनां श्रेय इति मत्वा ते धूर्ता अहन्यपश्यतां गुहान्तस्तस्थुषां तेषां गुहाद्वारे स्थित्वा भूरींस्तद्भोज्यान् कीटकांस्तुण्डैरादाय गुहान्तर्मुमुचुः, केनेदं निक्षिप्तमशनमिति तैरुक्ते काकाः प्रोचिरे-कटुस्वरादयो वयं भवतां दासाः, अथ निशि चैतेषु चरणार्थं निर्गतेषु ते काका इतस्ततः पतितशीर्णवस्त्रार्कतूलतृणकाष्ठखण्डा-दिभिस्तेषां कृते शयनं रचयन्ति। आगतैस्तैरुक्तं कैरिदं शयनीयमकारि? दासैरस्माभिरिति तैर्धूर्त्तैस्ते भृशं वञ्चिताः, यतः—

पक्षिणां वायसो धूर्तः, श्वापदानां च जम्बूकः ।
नराणां नापितो धूर्तो, नारीणां गणिका मता ॥ ३ ॥

किं बहुना? तत्कपटैस्ते मोहिताः सन्तस्तानात्मनां भक्तिमतः किंकरान् विदाञ्चक्रुः। आत्मनां विश्वासं भूयांसममी कुर्वन्तीति ध्यात्वैकदा वासरे सकुटुम्बेषु तेषु गुहान्तःस्थितेषु तद्द्वारं कण्टकैः पिधाय तैः काकैस्तुण्डैः कुतोऽप्यानीय क्षिप्तेन वह्निना ते सर्वेऽपि घूकाः प्रलयं नीताः, ततस्ते काकाः कल्याणवन्तो जाताः **॥ इति वैरिणां विश्वासो न विधेय इत्यर्थे काकघूककथा ॥ ७६ ॥**

॥ ७७ ॥ कुमित्रसेवा न कार्येत्यर्थे घूक-हंस-कथा ॥

श्रेयोऽर्थिना हि नीचपरिचयः परिहर्तव्यः, यतः—

हिमति महिमाम्भोजे चण्डानिलत्युदयाम्बुदे। द्विरदति दमारामे क्षेमक्षमाभृति वज्रति।
समिधति कुमत्यग्नौ कन्दत्यनीतिलतासु यः। किमभिलषतां श्रेयः श्रेयः स निर्गुणसङ्गमः ? ॥१॥

१. पाक = शिशु ॥

तेनाऽगुणिनां सङ्गमेन सतामुद्वेगः, यतः—

हुं तुहि वारुं साधुजण, दुज्जणसंग निवार ।
हरइ घडी जल झल्लरी, मत्थइ पडइ प्रहार ॥ २ ॥
नीचसरिस जु कीजइ संग, चढइ कलंक होइ जस भंग ।
हाथें अंगार ग्रहइ जो कोइ, कंइं दाझइ कंइं कालो होइ ॥ ३ ॥

तेन कुमित्रसेवा सर्वथा त्याज्या, यतः—

अकालचर्या विषमा च गोष्ठी, कुमित्रसेवा न कदाऽपि कार्या ।
बाणाऽऽहतं पश्य मरालबालं, यद्घूकसङ्गान्निशि नीडसंस्थम् ॥ ४ ॥

तथाहि— **केलितिलको** नाम मरालो मानसं व्रजन् सायं घूकाऽऽग्रहेणैकस्मिन् वटे विश्रामं विधत्ते स्म । तदा च मित्राऽनुदयमीहमानेन प्रत्यक्षनिशाचरेणेव निशाऽटनेनाऽऽनीतं कीटकादिभोज्यं तेन समं प्रवृत्तिं विधाय च तेन दर्शिते नीडे स हंसः शेते स्म । अथ तस्यामेव निशि निशाटो दक्षिणतः शब्दायमानस्तत्र प्रदेशे गच्छतामध्वनिनामपशकुनं विधाय स्वयं वटकोटरे तस्थौ । अहो प्रस्थितानां नः प्रथमं वामेतरः काकारिध्वनिरशकुनमिति मन्यमानानां तेषामेकतमेन शब्दवेधिना पान्थेन मुक्तेन बाणेन तस्मिन् घूके कोटरान्तः प्रविष्टे सति तत्पङ्क्तिस्थनीडस्थितः स हंसो विद्धः ॥ **इति कुमित्रसेवा विषमावस्थितिर्न कार्येत्यर्थे घूकहंसकथा ॥ ७७ ॥**

॥ ७८ ॥ छले आभीरपुत्री-कथा ॥

परवञ्चनार्थं विहिता माया स्वार्थमवश्यं विनाशयति, यतः—

विधाय मायां विविधैरुपायैः परस्य ये वञ्चनमाचरन्ति ।
ते वञ्चयन्ते त्रिदिवापवर्ग-सुखान्महामोहसखाः स्वमेव ॥ १ ॥

इष्टेनापि च्छलेन याऽर्थसिद्धिः सा न धनबलादिना, यतः—

छलेनापि निजं कार्यं, सृजन्ति कृतिनः खलु ।
गन्त्रीवैरं ललौ पुत्री, मुष्टितैलच्छलेन यत् ॥ २ ॥

तथाहि— **भम्भलावासग्रामे फामणोना**माभीरः, तस्य च पूर्वपुण्यप्राग्भारप्रकटितप्रभूत-धिषणा **सिषणा**नाम पुत्री। स चैकदा काष्ठभृतं वरवृषभयुतं शकटमादाय समीपवर्तिनि नगरे काष्ठविक्रयाय ययौ । तथाऽवस्थया चतुष्पथे स्थितं तमेको धूर्तशिरोमणिः **सोमणो** नागरिकः किमस्य शकटस्य मूल्यमित्यप्राक्षीत् । मूर्खेण तेन तस्य शकटस्य यन्मूल्यमभ्यधायि। पौरान् साक्षिणो विधाय तन्मूल्यं वितीर्य च सकाष्ठवृषभे शकटे तेन रक्षिते सति विक्षापन्नः **फामणो** गृहमागतः पुत्रीपुरो यथाजातं वृत्तान्तमुदितवांश्च । हे तात ! धीरो भवेत्यभिधाय तथैव शकटमादाय चतुष्पथे स्थितां तां स एव धूर्तस्तथैवाऽपृच्छत् ।

तयाऽभिहितं तिलमुष्ट्यभ्यधिकं मूल्यं दत्त्वा तिलमुष्टिं यच्छतस्तस्य करं सा जग्राह। जगाद च हे धूर्त ! शकटन्यायेन मणिबन्धतश्छित्त्वा तव पाणिमादास्ये । अथ तथा विवदमानौ तौ राज्ञः पुरो गतौ, राजाऽपि शकटन्यायेन मणिबन्धतः परः पाणिरस्या एवेत्यभिधाय तया मार्गितं धनं, पुरा गृहीतं च सवृषभं शकटं दापयित्वाऽहो धीमती बालिकेयमिति वसनादिना सत्कृता सा स्ववेश्मनि गता ॥ **इति च्छले आभीरपुत्री- कथा ॥ ७८ ॥**

॥ ७९ ॥ नियमनिर्वहि करणाह्वभारवाहककथा ॥

ये स्वीकृतं नियमं न मुञ्चन्ति ते स्तवनीयाः, यतः—

उदयं पद्मिनीबन्धोः, सीमानं च सरित्पतेः ।
जयन्ति नियमा येषां, कुर्मस्तान् **स्तवनाऽतिथीन्** ॥ १ ॥

अपि च—

प्राप्याऽपि भोगसामग्रीं, सन्तः सीमां त्यजन्ति न ।
यथेन्दुं वीक्ष्य गणिका - ममुञ्चद्भार**वाहिकः** ॥ २ ॥

तथाहि— **कनकावत्यां** नगर्यां **हरिषेणो** नाम राजा, तत्र च **करणाह्वः** काष्ठभारवाहकः, स चैकदा काष्ठान्याहर्त्तुं वने गतः, तत्राऽशोकस्य तले मूर्तं धर्ममिव स्थितमेकं मुनिमालोक्याऽयं महात्मेति तदभ्यर्णं तस्थौ ।

परोपकारिणा तेन मुनिनोपदिष्टं शीलधर्मं सम्पूर्णमङ्गीकर्तुमसमर्थः स राकानिशि शीलं पालनीयमिति नियमं चिन्तामणिमिवादाय स्वपुरं प्रविष्टः, अन्यदा मध्यन्दिने काष्ठभारं लात्वा गच्छन्नेकस्यां सौधस्य भित्तौ भारं निधाय स्थितः। स तत्र वातायने तस्थुषीं कामकामिनीमिव सुरूपां **सुरूपानाम**गणिकां विलोक्येति दध्यौ, अहो स्वोदरभरणेऽप्यक्षमः सर्वदा **भारवाहकः** स्त्रीमात्रसम्भोगरहितश्चाहमपि पुमान्, ये च **लक्षम्भरयः** सन्तोऽनया समं रमन्ते, तेऽपि पुमांसः, तेन सर्वदा धनस्थानसामग्रीरहितं मां धिग् । किञ्च—

नो धर्माय यतो न तत्र निरता नाऽर्थाय येनेदृशाः ।
कामोऽप्यर्थवतां भवेत्स च कुतो मोक्षः कुतः कस्यचित् ।
तत्के नाम वयं किमत्र घटिता ज्ञातं पुनः कारणं ।
जीवन्तोऽपि मृता इति प्रवदतां शब्दार्थसंसिद्धये ॥ ३ ॥

[जीवन्तोऽपि मृताः पञ्च, **व्यासेन** परिकीर्त्तिताः ।
दरिद्रो व्याधितो मूर्खः, प्रवासी नित्यसेवकः ॥ ४ ॥]

१. वल्लव AH । २. श्लोको नास्ति DHA ।

तेन च ये जीवन्तोऽपि मृतास्तेषामेकतमोऽस्मीति विषादवानभूत् । एकदा प्रावृषि काष्ठार्थं वने गच्छन् सरित्पूरे वहमानमेकं काष्ठखण्डमालोक्य कुठारेण छित्त्वा तत्खण्डभारं लात्वा पुरे प्रविशन् स सौगन्धिकेन **जिनदासेन** श्रावकेण विलोकितः, व्यवहारशुद्धिमता तेनेदं श्रीखण्डमित्यभिधाय दत्तं सहस्रसुवर्णमूल्यमादाय तस्याः **सुरूपाया** वेश्याया वेश्मनि गत्वा तद्गृहे वासार्थं तत्कनकं तस्यै ददौ ।

अथ धनलाभतो मुदिता सा स्नानविलेपनभूषणादिना तमलङ्कृत्य वातायने वासयित्वा स्वयं च शृङ्गारकरणार्थं ययौ । तत्र स्थितः सोऽपि तस्य मुनेर्वचसा पुष्पदन्तयोरुदयाऽस्तमनाभ्यां तां पूर्णिमायामिनीमवगम्य स्मृतस्वनियमस्तत्स्वधनं तदीयं च वस्त्रादि तत्र विमुच्य स्वकीयं वेषमादाय च देहचिन्तामिषेण ततो निर्गत्य क्वाऽपि हट्टे शेते स्म । तं च गतं ज्ञात्वा मा मां कोऽपि राजनरोऽन्यो वा कपटी कष्टे पातयत्विति सा वेश्या तदैव राज्ञोऽग्रे गत्वा तां किंवदन्तीं वदति स्म । अथोषसि हरिषेणेन राज्ञा सर्वेषु भारहारेषु मेलितेषु सुरूपयोपलक्षितः स तत्स्वरूपं पृष्टः सन् मुनिग्राहितनियमादारभ्य सर्वं वृत्तान्तमुदितवान् । तदाकर्ण्य राजाऽपि धन्योऽहं यस्य पुराऽन्तरीदृशो व्यवहारवान् वणिग् वसतीति तं **जिनदासमाकार्य** नगरश्रेष्ठिनं विधाय, बहुवित्तदानपुरस्सरं तां गणिकां च तस्मै करणकाष्ठहाराय ददौ । अहो ! नियमप्रभावोऽयमिति मन्यमानः **करणो**ऽपि तया समं सुखमनुभवन् क्रमेण तत्र समागतस्य तस्यैव मुनेः समीपे प्रव्रज्य सिद्धः ॥ **इति नियमनिर्वाहे करणाह्वभारवाहिककथा** ॥ ७९ ॥

॥ ८० ॥ दयायां विक्रमादित्यकथा ॥

दया हि साक्षादमरगवी, यतः—

नानामौक्तिकहेमविद्रुममणिद्यूम्नाह्वयं गोमयं । दुग्धं दुग्धसमुद्रहारिलहरीशुभ्रं यशःसञ्चयम् ।
वत्सं विश्वजनेहनीयमहसं स्वर्गापवर्गोदयं । या देयादवतां दयाऽमरगवी सा रक्ष्यतामक्षयम् ॥ १ ॥

ईदृशीं करुणां केऽपि सत्पुरुषाः स्वदेहव्ययेनाऽपि पालयन्ति स्म । यतः—

स्वदेहदानविधिना, परान् रक्षन्ति सत्तमाः । स्वाङ्गं दत्त्वापि सिंहस्य, विक्रमो गां ररक्ष यत् ॥ २ ॥

तथाहि— एकदा शीततौ दुष्टेनाऽविनीतेन वाजिनाऽपहृतो **विक्रमादित्यो** वने गतः, मृते च तस्मिन् वाजिनि राजा रात्रावेकस्य तरोस्तले सावधानतया तस्थौ । तदा च तद्वनवास्येको वटवासिदेवो **विक्रमादित्यो**ऽयं परदुःखकातर इति ख्यातिं वहन्नस्ति, तेनाऽस्य परीक्षां करोमीति दध्यौ । तदैव जरतीं भृशं कृशाङ्गीं शीतेन कम्पमानां तत्राऽऽगतामेकां गां राजाऽपश्यत् । अहो ईदृशीयं वराकी गौरनेन शीतेन मरिष्यतीति ध्यात्वा स्वपटेन तां पिधाय, कृपाणपाणौ तस्मिन् राजनि तां गां रक्षति सत्येकः करालः केसरी तत्राऽऽययौ, तां चाऽऽहन्तुमुत्फालितं तं राजोचे—

१. तुला- सिंहासनबत्रीसी कथा २२ । मध्यकालीन गुजराती कथाकोश खण्ड १ ॥

अरे! मयि गोसरि कथमेनां हन्तुं त्वं प्रभविष्यसीत्युक्ते सिंहः स्माह दारुणाऽनेन शीतेनेयं गौरवश्यं मरिष्यति, सप्तदिनभवक्षुधया च मांसाऽशनलुब्धोऽहमपि मरिष्यामि । तेनेमां दत्त्वा मां जीवय! इत्थं च तव परोपकारित्वं समीचीनं भविष्यति ।

तत् श्रुत्वा राज्ञोक्तं— हे सिंह ! म्रियतां जीवतु वेयं गौः, परं तव न दास्ये, किं च यदि तवाऽऽमिषं विलोक्यते, तदेदं मद्वपुर्भवत्सादस्तीति वदन्तं तं सिंहः स्माह— हे भूप! त्वं पञ्चमो लोकपालः, तेन जीवन्नऽपि त्वं प्रजानां हितं करिष्यसि, अतो लोकान्तर्गमनतत्परां ममेमां गां दत्त्वा हितं कुरुष्वेत्युक्ते मत्कायेनैव तव हितं भूयादित्यभिधाय राज्ञा तस्मै स्वं वपुर्ढौकितम् । हन्तुमागते च तस्मिन्नधोमुखस्य राज्ञः शिरसि पुष्पवृष्टिरभूत् । तदा च राजा न तां गां, न च तं सिंहमपश्यत् । इतस्तत्र प्रकटितः स सुरोऽपि स्वं स्वरूपं निवेद्य राजानं च पुरे नीत्वा तिरोदधे। राजाऽपि प्रभाते विस्मितः सन् सचिवादीनां तद्वनवृत्तान्तं निवेद्य सुखमनुभवति स्म ॥ **इति दयायां विक्रमादित्यकथा** ॥ ८० ॥

॥ ८१ ॥ अर्हद्वचनाऽऽकर्णने रौहिणेयचौरकथा ॥

सम्यग्देवगुरुधर्मादिस्वरूपं जिनवचनविकला न विदन्ति । यतः—

न देवं नाऽदेवं न गुरुमकलङ्कं न कुगुरुं । न धर्मं नाऽधर्मं न गुणपरिणद्धं न विगुणम् ।
न कृत्यं नाऽकृत्यं न हितमहितं नाऽपि निपुणं । विलोकन्ते लोका जिनवचनचक्षुर्विरहिताः ॥ १ ॥

किं बहुना ? स्वल्पमपि सर्वज्ञोदितमाकर्णितं सुखाय, यतः—

अर्हद्वाचां लवोऽपि स्यात् श्रुतो निर्वाणशर्मणे । रौहिणेयः सुखं नापद् गाथया हि किमेकया ? ॥ २ ॥

तथाहि— राजगृहे नगरे **श्रीश्रेणिको** नाम राजा, तस्याऽभयो मन्त्री, तत्र च सुमहत्तरे [1]**वैभारगिरि**कन्दरे वसन् प्रान्तकाले **लोहखुरेण** पित्रा **वीर**वचःश्रवणे कारितनिषेधो **रौहिणेया**ऽभिधस्तस्करो राजगृहं स्वैरं मुमोष ।

एकदा चौर्यं विधाय स्वपुरमागच्छन् रौहिणेयोऽन्तराले भगवतः समवसरणं मत्वेति दध्यौ, अस्मिन् पथि गच्छतो मम **वीरवाक्**श्रवणेन पितुराज्ञाभङ्गः, किं चाऽन्यः कोऽपि पन्था नास्ति, तेन तस्मिन्नेव पथि पाणिभ्यां कर्णौ पिधाय गच्छतस्तस्य पादे कण्टको भग्नः, तदा चौत्सुक्येन पादात्कण्टकं निष्कासयितुं, कण्टके च सति क्रममपि चलितुमशक्तः स यावदेकेन पाणिना चरणात्कण्टकं निष्कासयति तावद्योजनविस्तारिणी सर्वजीवभाषानुकारिणी पञ्चत्रिंशद्गुण-हारिणी भागवती वाणी तस्य कर्णे न्यपतत् । यथा—

अणिमिसनयणा मणकज्ज-साहणा पुप्फदामअमिलाणा ।
चउरंगुलेण भूमिं, न छिवंति सुरा जिणा बिंति ॥ ३ ॥

---

१. *तुला – उपदेशप्रासादे व्या० ८० ॥*

हा मयेदं बहु श्रुतमिति मां धिग् । कृतपठितविस्मारणोपायेनाऽप्यविस्मृतभगवद्वचसा तेन सदा बाढं मुषितैर्नागरैर्विज्ञप्तेन राज्ञा दण्डपाशिकः साक्षेपमुक्तः स्माह— हे देव! मार्गं निरुध्य स्थितेष्वप्यस्मासु वायुरिव **रौहिणेय**स्तस्करो याति, तेन तं धर्त्तुमहं नाऽलम् । इति तेनोक्तेऽ**भयो** मन्त्री तं दण्डपाशिकं प्रोचे-चतुरङ्गिण्या सेनया बहिस्तात् पिहितगोपुरं पुरं वेष्टयित्वा स्थितेन त्वया वप्रमुत्प्लवमानः स चौरो ग्राह्यः इति प्रेरितेन तेन नगररक्षकेण तदा च तेन तथैव स्थितेन पुरीरोधमजानानस्तथैव गच्छन् **रौहिणेयो** धृत्वा राज्ञोऽग्रे नीतः, निहन्यतामयं चौर इति राज्ञाऽऽदिष्टेऽ**भयः** प्रोचे- हे स्वामिन्नलोप्त्रोऽयं न निग्रहमर्हति । तेन विचार्याऽस्य निग्रहः कर्त्तव्यः, कस्त्वमिति राज्ञोक्ते सोऽवोचत्- हे देव ! **शालिग्रामवासी दुर्गचण्डा**ह्वोऽहं कुटुम्बिकः, कार्येणाऽत्राऽऽगतः पुरीरोधे सति भयभीरुरहं वप्रं लङ्घयित्वा व्रजन्नारक्षकैर्धृतः, नाऽहं चौरो, निरपराधोऽस्मीति वादी स राज्ञा कारायां निक्षिप्य तत्र चरः प्रैषि, चरोऽपि तत्र गत्वा जनांस्तं वृत्तान्तं पृच्छति स्म । चौरेण पूर्वसङ्केतितैस्तद्ग्रामवासिभिः प्रोचे- यदत्र **दुर्गचण्डो** वसति, स च कार्येण ग्रामं गतोऽस्तीति। ततः समेत्य चरेणोक्तमाकर्ण्य दम्भविजृम्भितं दुस्तरमिति मन्यमानेनाऽ**भयेन** विमानप्रतिमाने सप्तभूमिके सौधे देवीभिरिव रमणीयाभी रमणीभिः परिवृते पल्यङ्के पायितमद्यः परिधापितचीनांशुकः स शायितः क्रमेणोत्तीर्णमद्यस्तां दिव्यर्द्धिमवलोक्य विस्मितः सोऽ**भया**ऽऽदिष्टैर्नरैर्जयजयनन्देति मङ्गलानि भणद्भिरभाणि-हे देव! अत्र विमाने त्वं सुरोऽभूरेते वयं च तव दासाः, एताश्चाऽप्सरसस्तव पत्न्यः, तेनाऽस्मानाऽदेशेनाऽनुग्रहाण, इमाभिरप्सरोभिः सह रमस्व । इदं सर्वं भवतः पुण्यैर्ढौकितं, यावत्ते सङ्गीतकं कुर्वन्ति, तावदेकेन सुवर्णदण्डभृता द्वाःस्थेनाऽऽगत्याऽभिदधे— देव ! प्रेक्षणकं पश्चादवलोकनीयमादौ स्वर्गस्थितिरियं विधीयतां, तथाहि—

योऽत्र देवः सञ्जायते स चादौ प्राक्तने सुकृताऽसुकृते वदति, तदनु च भोगाननुभवति, तेन तथा कुरुष्वेत्यभिहितो **रौहिणेयो** दध्यौ, **लोहखुरात्मजो रोहिणी**प्रभवो **रौहिणेय** एवाहं, न चाऽहं मृतः, तेन नून**मभयेना**ऽयं मां धर्त्तुं प्रपञ्चो रचितोऽस्तीति स्मृतपूर्वाऽऽकर्णितगाथाऽर्थेन महीमिलितचरणान् स्वेदमलिनकरणान् म्लानमाल्यान् सनिमेषेक्षणमालांस्तान् विलोक्य कपटोऽयमिति ज्ञात्वा प्रोचे-मया पूर्वस्मिन् जन्मनि सप्तक्षेत्र्यां धनमवापि, दान-शील-तपो-भावरूपो धर्मो निरमायि, **शत्रुञ्जया**दिमहातीर्थयात्रा व्यधायीति वदन् स पुनस्तैरूचे, हे स्वामिन्निदं सत्यं, किन्तु चौर्यपारदारिकादि च स्वं दुश्चरित्रमपि कथय । स जगौ साधुसङ्गवता मया तच्चौर्यादि किमपि कृतं नास्तीति तदुक्तं ते मन्त्रिणो जगुः, ईदृशेनाऽपि दम्भेन यो न गृह्यते स चौरोऽपि मोचनीय इति नीतिपरेण मन्त्रिणा विज्ञप्तेन राज्ञा स मुमुचे । धिग् पितुरादेशं, येनेयन्तं कालं सुधापानादिव भगवद्वचनाद्वञ्चितोऽस्मि, येनेहां विनाप्येकशः श्रुतेन **श्रीवीर**वचनेन तरण्डेन समुद्रमिवाऽभयमन्त्रिमतिसरित्पतिमुत्तीर्णवानस्मि ।

किंचाऽथ सम्यग् भगवदुक्तमाकर्ण्य स्वजनुः सफलं करोमीति ध्यात्वा **रौहिणेयः श्रेणिकस्य** पुरः स्वं नामवंशकर्मादि निवेद्य गिरिकन्दरादिषु निहितं पौराणां धनं दत्त्वा **श्रीवीरान्तिके** प्रव्रज्य च दिवं ययौ ॥ **इत्यर्हद्वचनाऽऽकर्णने रौहिणेयचौरकथा ॥ ८१ ॥**

॥ ८२ ॥ विनये श्रीश्रेणिककथा ॥

सर्वेषां गुणानामास्पदं विनय एव, यत :—

धिष्ण्यानां गगनं पयोनिधिरपामम्भोजबन्धुस्त्विषां ।
देवानां त्रिदिवं नृणां वसुमती विन्ध्याचलः कुम्भिनाम् ॥
आरामः पृथिवीरुहां कुमुदिनीप्रेयान् कलानां यथा ।
कासारः सरसीरुहां च विनयः स्थानं गुणानां तथा ॥ १ ॥

किञ्च विनयादेव देव-दानवादयस्तुष्टाः स्युः, यतः—

विनय देव रंजिइ, विनय मानव रंजिइ ।
विनय स्वामि सुप्रसन्न, विनय पर संपत्ति खज्जइ ॥ २ ॥
विनय नाग निरविस, विनय परदेसि न पिहडइ ।
विनय वइर वीसमइ, विनय को मित्र न विहडइ ॥ ३ ॥
गुणसार विनय लहि हीइ कहि, विणय अणाथि विहंडिइ ।
एरिसह विनय आठह पुहर, चतुर किम हि न वि छंडिइ ॥ ४ ॥

किञ्च विनयेनैवाऽदत्ता विद्या फलदा स्यात्, यतः—

मातङ्गसूनोर्वरविष्टरस्थाद्विद्या गृहीता फलति स्म शीघ्रम् ।
श्रीश्रेणिकस्येह यथा तथा स्यात्, सप्रश्रयशास्त्रमधीतमृद्धयै ॥ ५ ॥

सिंहासणे निसण्णं, सोवागं सेणिओ नरवरिंदो ।
विज्जं मग्गइ पयओ, इअ साहुजणस्स सुअविणओ ॥ ६ ॥

तथाहि— **राजगृहे** नगरे **श्रीश्रेणिको** नाम राजा, तेनाऽन्यदा स्वदेव्याश्चिल्लणाया विशेषतो मानमिच्छतैकस्तम्भप्रासादनिष्पादनार्थमादिष्टोऽभयो दारुग्रहणाय वने वार्धकिं प्राहिणोत्। तद्योग्यं काष्ठं विलोकयन् सोऽप्येकत्र लक्षणोपेतं महान्तमेकं तरुमालोक्येति दध्यौ, यदीदृशं स्थानं विनाऽधिष्ठायकं न स्यादिति। तदाराधनाय गन्धादिभिस्तमभ्यर्च्य कृतोपवासे तस्मिंस्तद्वासी देवः स्वस्थानभ्रंशभीरुरभयमेत्याऽभाणीत्, सर्वदा सर्वर्तुपुष्पफलशालिशालसुन्दरमेकस्तम्भं प्रासादमहमेव करिष्ये, तेन ममाऽऽस्पदच्छेदिनं वार्धकिं वनादाकारयेति। तेनोक्ते स्वं कृत्यं सिद्धमिति वदताऽभयेनाऽऽकारिते तस्मिन् सूत्रधारे, तेन सुरेण कृते तादृशे प्रासादे वसन्ती पुष्पफलादिभिः **श्रेणिकेन** समं रममाणा **चिल्लणा** सुखमनुभवति स्म । तदा तत्पुरवासी श्वपचपतिराम्रफलभक्षणे जातदोहदया प्रमदया तदाऽऽनयनार्थं भणितः, समयं विना तानि कृइत्यवादीत् ।

चिल्लणोद्याने, तया दर्शितेषु तेषु सोऽपि तत्र गत्वा दूरादेवावनामिन्या विद्यया निशि तान्याम्राणि जग्राह। प्रातः फलरहितं तमाम्रं विलोक्य विषण्णया **चिल्लणया** विज्ञप्तः **श्रेणिक**स्तस्करागवेषणाऽर्थ**मभयम**भ्यधात्, हे देव! तं तस्करं द्रुतमेवानयामीति प्रतिश्रुत्य प्रतिदिनं पुरान्तर्भ्रम**न्नभयो** निश्येकत्र बहुद्यूतकारक-पारदारिक-तस्कर-मांसलुब्धकजनैः कारिते सङ्गीतके गत्वा नटाऽऽगमं यावत्तेषां विलोकयंस्तेषां पुरस्तादेकां कथां कथयति। तथाहि— **वसन्तपुरे** निर्धनस्य **जीर्णश्रेष्ठिनो** वृद्धकुमारी **श्रीमतीनाम्नी** सुता वरवरणार्थं चौर्येणानीतैः कुसुमैः सततं स्मरदेवमानर्च।

अन्यदा पुष्पचौरग्रहणार्थं रहःस्थितेनाऽऽरामिकेण पुष्पाण्याददाना सा गृहीता सम्भोगाय चाऽभ्यर्थिताऽभ्यधात्— हे भद्र! कुमार्यहं पुरुषस्पर्शं नाऽर्हामि, तेनोक्तं यदि परिणीता सती प्रथमं मामेव समीहसे तदा त्वां मुञ्चामीति तदुक्तमङ्गीकृत्याऽऽगता परिणीता सा प्रथमेऽहनि रहसि स्वां प्रतिज्ञां तां स्वपतेरवादीत्। अहो सत्यसन्धा इयमिति पत्याऽनुमता मणि-मौक्तिक-कनका-ऽऽभरण-वरवस्त्रविभूषिता वेश्मतो व्रजन्ती सा पथि पारिपन्थिकै रुद्धा तान् स्वप्रतिज्ञां जगौ, तेन हे भ्रातरः! ततो निवृत्ताहं भवद्भिहितं विधास्यामीति तैर्मुक्ता पुरो यान्ती सा क्षुधाक्षामोदरस्यैकस्य राक्षसस्य तथैव निवेद्योद्याने गत्वाऽहमागताऽस्मीति तमारामिकमाह। अहो इयं महासतीति मन्यमानेन तेन पुष्प-फल-पत्रादिभिः स्वसेव सन्मान्य विसृष्टा सा तत्रैव स्थितस्य राक्षसस्य तं मालिकव्यतिकरं यथाजातं जगौ।

यदीमामद्य तदा मालिकादपि मन्दसत्त्वोऽहमिति मत्वा मालिकेनेव रक्षसा विसृष्टा सा तद्वर्त्म पश्यतां तत्रैव तस्थुषां तेषां चौराणां मालिकराक्षसवृत्तान्तं वक्ति स्म। यद्यस्या भूषणादिकमादास्यामस्तदा मालिकराक्षसाभ्यामपि वयमधमा इति तैरपि सन्मान्य मुक्ता सा स्वपतेस्तेषां वृत्तान्तं निवेद्य सुखमनुभवन्ती स्वामिना गृहस्वामिनी चक्रे। अथ तान् जना**नभयो**ऽभ्यधात्, पतिचौरराक्षसमालिकानां मध्ये को दुष्करकारकः? नवोढा स्वपत्न्यपि येनान्यपुरुषकृते प्रहिता, स तत्पतिदुष्करकारक इति कैरपीर्ष्यालुभिः कथिते सति, क्षुधितेनापि येन सा न भक्षिता स राक्षसः सत्त्ववानिति कैरपि क्षुधातुरैरुक्ते सति, येन स्वयमागता निशि न भुक्ता स मालिकोऽधिक इति कैरपि जारैरभिहिते सति, यै रत्नाद्याभरणा सा नवोढा मुक्ता ते तस्कराः श्लाघ्या इति तेन चौरैणोदिते सति च तमेवाऽऽम्रचौरं विज्ञाय कथमाम्राणि त्वया गृहीतानीति **तमभयो**ऽपृच्छत्। तेनापि ग्रहणोपाये प्रतिपादिते सति चौरोऽयमित्य**भयेन** राज्ञो ज्ञापितं, तद्वधमादिशन् कुपितः क्ष्मापतिर्मन्त्रिणा तद्विद्याग्रहणार्थं प्रेरितः, पुरःस्थितेन तेन पाठिते **अप्यवनामन्युन्नामन्यौ** विद्ये यदा सिंहासनस्थस्य राज्ञो मनसि न सङ्क्रान्ते, तदा कूटं पाठयसीति तं तर्जयन्तं राजान**मभयः** स्माह, हे स्वामिन्नेनं स्वस्थाने निवेश्य स्वयं च भूमौ स्थित्वा पठिते विद्ये फलदे भविष्यतो, नाऽन्यथेति। तदा तथैव विहिते सति ते विद्ये सम्यग् समायाते, ततो विद्यागुरुत्वेन मन्त्रिणा मोचितः सोऽपि स्वस्थानं ययौ।

॥ इति विनये श्रीश्रेणिककथा ॥ ८२ ॥

॥ ८३ ॥ स्वार्थं विनाप्यनीतिकारिणां हंसकाकसाक्षिणां ग्राम्याणां कथा ॥

ये मुधैव परार्थं विनाशयन्ति ते पापीयस्तराः, यत :-

एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये । सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये । ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ।१ ।

अपि च—

अल्पीयसे निजाऽर्थाय परार्थं घ्नन्ति पापिनः । काकाद्धीता हि काकाय ग्राम्या हंसीमदापयन् ॥ २ ॥

तथाहि— **अकरालो** नाम मरालो मरालीयुतो मणिमण्डिते सरसि वसति । स चाऽन्यदा वर्षाऽऽगमे कलुषं सरोनीरं मत्वा सस्त्रीको मानसं व्रजन्नन्तराले **कटकुटे** वटे विशश्राम।

तदा तद्वासिना काकेन स्वागतपूर्वं क्व यासीति पृष्टो हंसोऽभाषिष्ट, सर्वत्र कलुषितनीरं मर्त्यलोकं विहाय सदा स्वच्छाऽम्भसि देवसरसि गच्छन्नस्मीति तेनोक्ते काकः स्माह— हे पक्षिपुङ्गव! सततं निर्मलजला प्रोत्फुल्लकमला मानसदुहितेवेयमिह वटनिकटवर्तिनी वापी वर्तते, तेनाऽस्मिन् वटे वसंस्तस्यां च वाप्यां क्रीडन् ससुखमिमं वर्षारात्रमिहैव तिष्ठ। हंसोऽपि तत्तथैव विदन् सुखं तत्र स्थित्वा वर्षाऽत्ययेऽन्यत्र व्रजन् वायसेनाऽभाणि— हे हंस! यदि त्वं यासि तदा याहि परं मदीयामिमां रमणीयां रमणीमादाय कथं यासीत्युक्ते सोऽवक् - रे मूढ! ममेयं मरालीमहिला, महिषविषाणैरिव घटितस्य कालस्य तवेदृशी प्रिया कुतः? 'हे हंस ! बलेन रक्षितो ममैवोपकारिणः प्रियापहाररूपमपकारं कथं करोषि? किञ्च श्यामानां पतीनां गौराङ्ग्यः प्रणयिन्यः किं न स्युः? तेनेमां मम प्रियतमां विमुच्य त्वं यथेच्छं याहि,' एवं विवदमानाभ्यां ताभ्यामभ्यर्णग्रामलोका इहाऽर्थे प्रमाणमिति निर्णीतम्।

तदा च केनाऽपि कपटेन तेन काकेनपुरतस्तत्र ग्रामे गत्वा ग्राम्या बभाषिरे— रे ग्राम्या! यदि हंसीं मम न दापयिष्यथ तदा भवतां डिम्भानां चतुष्पदानां च नेत्रकर्षणं करिष्ये, किंचाऽन्यमपि भूयांसमुपद्रवं विधास्ये, इति भीतैस्तैर्ग्राम्यैस्तद्वचने प्रतिपन्ने सति ते त्रयोऽपि तत्राऽऽगताः, तेषां पुरः स्वं स्वं दुःखमूचानयो [स्तयोर्हंसवायसयोर्वचांसि] मिथो विमृश्य ते पापिनो ग्राम्या बभाषिरे, **नारायणादीनामिव** श्यामानां पतीनां कमलादय इव गौराङ्ग्यः प्रियाः सम्भवेयुः, इति इयं धवला हंसी काकस्याऽस्य पत्नीति तैर्दापितायां तस्यां त्रिष्वपि तेषु युगपद्रुदत्सु एकः प्रवया वायसस्तत्राऽऽगतोऽवदत्, स्वपतिविरहाऽऽतुराया हंस्याः, स्वपत्नीवियोगाऽऽर्तस्य हंसस्य च विलापः समञ्जसः, परं हे काक! प्राप्तमरालिकस्त्वं कथं रोदिषीत्युक्ते सोऽवादीत्, इयं हंसी हंसस्य पत्नीति जानानैरमीभिः स्वार्थायाऽनीतिकारिभिर्यदसौ दापिता, तेनाऽमीषां पापवतां रोदिमीति तान् सर्वत्र विगोप्य [हंसीं च हंसाय समर्पयामास, ततः] ते सर्वेऽपि स्वं स्वं स्थानं जग्मुः ॥ **इति स्वार्थं विनाप्यनीतिकारिणां हंसकाकसाक्षिणां ग्राम्याणां कथा ॥ ८३ ॥**

१. *श्यामस्य इत्यर्थः ॥*

॥ ८४ ॥ स्त्रीचरित्रे पुरुषोत्तमराजपुत्रप्रिया-गङ्गाकथा ॥

कपटो हि युवतीजातावेव, यतः—

स्त्रीजातौ दाम्भिकता, भीरुकता भूयसी वणिग् जातौ ।
रोषः क्षात्रियजातौ, द्विजातिजातौ पुनर्लोभः ॥ १ ॥

तेनैतासां कौटिल्यं न केनापि ज्ञातुमलं, यतः—

शक्यं न कौटिल्यकलाकुलानां, बोद्धुं चरित्रं चपलेक्षणानाम् ॥
अद्येति कल्ये कथमित्युदीर्य, व्यधाददोषौ कुलटा हि जारौ ॥ २ ॥

तथाहि—

बहुलावासे पुरे **पुरुषोत्तम**राजपुत्रस्य **गङ्गानाम**गेहिनी स्वैरिणी। सा प्रिये परदेशं गते तद्वासिनोः **श्रीमित्र-श्रीदत्त**नाम्नोः पितृ-पुत्रयोर्वणिजोर्विपणितो वस्त्र-धान्य-घृत-तैल-गुडादीनि भूरीणि वस्तून्युद्धारकेण जग्राह।

एकदा तन्मूल्यधनाऽऽदानार्थं गृहमागतेन **श्रीमित्रेण** पित्रा रूपयौवनशालिनी सा धनमर्थिता देयं धनं दातुमक्षमा पुंश्चली विशिखैरिव सरागनिरीक्षणैर्मारयन्ती क्रमेण तमात्मसात्कृत्य स्मरातुरेण तेन जारेण सह नवनवैः सम्भोगै रेमे। सोऽपि तदासक्तत्वेन स्वं धनं मार्गयितुं लज्जमानो धनग्रहणार्थं तद्गृहे **श्रीदत्तं** स्वं पुत्रं प्राहिणोत्। तत्राऽऽगतः **श्रीदत्तो**ऽपि हावभावै-र्वशीकृतः पितेव निरङ्कुशतया तया सह भोगान् बुभुजे। एकदा पुत्रे मध्यवर्तिनि द्वारे समेतं **श्रीमित्रं** मत्वा सा **श्रीदत्तं** मञ्जूषायां निक्षिप्य मध्यमाऽऽगतेन तेन सह सम्भोगं व्यधात्। तदा च तद्गृहान्तर्विद्यमानयोस्तयोरकस्मात्पुरुषोत्तमोऽपि द्वारे समेत्य कपाटखाट्कृतिमकरोत्। तदागमनेन व्याकुलं **श्रीमित्रं** सा स्माह- रे मूढ! त्वं न वेत्सि, यत्तव पुत्रोऽप्यत्र मञ्जूषायामस्ति।

पुत्रमपि तत्रैव निरीक्ष्य **पुरुषोत्तम**माद्वयं च विज्ञाय ससुतमपि कम्पतं **श्रीमित्रं** सा पुनरभाणीत्-यदि देयं धनं न मार्गयसि तदाऽमुमपराधं निराकृत्य पितृपुत्रौ द्वावपि सुखेन वेश्मनि प्रहिणोमि। भयभीरुणा तेनाऽपि तथेति तद्वचस्यङ्गीकृते स्वैरिणीनां शिरोमणिर्मतिमती सा यष्टिमेकां तत्पाणौ दत्त्वा '**आजे इम तो काले किम**' इति भूयोभूयो भणनपूर्वमितस्ततो भ्रमणीयमिति च तं शिक्षयित्वा कपाटमुद्घाटयामास। तादृगाऽऽकारधारिणं तं विलोक्य गृहान्तरागतेन **पुरुषोत्तमेन** पृष्टा गङ्गा जगौ, हे नाथ! किमप्यपराधं विधायेह मञ्जूषायां प्रविष्टं स्वं पुत्रमसौ वक्ति, यदि अद्येह शरणं श्रितस्तर्हि कल्ये कथं करिष्यसीति वदन्नयं वणिगाऽऽत्मवेश्मान्तर्भ्रमन्नास्ते, प्रियावचनं समीचीनं मन्यमानेन तेन तौ द्वावपि मिथः प्रीतिभाजौ विधाय वेश्मनि प्रहितौ ॥ **इति स्त्रीचरित्रे पुरुषोत्तमराजपुत्रप्रियागङ्गाकथा ॥ ८४ ॥**

॥ ८५ ॥ चरित्रेण कुलज्ञानम् इत्यर्थे दुर्गन्धाराज्ञीकथा ॥

येन तेनाऽपि प्रीतिकरणे विलम्बो वरं, न चौत्सुक्यं, यतः—

जोई लीजइ जाति, वरिवरि सासउ पडिषिइ ।
पडइ पटोलइ भाति, फाटइ पण फीटइ नही ॥ १ ॥

किंच अनभिजातो[1] हि स्वचरित्रैरेव स्वकुलं व्यनक्ति, यतः—

कुलं स्वकृत्यैरकुलप्रसूतः, सन्मानितोऽपि प्रकटीकरोति ।
श्रीश्रेणिकांसे निदधे यदंहि-र्दुर्गन्धया पण्यवधूद्भवत्वात् ॥ २ ॥

तथाहि—**राजगृहे नगरे श्रेणिकः** पार्थिवः एकदा तत्र समवसृतं भगवन्तं **श्रीवीरं** वन्दितुं सर्वर्द्ध्या गच्छन् स राजा दुर्गन्धपराभवाद्वस्त्राञ्चलैर्घ्राणानि पिदधानान् सैनिकानवलोक्य किमेतदिति कमपि स्वं सेवकमप्राक्षीत्। अस्य दुर्गन्धस्य निदानमध्वनि जातमात्रैका बालिका पतिताऽस्तीति तेनोक्ते पुद्गलानां परिणाम एष इति सुगन्धे दुर्गन्धे वा समानभावतः स नरकादागतं नारकमिव तथारूपां तां वर्त्मनि पतितां विलोक्य समवसरणे गत्वा **श्रीवीरं** प्रणम्य चाऽवसरे तस्याः प्राक्चरित्रमपृच्छत्।

भगवानभाणीत्-**पर्यन्तदेशे शालिग्रामे धनमित्रस्य** श्रेष्ठिनो **धनश्रीः** सुता, एकदा ग्रीष्मर्तौ तस्या विवाहे प्रारब्धे तस्यौकसि विहरणाय साधवः समेताः, तदा पित्रादिष्टा सा तान् प्रतिलाभयितुं ससज्ज। तदा चाऽप्रतिकर्मितशरीरिणां तेषां महात्मनां महामुनीनां स्वेदमलदुर्गन्धेन मोटितमुखकमला जातयौवना बाला सर्वाभरणशालिनी पट्टकुलमालिनी मनोहराऽङ्गरागताम्बूलहारिणी सर्वश्रीभृङ्गारधारिणी सा **धनश्री**र्दध्यौ—

अहो निष्पापे श्रीजिनमार्गे स्थिता अमी साधवो यदि प्रासुकेनापि वारिणा स्नान्ति तदा को दोष ? इति जुगुप्साभवं कर्माऽनालोच्य मृता साऽत्र **राजगृहे** गणिकोदरे सुतात्वेनोत्पन्ना, तेन दुष्कर्मणा च सा गर्भस्थितापि मातुर्भृशमरतिमकरोत्। तेन गर्भेणोद्विग्ना सा वेश्या गर्भपातनौषधानि विदधानाऽपि समये प्रसूतां तां दुर्गन्धां विष्टामिव बहिरत्यजत्। अथ काऽस्या गतिरिति पृष्टः प्रभुः प्राह— हे राजन्नया स मुनिजुगुप्साभवकर्मविपाकः सर्वोऽपि भुक्तः।

अथ सुपात्रदानोपार्जितभोगफलैषा मृगमद-कर्पूर-श्रीखण्डादिभ्योऽप्यधिकसुगन्धिशरीरा अष्टौ वर्षाणि तवाऽग्रमहिषी भविष्यति, तदभिज्ञानं चाऽक्षक्रीडायां जितस्य तव पृष्टेऽधिरोहणं सा विधास्यतीति निशम्य कथमेषा मम प्रिया भवितेति विस्मयं वहन् राजा जिनं प्रणम्य गृहमगमत्। इतश्च निर्जरितदौर्गन्ध्यकर्मा साऽनपत्ययैकया गोपस्त्रिया गृहीता सुतेव पालिता क्रमेण यौवनं प्रपेदे। एकदा सम्प्राप्ते कौमुद्युत्सवे नगरोद्याने रममाणरमणीश्रेणिनिर्वर्णनाय गतोऽभयेन युतः **श्रेणिकः**—

---

१. अकुलीन ॥

श्यामां यौवनशालिनीं सुवचनां सौभाग्यभाग्योदयां ।
कर्णान्ताऽऽयतलोचनां कृशकटीं प्रागल्भ्यगर्वाऽन्विताम् ।
रम्यां बालमरालमन्थरगतिं मत्तेभकुम्भस्तनीं ।
बिम्बोष्ठीं परिपूर्णचन्द्रवदनीं भृङ्गाऽऽलिनीलाऽलकाम् ॥ ३ ॥

तां गोपसुतामवलोक्य सञ्जातकामरागोऽनङ्गसत्यङ्कारमिव निजनामाऽङ्कितामूर्मिकां तदुत्तरीयाऽञ्चले निबध्य तदन्वेषणार्थं मम मुद्रिका केनाऽपि हृतेति दम्भवचांसि वदन्नभयमादिशत्। सरलाऽऽत्माऽभयोऽपि पितुर्वचनं सत्यं विदन् सर्वाण्यपि वनद्वाराणि निरुध्यैकेन द्वारेण निर्गच्छन्तीनां मुखपाणिपटाञ्चलान्यवलोकयन् क्रमेणाऽऽगतायास्तस्या उत्तरीयाऽञ्चले निबद्धां तां मुद्रिकामुदीक्ष्य कुतस्त्वया गृहीतेयमूर्मिकेति पृच्छति स्म। कर्णौ पिधाय किमपि नाऽहं जानामीति वादिनीं तां लक्षणैरचौर्यपरां मत्वा, नूनमेषा न चौर्यकारिणी, किन्तु जातरागेण तातेनैवैषा मुद्रिकाऽस्याः पटाऽञ्चले बद्धेति मन्यमानस्तामादाय राजाऽन्तिकमागत्योचे—

हे देव ! अनया भवतां चित्तमचौरि, तेन मुद्रिकाकथया पर्यासं, सस्मितः **श्रेणिकोऽप्येवमेवेति** निवेद्य तां च परिणीयाऽग्रमहिषीं चकार। अन्यदा जितस्य पृष्ठे जयिनाऽधिरोहणीयमिति पणं विधायाऽक्षैः क्रीडतो जितस्य राज्ञः पृष्ठे कुलोत्पन्ना अन्या राज्ञ्यः पणसूचकं वस्त्रमात्रं न्यधुः, जितस्य राज्ञः पृष्ठे वेश्यासुतात्वेन कठिनाऽऽशयायां तस्यां निशङ्कमधिरूढायां स्मृतवीरवचनः **श्रेणिकः** स्मितमकरोत् । साऽपि तत्कालमेव पृष्ठादुत्तीर्याऽकारणहास्यकारणमप्राक्षीत् । तदा पूर्वभवादारभ्य हास्यपर्यन्तं स्वामिनाऽऽख्यातं स्ववृत्तान्तं राज्ञोदितमाकर्ण्य जातवैराग्या सा **श्रीवीर**पादान्तिके प्राव्राजीत् ॥ **इति चरित्रेण कुलज्ञानमित्यर्थे दुर्गन्धाराज्ञीकथा ॥ ८५ ॥**

॥ ८६ ॥ कार्पण्यविषये सङ्कुलकथा ॥

धनवानपि कृपणो याचकैस्त्यज्यते, यतः-

भृङ्गैः पुष्पमिवाऽरसं गतफलो वृक्षो विहङ्गैरिव ।
प्रेष्यैर्नाथ इवाऽधनः श्रितजरा नारी वयःस्थैरिव ।
तोयैर्भूमिरिवोन्नताऽतिमलिनं नीरं मरालैरिव ।
त्यागप्रीतिपराङ्मुखोऽर्थिनिवहैः सन्त्यज्यते सद्धनः ॥ १ ॥

तेन कृपणः श्रीदानं विधातुं नाऽलं, यतः-

न दातुं नोपभोक्तुं च, शक्नोति कृपणः श्रियम् ।
किन्तु स्पृशति हस्तेन, नपुंसक इव स्त्रियम् ॥ २ ॥

तेन कार्पण्यममुञ्चतामनर्थाः स्युः, यतः—

कार्पण्यं कुधियां पण्यं, विमुञ्च चतुराऽऽशय! ।
अनर्था यद्वशाज्जाताः, सङ्कुलश्रेष्ठिनः पुरा ॥ ३ ॥

तथाहि— **धारावासनगरे** महेभ्यः **सङ्कुलः** श्रेष्ठी, परमत्यन्तबद्धमुष्टिः सोऽन्यदैकेन **पुन्नाऽऽख्येन** बटुना धनमर्थितः, कल्ये दास्ये इति वदन् प्रत्यहं याचमानं तं बटुं विप्रतारयामास। तदा च भृशं रुष्टः सोऽपि बटुर्भूरिभक्तितुष्टादेकस्माद्वटवासिनो देवात्[लब्ध]-कामितरूपसिद्धिः पुरान्तरे गते तस्मिन् श्रेष्ठिनि तद्रूपमाधाय तद्गृहे प्राविशत्। प्राह च द्वारपालं अद्य पुरे भूरयो दाम्भिका रूपपरावृत्तिकारिणः समेताः सन्ति, तेन यदि मद्रूपवान् कोऽपि पुमान् समेति तदा स भृशं कुट्टनीयः, इति शिक्षां दत्त्वा तत्कामिनीस्तत्संपत्तिं च स स्वैरं बुभुजे। इतश्च ग्रामादागतो गृहं प्रविशन् सङ्कुलो द्वाःस्थेन पृष्टः कस्त्वमिति प्रोक्तश्चाऽहं गृहस्वामी सङ्कुलः इति वदन्तं मत्स्वामिकथितं सत्यमासीदिति लपन् स द्वाःस्थः- रे पाप! त्वं कपटी मत्स्वामिरूपं कृत्वा गृहं प्रविशसीत्यभिधाय कामं कदर्थनापुरस्सरं हन्ति स्म। इत्यत्यर्थं कदर्थितः सङ्कुलोऽन्यमुपायमलभमानः स्वस्वामिनं **कनकरथ**नामानं राजानं स्वं स्वरूपमभ्यधात् ।

राजाऽऽदिष्टेन **शिष्टनाम्ना** मन्त्रिणाऽऽकारितौ तौ द्वावपि परिषदं प्राप्तौ। मिथो विवदमानौ तौ विलोक्य सद्यःसञ्जातमतिना तेन मन्त्रिणा रहसि गृहव्यापारादिस्वरूपं पृष्टं, तदा सङ्कुलो यथाऽवस्थितं स्पष्टमाचष्टे। तथैव रहसि पृष्टो दाम्भिकोऽपि यक्षप्रभावेण सङ्कुलवत्सर्वं गृहस्वरूपं जगौ । एवं तयोर्द्वयोर्भेदमलभमानेन मन्त्रिणा राजसमक्षं तौ द्वावप्येवमभिहितौ, यो झारिकामुखे प्रविश्य नालकेन, निर्याति स गृहस्वामीति कथिते शक्तेरभावात् सङ्कुलो विषण्णः। स च दम्भवान् द्रुतमेव मक्षिकारूपेण मन्त्रिणाऽभिहितं कुर्वन् मन्त्रिणा करेण धृत उक्तश्च त्वं कपटी, गृहस्वामी चाऽसौ। तदैव स निजं बटुरूपमाविष्कृत्य तदीयं स्वरूपं च प्रतिपाद्य सङ्कुलमुद्दिश्यैकं श्लोकमपाठीत्। यतः—

दातव्यं भोक्तव्यं सति विभवे सञ्चयो न कर्त्तव्यः ॥
यदि सञ्चयं करिष्यसि सङ्कुल! पुनरागमिष्यामि ॥ ४ ॥

तदा राज्ञा मन्त्रिणा सभ्यैश्च प्रोचे, नैतस्य बटोरयं दोषः। ततस्तौ द्वावपि स्वं स्वं स्थानं जग्मतुः ॥ **इति कार्पण्यविषये सङ्कुलकथा ॥ ८६ ॥**

॥ ८७ ॥ प्रियया पतिः पापाद् वारितः इत्यर्थे कथा ॥

काश्चित्कुरङ्गीदृशोऽपि निजजीवितेशं दुराचारान्निवारयन्ति, यतः—

उत्पथं यान्तमात्मेशं धन्या रक्षन्ति सुभ्रुवः। यत्कृत्वाऽन्यवधूरूपं स्वप्रियोऽरक्षि धन्यया ॥ १ ॥

तथाहि-**कनकपुरे** पुरे धनद इव धनवान्, काम इव रूपवान्, बृहस्पतिरिव बुद्धिमान्, धनदत्तः श्रेष्ठी, तस्य च रूपलावण्यसौभाग्यसम्पत्पराभूतपुरुहूतनितम्बिनी **धन्या** नामनितम्बिनी।

स च जैनमतमृणालिनीकुलमधुव्रतः स्वीकृतस्वदारसंतोषव्रतस्तया समं भोगान् बुभुजे। स चाऽन्यदा स्वगृहमागतां सकलसौभाग्यसङ्गतां तारुण्यहारिणीं विविधशृङ्गारधारिणीं यथौचित्यन्यस्तसमस्ताऽऽभरणां स्मेरसरोरुहसमानकरचरणां **चन्द्रमुखी**नामस्वस्त्रीसखीं विलोक्य विस्मृतव्रतमर्यादः स्मराऽऽतुरस्तस्यां रागवानजनि। स्मरातुराणामुचितानुचिताऽविचारो हि न स्यात्। यतः—

किमु कुवलयनेत्राः सन्ति नो नाकिनार्य-स्त्रिदशपतिर**हल्यां** तापसीं यत्सिषेवे ।
हृदयतृणकुटीरे दीप्यमाने स्मराऽग्ना-वुचितमनुचितं वा वेत्ति कः पण्डितोऽपि ? ॥ २॥

अथ तत्सङ्गमकर्मकर्मठमन्यमुपायमपश्यन् स स्वप्रियां प्रोचिवान्- हे सुभगे! यदि मम प्राणैः प्रयोजनं तदा **चन्द्रमुखीं** तव सखीं मम मेलयेति विवशं सम्प्राप्तस्मरान्त्यदशं स्वप्राणेशं विलोक्य साऽपि धीमती तदुक्तं प्रतिशुश्राव।

अथ सा मिषाऽन्तरेण सखीगृहे गत्वा स्वप्रियविलोकनसमयविहितं तद्वेषं मार्गयित्वा गृहाऽऽगता पतिं प्रोचे- हे सुभग! सा सायमद्य समेष्यति, सोऽपि प्रपञ्चितस्फारशृङ्गारस्तदागतिं पश्यन्नेकान्ते तस्थौ। अथ सा धन्या विहितवयस्यावेषवचनविभ्रमविलासविनोदहावभावा, विध्यापितप्रदीपे शयनीयधाम्नि तेन समं रेमे। तस्यां गतायां सोऽपि पूरिततद्भोगाऽभिलाषः स्वस्थीभूतमनाः स्मृतस्वनियमो नियमभङ्गपापेन पीडितः प्राणत्यागपरायणो यावदासीत्, तावत् स्वीकृतस्ववेषा **धन्या**ऽऽगत्य प्राह- हे नाथ! किमेतदिति? सोऽवोचत् खण्डितव्रतस्य मम किं जीवितेनेति तस्याऽऽग्रहं मत्वा सा सर्वं स्वसूत्रितमुक्तवती। तथाऽपि स हा मया पापमाचरितमिति वैराग्यवान् सप्रियः प्रव्रज्याऽऽलोचितदुरितकर्मा निर्वाणमासदत् ॥ **इति प्रिययापतिः पापाद्वारित इत्यर्थे कथा ॥ ८७ ॥**

॥ ८८ ॥ स्त्रीचरित्रे गुणावली-कथा ॥

स्त्रीचरित्रज्ञाने समर्थं कौशलं केषामपि नाऽस्ति, यतः—

.न सा कला न तद् ज्ञानं, न सा बुद्धिर्न तद्बलम् ।
ज्ञायते यद्वशाल्लोके, चरित्रं चलचक्षुषाम् ॥ १ ॥

विबुधानामपि स्त्रीचरित्रेष्वपाटवं, यतः—

वामभ्रुवामद्भुतकौशलानां, को वेत्ति धीमानपि चेष्टितानि? ।
यद्दर्शितोऽपि स्वकरेण राज्ञ्या, नाऽज्ञायि राज्ञा गृहगोऽपि भट्टः ॥ २ ॥

तथाहि— **धनवासे** नगरे महामिथ्यादृष्टेर्**नगराजस्य** राज्ञो जीवादितत्त्वज्ञाऽऽर्हती **गुणावली**नाम्नी राज्ञी, तत्र चैकदा पञ्चशतच्छात्रपरिवृतः पञ्चशतवृषभवाहितपुस्तकः प्रभूताऽभिमानचिह्नाङ्कुशकुठारकुद्दालजालनिःश्रेणिच्छत्रचामरविहिताडम्बरः सर्वविद्याखर्वगर्वपर्वताऽधिरूढः करितुरगादिसमस्तसम्पत्तिधरो **गदाधरो** नाम भट्टः समेतः, तद्भक्तेन राज्ञाऽपि वस्त्राऽऽदिना स बहु सत्कारितः।

अथ तस्यैनमाडम्बरं निरीक्ष्य राज्ञी 'स्त्रीचरित्रं वेत्सि?' इति स्वदास्या तमप्राक्षीत्। मद्वामपादाङ्गुलिनखाग्रे समस्तं स्त्रीचरित्रमस्तीति तद्वचो निशम्य तद्गर्वनिराकरणाय राज्ञी राजानं व्याजहार- हे नाथ ! युष्मद्गुरोः पार्श्वेऽहं **भागवतं** श्रोतुमिच्छामि। इयमपि भागवतश्रवणात् शैवधर्मकर्मठा भूयादिति भूपेनाऽऽकारितो भट्टोऽन्तःपुरपुरस्ताद्भागवतं वाचयति। सा राज्ञ्यपि तत्पुरःस्था तमालोक्य दम्भेन स्मरातुररमणीचिह्नमकरोत् तथाहि—

स्त्री कान्तं वीक्ष्य नाभिं प्रकटयति मुहुर्निक्षिपन्ती कटाक्षान् ।
दोर्मूलं दर्शयन्ती रचयति कुसुमापीडमुत्क्षिप्य पाणिम् ।
निःश्वासस्वेदजृम्भाः श्रयति कुचतटस्रंसि वस्त्रं विधत्ते ।
सोत्कण्ठं वक्ति नीवीं शिथिलयति दशत्योष्ठमङ्गं भनक्ति॥ ३ ॥

सोऽपि तामेतादृशीं दृष्ट्वा तस्यां रागवानासीत्। स्मराऽऽर्त्तानां कुतः कौशलं, यतः—

विकलयति कलाकुशलं, हसति शुचिं पण्डितं विडम्बयति ।
अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ॥ ४ ॥

अथाऽऽत्मनि गाढरागिणं तं निभाल्य कल्ये मम सौधे समेतव्यमिति तया दत्तसङ्केतो भट्टस्तदाऽऽवासमगात्। अथ तदैवैकां बालिकां बहिः स्थापयित्वा दत्तकपाटा राज्ञी भट्टयुता सौधान्तर्गता। इतस्तदैव द्वारि समागतेन राज्ञा कथं कपाटं दत्तमिति प्रोक्ता सा बालिका मध्ये भट्टोऽस्तीति भणति स्म। तन्निशम्य कामं कुपितेन राज्ञा कपाटमुद्घाटयेति कथिते भृशं चकितं तं भट्टं मञ्जूषायां निक्षिप्य तन्मुखे च तालकं दत्त्वा राज्ञ्या द्रुतमुद्घाटिते द्वारेऽन्तः समेतेन राज्ञा भट्टः क्वास्तीति राज्ञी प्रोचे। साऽवदन्मञ्जूषायां निक्षिप्तोऽस्ति भट्टः, तत्तालककुञ्चिकाऽपि चेहाऽस्तीति तदुक्तस्थानात् कुञ्चिकामादाय मञ्जूषाम्प्रति चलिते राज्ञि, सा हस्ताऽऽस्फालनपूर्वकं बाढं स्मितमकरोत्।

कथं हसिताऽसीति राज्ञोक्ता सा स्माह, हे नाथ ! त्वादृशो मूर्खो न मयाऽस्मिन् जन्मनि दृष्टो न च श्रुतः, तत्कथमिति तेनोक्ते सा पुनः प्राह, हे स्वामिन्नीदृशमकृत्यं मया सर्वथा न क्रियते, यदि च क्रियते तदा कथं कुञ्चिकास्थानदर्शनादि सर्वं सत्यमुच्यते? तत्तु सर्वं मदुक्तं त्वया सत्यमज्ञायि, तेन भवन्मूर्खतताप्रेरिता हसिताऽस्मीति तदुक्तं सत्यं ज्ञात्वा क्षणं च तत्र स्थित्वा राजा राजसभामगात्। अथ मञ्जूषातो निष्कासितं भट्टं सा प्राह— भो भट्ट ! स्त्रीचरित्रं भवद्वामपादाऽङ्गुलिनखाऽग्रेऽस्ति तत्सर्वं दृष्टं न वेत्याकर्ण्य भट्टोऽपि तत्पादौ प्रणम्य प्रोचे- हे देवि! वृथैवैतावान् गर्वो मया निर्ममे, अहं मूर्खस्त्वं च पण्डिता इतिभूयो भूयस्तामस्तवीत्। अथ तयोक्तं हितं वचः सर्वज्ञोक्तं च तत्त्वमादाय मुक्तविद्यागर्वः स भट्टः स्वं स्थानमगात्। सा राज्ञ्यपि सत्यं तद्भट्टचेष्टितं निवेद्य राजानं च श्रावकीकृत्य स्वमर्थमसाधयत् ॥ **इति स्त्रीचरिते गुणावलीराज्ञीकथा** ॥ ८८ ॥

॥ ८९ ॥ स्त्रीवियोगो दुस्सह इत्यर्थे पुरन्दरश्रेष्ठिकथा ॥

पितृमातापुत्रादिभ्योऽपि स्त्रीस्नेहः पुंसां महीयान्, यतः—

गुरु गुरुतरोअ अइगुरु, पिउमाइअवच्चपिअजणसिणेहो ।
चिंतिज्जमाण गुविलो, चत्तो अईधम्मतिसिएहिं ॥ १ ॥

तेन स्त्रीपराभूतौ हि लघीयसामपि दुःखं, यतः—

जायते स्त्रीपराभूति-र्लघूनामपि दुस्सहा ।
पक्षिणोऽपि प्रकुर्वन्ति, स्वकलत्रकृते कलिम् ॥ २ ॥

किं बहुना ? पत्नीपराभवे यदशर्म तस्य स्वरूपं वक्तुं न कोऽप्यलं, यतः—

यादृग्व्यथा स्याद्दयितावियोगे, तादृग् न मातृस्वसृबन्धुनाशे ।
यत्तद्व्यथानिःश्वसितेन भर्तुः, करोटिकासम्पुटमाप सन्धिम् ॥ ३ ॥

[1]तथाहि— **श्रीसुन्दरनाम**नगरे महेभ्यस्य **सुन्दरश्रेष्ठिनः पुरन्दरः** पुत्रः, स च पित्रा रूपसौभाग्यवतीं **धनवती**नामकन्यामुद्वाहितः । जलक्रीडातत्परस्य तस्य शिरसि भेकी समुत्पन्ना। तद्व्यथया दिने दिने तन्नेत्रतेजो हीयते, शिरोऽर्त्तिश्च भूयसी भवति। किं बहुना ? मरणावस्था निकटवर्तिनीवाऽजनि। अथ तत्पित्रा कारितेष्वपि भूरिषूपचारेषु व्यथाशान्तिर्नाऽऽसीत्।

अथैकदा तत्र पुरे वैद्यकलाकुशलः **कुशलो** नाम वैद्यः समेतः, श्रेष्ठिना दर्शिते सुते जलक्रीडावशादस्य मूर्द्धनि भेकी समुत्पन्नाऽस्तीति, तेन च तस्य नेत्रव्यथा शिरोव्यथा चाऽस्तीति। यतः—

माषारनाल-तिलतैल-जलावगाह-कट्वम्लशाक-दधिफाणित-धूमतापैः ।
सूक्ष्माक्षरेक्षण-दिवाशयनाच्च पुंसां, चक्षुः क्षयं व्रजति धामपतौ च दृष्टे ॥ ४ ॥

इति तेन सत्यनिदानेऽभिहिते श्रेष्ठी तमभाषिष्ट, हे वैद्यराज! यदि मे सुतः सज्जः स्यात्तदा सुततुलितं कनकं रत्नजातं वा यच्छामीति तदुक्तः स स्माह—कनकादिना न मम कृत्यं, यद्यस्य पत्नी दीयते तदैनं सज्जयामि नाऽन्यथेति तदुक्तः स दध्यौ, अहो कथमिदमकृत्यं भावि?

इतः सुतमरणमितः परपुत्र्याः स्नुषायाश्च दानमिति व्याघ्रतटीन्यायः सम्पन्नः, तथाऽपि तेन रहसि वैद्योक्तं स्नुषा पृष्टाऽवादीत्, हे तात! पृच्छ्यतामसौ भिषक्, यन्मां पुत्रीत्वेन पत्नीत्वेन वा स रक्षयिष्यतीति? तथैव चोक्ते श्रेष्ठिना सोऽवोचत्-मम धाम्नि सुतात्वेनैषा स्थास्यतीति तदुक्तमाकर्ण्य सा दध्यौ यन्मम भर्तरि जीवति सधवाऽहं तिलक-ताम्बूल-कुसुम-कुङ्कुम-कङ्कण-कञ्चुक-कज्जलशालिनी भविष्यामि, पितुरिवास्य वेश्मनि शीलपालनं च भवितेति तया वैद्यगृहाऽवस्थितौ स्वीकृतायां श्रेष्ठी स्नुषापितृ-नगरश्रेष्ठि-मन्त्रि-राजसम्मतिपूर्वकं स्नुषादानमङ्गीचकार। अथ वैद्योऽपि तन्नेत्रयोः पटबन्धं विधाय निशितेन शस्त्रेण तत्करोटिका-मुत्पाटयाञ्चक्रे। तदा च सा भेकी करोटिकारन्ध्रेण सजलनव्यमृत्तिकागन्धेन बहिरपतत्। अथ

यद्ययं धनिको निजां पत्नीं स्वयं दत्ते, तदाऽहमेनां करोटिकां तत्स्थाने मुञ्चामीति वैद्येनोक्ते मुक्तदृग्बन्धनः स पुरन्दरः पुरः स्थितां सकलशृङ्गारसुन्दरीं **सुन्दरीं** निरीक्ष्य प्रियावियोगजनितेन दुःखेन प्रकामं निःश्वासं व्यधात्, दुःखानां हि चिह्नमिदं—

बहु[1] दुक्ख हउली विणुं जइ निसास न हुंति ।
हियडुं रान तलाव जिम फाटी यहद सिजंति ॥ ५ ॥

तदा तेन बाढं निःश्वसितेन प्रेरिता सा करोटिका द्रुतमधस्तादुपविष्टा। अथ स वैद्यो **धनवत्याः** पादौ प्रणम्य श्रेष्ठिनमाह-हे श्रेष्ठिन्! बहुदुःखार्थमिदं मया निरमायि, प्रियावियोगं विनाऽस्य बहुदुःखं न स्यात्, तदभावे च बाढनिःश्वासो न स्यात् तदभावे चैषा करोटिका स्थाने नोपविशतीति वैद्योक्तमाकर्ण्य स्वं सुतं च नीरोगं विज्ञाय तेन श्रेष्ठिना बहुवस्त्रमणिकनकधनादिना सत्कृतः स वैद्यः स्वस्थाने ययौ। पुरन्दरोऽपि नीरोगः सन् गृहस्थतां प्रतिपाल्य प्रान्ते धर्ममाराध्य सद्गतिमसाधयत् ॥ **इति स्त्रीवियोगो दुस्सह इत्यर्थे पुरन्दरश्रेष्ठिकथा ॥ ८९ ॥**

॥ ९० ॥ नीचसङ्गादनर्थाधिगम इत्यर्थे हंसकथा ॥

यादृशां सङ्गतिस्तादृशा एव गुणाः, यतः—

सन्तप्ताऽयसि संस्थितस्य पयसो नामाऽपि न ज्ञायते ।
मुक्ताऽऽकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वातौ सागरशुक्तिसम्पुटगतं तज्जायते मौक्तिकं ।
प्रायेणाऽधम-मध्यमोत्तमगुणः संवासतो जायते ॥ १ ॥

तेन नीचसङ्गादवश्यमनर्थाः स्युः यतः—

नीचसङ्गप्रसङ्गेन, मृत्युरेव न संशयः ।
हंसः पक्षिवतंसोऽपि, काकसङ्गान्मृतिं ययौ ॥ २ ॥

तथाहि— **अतिघन**नामवने **नगरकण्ठो** नाम **काको** महत्येकस्मिन् वटे वसति। तत्र वटे चैकदा मानसं प्रति गच्छन् मरालस्तस्थौ। दैवात्तस्य तेन **नगरकण्ठेन** सह सख्यमासीत्। तस्योपरोधेन सरलाऽऽत्मा स हंसस्तत्रैव दिवानक्तं तिष्ठति। अन्यदा तत्रैव वने मृगयार्थं भ्रमन् **जितारिः** पार्थिवः श्रमाऽपनोदायाऽतुच्छच्छायासङ्कटे तत्रैव वटे विशश्राम। विश्रान्ते च तस्मिन् राजनि नीचस्वभावः स वायसस्तन्मस्तके विष्टामकरोत्। एतदनर्थमूलं तं वायसं हन्तुं तेन राज्ञाऽपि मार्गणो व्यमोचि। तथाविधं चाऽस्य भूपस्य व्यापारं विलोक्य क्वापि गते तस्मिन् विहगधूर्ते ध्वाङ्क्षे तत्समीपस्थितः सरलाऽऽत्मा स मरालो बाणविद्धो यमधाम जगाम ॥ **इति नीचसङ्गादनर्थाऽधिगम इत्यर्थे हंसकथा ॥ ९० ॥**

१. तुला "ध्याननिश्वसबहुलं लिङ्गं कामश्वरे स्मृतम्" चरकसंहितायाम् ॥

॥ ९१ ॥ मर्मकथनेऽनर्थ इत्यर्थे पुण्यसारश्रेष्ठिकथा ॥

कथिते हि मर्मण्यवश्यमनर्थाऽवाप्तिः, यतः—

मर्मवाग् दासविश्वासः, स्वैः कलिः खलसङ्गतिः ।
विरोधो बलिभिश्चाऽमी, पञ्चाऽनर्थप्रपञ्चकाः ॥ १ ॥

अपि च-

मर्मवाक्यं न वक्तव्यं, कदाचिदपि धीधनैः ।
यन्मर्मकथनाज्जज्ञे, दुःखभाक् स्त्रीमृतेर्वणिक् ॥ २ ॥

तथाहि— **वरण**नामनगरे **पुण्यसारः** श्रेष्ठी, स चैकदा पितृगृहाद्वीरश्रीनामस्वप्रियामानेतुं[१] तत्र गतः, पतिगृहे समागमनमनीहमानां तां हठादादाय वर्त्मनि व्रजंस्तया कूपात्पयः प्रतिकर्षन् स निजपतिः कूपे क्षिप्तः, स्वयं च सा प्रणश्य पितृगृहे गता। किमिदमभूदिति पित्रा पृष्टा साऽभाषिष्ट-यत्पथि चौरैर्लुण्टितो मत्पतिस्ततो नष्टा जीवन् क्वाऽपि गतो मृतोऽथवेति नाऽवगम्यते, अहं चेह समागां, एवं तद्वचः सत्यं मन्यमानेन पित्रा रक्षिता गृहे सा स्वैरं तस्थौ। **पुण्यसारो**ऽपि दैवात्कूपवेदिकायां पतितो जलार्थं समेतैः पान्थैर्प्राणन् स कूपात्कर्षितो निजाऽगारमगात्। पृष्टश्च परिजनैः पत्नीवदभिधाय गृहे तिष्ठति स्म।

पुनरपि कियता कालेन स श्वशुरौकसि गतः पृष्टोऽयं च पथस्वरूपं तैस्तमवोचत्, तदाऽहं पथि गृहीतसर्वसारैस्तस्करैः पुण्यप्रभावाज्जीवन्मुक्त इति मर्मपिधानेन पत्यौ प्रकामं मुदितां तामादाय स स्वगृहं समेतः। ततो लक्ष्मी-लक्ष्मीनाथयोरिव प्रभूतप्रीतिप्रसक्तयोस्तयोर्विषयाननुभवतोः सुतः समजनि। एकदा भुञ्जानस्य तस्य भोजनभाजने वातूलोल्लालितं रजः पतत्तया निजोत्तरीयाञ्चलेन न्यवारि। तदा च स्मृतपूर्वचरित्रः स मनाक् स्मितमकरोत्। तदा निकटस्थेन **स्थावरा**ऽऽख्येन तत्सुतेन विजने जनकः स्मितकारणं पृष्टः, अकथयन्नपि स पुत्रहठाद्यथाजातं प्रियाचरित्रं पुत्रपुरः प्रोचिवान्। एकदा स्वजातिगर्वपर्वताऽधिरूढायां स्वप्रियायां रहसि स्थावरः स्वमातुश्चरित्रं पत्नीपुरो निवेद्य स्माह—धिग्व्रतीनां जातिं, यत्कुपिता भवन्त्यः सम्बन्धिन्यप्यनर्थं प्रकुर्वन्ति। यतः—

नितम्बिन्यः पतिं पुत्रं, पितरं भ्रातरं क्षणात् ।
आरोपयन्त्यकार्येऽपि, दुर्वृत्ताः प्राणसंशये ॥ ३ ॥ [योगशास्त्रे २/८६]

तेन स्वाभाविकाऽशेषदोषवतीषु भवतीषु कः प्रेमावतारः ? यतः—

वञ्चकत्वं नृशंसत्वं, चञ्चलत्वं कुशीलता ।
इति नैसर्गिका दोषा, यासां तासु रमेत कः ? ॥ ४ ॥ [योगशास्त्रे २/८६]

१. पितृगृहाद्वीरश्रियं नाम स्वं° PBD ॥ २. BDI पृष्टश्च पथस्वरूपं तथैवाऽवोचत् मु. ॥

इति लज्जिता मौनमाधाय सा स्थिता । अन्यदा वीरश्रिया सह कलहे जायमाने तत्पूर्वचरित्रप्रकाशनपूर्वं तां प्रभूतस्त्रीसमक्षं सा स्नुषा विडम्बयामास।

अथ पविपातेन निहतेव दुःखिता वीरश्रीर्दध्यौ, यदहो इयन्तं कालं पत्या मन्मर्म मनसि रक्षितम्, अथ तु प्रकटितं, तेनाऽलं मम प्राणैरिति सा कण्ठपाशेन प्राणान् जहौ। रमणीमरणतः **पुण्यसारो**ऽपि वार्द्धके भृशमशर्मभाक् लोकैः पृष्टः प्रलपति '**भासिआओ अभासिअं वरं**' इति सर्वत्र सर्वदा प्रलपन् कालमनैषीत् ॥ **इति मर्मकथनेऽनर्थ इत्यर्थे पुण्यसारश्रेष्ठिकथा** ॥ ९१ ॥

॥ ९२ ॥ स्त्रीचरित्रे वसुदत्तविप्रप्रियाकथा ॥

सर्वत्रोपायनिर्मितौ चतुरोऽपि चतुराऽऽननः स्त्रीचरित्रे निरुद्यमः, यतः—

तापेष्वातपवारणं जलनिधौ यानं तमःसङ्गमे ।
दीपं सर्पभयेषु मन्त्रमनघं स्तम्बेरमेष्वङ्कुशम् ।
पाकेषु ज्वलनं मलेषु सलिलं रोगव्रजेष्वौषधं ।
ब्रह्मोपायमसूत्रयन्मृगदृशां वृत्ते च सोऽनुद्यमः ॥ १ ॥

तेनाब्धेरपां पारो न तु योषिच्चरित्राणां, यतः—

लाम्पट्यकौटिल्यकलाकुलाना-महो चरित्रं चपलेक्षणानाम् ।
यत्स्वैरिणीस्त्री पुरतो जनानां, कलङ्कयामास कुमारपालम् ॥ २ ॥

तथाहि— कलिकालसर्वज्ञे **श्रीहेमचन्द्राचार्ये** द्वात्रिंशद्दशनशुद्धये स्वयं निर्मितान् द्वात्रिंशत्प्रकाशान् **श्रीकुमारपालभूपालं** पाठयति सति क्रमेण गृहस्थतुर्यव्रताधिकारस्थः—

प्राप्तुं पारमपारस्य, पारावारस्य पार्यते ।
स्त्रीणां प्रकृतिवक्राणां, दुश्चरित्रस्य नो पुनः ॥ ३ ॥ [योगशास्त्रे २/८५]

असौ श्लोकः समागतः। अर्थतश्चैनं श्लोकमधीत्य राजा गुरुमाह- हे भगवन् ! यत्कवयो मेरुं कक्करं, कक्करं च मेरुमिति कवयन्ति तत्सत्यमासीत्। यतः—

कवियण किमहि न छेडिइ जउ होइ हियडइ सांन।
मेरु टालइ कक्कर करइ कक्कर मेरुसमान ॥ ४ ॥

तेनैतासामबलानां स्वभावभीरूणां चरित्रेषु भगवद्भिरित्थं या दुःखबोधताऽभ्यधायि सा सर्वथा कविकलाकौशलरूपैवेति कदाग्रहपरं पार्थिवं गुरुराह— हे राजन्नत्रार्थे भूरयः पूर्वसूरयः प्रमाणं, यतः—

जलमज्झे मच्छपयं, आगासे पंखियाण पयपंती ।
जाणंति बुद्धिमंता, महिलाचरिअं न याणंति ॥ ५ ॥

तेनाऽत्रार्थे मा निर्बन्धं विधेहि, यदि च वारितोऽपि निर्बन्धं न जहासि, तदाऽद्य सायं मृतस्य वसुदत्तस्य विप्रस्य ज्वालनार्थं गतायास्तत्प्रियायाश्चरित्रं हरगृहे (श्मशाने) गत्वा निभालय।

गुरुणा वारितोऽपि हठतो नक्तं मृतकदाहो न स्यादिति हरौकसि पतिमस्तकमुत्सङ्गे निधाय स्थितायास्तस्या योषितश्चरित्रं राजा प्रच्छन्नस्थो द्रष्टुं लग्नः। अथ स्वैरिणीनां शिरोमणिः साऽपि तत्र स्थितेनैकेन मधुरस्वरगानपरेण पङ्गुनरेण मोहिता सती तेन सह सम्भोगं व्यधात्। राजाऽपि तस्या एतद्धशमनुचितं चरितं निरीक्ष्य धन्या गुरव इति ध्यायन्नुषसि गृहं ययौ। अथोदिते रवौ राज्ञा चितां प्रवेष्टुमुद्यतां 'नक्तं तच्चरित्रमधुना चैवं करोषि' इति कर्णे प्रविश्य उक्ता सा राजानं दूरीकृत्य लोकसमक्षमाह—भो लोकाः ! यदसौ **कुमारपालः** परमाऽऽर्हतः परमधार्मिकश्च तन्मिथ्या, यत्कर्णे प्रविश्य मामिति वक्ति, हे सुन्दरि ! मा त्वमग्नौ प्रविश मदन्तःपुरमलङ्कुरु ! त्वामहमग्रमहिषीं करिष्ये, इति बाढस्वरेण जनानां पुरः प्रतिपाद्य सा चितां प्राविशत्। धिग्धिगिति लोकैर्निन्दितो अञ्जनदिग्धमिव निजं श्यामं मुखं पिधाय वज्राहत इव हृदि पीडितः पार्थिवो नगरान्तरागत्य सौधं प्रविष्टः।

ज्वलनोद्यतामिमां महासतीमसौ राजा भृशमनुचितमूचे इति चत्वराऽऽदिषु लोकैर्विधीयमानेयं वार्ता सलिले तैलबिन्दुरिव सकलेऽपि पुरे प्रथिता; अथैनमुदन्तमाकर्ण्य गुरवोऽपि सौधे गत्वा राजानमूचिरे, हे राजन् ! दृष्टं स्त्रीचरित्रम्? इत्युक्ते राजोवाच- हे भगवन्! भवदाज्ञाभङ्गफलं लब्धम्, अथ सकलङ्कस्य मम किं प्राणैः? अतोऽनशनं कृत्वा प्राणांस्त्यक्षामीति वदन्तं तं गुरुराह- हे राजन्नलं खेदेन, पङ्गुद्वारा कलङ्कमिमं निराकरिष्ये, इत्यभिधाय लोकसमक्षं पङ्गुमाकार्य गुरुणा पृष्टः स रात्रिजातं तत्स्त्रीचरित्रं यथाजातं जगौ, लोकोऽपीति तदुक्तं निशम्य धिक् धिक् तां स्वैरिणीमिति तन्निन्दां विधाय राजानमस्तवीत् ॥

इति स्त्रीचरित्रे वसुदत्तविप्रप्रियाकथा ॥ ९२ ॥

॥ ९३ ॥ धूर्तचरित्रविषये धूसराऽऽभीरकथा ॥

धूर्तानां चरित्रं दुरवबोधं, यतः—

मन्त्रेत्रयोस्त्वयाऽकारि, तुष्टिस्त्वत्कर्णयोर्मया ॥
आभीरेण नटोऽवञ्ची-त्युक्त्या धूर्ता हि दुष्कराः ॥ १ ॥

तथाहि— **नागसारे नगरे** बहव वल्लवाः वसन्ति। तत्र चैको महाधूर्तो **धूसराह्वो** वल्लवः। तत्रैकदा नटकलाकलापेशलः **पेशलो** नाम नटराजो राजादिलोकानां पुरस्ताद्बहुभिर्वेषविशेषैर्नृत्यमतनोत्। तत्कलामालोक्य राजाऽऽदयो लोका वस्त्रधनकनकदानैस्तं तोषयामासुः। अथ ते चाऽऽभीरा अपि गो-वृषभ-महिषीप्रमुखचतुष्पदप्रदानेन तं प्रीणयन्ति स्म। अथ तत्र स्थितः

१. प्रविशितुम्-PBD ॥

स धूसरोऽपि **रामचन्द्रसीतादिवेषे** समानीते तं नटमाह—प्रभाते महिषीमेकामहं ते दास्ये, **हरिश्चन्द्रवेषे** चानीते नवप्रसूतामेकां गामुषसि वितरिष्यामि, **उमामहेशवेषे** चोपस्थिते महान्तमेकं वृषभं विभाते दास्यामीति वदति तस्मिन् पेशलोऽपि विशेषतस्तमुद्दिश्य नृत्यं व्यधात्। अथ प्रभाते विसृष्टे च नाट्ये सर्वेष्वपि लोकेषु निजास्पदं गतेषु स नटोऽपि विहितदन्तधावनादि-प्रभातकृत्यः सपरिकरो धूसरधामनि गतवान्, याचितश्च नक्तोक्तं[1], स धूसरस्तमाह, हे नट ! भवता यथा मम दृशोस्तुष्टिरकारि, तथा मयाऽपि तव कर्णयोस्तोषो निर्ममे, इति वञ्चितः स नटः स्वस्थानं ययौ ॥ **इति धूर्त्तचरित्रविषये धूसराऽऽभीरकथा ॥ ९३ ॥**

॥ ९४ ॥ मतिविषये प्रीतिमतीकथा ॥

सर्वत्र सर्वथा सर्वेषां मतिमानेव प्रीतिहेतुः, यतः—

न भ्रातरि न च मातरि न च, नेतरि नापि पितरि न स्वसरि ।
न च दातरि न च गातरि सा, प्रीतिर्या च बोधरि नरि स्यात् ॥ १ ॥

तेन मतिमतां न किमपि दुरवबोधं, यतः—

प्रज्ञाप्रभावविदिताऽखिलचेष्टितानां, चेतस्विनां किमवबोधमुपैति नैव ।
कन्याचतुष्टयविवादमबोधि रामं—पुश्रे इति च्छलमयं सचिवाऽऽत्मजा यत् ॥ २ ॥

तथाहि— **श्रीनन्दिपुरे** नगरे **मणिशेखरो** नाम राजा, **सुबुद्धिमन्त्री, प्रीतिमतीनाम**-मन्त्रिपुत्री। तत्र च पुरे **कमला-रमा-लक्ष्मी-पद्माभिधानाश्चतस्रः** श्रेष्ठिसुताः कुमारिकाः, तासु चैका **वासुदेवं**, द्वितीया **श्रीदेवीं**, तृतीया **महेश्वरं**, चतुर्थी **भवानीं** चेति वरार्थिन्यस्ता आराधयामासुः। कुसुमकुङ्कुमकर्पूरकालागुरुश्रीखण्डबलिभिरनिशं पूजितास्तेऽमी देवास्तद्भक्ति-भरवशीकृता अन्यदा प्रत्यक्षीभूय वरं याच्यतामिति ताः प्रति प्रोचिरे। अस्माकमुचितवरवाञ्छां पूर्यतामिति ताभिरुक्तास्ते प्रत्येकं 'रामंपुश्रे' इति वर्णचतुष्टयं दत्त्वा तिरोदधिरे। अथैतेषां वर्णानामर्थमजानानास्ताःस्वस्वपितॄन् प्रोचुः। तत्पितरोऽपि स्वयमन्यपण्डितेभ्यश्च तदनिर्णयं मत्वा राज्ञे विज्ञपयन्ति स्म। राजापि स्वान् पञ्चशतपण्डितान् **सुबुद्धिं** च मन्त्रिणमभणत्- भो पण्डिता! एतन्निर्णयः क्रियतां, न चेन्मदाज्ञाविषयो विषयो मुच्यतामिति सप्तदिनसीमानमङ्गीकृत्य गतेषु तेषु सुबुद्धिरपि श्याममुखः स्वं धाम जगाम। चिन्ताकारणं पृष्टः सः सर्वं प्रीतिमत्यै जगौ। सद्योऽवगततदर्था सा बुद्धिमती द्रुतमेवैतन्निर्णयं करिष्ये इति पितरं प्राह। अथ प्रभाते प्रमुदितेन पित्रा समं भूपपर्षदि गत्वा सा लघीयसी प्रीतिमती तेषामक्षराणामर्थमचीकथत्। 'रा' इति राज्ञः सुतः प्रोक्तः, 'मं' इति मन्त्रिनन्दनः, पुं[2] इति पुरोधसः पुत्रः, श्रे इति श्रेष्ठिनोऽङ्गजः, एवं सम्यगर्थकथनतस्तुष्टेन राज्ञा वस्त्राऽऽभरणादिना सा सत्कृता, अहो ! मतिकौशलमस्या इति

१. नक्तमुक्तं - P। नक्तयुक्तं - BD ॥ २. पुश्रेति-AHPBD ॥

च लोकैः प्रशंसिता सा **प्रीतिमती** गृहं गता। कः को वरः कस्यै कस्यै रोचते? इति पितृभिः पृष्टासु तासु चाऽऽद्या **कमला** जगौ सर्वलोकेभ्यो राजसुतो विलासी, अतः स एव मम विवोढा भूयादिति। राजसुतादपि मन्त्रिपुत्रो विशेषतः सम्भोगसौभाग्यवानिति स एव मम पतिरस्तु इति द्वितीया रमाऽब्रवीत्। मन्त्रिपुत्रादपि मन्त्रतन्त्रशक्तिभिर्वशीकृतराजादिलोकमनाः सुमनाः पुरोधसस्तनयस्तेन स एवास्तु मम रमण इति तृतीया लक्ष्मीर्जगाद। पुरोहितपुत्रादपि सर्वदा देव इव विविधविलासशाली श्रेष्ठिनन्दनस्तेन स एव मम प्रियतमो भवतादिति चतुर्थी पद्मा प्राह- अथ पितृभिर्यथारुचितवरान् विवाहितास्ताः सुखपदं बभूवुः ॥ **इति मतिविषये प्रीतिमतीकथा** ॥ ९४ ॥

॥ ९५ ॥ यथा तथापि प्रतिबोधो देय इत्यर्थे पण्डितकथा ॥

परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः, परोपकाराय सतां प्रवृत्तिः ॥ १ ॥

तेन परोपकारैकरसिका येन तेनाप्युपायेनोपकुर्वन्ति। यतः—

यो यथात्र समुपैति विबोधं, तं तथैव हि नयेत विबोधम् ।
यत्कखेतिवचनाद् द्विकभक्षी, बोधितस्तथदधेति न वाक्यात् ?॥ २ ॥

तथाहि— **धनसारे** ग्रामेऽतीवमूर्खा बहवो भरडका वसन्ति। आत्मनां मध्ये कोऽपि पण्डितो नास्तीति मत्वा तैरशेषैः सम्भूयैकस्य भरडकस्य **नन्दको** नाम नन्दनः कस्यापि पण्डितस्य पार्श्वे पठनार्थममोचि। जातिविशेषेण भृशं बालिशः सोऽपि नन्दको वर्षत्रयेण मातृकापाठमेवापाठीत्। वेदमाताऽनेनाधीतेति प्रतिपाद्य तेन पण्डितेन स तेषां भरडकाणां प्रत्यर्पितः। महाजडैस्तैरपि वेदमाताऽनेन पठितेति महापण्डितधियासौ मेने। किं बहुना? यदयं वक्ति तत्तद्वितर्करहिताः सन्तस्ते सृजन्ति।

एकदा रात्रौ प्रदीपनेन समग्रेऽपि ग्रामे दग्धे क्वाप्येकस्य तरोरधो दग्धान् काकान् पतितान् विलोक्य तैरूचे- हे नन्दक ! किममी दग्धाः काका भक्ष्या उत न वेति ? तदुक्तोऽसौ जगाद- वेदमातरि 'क' इति काकाः, 'ख' इति खाद्यास्तेन सद्योऽमी भुज्यन्तामिति तदुक्तास्ते सर्वेऽपि तथैव कर्तुमुद्यताः केनापि वैदेशिकेन पण्डितेनावलोकिताः, पृष्टाश्च ते तस्मै नन्दकोक्तमूचिरे। अहो महामूर्खा अमीति मत्वा तेनाप्यभाणि, भो विप्राः ! श्रूयतां वेदमातृवाक्यं, क इति काकाः, ख इति खाद्याः, तथ इति तथैव, सत्यमिति यावत्, परं दध इति दग्धाः काकाः, न इति न भक्षणीयाः, इति तद्वचनेन तदकृत्यान्निवृत्तास्ते सर्वेऽपि तं वैदेशिकं पण्डितमपूजयन् ॥ **इति यथा तथापि प्रतिबोधो देय इत्यर्थे पण्डितकथा** ॥ ९५ ॥

॥ ९६ ॥ विज्ञानप्राधान्यविषये मनोरथसूत्रधारकथा ॥

विद्यादिभ्योऽपि विज्ञानमेवाऽविनश्वरं, यतः—

विद्या विस्मरति प्रमादवशतो वित्तानि वह्न्यादिना ।
नाशं यान्ति जरारुजादिभिरलं रूपप्रथा हीयते।
लोभात्सौहृदमस्तमञ्चति यशोऽनाचारतः क्षीयते।
विज्ञानं च वदन्ति शाश्वतमिदं सर्वत्र मित्रोपमम्॥ १॥

तेन विज्ञानं हि निधिरेव, यतः—

निधानमेव विज्ञान-मामनन्ति मनस्विनः।
रथकारसुतः प्राप, श्रियं यत्काष्ठकौशलात्॥ २ ॥

तथाहि— **गिरिसारे** नगरे **वेणिदास**सूत्रधारस्य **मनोरथः** सुतः, स च पित्रा शुभेऽहनि कलाचार्यस्य समीपे पठनार्थं मुक्तो लक्षमितं वास्तुशास्त्रमधीते स्म। यौवनोन्मुखश्च स पित्रा **मथुरा**वासिनो **गदाधरस्य** सूत्रधारस्य **पद्मिनी**नामपुत्रीं परिणायितः। क्रमेण पितरि पञ्चत्वं प्राप्ते लक्षणोपेतकाष्ठाऽलाभात्स्वं कर्मोद्यममकुर्वन् दौर्गत्यपराभूतो **मथुरा**मेत्य श्वशुरगृहे तस्थौ। तत्रापि श्यालादिभिर्हसितोऽप्यसौ सल्लक्षणं काष्ठं विना सर्वदा स्वव्यापारविमुखोऽसुखमश्नुते स्म।

एकदा प्रावृषि यमुनाप्रवाहे वहमानमेकं शास्त्रोक्तलक्षणोपेतं दारुदलं विलोक्य द्रुतं तदादाय गृहं गतः, **तस्मात्स** स्वोपकरणेन धान्यमानोचितं पात्रं निर्माय, लक्षसुवर्णमूल्यं विना न कस्यापि देयमिति शिक्षां दत्त्वा प्रभाते स्वप्रियां चतुष्पथे प्राहिणोत्। चतुष्पथे स्थिता सापि जनैः पात्रमूल्यं पृष्टा तदेवाह, तेन केनापि सर्वस्मिन्नप्यहनि तन्नादायि, परं लोकैः सा बहु हसितापि पतिवाक्याऽनुलङ्घनात्सायं यावत्तत्रैव तस्थौ। तदा च हट्टाद् गृहं गच्छता **जिनचन्द्रेण** श्रेष्ठिना सा दृष्टा, पृष्टा च पात्रमूल्यं तदेवोचे, महाशयेन तेनापि तेनैव मूल्येन तत्पात्रमादाय तया समं तदौकसि गतेन तन्महिमानं पृष्टस्तत्पतिः प्राह- हे श्रेष्ठिन् ! तव भाग्यं भूयो येन यद्वस्तु चास्मिन् पात्रे निधीयते, तन्न कदापि त्रुटतीति निशम्य चिन्तामणिमिव तत्पात्रं मन्यमानः स स्वस्थानं ययौ। ततो मनोरथोऽप्यवशिष्टेन काष्ठेन द्वितीयं पात्रं निर्माय निक्षिप्य च तत्र तद्धनं कुबेर इव श्रीमानजनि ॥ **इति विज्ञानप्राधान्यविषये मनोरथसूत्रधारकथा** ॥ ९६ ॥

॥ ९७ ॥ लोभविषये वासुदेवविप्रकथा ॥

लोभो हि सर्वेषां गुणानां निधने धुरीणः, यतः—

किं ध्यानैर्मुखपद्ममुद्रणचणैः किञ्चेन्द्रियाणां जयै-

१. सद्म पद्म शशिभिः मु. अत्रैव ५७ तमकथायामपि ॥

रुद्धेच्छैस्तपसां पुनः प्रतपनैः किं मेदसां शोषणैः ।
किं वाचां जनितश्रमैः परिचयैः किं क्लेशजातैर्व्रतैः-
श्लेष्लोभोऽखिलदोषपोषणपटुर्जागर्त्ति चित्तेऽर्तिभूः ॥ १ ॥

तेन लोभादनर्थाः प्रतिपदं प्राप्यन्ते। यतः—

एकं दृष्ट्वा शतं दृष्ट्वा, दृष्ट्वा सप्तशतानि च ।
अति लोभाभिभूतस्य, चक्रं भ्रमति मस्तके ॥ २ ॥

तथाहि— **अचलपुरवासी वासवो** नाम द्विजन्मा दारिद्र्योपद्रुतो निशीथे गृहान्निर्गत्य **कुञ्जरावर्तं** महारण्यं प्राप्तः, तत्र च नालिकेरकदलीदाडिमादीनि फलान्युपभुज्यैकस्मिन् सरसि सरसं शीतलं सलिलं च निपीय तत्पाल्यां वटतरोरधस्तात्सुष्वाप। सुप्ते च तस्मिन् विप्रे परिहिताशेषाऽऽभरणसम्भारा विहितस्फारशृङ्गारा यौवनशालिनी रूपसौभाग्यमालिनी गजगामिनी भामिनी समेत्य संवाह्य च तत्पादौ कमलकोमलाभ्यां कराभ्यां तमुत्थापयामास।

उन्निद्रश्चाऽसौ तथाविधां तां निरीक्ष्य निरीक्षितस्वप्नमिवात्मानं मन्यमानस्तयाऽभाणि, स्वामिन्नित उत्तिष्ठ, सोऽपि तयानुगतो व्रजन्नग्रे सप्तभूमिकं विमानमिव रम्यमेकं प्रासादं प्रविष्टः, उपविष्टश्च शस्ततूलिके पर्यङ्के, अथ शोभनाऽऽसनशयनादिभिरुपचर्य सादरं सा तं प्राह- 'हे स्वामिन्नियं दासीकृतशक्रवधूरहं तव दासी, रम्यमिदं च सौधं, सर्वा चाऽसौ सामग्री वसनाऽऽभरणादिरूपा, तेन किमतः परमन्यद्विलोक्यते?' 'देवविलासललितमिव सर्वं सुभगमिदं मया लब्धं, तेन नान्यत्किमपि विलोक्यते,' इति तेनोक्ते साऽवादीत्- हे देव ! क्वापि मयि गतायां भवतो यदि रिरंसा स्यात्तदा पूर्वोत्तरपश्चिमद्वारेषु निर्गत्य तत्रस्थोद्यानेषु क्रीडा विधेया, न च याम्यद्वारे, इत्युक्तस्तया समं भोगान् भुञ्जानोऽन्येद्युस्तस्यां क्वापि गतायां दक्षिणद्वारे निर्गतः स तयेव कामिनीशतेन चतुर्दशभूमिके सौधे निन्ये, तयेव विशेषतस्ताभिरुपचर्य स तथैवोक्तः। अन्यदा क्वाऽपि गतासु तासु पुरावल्लोभादधिकमिच्छुना तेन तथैव याम्यद्वारे निर्गतेन तादृश्येव स्त्रीसप्तशती लब्धा, ताभिरप्येकविंशतिभूमिके प्रासादे सम्प्राप्य विशेषादुपचर्य तथैवोक्तः सोऽप्यतिलोभादधिकतरमीहमानस्तथैव विदधे। अतिलोभाभिभूतस्य दक्षिणद्वारे निर्गतमात्रस्यैव तस्य मस्तके सहस्रभारलोहमयं चक्रं नभस्तलतो न्यपतत्, तया व्यथया पीडितः स मृत्वा नरकं ययौ ॥ **इति लोभविषये वासवविप्रकथा ॥ १७ ॥**

॥ १८ ॥ पुत्रचरित्रात्पितृदोषज्ञानमित्यर्थे माधवविप्रकथा ॥

अपत्यचरित्रैरेव पितृदोषो निर्णीयते, यतः—

अङ्कुरैरिव बीजमुत्तमवनौ वाजीव हेषारवै-
र्धूमौघैरिव पावकश्च तटिनीपूरैरिवाम्भोधरः।

१. क्लेशयुक्तै -HP ॥

सौख्यैः पूर्वकृतेव पुण्यघटना पूषेव पद्मस्मितैः,
सम्पन्नं पितृदूषणं तनुरुहां चेष्टाभिरुन्मीयते ॥ १ ॥

अपि च—

चरित्रैरेव पुत्राणां, वप्तुर्दोषोऽवसीयते ।
विप्रोऽपूतपयःपाना-[1]ज्जारजोऽज्ञायि भूभुजा ॥ २ ॥

तथाहि— **दिल्लीपुर्यां** वातायनस्थेन **शेरसिंहेन** पातसाहिना प्रातरेवाऽगलितं जलं पिबन्**माधवाख्यो** द्विजन्मा दृष्टो निजनरैराकार्य पृष्टश्च, भो विप्र ! प्रातरेवाऽविहितदन्तशुद्धिः कथमगलितं पयः पीतवान्? इत्युक्तः सोऽवदत्, हे देव ! नक्तमुष्णमन्नं भुक्तं, तेन पिपासा भूयसी समभूत्, तद्वशादौत्सुक्येनापूतमेव पयः पीतं मयेति तदुक्ते साहिराह- भो विप्र ! यदि सूनृतं वदसि तदा सत्करिष्ये, न चेन्मारयिष्ये, इति कुपितं पातसाहिमालोक्याऽजामिषमह-मद्य रात्रौ भुक्तवान्, इति तदुक्तमाकर्ण्य मांसविक्रेताऽऽकार्य साहिना पृष्टः, सोऽप्याह हे देवायं विप्रः प्रत्यहं मम हट्टादजामिषमादत्ते, अद्य तन्नाभूत्तेन तत्स्थाने गोमांसमहमदामिति निशम्य यवनानां गोमांसमुचितं, न तु तदन्येषामिति क्रुद्धेन साहिना स मांसविक्रेता हतः।

अथ विप्रमातरमाकार्य साहिना रहसि पृष्टं, हे भगिनि! सत्यं वद, कस्यायं सुतः? सत्यं [2]वदसि यदि तदा त्वां पूजापात्रं करिष्ये, न चेत्रक्रकर्णच्छेदनपुरस्सरं विडम्ब्य पुरान्निष्का-शयिष्यामीति साहिनाऽभिहिता साऽभिदधे, हे स्वामिन् ! मदोकःसमीपवासिनैकेन तुरुष्केण रजस्वलाऽहं बलाद्भुक्ता, तदायं मद्गर्भे समुत्पन्नः, इति सत्यवादिनीं तां भगिनीमिव वस्त्रादिना सुतसहितां तां साहि सत्कृत्य विससर्ज ॥ **इति पुत्रचरित्रात्पितृदोषज्ञानमित्यर्थे माधवविप्रकथा ॥ ९८ ॥**

॥ ९९ ॥ पूर्वजदोषः पौत्रादिष्वपि स्यादित्यर्थे श्रेष्ठिस्नुषाचन्दनाकथा ॥

अत्रैवार्थे कथान्तरं—

पुरातनैः कृतं कृत्यं, प्रायोऽपत्येऽपि जायते ।
मृता मातामही पाशा-त्तथैव नप्तृकोद्यता ॥ १ ॥

तथाहि— **शङ्खपुरे** पुरे **कनकदेवस्य** श्रेष्ठिनः **कनकश्रीर्गेहिनी, कामचन्द्रश्च** सुतः तस्य च प्रातिवेश्मिकस्य **धनदेवस्य धनश्रीकुक्षिजाता चन्दनानाम**नन्दना। अन्यदोद्दाम-यौवनयुतायाः स्वसुतायाः पाणिग्रहणार्थं **धनश्रिया कामचन्द्रमाश्रित्य कनकश्रीरूचे** । तयाप्यस्मिन्नुदन्ते स्वपतेर्निवेदिते सोऽवादीत्, हे प्रिये ! अत्राऽर्थे त्वया न निर्बन्धो विधेयः,

१. AHPBD । जाल्मजो-मु. । २. A । वदिष्यसि - H । वक्ष्यसि - मु. ।

इति पतिनिषेधान्मौनमाधाय स्थितायां तस्यां कियत्सु दिनेषु गतेषु पुनरपि **धनश्रिया** तथैव **कनकश्री**रभिहिता। पुनरपि तया पृष्टः पतिस्तथैवाह। अन्यदा च धनिके क्वापि पुरान्तरं गते कन्यारूपमोहितया **कनकश्रिया** पत्याज्ञामुल्लङ्घ्य स्वसुत**श्चन्दना**मुद्वाहितः।

गृहमागतश्च **कनकदेवः** सुतविवाहस्वरूपमवगम्य मौनं कृत्वा तस्थिवान्। अन्यदा स्वनिषेधफलविज्ञापनाय भोजनवेलामतिक्रम्य गृहमागतः श्रेष्ठी प्रियां प्राह— हे प्रिये ! अधुनैकस्याऽधमर्णस्य प्रभूतं वित्तं देयमस्ति, तेनैकं तवाभरणमेकं च स्नुषाभरणं दीयतामित्युक्ते प्रियया बहुमूल्यमेकमाभरणमदायि। तदा च स्नुषयाऽभ्यधायि, यदि मदाभरणमादास्यते तदाऽहं कण्ठपाशेन प्राणत्यागं विधास्ये, इत्युक्ते श्रेष्ठी प्रियां प्रोचिवान्— हे प्रेयसि ! यदस्याः स्नुषाया मातामही कण्ठपाशेन परासुरभूत्तेनाऽस्यामपि स दोषो भवितेति विवाहार्थं त्वामहं निषिद्धवान्। अथ **कनकश्रीरपि** स्वस्वामिमतिं वरीयसीं मन्यमाना पत्या सह भोगानुपभुज्य काले पत्या सह धर्मपरायणा सती सन्मार्गमाराधितवती ॥ **इति पूर्वजदोषः पौत्रादिष्वपि स्यादित्यर्थे श्रेष्ठिस्नुषाचन्दनाकथा ॥ ९९ ॥**

॥ १०० ॥ जीवतां कल्याणागम इत्यर्थे भानुमन्त्रिकथा ॥

जीवतां प्रायेण विपत्तिप्रणाशः स्यात्, यतः—

जीवैः प्रायेण जीवद्भि-र्विपत्तिरभिभूयते ।
क्षीणभावो निराकारि, न किं कुमुदबन्धुना ?॥ १ ॥

तेनावश्यमेव जीवन्तः पुमांसः कल्याणभाजो भवन्ति। यतः—

भानुश्च मन्त्री दयिता **सरस्वती,** मृतिं गता सा नृपकैतवेन ।
गङ्गां गतस्तां पुनरेव लेभे, जीवन्नरो भद्रशतानि पश्यति ॥ २ ॥

तथाहि— **तुरगदे** नगरे **नरराजस्य** राज्ञो **भानो**र्मन्त्रिणः **सरस्वती**प्रिया, रोहिणी-रोहिणीप्राणेशयोरिव परस्परं प्रीतिप्रह्वयोर्मन्त्रिप्रिययोः प्रयान्ति वासराः। अन्यदाऽनयोर्मिथः प्रभूतप्रेमवार्त्ताकर्णनविस्मितेन मृगयां गतेन राज्ञा कौतुकेनाऽन्यजीवरुधिराऽङ्कितवस्त्रसहितो मन्त्रितुरङ्गमः पुरम्प्रति प्रहितः। स्वप्रियं विना रक्ताऽङ्कितस्वनाथवस्त्रयुतं तमश्वमायान्तं विलोक्य हा मृगयां गतो मम प्राणेशः केनाऽपि सिंहादिना दुष्टश्वापदेन हत इति ध्यायन्ती **सरस्वती** वज्राहतेव भूमौ पतिता मृता च। ज्ञाततन्मरणेन हा हास्यस्थाने विषादः सम्पन्न इति खेदात्तेन राज्ञा ज्ञातस्वप्रियामरणो मन्त्री प्रकामोपायेन रक्षितः, परमन्यकलत्रविमुखस्तदस्थीन्यादाय स्वीकृतयोगिवेषो गङ्गां प्रति गच्छन् मन्त्री द्वादशाब्दैर्गङ्गोपकण्ठस्थितं **महारथपुरं** प्राप्तः, तत्र च **शतरथो** राजा, तस्य च **भारती**सुता, तत्रैव च **महासेन**श्रेष्ठिनः **श्रीमती** सुता, राजसुता श्रेष्ठिसुता चेति मिथः सौहार्दशालिन्यौ स्तः।

अन्यदा स योगी तत्र पुरे भिक्षार्थं भ्रमन् राजमन्दिरं गतो **भारत्या** दृष्टः, अथ तस्य भिक्षां दातुमुपस्थितायास्तद्दर्शनाल्लिखिताया इव स्थितायास्तस्याः पाणिस्थं कूरं काका आददिरे। स योग्यपि तां पश्यंश्चित्रित इव तस्थौ। एतद्व्यतिकरं गवाक्षस्था **श्रीमती** विलोक्येदमभणत्—

सा पिच्छइ तस्स वयणं, जोगी पुण नाहिमंडलं तीए ।
पुव्वभवंतरनेहो, कागा अ चुणंति तक्कूरं ॥ २ ॥

इति मत्वा यावत्सा समेति, तावत्स योगी तां तथैव हित्वा क्वापि गतः। अथाऽऽवयोरयमेव पतिरिति ताभ्यां सखीभ्यां सङ्केतो निर्ममे। अथ ज्ञाततत्प्रतिज्ञः स राजा ताभ्यां विज्ञप्तः—

अलियं जंपेइ जणो, राया चोराण निग्गहसमत्थो ।
अम्हं चिय मणहरणो, सो चोरो णयरमज्झंमि ॥ ३ ॥

अथ राज्ञाप्युपायेन सर्वस्मिन्नपि योगिसमुदाये मेलिते तदन्तःस्थः स योगी ताभ्यां दृष्ट उपलक्षितश्च। **भारत्या** चाऽभाणि—

मज्झ मणं गहिऊणं, नट्ठो सहसत्ति तम्मि समयम्मि ।
अहुणा महकर चढिओ, कह वच्चसि कहसु तं नाह ! ॥ ४ ॥

योग्यपि जगौ-

सिहलंकहरी गइहंसहहरी, आ नयणकुरंगीवंसहरी[1] ।
ससहरबिंब हरेवा वल्ली, किस हुं चोर किसि तुं भल्ली ? ॥ ५ ॥
हुं जोगी जगि अच्छउं निरंजण, में नवि हरिउं छे[2] तुम मन्न ।
सुण सुंदरि कुण झगडो आपण, पुव्वभवंतर लागी खणखण ॥ ६ ॥

पूर्व भवान्तरमिति योगिनोदिते जातजातिस्मृतिर्भारती निखिलं पूर्वचरित्रं जगौ, राजापि मुदितो योगिनं जगौ, हे योगिन् मुञ्चेमं योगिवेषं, इमां श्रीमतीयुतां मम पुत्रीं च परिणयेत्युक्ते स योगी तस्यां सञ्जाततीव्ररागो योगिवेषं विमुच्य तामुपयेमे।

तं चरिअं दट्ठूणं, राया दुण्हंपि देइ आवासं ।
वसिऊण वीस वासं, पुणोवि दुण्हंपि वेरग्गं ॥ ७ ॥

इति जीवतां कल्याणागम इत्यर्थे भानुमन्त्रिकथा ॥ १०० ॥

॥ १०१ ॥ स्त्रीशक्तिविषये नापित-मालिकस्त्रीकथा ॥

स्त्रीणां शक्तिरतुला, यतः—

यल्लब्धनिस्तुलफलैर्न बलैर्नरेन्द्रा, यद्विद्यया विदितविष्टपया न विज्ञाः ।

१. AH अनायण कुरंगीवंसह । २. अछइ AH ।

वित्तैर्न ससृजुरकृत्यकरैर्यदाढ्या-स्तल्लीलयैव खलु लोलदृशः सृजन्ति ॥ १ ॥

अपि च—

अनेककौतूहललीनचेतसा-मेणीदृशां पश्यत शक्तिमद्भुताम् ।
यन्नापितस्त्री गगनं व्यदारय-द्यन्मालिका च प्रगुणीचकार तत् ॥ २ ॥

तथाहि— **रविपुरे** पुरे **पूणाह्वा** नापितस्त्री, **लक्षणाख्या** च मालाकारस्त्री, द्वे अपि कपटपटीयस्यौ स्तः, एकदा परस्परं प्रीतिवार्त्ताप्रह्वयोस्तयोः **पूणां लक्षणाऽभ्यधात्**- हे सखि! कियती तव शक्तिः? अथ साऽवादीत्- यदहं गगनं स्फोटयामीति **पूणया** कथितेऽन्या न्यगदत्- तदा तदहं सज्जयामीति मिथः स्वां स्वां शक्तिमुद्गीर्य स्वं स्वं स्थानं गते।

एकदा पुरमध्ये व्यवहारिणां गृहेषु भ्रमन्ती **पूणा** प्रोषितभर्तृकां **भानुमतीनाम**श्रेष्ठिसुतां रहसि स्माह— हे सुभगे ! वने प्रसूनमिव, शून्यवेश्मनि वेश्ममणिरिव तव यौवनं, येनाऽस्मिन्नवसरे तव पतिविप्रलम्भः, इत्युक्ता सा तद्वचने जातरुचिरिव यदा जज्ञे, तदा सा **पूणा** पुनर्बभाण, हे सुभगे ! त्वदुचितेनैकेन यूना समं तव सङ्गमं कारयिष्यामीति वादिनीं तां साऽनुमेने। अथ सा **पूणा** यूना **भानुचन्द्रेण** श्रेष्ठिपुत्रेण सहैकस्मिंश्चण्डिकौकसि तां **भानुमतीं** संस्थाप्य कोट्टपालमिति जगौ, हे स्वामिन्नत्र चण्डिकौकसि काऽपि स्वैरिणी जारेण सह प्रविष्टाऽस्तीति निशम्य स रात्रावेव स्वनरैस्तद्देवकुलं वेष्टयामास। अथ गगनं स्फाटितमस्तीति सर्वं **लक्षणाया** निवेद्य सा **पूणा** स्वगृहं गता। अथ सा **लक्षणापि भानुचन्द्रगृहमेत्य** तां सर्वां वार्तां तत्पितुरवादीत्। तेनाऽनुमता साऽपि पञ्चस्त्रीयुतां **भानुचन्द्रप्रियामादाय** वाद्यपुरस्सरं चण्डिकागृहं गत्वा तत्रस्थान् तान् नरानाह— भो भद्राः! यदस्माकं चण्डिकादर्शनं विना भोक्तुं न कल्पते, तेनाऽत्र प्रवेशो दीयतामिति। अथ ते प्रोचुर्यदत्र कोऽपि सस्त्रीकः पुमान् प्रविष्टोऽस्तीति प्रवेशो न दास्यते।

अथ सा स्माह यावतीनामस्माकमिह प्रवेशस्तावतीनामेव निर्गमो देय इति प्रतिपाद्य तेषां सर्वेषां प्रत्येकमेकैकं सुवर्णटङ्कं च दत्त्वाऽन्तःप्रविश्य च **भानुमतीस्थाने** तत्प्रियां विमुच्य **भानुमतीं** चाऽऽदाय सा **लक्षणा** स्वां प्रतिज्ञामपूरयत्, गगनं सन्धितमस्तीति **पूणाया**श्च जगौ। अथ प्रातरुद्घाटिते कपाटे तौ दम्पती निर्गतौ विलोक्य ते कोट्टपालपुरुषा लज्जितास्तं वृत्तान्तं स्वस्वामिने जगुः ॥ **इति स्त्रीशक्तिविषये नापित-मालिकस्त्रीकथा ॥ १०१ ॥**

इति पं. श्रीकमलविजयगणिशिष्य पं. श्रीहेमविजयगणिविरचिते

कथारत्नाकरे

चतुर्थस्तरङ्गः समाप्तः

॥ श्रीरस्तु ॥

॥ ५॥ पञ्चमस्तरङ्गः ॥

॥ १०२ ॥ स्त्रीचरित्रे महेशविप्रप्रिया-नन्दरीकथा॥

चलदृशां चरित्रं हि दुश्चिन्त्यं, यतः—

युवानमन्यं हृदये वहन्ति, पश्यन्ति दृग्भिः सुभगाभिरन्यम् ।
क्रीडन्ति चाऽन्येन समं समन्ता-दहो! चरित्रं चपलेक्षणानाम् ॥ १ ॥

तेनैतासामेव मानसे भूयः कपटं, यतः—

धूलिः किमेषा? दयितेन पृष्टे, प्राह प्रियैवं पतति स्म पाणेः ।
द्रव्यं तदन्वेष्टुमियं गृहीता, मयेत्यहो ! कैतवमङ्गनानाम् ॥ २ ॥

तथाहि— **गञ्जणपुरे** पुरे **महेशस्य** विप्रस्य **नन्दरी**नामसुन्दरी, अन्यदा परदेशं गते भर्तरि सा **नन्दरी** केनाऽपि पुंसा स्वैरं विषयान् सिषेवे। अथ भूयोभिरहोभिरगारमागते **महेशे** जलार्थं नदीं व्रजन्ती सा तेन यूना जगदे- हे सुभ्रु ! यद्यद्य समेतेऽपि प्रेयसि मया मिलिष्यसि तदाऽऽवयोः प्रीतिरिति तथेति प्रतिश्रुत्य स्वं धाम गता सा विशेषतः स्नानादिना भर्तुरुपचर्यां विदधे।

अथ **महेशेन** गोधूमचूर्ण-तण्डुलाद्यानेतुं द्रव्यं दत्त्वा विपणौ प्रहिता सा ध्यातवती, असावेवाऽवसरस्तेन प्रेयसा रन्तुमिति मत्वा हट्टस्थमेकं वणिजमाह- भद्र ! गृहाणैतन्नाणकं एतावद्गोधूमचूर्णमेतावन्तश्च तण्डुलाः सर्वमेतद्वस्त्रग्रन्थौ निबध्याऽत्र मोच्यं, कृताऽन्यकृत्याऽहमागच्छन्ती समादास्ये। तस्यां गतायां स वणिग् दध्यौ, नूनमियं स्वैरिणी केनापि रन्तुमुत्सुका याति, तेनाऽस्यां ग्रन्थौ गोधूमचूर्णादिस्थाने धूलिं बद्ध्वा मुञ्चामि, येनाऽऽगताऽसौ प्रकामौत्सुक्येन धूलिरन्यद्वेति न विलोकयिष्यतीति तेनैवमेव कृते समेता सत्वरा सा तां धूलिग्रन्थीं लात्वा गृहमाययौ, अथ पत्या ग्रन्थेरन्तः पांसुमालोक्य किमेतदिति पृष्टा समुत्पन्नसद्यःप्रतिभा साऽभाषिष्ट, हे कान्त! भवता दत्तं नाणकं मत्पाणेः पतितं, तद्विलोकनाय भूयान् विलम्ब सञ्जातः, तदनात्तौ च तत्स्थानरथ्यारजःपुञ्जमादाय समेताऽस्मीति तयोक्तः सोऽन्येन द्रव्येण सर्वकृत्यमसाधयन्मेने च तां महासतीम् ॥ **इति स्त्रीचरित्रे महेशविप्रप्रियानन्दरीकथा ॥ १०२ ॥**

॥ १०३ ॥ कुमानुषसङ्गेऽनर्थ इत्यर्थे मन्दविसर्पिणी-यूकाकथा ॥

कुसङ्गाद् व्याध्यादयो वराः, यतः—

वरं वाही वरं मच्चू, वरं दारिद्दसंगमो ।
वरं अरण्णवासो अ, मा कुमित्ताण संगमो ॥ १ ॥

येन नीचो हि सङ्गतानामनर्थहेतुः, यतः—

लूणा-घूणा-कुमाणसां, त्रिणें एकसहाव ।
जिहां जिहां करइ निवासडो, तिहां तिहां फेडइ ठाव ॥ २ ॥

अपि च—

न त्वविज्ञातशीलाय, प्रदातव्यः प्रतिश्रयः । यूका मत्कूणसङ्गेन, हता मन्दविसर्पिणी ॥ ३ ॥

तथाहि— **बाणपुरे** पुरे **जितरणस्य** भूपस्याऽतिस्वच्छदुकूलमय्यां तूलिकायां **मन्दविसर्पिणी**नामयूका सर्वदा वसति स्म। अन्यदा तत्र **वज्रमुखो** नाम मत्कुणः प्राघूर्णः समेतस्तां जगौ- हे मातृस्वसः! समाधिभागसीति ? साऽवादीत्- हे भागिनेय! भवतः स्वस्ति समस्ति? इति मिथः स्वागतप्रश्नपूर्वं प्रीतौ तौ क्षणं तस्थतुः। अथ यातुमुत्सुके तस्मिन् मत्कुणे यूका जगौ, भो भद्र! अद्य त्वं ममाऽतिथिर्भव येन तव भक्तिं करोमि।

का भक्तिरिति तेनोदिता साऽऽह- यतोऽस्यां तूलिकायां पीनाङ्गः पार्थिवः स्वपिति। सुप्ते च तस्मिन् पीयूषादप्यतिमधुरं तस्य रुधिरं निपीय गच्छेरिति तन्निर्बन्धेन स्थिते तस्मिन् सायं स राजा तस्यां तूलिकायां सुष्वाप, सुप्ते च तस्मिन् राजनि तेन मत्कुणेन शनैः शनैर्निर्गत्य स पृष्ठे दष्टः, केनाऽपि मद्वपुर्दष्टमिति पुनः पुनर्जल्पन् राजोत्तस्थौ। एतदवगत्य तत्परिजनोऽपि दीपेन तां तूलिकां शोधयाञ्चक्रे। ज्ञातसञ्चलः स मत्कुणः काकिनाशं नष्टः, तत्परिवारेण च शोधितायां तूलिकायां वराकी सा यूका दृष्टा, अहो अनया पापयाऽस्मत्स्वामिशरीरं जग्धं, धिगिमां पापिनीमित्युक्त्वा सा मर्दिता, प्राप चाऽज्ञाताऽऽचारसंवासजं मरणरूपं फलम् ॥ **इति कुमानुषसङ्गेऽनर्थ इत्यर्थे मन्दविसर्पिणीयूकाकथा** ॥ १०३ ॥

॥ १०४ ॥ साहसे धनश्रीकथा ॥

निर्लक्षणोऽपि पुमान् सत्त्वतः सिद्धिभाग्भवति। यतः—

अस्थिष्वर्थाः सुखं मांसे, त्वचि भोगाः स्त्रियोऽक्षिषु ।
गतौ यानं स्वरे चाऽऽज्ञा, सर्वं सत्त्वे प्रतिष्ठितम् ॥ १ ॥

अपि च—

बिलेशयबिले क्षिप्त-पाणिर्वाणिजवर्णिनी। सत्त्वतो रैलतां प्राप-दहो सत्त्वस्य वैभवम्॥ २॥

तथाहि—**धवलपुरे** पुरे **धनस्य** वणिजो **धनश्रीः** कामिनी, दानपुण्यपरयोरनयोर्दम्पत्योरम्भसि तैलबिन्दुरिव सर्वत्राऽपि कीर्त्तिः पप्रथे। एकदा **श्रीशत्रुञ्जयमहातीर्थं** व्रजन् भूयान् सङ्घस्तत्रोत्तीर्णः। तमालोक्य तत्पुरवासिमहर्द्धिकैकसुवर्णकारस्य **पुरी**नाम्नीं पुत्रीं तत्सखी इति जगौ, हे सखि ! इमं सङ्घं कोऽत्र भोजयिष्यतीत्याकर्ण्य परगुणमत्सरिणी सा **पुरी** महादाता **धनश्चै**नं सङ्घं भोजयिष्यतीति हास्येन स्वसखीं यदाह, तत्सर्वं दैवात्तत्पृष्ठगा **धनश्री**राकर्ण्य स्वपतेरभाणीत् ।

सोऽप्याह हे प्रिये ! किं क्रियते ? यदात्मन एतावती सम्पत्तिर्नास्ति, ययाऽसौ सर्वोऽपि सङ्घो भोजयितुं शक्यते। इत्युक्ते सा स्माह— हे नाथ! त्वं सङ्घं निमन्त्रय! अहं च ससर्पेऽस्मिन् दरे करं क्षेप्स्यामि, ततस्तद्दृष्टायां मयि मृतायामात्मौकसि सङ्घो नैष्यत्यात्मकीर्त्तिश्च भवितेति **धनेन** सङ्घे निमन्त्रिते स्वीकृतप्रभूतसत्त्वया तया दरान्तः क्षिप्ते करे तत्साहससन्तुष्टया शासनदेव्या स सर्पः **कनकलताऽऽख्यो** हारो निर्ममे। तत्करलग्नं तं हारं निभाल्य तुष्टेन **धन्येन** तस्यैव तुलाकारस्य[1] गृहे तं हारं विमुच्य तस्य द्रव्येण सर्वोऽपि श्रीसङ्घो वस्त्रादिसत्कारपूर्वं भोजितः। अथ द्वितीयदिने तस्य गृहे गत्वा **धनस्त**माह, भवल्लेखकं विधीयतां मम हारो दीयतां, आदीयतां च भवतो द्रव्यम्, इत्युक्तः स सुवर्णकारो हारं लातुं यावन्मञ्जूषायां करं निक्षिपति, तावत्तत्र महान्तमहिमालोक्य स पूत्कुर्वन्नष्टः, एतद्व्यतिकरं निरीक्ष्य **धनो** दध्यौ, यत्स सर्प एव पुण्यप्रभावतो हारो भूत्वा पुनरपि सर्पः समजनि, तेनाऽस्य किं दूषणमिति मत्वा स तमाह- भो सुवर्णकार ! भवद्वित्तं गतं, मम च स हारो गत इत्यावयोर्न देयाऽऽदेर्विवाद इति तेनाऽप्यङ्गीकृते **धनो** गृहे गत्वा स्वप्रियायाः सर्वमिदं निवेद्य समये स्वमर्थं विदधे ॥ **इति साहसे धनश्रीकथा ॥ १०४॥**

॥ १०५ ॥ लोभादनर्थ इत्यर्थे विप्रकथा॥

लोभादेव हि पुरुषः पुरुषार्थभ्रंशभाग्भवति। यतः—

आकरः सर्वदोषाणां, गुणग्रसनराक्षसः[2]।
कन्दो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः॥ १॥ [योगशास्त्रे ४/१८]

किं बहुना ? लोभाभिभूतः पुमान् स्वमप्यर्थं हारयेत्, यतः—

लोभो मूलमनर्थाना-मर्थानां हानिकारणम् ।
भुक्तये धावितो विप्रो, यद्गृहाऽऽज्यमहारयत् ॥ २ ॥

तथाहि— **पालिग्रामे** जन्मदुर्गतः **कृष्णा**ख्यो द्विजः स चाऽन्यदा पत्नीप्रेरितः कुठारमादाय काष्ठार्थं **कपिल**यक्षाऽऽयतनालङ्कृतं वनमगात् । तत्र चेन्धनोचितमपरं काष्ठमलभमानः स यावत्काष्ठमयीं यक्षमूर्तिं कुठारेण खण्डशः कर्तुमुद्यतस्तावत्तत्प्राच्यपुण्यात्स पुण्यजनः[3] प्रत्यक्षीभूय तमभ्यधात्- हे भद्र! मा मां विखण्डय, किञ्च यद्विलोक्यते तन्मार्गयेत्युक्ते प्रत्यहं गृहमानुषोचितं यथेष्टं मिष्टमशनं मदोकसि पूरयेति तं सोऽवदत्। तथेति प्रतिश्रुत्य तिरोहिते यक्षे गृहमागतो विप्रो गृहकोणे स्वगृहनिर्वाहोचितं वित्तं प्राप्य स परिवारनिर्वाहमकरोत्। अथ तत्प्रियातो ज्ञातैतद्वार्त्तया तत्प्रातिवेश्मिकपत्न्या प्रेरितस्तत्पतिरपि वने गत्वा यावत्तथैव करोति, तावत्कुपितोऽसौ यक्षस्तमूर्ध्वपाणिं व्यात्तवदनं स्तम्भितपदं प्रकटितनेत्रोदराऽऽदिव्यथं व्यधाय साऽऽक्षेपमवोचत्- रे पाप! मदवज्ञाफलं पश्य, यत्त्वामधुनैव यमधाम्नि नयामीति कथितेऽसौ

१.AH। तुलावर्त्तिनः D। सुवर्णकारस्य-मु. ॥ २. PBD। राक्षसां-AH। रक्षसां-मु. ॥ ३. AHPBD। यक्षः-मु. ॥

भ्रमन्नेत्रः कम्पमानवपुरवादीत्, हे देव ! यद्वदसि तत्करोमि, मुञ्च मामिति वदन्तं तं यक्षो जगौ, त्वद्गृहधृतं नित्यं **कृष्णविप्रौकसि** प्रापयेरित्यभिधाय यक्षस्तं सज्जीकृत्य ययौ। सोऽपि तथैव चकार ॥ **इति लोभादनर्थ इत्यर्थे विप्रकथा ॥ १०५ ॥**

॥ १०६ ॥ युवती नात्मीयेत्यर्थे श्रेष्ठिप्रियादामिनीकथा ॥

उत्सङ्गजुषामपि चलचक्षुषां न विश्वासः, यतः—

शास्त्रं सुनिश्चितधिया परिचिन्तनीय-माराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्कस्थिताऽपि युवतिः परिरक्षणीया, शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वम्? ॥ १ ॥

अपि च—

स्वीयाः सुलोचना एता, मतिर्मिथ्या वपुष्मताम् ।
आयुर्दानाज्जीविताऽपि, श्रेष्ठिनी यत्पतिं जहौ ॥ २ ॥

तथाहि— **हस्तिपुरे** नगरे **सुरदत्त**श्रेष्ठिनः पुत्रस्य **शोभनस्य दामिनी**नामकामिनी, रति-रतिनाथाविव तौ दम्पती मिथः प्रीतिभाजौ, एकदा **शोभनः** स्वप्रियां जगौ, हे प्रिये ! मृते मयि त्वं किं करिष्यसीत्यभिहिता साऽवदत्, हे नाथाऽवश्यमग्नौ प्रविश्य त्वामनुगमिष्यामीति प्रतिपन्नया तया पृष्टः सोऽप्येवमेवाऽवादीत्। अथैकदा दैवादहिदंशादाप्तमूर्च्छा सा मृतेवाभूत्।

अथ मित्रपित्रादिभिर्वारितोऽपि त्यक्तत्रपः स स्मशानं नीयमानया तया सह ज्वलयितुं स्मशानं यावदेति तावत्तरणिरस्तमितः, नक्तं न दार्घं इति तन्मस्तकमुत्सङ्गे निधायाऽकृतप्रदीपे स्मशानौकसि स तस्थिवान्। तदा नभसि गच्छन् सस्त्रीकः कोऽपि विद्याधरस्तत्राऽऽगतस्त-ज्जीवनाय स्त्रिया विज्ञप्तः किमेतदिति तमप्राक्षीत्। तेनाऽपि यथाजाते स्ववृत्तान्ते कथिते सोऽवदत्, हे सुभग! यदि स्वमायुरस्यै दीयते तदाहमेनां जीवयामीति तेनोक्ते तेनापि स्वाऽऽयुषो दशसु वर्षेषु दत्तेषु विद्याबलेन तामुज्जीव्य गते तस्मिन्नुत्थितायास्तस्या उत्सङ्गे शिरो निधाय तत्रैव सुप्ते शोभने तदध्वना व्रजता केनापि मन्त्रिपुत्रेण तत्राऽऽगत्य साऽभाणि- हे सुभ्रु ! मन्मन्दिरमलङ्कुरु, त्वामहमन्तःपुरप्रधानां करिष्ये इति, सा स्वोत्सङ्गस्थाने काष्ठे पतिशिरो निधाय तद्रूपमोहितायां तेन समं गतायां तस्यां स प्रातरुदस्थात्, अथ स तां गतां मत्वा गृहमागतः, पृष्टश्च पित्रादिभिः सा सुरेण जहे इत्याह, परं मनसि विषादमुद्वहन्निति दध्यौ, यत्सा स्वैरिणी मदाऽऽयुरादाय गतेति मां दुनोति। अथ सार्थवाहवेषेण सरःसरिद्वापीकूपादिषु स्त्रीवृन्दं पश्यन्निधिसारे पुरे सरसि जलक्रीडापरां तामुदीक्ष्योपलक्ष्य च तद्भर्तुर्गृहादिस्वरूपं जनादवगत्य स राज्ञे व्यज्ञपयत्। हे देव! तव मन्त्रिपुत्रेण मम प्रिया हृतास्तीति। राज्ञाप्याकार्य पृष्टा साऽभाषिष्ट, नाऽयं मम भर्ता, नाऽस्याऽहं गेहिनीति विवादे जायमाने राज्ञा पृष्टेन शोभनेन सर्वं वृत्तान्तं निवेद्योचे- हे देव!

१. AHPD । दाह-मु. ॥

यद्यसौ मम गेहिनी नाऽस्ति तदैवमस्तु, परं मत्पाणौ पानीयं निधाय मदाऽऽयुरनया दीयतामिति तेनोक्ते राज्ञाऽऽदिष्टा सा धृष्टा तथैव व्यधात्। अथ तदा काकतालीयन्यायेन नभसि व्रजन् स एव विद्याधरस्तं वृत्तान्तं निभाल्य रुष्टो विद्याबलेन व्योमस्थ एव तां निहत्य स्वस्थानं ययौ, लोकैर्निन्दिता सा द्विधाप्यधस्तादपतत्। धन्योऽसौ महात्मेति लोकैः स्तुतः **शोभनः** स्वं धाम गत्वा स्वमर्थं समर्थयामास ॥ **इति युवती नाऽऽत्मीयेत्यर्थे श्रेष्ठिप्रियादामिनीकथा** ॥१०६॥

॥ १०७ ॥ योषितो नात्मीया इत्यर्थे त्रिविक्रमभट्टप्रियाप्रेमवतीकथा॥

स्त्रीणां विश्रम्भकरणे मरणं, यतः—

अनुचितकर्मारम्भः, स्वजनविरोधो बलीयसा स्पर्धा ।
प्रमदाजनविश्वासो, मृत्युद्वाराणि चत्वारि ॥ १ ॥

अपि च—

विश्वासो नोचितः स्त्रीणां, प्रौढप्रीतिजुषामपि ।
यत्पीयूषरसं प्राप्य, भट्टं भट्टप्रियाऽत्यजत् ॥ २ ॥

तथाहि— **कोरण्टकूटपुरे मकरध्वजस्य** भूपस्य **त्रिविक्रमो** नाम भट्टः, स च भट्टो मृतायां स्वभार्यायामेकां मृतभर्तृकां रूपयौवनवतीं **प्रेमवतीनामभट्टभामिनीं** स्वौकस्यनयत्। सा च विशेषतस्तस्मिन् रागवती जाता। किं बहुना ? परिणीतयोरिव तयोर्दम्पत्योर्मिथः प्रेम काम-मवर्धिष्ट। स च भट्टः सर्वत्र भोजनमज्जनशयनादौ तस्या विश्वासं व्यधात् । एकदा भूपपर्षदि स्वप्रियायाः प्रशंसां कुर्वन् स राज्ञोचे- हे त्रिविक्रम! परिणीतानामपि स्त्रीणां विश्रम्भो नोचितः, किं पुनः परगृहादागतानामिति ? यतः—

नारीणां च नदीनां च, विश्वासो नोचितः सखे !।
मूलतः पातयन्त्येका, नरानन्याश्च पादपान् ॥ ३ ॥

तथापि— तन्मय इव स तत्प्रशंसां नाऽमुञ्चत् । एकदा मान्द्यमिषेण कियद्वासरानन्तःपुरे स्थित्वा बहिश्चाऽऽगत्य राज्ञा स भट्टोऽभाणि, हे त्रिविक्रम! साम्प्रतं मद्वपुश्चार्तमासीत्। तेनाद्य भट्टभामिन्या एकया कराङ्गुल्या गोत्रदेव्याः पूजा निर्मिता विलोक्यते।

किं चाऽस्मिन् सर्वस्मिन्नपि पुरे तवैव प्रिया कथितकारिणी वर्तते, ततस्तद्विधेहि [एकामङ्गुलिमानय ? तत् श्रुत्वा चिन्तार्तोऽसौ] अथ गृहमागतश्चिन्तार्तः स निर्बन्धेन तया पृष्टः पार्थिवोक्तमुक्तवान्। तयाऽपि सद्य एव छुरिकया छेदित्वा दत्तां कराङ्गुलिं नृपाग्रे विमुच्य स इति जगौ, हे राजन्! पश्य विनीताया मम प्रियायाः प्रणयमिति, तथापि तदश्रद्दधानो राजा योषितां चित्तेषु न स्थैर्यमित्याह। यतः—

करिकर्णेषु न स्थैर्यं, न स्थैर्यं कुशवारिषु ।
विद्युल्लतासु न स्थैर्यं, न स्थैर्यं हृत्सु योषिताम् ॥ ४ ॥

इत्याकर्ण्य सोऽवोचत्, हे देव! नैषा तादृशी, अथान्यदा स पुनरपि तथैव तं जगौ, हे त्रिविक्रम! भट्टभामिन्याः शिरसाद्य गोत्रजापूजा कृता विलोक्यते, ततस्तदाऽऽनय। तत् श्रुत्वाऽतीवचिन्तातुरमागतं तं पृष्ट्वा साप्यसिना स्वं मूर्द्धानं चिच्छेद। सोऽपि रुदन् दुकूलेन पिधाय तन्मूर्द्धानं राज्ञोऽग्रे विमुच्य तत्कालं तत्कायं श्रीखण्डखण्डैरदीदहत्।

तस्या रागेण चाऽपरकलत्रमकुर्वाणस्य तस्य प्रतिबोधाय राजैकममृतपात्रं तस्मै दत्त्वेति ब्रूते स्म, अनेनामृतेन चितास्थानं सिञ्चय यथा सा जीवति, तेनापि द्रुतमेव तथैव विहिते जीविता सा भट्टमुखादमृतमहिमानं ज्ञात्वेति ध्यातवती, यद्यहं दैववशेनाद्य जीविता, कदापि न जीविता तदा का गतिर्ममेति मत्वा सा तेनामृतेन मूलपतिचितास्थानमभिषिच्य तं च जीवयित्वा, तदमृतपात्रं चाऽऽदाय निशीथे तेन समं परदेशं ययौ। तया तथा निर्मितं ज्ञात्वा भूपो भट्टमभणत्—

तिक्कम ती नवि धीरीयें, जओ सिर कट्टी देइ ।
[1]नदीकिनारें रुक्खडां कबहि समूलां लेइ ॥ ६ ॥

इत्याकर्ण्य स भट्टोऽपि स्त्रीषु सर्वथा विरक्तो भवति स्म ॥ **इति योषितो नाऽऽत्मीया इत्यर्थे त्रिविक्रमभट्टप्रियाप्रेमवतीकथा ॥ १०७ ॥**

॥ १०८ ॥ प्रत्युत्तरप्रदानविषये श्रीहेमचन्द्रसूरिकथा ॥

वक्तारो हि गगनकुसुममिव दुर्लभाः, यतः—

शतेषु जायते शूरः, सहस्रेषु च पण्डितः ।
वक्ता शतसहस्रेषु, दाता भवति वा न वा ॥ १ ॥

तेन वक्तारं विना पार्थिवादीनां सभासु न कोऽप्यन्यः प्रतिवचो दातुमलं, यतः—

प्रत्युत्तरं कः प्रददाति सम्यग्, विहाय विद्यासदनं वदान्यान्।
सिंहो बलीत्थं कथयन् द्विजानां, श्रीहेमचन्द्रः पिदधे मुखानि ॥ २ ॥

तथाहि— **पत्तनेऽन्यदा** भूरिमहेभ्यसभायां कलिकालसर्वज्ञैः **श्रीहेमचन्द्राचार्यैर्**वाच्यमानं **श्रीस्थूलभद्र**महामुनेश्चरित्रमाकर्ण्य जैनश्रमणद्वेषिभिर्द्विजन्मभिः **सिद्धराजजयसिंहदेवो** भूपो विज्ञप्तः, हे देवाऽस्मिन्नगरे नागराणां पुरस्तादेको व्रतिक इति कथां कथयति **पाटलीपुरे शकडाल**-सचिवसूनुः **स्थूलभद्रः** परिव्रज्य पूर्वपरिचिताया वेश्याया वेश्मनि चतुर्मासीमासीनस्तत्र षड्रसा-

१. नदि किराडइ - HD। २. AHPD। समर्थम् - मु. ॥

ऽऽहारपरायणः स शीलं पालितवानिति बह्वसमञ्जसम्। राजाप्येवमेव मन्यमानो गुरूनाहूयेति जगौ— भो ! भट्टारकाः ! साम्प्रतं वणिजामग्रे किं वाच्यमानमस्ति ? **श्रीस्थूलभद्रचरित्रमिति** गुरुभिरभिहिते तत्र का कथेत्युक्ता गुरवोऽभिदधिरे—

वेश्या रागवती सदा तदनुगा षड्भी रसैर्भोजनं,
रम्यं धाम मनोहरं वपुरहो नव्यो वयःसङ्गमः ।
कालोऽयं जलदाविलस्तदपि यः कामं जिगायाऽऽदरा-
त्तं वन्दे युवतीप्रबोधकुशलं **श्रीस्थूलभद्रं** मुनिम् ॥ ३ ॥

एतदाकर्ण्य मुधामत्सरिणो भूपाभ्यर्णभाजो द्विजन्मानोऽभ्यधुः—

विश्वामित्रपरासरप्रभृतयो ये चाम्बुपत्राशिन-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
आहारं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवा-
स्तेषामिन्द्रियनिग्रहः कथमहो ! दम्भः समाऽऽलोक्यताम् ॥ ४ ॥

एतत्पैशुन्यज्ञानपटवः प्रतिवचश्चञ्चवः श्रीगुरवः प्रोचिरे, हे नरशार्दूल ! शीलपालनाऽपालने नाऽऽहाराऽनाहारौ कारणं, किन्तु मनोवृत्तिरेव । यतः—

सिंहो बली द्विरदसूकरमांसभोजी, [1]संवत्सरे रतिमुपैति किलैकवारम् ।
पारापतः खरशिलाकणमात्रभोजी, कामी भवत्यनुदिनं ननु कोऽत्र हेतुः ? ॥ ५ ॥

एतदाकर्ण्य मुषितसर्वस्वा इव मुखं श्यामं कृत्वा सर्वेऽपि तेत्रयीमुखाः जग्मुः, राज्ञा मानिताः श्रीगुरवोऽपि स्वं स्थानमलञ्चक्रुः ॥**इति प्रत्युत्तरप्रदानविषये श्रीहेमचंद्रसूरिकथा ॥१०८॥**

॥ १०९ ॥ प्रस्तावोचितवचने भूर्कण्डविप्रकथा ॥

अवसरोचितवक्ता हि पण्डितः, यतः—

प्रस्तावसदृशं वाक्यं, सद्भावसदृशीं श्रियम् ।
आत्मशक्तिसमं कोपं, यो वेत्ति स हि पण्डितः ॥ १ ॥

प्रस्तावोचितवचनादापत्स्थानेऽपि सम्पदः स्युः, यतः—

प्रस्तावोचितवाक्यं किं, भूरिणे शर्मणे न हि ।
भट्टिर्नष्टेति भणना-च्चौरेणाऽरञ्जि यन्नृपः ॥ २ ॥

तथाहि— **काश्मीरदेशमध्यवर्तिनि महानन्दिपुरे** नानाशास्त्रनिपुणः पण्डितप्रियो **भूधवो** नाम पार्थिवोऽजनिष्ट, तदभ्यर्णपुरवासी कविकलाकुशलो दुर्दैववशेन लग्नचौर्यव्यसनो **भूर्कण्ड**नामद्विजन्मा तत्र पुरे चौरिकार्थं भ्रमन्निशि कोट्टपालपुरुषैर्धृतो बद्ध्वाऽऽनीतश्च नृपाग्रे, तस्करा

१. संवत्सरेण रतिमेति - उपदेशप्रा. व्या. ३२ ॥

वध्या इति नीतिवचः स्मरन् स भूपस्तं वधायाऽदिशत्, वधभूमौ नीतश्च स नृपनरानाह भो भद्रा एकशो मां नरेन्द्रपुरतो नयत ब्राह्मणोऽसाविति तद्विज्ञप्तिमवधार्य तैर्विज्ञप्तेन भूपतिना समाहूतः स भूपसभामेत्य भूपतिमित्यवोचत्—

भट्टिर्नष्टो भार्गवश्चापि नष्टो, भिक्षुर्नष्टो भीमसेनोऽपि नष्टः ।
भूर्कण्डोऽहं भूधवस्त्वं च राजन्, भानां षड्क्तौ सम्प्रविष्टः कृतान्तः ॥ ३ ॥

चतुरचित्तचमत्कारिकाव्यमिदमाकर्ण्य तुष्टेन सकर्णेन राज्ञाऽतः परं चौर्यं न विधेयमित्यभिधाय भूरिकनकवसनादिना मानितो भूर्कण्डो निजधाम जगाम ॥ **इति प्रस्तावोचितवचने भूर्कण्डविप्रकथा ॥ १०९ ॥**

॥ ११० ॥ नीचेभ्यो देवा अपि भयं यान्ति इत्यर्थे खर्परचौर-हरसिद्धदेवीकथा ॥

नीचो हि जगतामपि त्रासकारणं, यतः—

व्याघ्रौघादिव गोगणः फणभृतां माला मयूरादिव ।
स्ववांसिप्रकरादिवाऽसुरततिः सिंहादिवेभव्रजः ।
ओतूनां निकरादिवाऽऽखुनिवहः सप्तिर्लुलायादिव ।
स्तोमादस्थिभुजामिवैणनिचयो नीचाज्जगद्भीतिभाक् ॥ १ ॥

आस्तां मनुजाः, दनुजारयोऽपि नीचतो भयभाजो भवन्ति, यतः—

नीचाद्बिभेति देवोऽपि, यत्खर्परमलिम्लुचात् ।
हरसिद्धसुरी जिह्वां, तुण्डान्तर्दरिता न्यधात् ॥ २ ॥

तथाहि— **मालवदेशे** शोभादायिन्या**मुज्जयिन्यां** पुर्यां **खर्परो** नाम महातस्करो वसति, एकदा द्यूतादिव्यसनवानसौ स्मशानाङ्गारैः पोलिका विधाय सिप्रातटस्थसिद्धवटाधस्तात् स्थित**हरसिद्ध**देवीमूर्तेः स्कन्धयोर्निहितपादो यावद्भशोर्ध्वस्थिततद्दीपतैलेन सह ताः पोलिका अत्ति, तावत्तद्भापनाय तया स्वमुखाज्जिह्वा बहिर्निष्कासिता, तथाविधां तज्जिह्वां विलोक्य हे देवि! त्वमपि किं क्षुधितासीत्यभिधाय स्वमुखादेकमुच्छिष्टं कवलं तज्जिह्वायां विमुच्य शेषं च भुक्त्वा सोऽन्यत्र ययौ। मनुष्योच्छिष्टाऽन्नदिग्धां जिह्वां कथमहं मुखान्तर्निदधामीति बहिःस्थजिह्वां **हरसिद्ध**देवीमालोक्य कोऽपि देवीकोप इति चकितैर्लोकैः कुसुमकर्पूरकुङ्कुमकाकतुण्डपूजाबलिभिराराधिताऽपि सा देवी तथैवाऽस्थात्। अहो ! देवी रुष्टा पौराणां महान्तमुपद्रवं करिष्यतीति लोकमुखात्प्रथितां वार्त्तां निशम्योपकारिणा **विक्रमादित्येन** राज्ञेति पुरान्तः पटहो वादितः, यः कश्चिद्देवीमिमां तोषयिष्यति तस्मै राजा वसुशतं ददातीति भ्रमन्तं पटहं स खर्परतस्करोऽस्राक्षीत् । अथ राजाज्ञया स देवीगृहान्तर्गत्वा कपाटं दत्त्वा देवीमिति जगौ, हे रण्डे!

१. A। भूकण्ड - HP। भूकुण्ड - मु. एवं कथायामन्यत्राऽपि ॥

जिह्वां मुखान्तर्निधेहि, न चेदनेन पाषाणेन खण्डशः करिष्यामीति तस्य दुष्टस्य वचनैर्भीता सा देवी स्वां रसनां सद्य एव मुखान्तर्न्यधात्। अहो ! अस्य मन्त्रशक्तिरिति लोकैः स्तुतस्य तस्य राज्ञा प्रतिपन्नं कनकमदायि ॥ **इति नीचेभ्यो देवा अपि भयं यान्तीत्यर्थे खर्परचौरहरसिद्ध-देवीकथा ॥ ११० ॥**

॥ १११ ॥ साहसे विक्रमादित्यभूपकथा ॥

सत्त्ववतां वैषम्येऽप्यविषमता, यतः—

मेरु तिणंव धरणी-घरं छगणगणंव छप्पयं गयणं ।
वहिलिअव्व समुद्दो, साहसवंताण पुरिसाणं ॥ १ ॥

अपि च—

सिद्धिः सत्त्ववतां पुंसां, नूनं स्यादनिवारिता ।
विक्रमः सत्त्वतः प्राप, रैनरं श्रेष्ठिगेहगम् ॥ २ ॥

तथाहि— **उज्जयिन्यां** नगर्यां महेभ्यो **वित्तदत्तनामा** श्रेष्ठी, स चैकदा पुष्याऽर्कयोगे जनितं गृहं सिद्धिदं स्यादिति ज्योतिर्विन्मुखादशृणोत्। पुष्ये विहितं कृत्यं सिद्धिमेति, यतः—

कार्यं वितारेन्दुबलेऽपि पुष्ये, दीक्षां विवाहं च विना विदध्यात्।
पुष्यः परेषां हि बलं हिनस्ति, बलं तु पुष्यस्य न हन्युरन्ये ॥ ३ ॥

इति च महियांसं पुष्यमहिमानमवगम्य नवीनैः प्रधानैः काष्ठादिभिर्वास्तुविद्याविदग्धैः सूत्रधारैः प्रभूतवित्तव्ययेन स सौधं निष्पाद्य शुभतिथि-नक्षत्र-करण-वार-लग्नयोगे महामहैस्तत्र प्रविश्य च पर्यङ्के सुप्तः पतन्नस्मीति वचनमाकर्णितवान्। सौधपतनभयाद्भीतस्तदैवोत्थाय सोऽन्यत्र सुष्वाप। द्वितीयस्मिन्नप्यहनि तथैव जाते सौधनिष्पादनोदन्तज्ञापनपुरस्सरं सर्वं रात्रिवृत्तान्तं सर्वजगदुपकाररसिकस्य साहसैकशेखरस्य **विक्रमादित्यस्य** राज्ञो विभाते स श्रेष्ठी विज्ञपयामास। सव्याजं तल्लग्नं वित्तं तस्मै दत्त्वा तद्गृहं चाऽऽत्मसात्कृत्वा रात्रौ तत्रैव सुप्तेन भूपेन तथैव शब्दमाकर्ण्य पर्यङ्कं हित्वा पतेत्युक्ते सार्वभौमाऽनुभवनीयो भूरिभाग्यलभ्यस्तेजः-पुञ्जमयः सुवर्णपुरुषो न्यपतत्। ज्ञातोदन्तेन तेन श्रेष्ठिनाऽन्यजनेन चाहो **विक्रमादित्यस्य** सत्त्वमिति स्तुतस्तं सुवर्णनरमादाय प्रभूतं कनकदानं यच्छन् महामहैः पार्थिवः स्वं धामाऽगमत्। **॥ इति साहसे विक्रमादित्यभूपकथा ॥ १११ ॥**

॥ ११२ ॥ शूरा अपि परहक्किताः कातर्यं यान्तीत्यर्थे बलसारनृपकथा ॥

स्वस्वौकसि सहस्रशः शूराः, यतः—

घरि सूरा मढि पण्डिआ, गामि गमारहगोठी ।
सभामांहि बोलावीइ, धूजी विछूटइ होठि ॥ १ ॥

तेन परैर्हक्कितानां केषाञ्चिदेव सुभटत्वं स्यात्, यतः—

ये न नश्यन्ति ते वीरा, भूरिभिर्हक्किताः परैः ॥
यद्भूपो नाऽच्छिनद्वर्म, स्त्रीहक्कारवकातरः ॥ २ ॥

तथाहि— **तिलकपुरे** पुरे **बलसारो** राजा, तत्र च **धूरणाख्यो** लोहकारस्तस्य च **करिणी** प्रिया। अथैकदा करालकरवालकुन्तकुठारादिककठोरप्रहारैरच्छेद्यकवचकलाकौशलार्थं राज्ञा प्रहितो **धूरणः** परदेशं ययौ। कालेन तत्कलामादाय गृहमागतः स बहुभिरहोभिरतिदृढं लोहमयं कवचं कृत्वा भूपाय ददौ, भूपोऽपि तत्परीक्षार्थं तं कवचं स्तम्भे निबध्य स्वयं मुक्तेनाऽसिना द्विधा व्यधात्। एवं तेन पुनःपुनर्निर्मितं कवचं राज्ञा खंडशः कृतम् ! अथ विषादमापन्नः प्रियापृष्टः स सर्वं कवचनिर्माणच्छेदनादिवृत्तान्तं न्यवेदयत्, सा प्राह— हे स्वामिन्नथैकं कवचं कुरु । किं च तदादाय व्रजता भवता सममहमपि भूपसभामेष्यामीति।

अथैकं कवचं कृत्वा तदादाय च पार्थिवपर्षदि गच्छताऽनेन समं साऽपि तत्राऽऽगत्य पतिपङ्क्तौ तस्थौ। भूपस्तदपि कवचं स्तम्भे निबध्याऽसिप्रहारं यावता मुञ्चति, तावता तया च **करिण्या** स्वकक्षान्तरालादेकं तडित्सखं खड्गमाविष्कृत्य कथमत्राऽऽगच्छसीति बाढस्वरेण हक्कितेन राज्ञा मुक्तेऽप्यसिप्रहारे तत्कवचमखण्डितमेवाऽस्थात्। अथ साऽवादीत्- हे देव ! त्वं मूर्खोऽसि, तत्कथमिति पृष्टे साऽभाषिष्ट- हे देव ! यः कश्चिदिदं कवचं परिधाय युधि समेष्यति, स स्तम्भो न भविता, किं तु स कोपाटोपलोचनो वीराऽग्रणीर्भावी, तेनाऽबलाया मम हक्कारभीरुणा भवता यदिदं न छिन्नं, तदा कथं तस्य वीराऽवतंसस्य वपुषि त्वया प्रहारोऽपि मोक्तुं शक्यः ? इति विचारमकुर्वतो भवतो मूर्खत्वमिति तन्मतितुष्टेन तेन राज्ञा सा स्वसेव वस्त्राऽऽदिना सत्कृत्य विसृष्टा पतियुता गृहं ययौ ॥ **इति शूरा अपि परहक्किताः कातर्यं यान्तीत्यर्थे बलसारनृपकथा ॥ ११२ ॥**

॥ ११३ ॥ मूर्खाणामुपदेशेनाऽनर्था इत्यर्थे केशवभट्टकथा ॥

ये मूर्खाणां पुरतः सदुपदेशं सृजन्ति त एव मूर्खाः, यतः—

तैः कर्पूरलवा सुधांशुसदृशाः क्षिप्ताः शुनामानने;
तैर्न्यस्ता वदनोदरे हुतभुजामम्भोरुहामङ्कुराः।
तैर्दुग्धं निदधे सुधाप्रियसखं तुण्डे पुनर्भोगिनां,
मूर्खाणां पुरतोऽभ्यधायि सुकृतं यैर्मूर्खमुख्यैः सखे![1] ॥ १ ॥

किञ्च मूर्खाणां पुरः पण्डिता अपि सदुपदेशेनाऽनर्थभाजः स्युः। यतः—

कलाविलासो मूर्खाणां, पुरोऽनर्थनिबन्धनम्।
भट्टः क्षीणं सृजन् ग्राम्यै, रक्ताक्ष इव डम्भितः ॥ २ ॥

१. HD। सखैः - A। श्लोकोऽयं मु. नास्ति ॥ २. AHD। कथां वदन् - मु.॥

तथाहि- **धनवासे** पुरे बहवो गोपाला वसन्ति स्म, तत्र च बहुधनधान्यादिसमृद्धस्य **सुरणस्य** गोपस्याऽतिमूर्खा **सुरमा**नामजननी, एकदा वर्षाकाले **सुरमायाः** पुरः प्रभूतशास्त्रवेत्ता **केशवो** नाम भट्टः प्रभातादारभ्य प्रथमं यामं यावद्बाढस्वरेण भागवतं वाचयति स्म, परं सा जडा किमपि न वेत्ति, न च तुष्यति, न च किमपि तस्य प्रयच्छति, किञ्चैकदा सा स्वसुतस्येति वक्ति, हे सुत! यदस्य भट्टस्य कोऽपि महान् रोगो जातोऽस्ति, येनाऽयं प्रभातादारभ्याऽऽद्यप्रहरं यावद् बाढस्वरेण पूत्करोतीति तदुक्तमाकर्ण्य स दध्यौ, ममाऽपि पुरैको महिष एवमेव प्रकुर्वन्नभूत्, डम्भितश्च स समाधिमानासीत्, तेनाऽस्यापि सैव प्रतिक्रिया घटते, इति स्वपुरुषैस्तं पादादिषु ग्राहयित्वा तेन दशमद्वाराद्यवयवेषु महिष इव डम्भितः, मुक्तोऽथ भट्टो दध्यौ, हा मया लब्धमद्य देहदाहलक्षणं मूर्खाणामुपदेशजं फलमिति स्वं धाम सोऽगात् ॥ **इति मूर्खाणामुपदेशेनाऽनर्था इत्यर्थे केशवभट्टकथा ॥ ११३ ॥**

॥ ११४ ॥ मूर्खाणां हितकार्यकथनेप्यनर्था इत्यर्थे सूरनाथयोगिकथा॥

निरक्षराणां हि कृत्यकरणे कार्यकर्तुरेवाऽनर्थाः, यतः—

जो कुणइ हिअं कज्जं, मणुआणं अइ अयाणमाणाणं।
सो अ अणत्थं पावइ, दिट्ठंतो इत्थ फलिअतरू ॥ १ ॥

अपि च—

बालिशानां पुरो वाच्यं, न हितं हितमिच्छुभिः ।
हितवाक्कथनाद्योगी, सरोऽन्तर्निदधे जनैः ॥ २ ॥

तथाहि- **पूरणे** ग्रामे लोकाः क्षारेणोदकेन काममुद्वेजिताः, यतः—

माठउ धोरी ठोठ गुरू, कुइ ते खारुं नीर।
गामि कुठाकुर घरि कुघरणी, पंचइ दहइ शरीर ॥ ३ ॥

इति हेतोस्तद्वासिभिः संभूय भूरिवित्तव्ययेन कारितेऽपि मनोहरे सरोवरे मरुभूमाविव तत्र नीरं नाऽतिष्ठत्। भृशमुद्विजाना नागरा अपि बलिनैवेद्यविधानपुरस्सरं सरोदेवीमर्चयन्ति स्म, तथापि गुह्यमिवाऽसज्जनमनसि तत्र सरसि वारि नाऽस्थात्। अथैकदा मन्त्रतन्त्रयन्त्रभूताराधकादीन् बहून् विशारदान् पृच्छद्भिः पौरैरेकत्र महान्तमेकं **सूरनाथ**नामानं योगिनं विलोक्य पृष्टं तस्मिँस्तटाके नीरानवस्थानरूपं स्वमशर्म। द्वात्रिंशल्लक्षणधरो नरो जीवन्नत्र सरोन्तर्निधीयते तदात्र पानीयं तिष्ठेदिति निशम्य द्वात्रिंशल्लक्षणधरोऽयमेवास्ति, किञ्च निःस्वामिकश्च इति मत्वा भूयोभिस्तैः सम्भूय स एव योगी जीवंस्तत्र सरोन्तर्निदधे, लब्धं च तेन योगिना मूर्खाणां हितकृत्यकथनजं निजमरणलक्षणं फलमिति । एवं स योगी मृत्वा नरके ययौ। ॥ **इति मूर्खाणां हितकार्यकथनेऽप्यनर्था इत्यर्थे सूरनाथयोगिकथा ॥ ११४ ॥**

१. भूयो AHPD ।

॥ ११५॥ सतां मनसि पातकं खाट्करोतीत्यर्थे दामोदरविप्रकथा ॥

अज्ञातादपि विहितं दुरितं सतां मनो दुनोति, नाऽसतां ज्ञात्वाऽपि कृतं दुष्कृतं, यतः—

पावं कम्मं विहिअं, हिअए सल्लूव्व होइ धण्णाणं।
तं चिअ पुण अण्णेसिं, पिअं अमयं व तुट्ठीकरं ॥ १ ॥

तथा च—

पापं शल्यमिव स्वान्ते, सतां तन्नाऽसतां पुनः।
निदर्शनमिह स्पष्टं, वाणिजे ग्रामरक्षके ॥ २ ॥

तथाहि— **वटपद्रे** नगरे **पुण्यरङ्गस्य** राज्ञो मित्रेणाऽऽभीरेणैका कामधेनुपुत्रीव रम्या वत्सिका प्राभृतीकृता, राज्ञाऽपि शारदशशिधवला सा सुतेव दुग्धादिना प्रतिपाल्य यः कोऽप्येनां दण्डादिना हनिष्यति स राज्ञा दण्ड्य इति सकलेऽपि पुरे घोषणां कृत्वा पुरे स्वैरं भ्रमन्ती मुमुचे। एकदा **गङ्गादासस्य** वणिजो हट्टे कणभक्षणपरा सा सहसात्कारेण तेन वणिजा दण्डेन मर्मणि हता मृतिमाप। अथ राज्ञा पृष्टेनाऽनेन यथास्थितमुक्ते कोऽस्य दोष इति राज्ञा विसृष्टः स सत्यवादी तां गोहत्यां पुनः पुनः स्मरन् गृहे गत्वा यावत्स्वपिति तावत् तद्गोहत्यापातकं तज्जठरान्तर्हम्भारवं[1] करोति, एवं च यदा स स्वपिति, तदा तथैव हम्भारवे जायमाने गतनिद्रः स तद्गोहत्यापापं दातुं **देवकपत्तने प्रभासतीर्थ**वासिनो **दामोदरस्य** विप्रस्य सुवर्णसहस्रं दत्त्वा तत्करे जलक्षेपपूर्वं तत्पापं ददौ।

गते च तस्मिन्नथ तथैवोदरे हम्भारवे जायमाने दामोदरोऽप्यधिकं तत्सुवर्णसहस्रं दण्डे वितीर्य राज्ञाऽधोमुखं बद्धं **कन्थरा**ऽऽख्यं ग्रामाऽऽरक्षकमङ्गीकृततत्पातकं तद्बन्धनादमूमुचत्। अथ दिनस्याऽल्पत्वेन स विप्रः **कन्थरस्य** गृहे गत्वा तत्खट्वानिकटे सुप्तः, परं निद्रामकुर्वाणं तं कन्थरः प्राह, हे विप्र! कथं त्वं निद्रां न करोषीति पृष्टे सोऽवादीत्, यथा ममोदरान्तरिदं वणिजो गोहत्यापातकं पूत्करोति तथाऽस्य[2] विप्रस्य उदरे करिष्यति न वेति ज्ञातुं मया गतनिद्रेण स्थीयतेऽधुनेति कथिते सोऽवदत्, हे विप्र ! तवोदरे हत्यापातकमन्यन्नास्ति, तेनैकाकिनी सा गोहत्या ग्रामपशुवत् खाट्कृतिं चकार। अथ ममोदरे तु ता भूयस्यस्तेन ताभिः सङ्गतैषा स्वजातिमिलिता ग्रामगौरिव मौनमाधाय स्थितवतीत्याकर्ण्य निःशूकानां मनसि हत्यादिभीतिर्न स्यादिति निश्चित्य स विप्रो गृहं गतः ॥ **इति सतां मनसि पातकं खाट्करोतीत्यर्थे दामोदरविप्रकथा ॥ ११५ ॥**

१. तज्जठरान्तरे हंभारवं – D ॥ २. PD। तथा तवाऽपि करिष्यति – मु.॥

॥ ११६ ॥ अतिलोभे सिद्धिकथा ॥

लोभादेवानर्थः, यतः—

सत्यं चेत्तपसास्ति किं ? शुचि मनो यद्यस्ति तीर्थेन किं ?,
सद्विद्या यदि किं धनैः ? सुमहिमा यद्यस्ति किं भूषणैः ? ।
लोभश्चेदगुणेन किं ? पिशुनता यद्यस्ति किं पातकैः ?,
सौजन्यं यदि किं ? निजैरपयशो यद्यस्ति किं मृत्युना ? ॥ १ ॥

तत्राऽप्यतिलोभादशर्मैव, यतः—

लोभाभिभूतभूतानां, स्यादनर्थपरम्परा ।
अधिकाधिकमिच्छन्ती, सिद्धिरन्धाभवद्यथा ॥ २ ॥

तथाहि— **श्रावस्त्यां** नगर्यां **बुद्धिसिद्धिसंज्ञे** वृद्धे द्वे नार्यौ मिथः प्रीतिमत्यौ दौःस्थ्यदुःखिते सख्यावास्ताम्। तत्र च कामघट इव लोकानां कामितपूरको **भोलाको** नाम यक्षः। एकदा चैत्यप्रमार्जनलिम्पनधवलनमण्डनचित्रणबलिकुसुमपत्रफलादिभूरिभक्तितोषितः तुष्टः स यक्षो बुद्धिमाह— हे बुद्धे ! याचस्व स्वं समीहितमित्युक्तया तया याचितमेकं सुवर्णं प्रतिदिनं स यक्षस्तस्यै ददौ । तेन च क्रमेण तद्गृहे धनधान्यादिसामग्रीं भूयसीं विलोक्य **सिद्ध्या** पृष्टया **बुद्ध्या** सर्वं यथाजातमुक्तम्।

अथ **सिद्धिरपि** तं यक्षं तथैवाराऽऽध्य बुद्धितो द्विगुणमयाचिष्ट। तत्स्वरूपं ज्ञात्वा बुद्ध्याऽपि त्रिगुणे मार्गिते सिद्धिश्चतुर्गुणमयाचत। एवं परस्परं स्पर्धया दशगुणं यावत्ताभ्यां याचितं यक्षेणाऽपि च दत्तम् । अथैकदा परद्रोहबुद्धिधुरीणा बुद्धिरेकां मम दृष्टिमन्धयेति याचितो यक्षस्तथैवाकरोत् । अथ बुद्ध्याराधितेन यक्षेण किमपि तस्याः प्रभूतमर्पितमित्याकर्ण्य लोभाभिभूता सिद्धिर्बुद्धितो मम द्विगुणं देहीती याचितो यक्षस्तस्या द्वे अपि दृशौ द्रागान्धयत्। एवं प्राप च साऽतिलोभफलमन्धत्वम् ॥ **इत्यतिलोभे सिद्धिकथा** ॥ ११६ ॥

॥ ११७ ॥ वित्तनाशे निजा अप्यस्नेहा इत्यर्थे कुसुमश्रीश्रेष्ठिनीकथा ॥

रूपादिगुणगणः श्रीरेव, यतः—

रूपं विस्मितविश्वविश्वहृदयं विद्या विनोदाऽऽस्पदं ।
सौभाग्यं सकलं बलं रिपुवधूवैधव्यदीक्षागुरुः ।
जातिः संस्तवनीयकीर्तिरनिशं वंशः प्रशंसागृहं ।
सर्वस्वान्तनियन्त्रणैकविदुरा श्रीरेव सङ्गीयते ॥ १ ॥

तेन सम्पत्तौ सत्यां सम्बन्धिनामपि प्रीतिः, यतः—

सम्बन्धिनोऽपि प्रणयं सृजन्ति, सत्यां सुतायामुदधेर्निजेषु।
अधौतमेवामुचदङ्गनापि, पादं प्रियस्य श्रुतवित्तनाशा ॥ २ ॥

तथाहि— **बलभद्रावासे** नगरे **कुसुमश्रेष्ठी**, तस्य च **कुसुमश्री**र्गेहिनी। एकदा स श्रेष्ठी बहुवित्तयुतः परदेशं गतः, परमलाभकर्मोदयवशान्मूलवित्तमपि विनाश्य बहुभिरहोभिर्गृहमागतः। अथ किमपि वस्त्राऽऽभरणादि मदर्थं प्रियेणाऽऽनीतं भावीति मुदितचित्ता तत्प्रियापि बहुदिनैरागतस्य स्वप्रियस्य स्नानादिना विशेषतः प्रतिचर्यां कृत्वा यावत्स्वयमीषदुष्णेन वारिणा चरणधावनं विधत्ते तावत्तस्य **चन्द्रदत्ताख्येन** मित्रेणाऽऽगत्य स्वागतप्रश्नपूर्वं व्यवसायलाभादिकोदन्तं पृष्टः सोऽभाषिष्ट, हे मित्र[2] ! तत्र देशान्तरे रजतमहारजतमुक्ताफलमणिमाणिक्यादिवस्तुव्यापारान्मम वित्तहानिरेवाऽजनि, न तु लाभलेशोऽपि, तेन मूलधनविनाशात्तत्र विलम्बितोऽप्यहमभाग्यतो रिक्त एव समागामिति पतिकथितमाकर्ण्य, हा मदर्थं मत्प्रेयसा किमपि नाऽऽनीतमिति विनष्टचित्तया तया चैकश्चरणस्तु चारुतया क्षालितः।

द्वितीयस्मिंस्तु चरणेऽधौते एव मुक्ते स दध्यौ, धिग्धनं, येन विना परिणीताः कुलीना अपि प्रेयस्यः प्रेयस्यपि स्नेहमुज्झन्तीति स्त्रीषु विरक्तचित्तो मित्रमुद्दिश्यैकं दोधकं स्वकृतमपाठीत्।

क्युरे वेश्या बप्पडी, जूठउ कंकण ठाय ।
द्रव्यविना कुलवंतीए, हेठउ मेल्यउ पाय ॥ १ ॥

इति गृहस्थाऽऽवासाद्विरक्तः स संयमं जग्राह॥ **इति वित्तनाशे निजा अप्यस्नेहा इत्यर्थे कुसुमश्रीश्रेष्ठिनीकथा ॥ ११७ ॥**

॥ ११८ ॥ विलम्बेऽवश्यं कल्याणमित्यर्थे दम्भमन्त्रिकथा ॥

अशुभे कर्मणि पुंसां विलम्बो वरीयान्, यतः—

क्षणेन लभ्यते यामो, यामेन लभ्यते दिनम् ।
दिनेन लभ्यते कालः, कालः कालो भविष्यति ॥ १ ॥

अपि च—

स्थैर्यं क्वाऽपि भवेत्पुंसां, प्रायः पूरितवाञ्छितम्।
तेनाऽभून्मन्त्रिणः पुत्री, पुत्रस्तीर्थप्रभावतः ॥ २ ॥

तथाहि— **धनवत्यां** पुर्यामशोकचन्द्रो राजा, तस्य च **अशोकश्री**राज्ञी, **दम्भो** मन्त्री, *दम्भवती च मन्त्रिपत्नी, राजप्रिया मन्त्रिप्रिया* च ते द्वे अपि मिथः सख्यावापन्नसत्त्वे, एकदैकान्ते ते आवयोर्यदि पुत्रपुत्र्यौ भविष्यतस्तदा तयोरेव विवाहं कारयिष्यावः, यथावयो-

१. लाभादि किं वदन्ति (न्ती P)। उदन्तो पृष्टः - AHP। २. मित्रामुत्र - PD।

र्मिथः सम्बन्धेन प्रीतिरविनश्वरी स्यादिति निर्णयं विधाय स्वस्वभर्तुः कथयतः स्म । मुदिताभ्यां ताभ्यामप्येतस्मिन्ननुमतेऽन्यदा शुभे दिने राजपत्नी पुत्रीमसूत, महामहैः कृतं च राज्ञा **कमलमालेति** तन्नाम। एतदाकर्ण्य सार्थकनामा मन्त्रिपत्नी रहसि विश्वस्तेन परिजनेन वृता पुत्रीं सूत्वा पुत्रो जात इति च बहिर्वार्तामकथयत्। राजसभाऽऽसीनेन मन्त्रिणा दासीमुखात्पुत्रजन्म निशम्य वस्त्राऽऽ-भरणादिना दासी सन्मानिता, जामातुर्जन्माकर्णनान्मुदितेन राज्ञापि सा दासी बहु सत्कृता।

अथ गृहमागतो मन्त्री प्रियायास्तद्विरुद्धं चेष्टितमवगत्य तामूचे— हे 'पापिनि ! धिक् त्वां, कोऽयं भृशदुस्तरः कपटविस्तरः'? 'स्थैर्यं भज ! कातर्यं त्यज ! कुरु विलम्बं ! नोत्सुको भव ! सर्वं भव्यं भावी' इति धृष्टया तयोक्तः सोऽपि विशेषतः पुत्रजन्मोत्सवं विधाय **कमलकेलि**रिति तस्य नाम निर्ममे, एकदा च मन्त्रिणा राज्ञे कथितं, हे स्वामिन्नद्य निशि मद्गोत्रदेव्येति प्रोक्तं, यद् द्वादशाब्दीं यावत्कस्यापि त्वया स्वपुत्रो न दर्शनीयः, अन्यथा चेत्तदाहमेनमवश्यं लास्यामि, हे देव ! तेन देवपादानां जामातुर्दर्शनेऽन्तरायः सम्पन्नः, यत्नेन मे जामाता गृहान्ते रक्षणीय इति राज्ञोक्तो मन्त्री स्वमतिविरचितं पत्न्यै निवेद्य रहस्येव तस्याः पुरुषकलाऽभ्यासमकारयत्।

अथ तस्यै स्वविलसितं निवेद्य जातद्वादशाब्दीं तां कारितपुंवेषां स राज्ञोऽग्रे निनाय, राजापि प्रथमे जामातुर्दर्शने तस्मै गजतुरगादि बहु दत्ते स्म। राज्ञ्यपि जामातरं तथैव सत्कारयामास। अथैकदा तया-त्वय्यारूढायां यत्रायं हयो याति, त्वयाऽपि तत्रैव गन्तव्यं न पुनरिहागन्तव्यमिति शिक्षितयाऽऽसन्ने विवाहवासरे पित्रा विपरीतशिक्षिते हयेऽध्यारोपितया पुरुषवेषधारिण्या तया कशाहतः स हयो वनं प्रत्यचालीत्, हा जामातरं लात्वा पापोऽयं हयः क्वापि गत इति राजा राज्ञी च भृशं सशोकौ जातौ। सुतारूपाऽस्मद्गृहादलक्ष्मीर्गता, अथ यदि सा समेष्यति तदा राज्ञः पुरस्तादित्यभिधास्यावो यत्केनाऽपि पापिना देवेन छलितोऽस्मत्पुत्रः पुत्री बभूवेति बाढं मुदितौ मन्त्री मन्त्रिप्रिया च । अथ महारण्यं गतैषैकस्मिँस्तीर्थे महाह्रदे पतिता वानर्यो वानरा जाता इति तीर्थमहिमानमालोक्य, साऽपि वस्त्रसहितैव तत्र पतिता पुमानासीत्; तमेव हयमारुह्य च गृहमागता, हा पापिनि ! त्वया कथं मुखं दर्शितं? याहि यमधामेति पित्रोपालब्धा सा पितुः स्वं रूपमदीदृशत्, जगाद च तीर्थप्रभावम्। जामातरमागतमाकर्ण्य राजापि सहर्षोऽजनि। विलम्बेन श्रेयःसङ्गतिरिति मन्त्रिणा च स्वीकृतम्। राजसुतां परिणीय मन्त्रिपुत्रोऽपि विषयान् सिषेवे॥ **इति विलम्बेऽवश्यं कल्याणमित्यर्थे दम्भमन्त्रिकथा ॥ ११८ ॥**

॥ ११९ ॥ दुष्टैर्दृष्टो गुणोऽप्यनर्थ-हेतुरित्यर्थे-द्विजसुता रूपसेनाकथा ॥

गुणादेव हि क्वाऽप्यनर्थः, यतः—

मांसं मृगाणां दशना गजानां, मृगद्विषां चर्म फलं तरूणाम्।
अर्थो नराणां वपुरङ्गनानां, गुणाऽधिका वैरकरा भवन्ति ॥ १ ॥

तत्रापि दुष्टैर्दृष्टो गुणो विशेषतोऽनर्थाय, यतः—

दुष्टैर्दृष्टो गुणोऽपि स्यात्, प्रायोऽनर्थनिबन्धनम् ।
साऽनर्थाऽजनि रूपेण, रूपसेना द्विजाऽङ्गजा ॥ २ ॥

तथाहि— **धनारामे** ग्रामे **लीलाधर**द्विजस्य **रूपसेना** सुता, अन्यदा यौवनशालिनीं तां विलोक्य **देवदत्ता**ऽऽख्य एको द्यूतकृत् स्मरातुरो भक्तितुष्टेनैकेन योगिना दत्तेन मन्त्रेण मोहितां तां लात्वा निशि पुराद्बहिरगात्। अग्रतः सः, पृष्ठतश्च सा एवं गच्छतोस्तयोर्निशि वनाऽहिना दष्टः स द्यूतकृत्परासुरासीत्। मृतं तं विमुच्य दिग्मूढा सा तत्रैवेतस्ततो यूथभ्रष्टा मृगीव भ्रमन्ती मृगयार्थमागतेन **रूपसेनेन** राजसूनुना दृष्टा, का त्वमसीति पृष्टा च मातुलगृहान्मात्रा सार्धं पितुर्गृहं व्रजन्ती सार्थभ्रष्टाऽहमिहैव भ्रमन्त्यस्मि ।

वक्त्रं चन्द्रविलासि पङ्कजपरिहासक्षमे लोचने ।
वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानां चयः ।
वक्षोजाविभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली ।
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम् ॥ ३ ॥

इति स्वाभाविकस्त्रीसप्तमण्डनमण्डितं तदङ्गमालोक्य, लक्षणैश्चानूढेयमिति निश्चित्य च मम पट्टराज्ञीयं भाविनीति मत्वा, निःस्वामिकं रत्नं राज्ञामिति च ध्यात्वा स तां पुरे निनाय। अन्तःपुराऽन्तः समेतां तां विलोक्य यदीयं राज्ञी भविता तदास्माकं भर्तुरपमान एवेति मत्वाऽन्याभिः कुमारस्त्रीभिः कुतोऽप्यानीय तस्यास्तूलिकाऽन्तर्मुक्तः सर्पो निशि सुप्तां तामदशत्। विषमूर्च्छितां तां मृतां मत्वा निम्बपत्रैः समं मञ्जूषाऽन्तर्निधाय राजसुतः सायं सरित्प्रवाहे मुमोच। तरन्ती सा मञ्जूषा प्रभाते **सिन्धुग्राम**परिसरे देहचिन्तार्थमागतेन **चन्द्रभागेन** श्रेष्ठिसूनुना विलोकिता कर्षिता च बहिः, तदन्तःस्थां कन्यामहिदष्टां मत्वा स्वाऽङ्गुलीयमणिजलसेचनेन सञ्जीव्य च परिणयनवाञ्छया स तां निजौकसि नयति स्म। तत्रापि राजसुतस्त्रीवत् तत्स्त्रीभिरपि तथैव विचिन्त्य विनोदेन कूपतटे नीत्वा हे शुभे! कूपं पश्येति दम्भेन सा कूपे क्षिप्ता, कूपवेदिकायां च पतिता सा जलार्थमागतया **कामसेना**वेश्याया दास्या बहिष्कर्षिता, समर्पिता च स्वस्वामिन्यै, मदोकसि निधानमिदमागतमिति मुदितया तया सा स्वपदे न्यधायि,

१. AHD। राजसुतेन सा दृष्टा, तयापि राजसुतो दृष्टः, मिथो रागः सञ्जातः, तद्व्यतिकरो ज्ञातः श्रेष्ठिसुतेन, ततस्तेन क्रीडामिषेण सा वने नीत्वा कूपविलोकनदम्भेन सा कूपे क्षिप्ता – मु. ॥

सर्ववेश्यास्वामिनी च चक्रे, सापि तत्र तत्कुलोचितं कर्म चक्रे, अथैकदा भुवि भ्रमन् स तत्पिता तं ग्राममागतः, सायं च तद् गृहमागत्य निशि तया सह विषयसुखमन्वभूत्। तद्रूपविनयौचित्य-प्रतिपत्तितोषेण कथितादप्यधिकदानाच्चमत्कृतचित्तया तया तद्ग्रामादि पृष्टः स सर्वं स्वं स्वरूपं यथास्थितमवदत्। कश्च भवतां परिवार इति पुनरपि चकितया तया पृष्टः स स्वसुताया नाम-नाशादि स्वं दुःखमपि पतद्बाष्पबिन्दुरवादीत् ।

अथ हा मया पापया महापापहेतुः पितुः संयोगो व्यधायीति मुहुर्मुहुरात्मानं निन्दन्ती बाष्पाविललोचना सा यथाजातं स्वं सर्वं व्यतिकरं तस्मै व्याकरोत्। अथ तौ द्वावपि पृथक् पृथक् वेश्यावेश्मतो निर्गतौ प्रव्रज्याऽलोचितस्वस्वदुष्कर्मविपाकौ सद्गतिभाजौ बभूवतुः ॥ **इति दुष्टैर्दृष्टो गुणोऽप्यनर्थहेतुरित्यर्थे द्विजसुतारूपसेनाकथा ॥ ११९ ॥**

॥ १२० ॥ स्त्रीणां रहस्यकथनेऽनर्थ इत्यर्थे विशालविप्रकथा ॥

हितैषिणा हि स्त्रीभिः सह सर्वथा मृषैव भाषा भाषणीया। यतः—

सत्यं मित्रैर्मृषा स्त्रीभिरलीकमधुरं द्विषा।
अनुकूलश्च सत्यश्च वक्तव्यं स्वामिना समम् ॥ १ ॥

तेन स्त्रीणां पुरः कथितं रहस्यमनर्थमेव सूते, यतः—

न गुह्यमुत्तानमनःस्थितीनां, निवेदनीयं पुरतो वधूनाम्।
विप्रः प्रियाऽग्रे कथयन्नवाप, यच्चिर्भटीबीजकथामनर्थम् ॥ २ ॥

तथाहि— **सङ्गरे** नगरे **विशालस्य** विप्रस्य **धरणी** गृहीणी, स चैकदा परदेशे गत्वा धनं धनमुपार्ज्य च स्वपुरमागच्छन् पथि **कुसुमपुरे सुन्दर**श्रेष्ठिपार्श्वात्सुवर्णसहस्रव्ययेन चतस्रो बुद्धीर्जग्राह। तास्वेका पथ्येकाकिना न गन्तव्यं, द्वितीया नद्यादिघट्टे दन्तधावनादि न विधेयं, तृतीया विरुद्धमपि कृत्यं महाजनोक्तं कर्तव्यं, चतुर्थी च परदेशादागतेन बुभुक्षितेन पुरे न प्रवेष्टव्यमिति बुद्धिचतुष्टयदाने बहुवित्तप्राप्त्या तुष्टेन तेन श्रेष्ठिना स्त्रीणां रहस्यं नाऽभिधेयमिति पञ्चम्यपि बुद्धिर्दत्ता।

अथाऽऽदत्तबुद्धिचतुष्टयः स विप्रोऽप्यन्यसार्थाऽप्राप्तौ वागुरिकान्मूल्येनैकं जाहकमादाय वर्त्मनि चलन् विश्रामाऽर्थं वटस्याऽधः सुप्तः, उत्थितश्च जाहकेन मारितमहिमवलोक्याऽहो! तस्य धीः! सर्पमरणाज्जीवता मया तस्य दत्तं सर्वं सुवर्णं लब्धमिति प्रमनाः स सरिद्घट्टे जलं पीत्वा पुरश्चलितः, तत्र विस्मृतं स्वधनं प्रत्यागतः प्राप, विशेषान्मुदं चाऽऽप। अग्रतश्चल-न्नेकस्मिन् पुरे विश्रान्तः, तत्रैकमन्यमध्वन्यमहिदंशान्निशि मृतं महाजनवचनाद्बहिः क्षिपंस्तद्ग्रन्थौ रत्नपञ्चकं स प्राप। पुनरपि पुरो गच्छतः स्वपुरपरिसरे भोक्तुं स्थितस्य तस्य पूर्वसुहृदेको योगी

मिलितः, भोजनेन भृशं तेन तोषितः स योगी तत्कालमुप्तानि प्ररोहन्ति फलन्ति च यानि चिर्भटीबीजानि तान्यस्मै ददौ। तान्यादाय पुरं प्रविशन् मातुर्मरणमाकर्ण्याऽहो तस्य धीः! सर्वं सुन्दरमभूदिति ध्यायन् मातुः शोकेन रुदंश्च गृहमागतः ।

तन्मतिकरणतः शुभं फलं लब्धमथ तदकरणे किं स्यादिति तेन निशि स्वस्त्री-पुरश्चिर्भटीबीजप्रभावोऽभिहितः, अथ तत्स्वैरिणीस्त्रीतो ज्ञातचिर्भटीबीजस्वरूपो ग्रामाऽधिपस्ता-मादातुमनास्तेन विप्रेणेति पणं चक्रे, यदीमानि बीजानि प्ररोहन्ति, तदाऽहं तुभ्यं यथेच्छं वाञ्छितं दास्ये, न चेत्तदा द्वाभ्यां कराभ्यां त्वद्गृहस्थं वस्तु यत्किञ्चिदादावेवादास्ये तन्मदीयमेव, इत्यभिधाय तत्प्रेरितया विप्रपत्न्या तानि बीजानि भ्रष्टानि, अथ चैकदोप्तानि तानि यदा न प्ररूढानि, तदाऽद्यतः सप्तमेऽहनि मदोकसि समागत्य यथेच्छं वस्तु त्वया ग्राह्यमित्यवधिं विधाय दिग्मूढः स **सुन्दरश्रेष्ठिपार्श्वे** गतः, कथितवांश्च सर्वं तद्व्यतिकरं, धिया ज्ञाततत्पत्नीचरित्रः **सुन्दरो**ऽपि तन्मन्दिरमागत्य मणिमौक्तिकादि सर्वं धनं पृथक्पृथक् बहिर्विमुच्य तत्पत्नीं चोपरितनभूमिस्थां विधाय ग्रामाऽधीशमाकार्य यथेच्छं गृहाणेति कथितवान्। सोऽपि तामुपरिस्थां विलोक्य तामुत्तारयितुं द्वाभ्यां पाणिभ्यां निःश्रेणिं जग्राह। दर्शिते च **सुन्दरेण** पणपत्रे स श्याममुखो गृहमगात्। तस्याश्चरित्रं च तत्पुरो निवेद्य **सुन्दरः** स्वमन्दिरं गतः ॥ **इति स्त्रीणां रहस्यकथनेऽनर्थ इत्यर्थे विशालविप्रकथा ॥ १२० ॥**

॥ १२१ ॥ आत्मवर्गपरित्यागेऽनर्था इत्यर्थे घोराकारशृगालकथा ॥

आत्मपरिवारपरिहारे हि क्लेश एव, यतः—

निअजणथी बाहिर पड्यउ, कउण न पामे दुक्ख।
संख समुद्दह वीछड्यउ, घरि घरि मांगइ भीख ॥ १ ॥

अपि च—

आत्मवर्गं परित्यज्य, परवर्गेषु ये रताः। ते नरा निधनं यान्ति, यथा राजा कुकर्दमः ॥ २ ॥

तथाहि— **घोरारण्य**वासी **घोराकारो** नाम शृगालः, स चैकदा मांसार्थी **कीरपुर**परिसरे सायं भ्रमन्नेकस्मिन्महति निलीकुण्डे पतितः, कज्जलैर्घटित इव सर्वाऽवयवेषु श्यामतमः समजनि।

प्रभाते वनं गतस्तादृशः स कस्त्वमिति श्वापदैः पृष्टोऽभाषिष्ट, भोः! श्वापदाः सुराणां शक्र इव, नक्षत्राणां चन्द्र इव, ग्रहाणां रविरिव, सर्वेषां भवतामहं स्वामीति तेनोक्तेऽभिनवघोराकारं *तं विलोक्य शरभसिंहसिन्धुरशार्दूलसारङ्गादयः* सर्वेऽपि वनजीवास्तं विधिवत् सिषेविरे। असौ नीच इति शृगालौघमात्मवर्गं दूरतो हित्वाऽमीभिः श्वापदैरेव परिवृतोऽन्यदा दूरादपि निशि शृगालेषु रटत्सु जातिस्वभावात्स्थातुमशक्तः स बाढमरटत्, तस्य रटितं चाऽऽकर्ण्याहो पापिनानेन

श्वापदाऽधमेन शृगालेन वयं विगोपिता वञ्चिताश्चेति क्रुद्धैस्तैः स हतः, प्राप चाऽऽत्मवर्गपरित्यागजं मरणरूपं फलम् ॥ **इत्यात्मवर्गपरित्यागेऽनर्था इत्यर्थे घोराकारशृगालकथा ॥ १२१ ॥**

॥ १२२ ॥ सर्वसंग्रहेऽपि संपत्तिरित्यर्थे सुरदत्तश्रेष्ठिकथा ॥

कालेऽनुचितस्यापि वस्तुनः संग्रहात्फललब्धिः, यतः—

कृतो हि सङ्ग्रहो लोके, काले स्यात्फलदायकः।
मृतसर्पसङ्ग्रहेण, लेभे हारं वणिक् पुरा ॥ १ ॥

तथाहि— **वर्धनपुरे सुरदत्तः** श्रेष्ठी, यद्वस्तु येनाऽऽनीयते तद्वस्तु भरत्ययमिति तस्य प्रसिद्धिः सर्वत्र प्रथिता। एकदा तत्परीक्षार्थमेकेन धूर्त्तेन मृतः सर्पस्तद्भटे समानीतः, तेनाऽपि यथोचितेन मूल्येनाऽऽदाय निद्रोपरि मोचितः, तदैव स्नातुं स्थिताया भूपप्रियायाः **कनकावलि**हारं भुजगधिया गृहीत्वा नभसि भ्रमन्त्याः शकुनिकाया मुखात्स हारस्तन्निद्रोपरि पतितः, सा शकुनिकाऽपि हारस्थाने तं मृतमहिमादाय नभस्युड्डीता। प्रातरुत्थितः स श्रेष्ठी मृतसर्पस्थाने तं महामूल्यं हारं प्राप्य श्रीमानासीत् ॥ **इति सर्वसङ्ग्रहेऽपि सम्पत्तिरित्यर्थे सुरदत्तश्रेष्ठिकथा ॥ १२२ ॥**

॥ १२३ ॥ धने सत्येव स्वजनानां प्रेमेत्यर्थे चन्दनश्रीकथा ॥

[1]श्रियो दृशि सर्वं सुखायते, यतः—

तावत्पञ्चमकाकलिं कलयितुं कण्ठः समुत्कण्ठते।
तावद्वाक्यरसायनं सुखयति श्रोत्रे कवीनां लुठत्।
तावन्मुग्धमृगीदृशीस्मितरसश्चेतः समाकर्षते।
लक्ष्मीर्यावदवेक्षते क्षणमपि प्रेमोर्मिणा चक्षुषा ॥ १ ॥

तेन सम्बन्धिनोऽपि सम्पत्तावेव निजं गौरवाऽऽस्पदं सृजन्ति, यतः—

अस्तु धिग् विभवमुज्झति यद्वशः, सौहृदं प्रणयवानपि सत्वरम्।
यत्स्वसारमपि बन्धुरमानय-न्नाधनां धनवतीमानर्च यत् ॥ २ ॥

तथाहि—**मकरावासे** नगरे **धरणस्य** श्रेष्ठिनश्चन्दनश्रीः स्वसा, सा च पतिगृहे दौःस्थ्ये समुपस्थिते वस्त्राऽऽभरणादिवेषाऽऽडम्बररहिता स्वसोदरस्य सुतविवाहे पितृगृहमागता, तत्र

१. सर्वं संग्रह कर्त्तव्यः । कः काले फलदायकः AHD। २. AD। श्रिया दृशा सर्वं सुखायते-H। श्रियां दृष्टायां सत्यां सर्वं सुखायते-मु.।

चाऽतुलभूषणभूषितानां विभववतीनामन्यासां सौभाग्यवतीनां गौरवमात्मनश्च भृशं लाघवं निरीक्ष्य धिग्धनमिति ध्यायन्ती भ्रात्राप्यमानितैव पतिगृहं गता।

अन्यदा च दैववशाद्गते दौर्गत्ये सा तूत्तरोत्तरीयदुकूलधरा कनककङ्कणकलितकरा ताम्बूलपूरितवदना सर्वाऽवयवलिप्तचन्दना नूपुरमण्डितचरणा यथौचित्यरचितमणिमौक्तिकाभरणा कुसुमपूरपूरितशिरोजा दुकूलकञ्चुकगाढबद्धोरोजा तथैवाऽपरभ्रातृव्यविवाहे समागता सहोदरेण भोजनाऽऽदिना बहुमानिता चैकं दोधकमभणत्-

[१]**जिमउं नागला ! खीटलां !, जिम घडि! जिमरे चीर ! ।**
इम आदर तुम्हनइं करइ, एह मारो वीर ॥ १ ॥

इति भूयो भूयो भणन्ती सा सुखभक्षिका-व्यञ्जन-कूराऽऽदिकवलान् कुण्डलकङ्कणादि-भूषणानामुपरि मुमोच। इति विपरीतं विदधती सा परिजनेन पृष्टा सर्वं पूर्वमाधुनिकं च वृत्तान्तं जगौ। तत् श्रुत्वा लोकैर्भ्राता निन्दितः, सा च संस्तुता पतिगृहमगात् ॥ **इति धने सत्येव निजानां प्रेमेत्यर्थे चन्दनश्रीकथा ॥ १२३ ॥**

॥ १२४ ॥ स्त्रीमतिकरणेऽनर्थ एवेत्यर्थे मन्थरकोलिककथा॥

मित्राऽऽदिषु सत्स्वपि कारवो हि स्त्रीप्रधानाः, यतः—

मन्त्रिप्रधाना राजानो, धीप्रधानाश्च मन्त्रिणः।
वित्तप्रधाना वणिजः, स्त्रीप्रधानाश्च कारवः ॥ १ ॥

स्त्रीधिया प्रवृत्तिप्रवृत्तानां तेषामेवाऽनर्थः, यतः—

यस्य नास्ति स्वयं बुद्धि-र्मित्राणां न करोति यः।
स स्वयं निधनं याति, यथा मन्थरकोलिकः ॥ २ ॥

तथाहि- **धणपल्लीग्रामे मन्थरो** नाम कोलिकः, स चैकदा पत्नीप्रेरितो निशितं कुठारमादायेन्धनार्थं वने पर्यटन्नन्यकाष्ठमप्राप्नुवन् वनस्थस्य **शङ्करस्य** यक्षस्य दारुमयीं मूर्त्तिं खण्डयितुमुद्यतो यक्षेणाऽभाणि— भो भद्र! मां मा विखण्डय याचस्व च यथेप्सितं वरमित्युक्तो ग्रामे गत्वाऽऽगत्य च वरं वरिष्यामीत्यभिधाय स निर्बुद्धिधुरीणः पुरे समेतो मित्राणां पुरो यक्षवृत्तान्तं जगौ, मणिसुवर्णादि याचस्वेति तैरुक्तेऽपि स स्वप्रियामप्राक्षीत् । धनादिभिः समृद्धोऽसौ प्रथमं मामेव त्यक्ष्यति, यतः—

प्रवर्धमानः पुरुष-स्त्रयाणामुपघातकः।
पूर्वोपार्जितमित्रस्य, कलत्रस्य च वेश्मनः॥ ३ ॥

१. मु.-मध्ये एतत्स्थाने अन्य श्लोकोऽस्ति यथा - धन छे तुमने माहरां। हे आभूषण चीर! आदर तो तुमनें करे। एहिज मारो वीर ॥ १ ॥ २. सत्स्वेव - PD॥

इति मत्वा साऽवादीत्— हे नाथ ! यथाऽऽत्मनां युगपत्पदद्वयं निष्पनीपद्यते तथा त्वदीयं याचस्वेति स्त्रीप्रधानः स मूर्खमुख्यो वने गत्वा यक्षं तथैव याचितवान्। एवं भूयादिति प्रतिपद्य तिरोहिते यक्षे स यथा पुरस्तात्तथा पृष्टे बभूव, चतुष्करश्चतुश्चरणो द्विमुखश्चैतादृग्रूपं पुरे प्रविशन्तं तं विलोक्याऽहो ! पुरे कोऽप्युपद्रवकारी पिशाचः प्रविशतीति क्रुद्धैर्लोकैः सम्भूय यष्टिमुष्टिपादप्रहारैर्निहतः स प्राप स्त्रीबुद्धिकरणतो जातं मरणलक्षणं फलम् ॥ **इति स्त्रीमति-करणेऽनर्थ एवेत्यर्थे मन्थरकोलिककथा ॥ १२४ ॥**

॥ १२५ ॥ शुनोऽपि नीचो निन्द्य इत्यर्थे श्वान-चौरकथा ॥

उपकृतोऽपि दुर्जनः शुनोऽपि तुलां नैति, यतः—

अशनमात्रकृतज्ञतया गुरो-र्न पिशुनोऽपि शुनो लभते तुलाम्।
अपि बहूपकृते सखिता खले, न खलु खेलति खे लतिका यथा ॥ १ ॥

अपि च—

श्वा कृतज्ञतुलां याति, याति तां नैव दुर्जनः।
वैद्योपचरितौ श्वान-चौराविह निदर्शनम् ॥ २ ॥

तथाहि— **शङ्करनामग्रामे कुन्तलो** नाम वैद्यः, स च सर्वत्रोपकृतिकृतमना एकदा **कन्धरेण** पुत्रेणाऽभाणि, हे तात! यादृशे स्थाने उपकृतिर्विधीयते तादृशमेव फलं लभ्यते, यतः—

वरस्यउ वरस्यउ अम्बुहर, वरसीअडां फल जोइ ।
धत्तूरइ विस नीपजे, इक्खु अमीअरस होइ ॥ ३ ॥

पुत्रेणेति कथिते सोऽकथयत्— हे पुत्र ! धर्मशास्त्रे परोपकारादपरो धर्मो नास्ति, यतः—

श्लोकार्द्धेन प्रवक्ष्यामि, यदुक्तं ग्रन्थकोटिभिः।
परोपकारः पुण्याय, पापाय परपीडनम् ॥ ४ ॥

इत्यभिधाय सर्वत्रोपकारतयैव तस्थुषस्तस्यैकदैकेन भट्टेनाऽयं दोधकोऽभाणि—

कहि किम कुक्कर-समवडिइ, दुज्जण जण तोलाय ।
इक पाल्यउ धन जालवइ, इक पाल्यउ लिइ जाइ ॥ ५ ॥

तथापि योग्याऽयोग्ययोरप्युपकारधीस्तेन नाऽमोचि। अथैकदा रोगाऽऽर्तस्य शुनः प्रतिचर्यां सृजतस्तस्यौकस्येको रोगातुरो दासीसुतो नीचः समेतः, पुत्रादिभिर्निषिद्धोऽपि **कुन्तलस्तमौषध-पथ्याऽऽदिना** प्रतिचरति स्म। जातपाटवः स दासीसुतस्तद्वित्तादि विलोक्याऽन्यत्र गत्वा च निश्येकदा *चौर्यार्थं तद्गेहमागतः, तत्र स्थितो नीरोगः स श्वा तं विलोक्य तं प्रति धावितस्तेन बाणेन हतः,* नश्यन् स चौरो निशि सर्पेण दष्टः पुराद्बहिः पतितो मृतश्च, बाणाऽऽहतः स श्वाऽपि मृतः। अथ

प्रातः पश्यत्सु लोकेषु स मृतः श्वा ततः समुत्थाय पतितस्य तस्य चौरस्य मुखान्तरुपविश्य तत्रैव पतितः, अहो मृतोऽप्यसौ श्वा कथमुत्थितः ? कथं चौरमुखे च पतितः ? इति सविस्मयं चिन्तयत्सु लोकेषु तत्रैव स **कुन्तलः** समेतः, स्वोपलक्षितं मृतं तं चौरं, तस्य मुखे च पतितं मृतं श्वानं विलोक्य किमिदमहो इति **कुन्तले** ध्यायति स्वामिकृतज्ञत्वजातेन शुभध्यानेन मृत्वा व्यन्तरीभूयः स श्वजीवो देवोऽम्बरस्थोऽस्य चौरस्याऽऽत्मनश्च कथां प्रतिपाद्य स्वशरीरं चन्दनैरदहत्, चौरशरीरं विडम्ब्य **कुन्तलं** च पूजयित्वा स देवः स्वस्थानं गतः। कुन्तलोऽपि पुत्रोक्तं चारणोक्तं च मनस्यवधार्य स्थाने कृतोपकारः सुगतिमगात् ॥ **इति शुनोऽपि नीचो निन्द्य इत्यर्थे श्वानचौरकथा ॥ १२५ ॥**

॥ १२६ ॥ मौनं हितमित्यर्थे तापसत्रयकथा ॥

केषाञ्चिन्मौनं हि हितार्थं, यतः—

स्वायत्तमेकान्तहितं विधात्रा, विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे, विभूषणं मौनमपण्डितानाम् ॥ १ ॥

क्वाऽपि पण्डितानामपि मौनं श्रेयसे, यतः—

मुञ्च मुञ्च पतत्येको मा मुञ्च पतितो यदि।
उभौ तौ पतितौ दृष्ट्वा मौनं सर्वार्थसाधनम् ॥ २ ॥

तथाहि- **विष्णुपुरे** पुरे **शिवशर्म-देवशर्म-हरिशर्म**नामानस्त्रयस्तापसा दुस्तपं तपस्तपन्ते स्म। तेषां त्रयाणामपि तपःप्रभावात्परिधानपटा नभस्यातपे तिष्ठन्तीति प्रसिद्धिः। एकदा स्नानार्थं सरसि गतास्ते त्रयोऽपि स्वस्वपरिधानपटाश्च नभस्यातपे धृता यावत्तिष्ठन्ति तावत्तत्र सरस्येकेन बकेनाऽऽदत्तं मत्स्यमालोक्य हा ! अकार्यमिदं यदनेन पापिना निरपराधोऽयं मत्स्यो गृहीत इति मुञ्च मुञ्चेति वदतो मत्स्ये समुत्पन्नकृपस्य बके च निर्दयस्य शिवशर्मणस्तस्यैकः पटो गगनादधस्तादपतत्। पतितं च पटं प्रेक्ष्य मा मुञ्च मुञ्चेति ब्रुवाणस्य क्षुधितोऽसौ वराको मरिष्यतीति तस्मिन् बके जातकारुण्यस्य मत्स्ये च निष्कृपस्य देवशर्मणोऽपि पटो द्वितीयस्तदैवाऽपतत्। इति तौ द्वावपि पतितौ पटौ विलोक्य बके मत्स्ये च निष्करुणत्वमेव पटपतननिदानमिति मौनमुपेयुषस्तस्य हरिशर्मणस्तृतीयः पटो नभस्येव तस्थिवान् ॥ **इति मौनं हितमित्यर्थे तापसत्रयकथा ॥ १२६ ॥**

इति पं. श्रीकमलविजयगणिशिष्य पं. श्रीहेमविजयगणिविरचिते
श्रीकथारत्नाकरे पञ्चमस्तरङ्गः समाप्तः
॥ श्रीरस्तु ॥

१. D। °धकं- AHP॥

॥ ८॥ अथ षष्ठस्तरङ्गः ॥

॥ १२७ ॥ दम्भनिर्माणे धरणकान्दविककथा॥

दम्भं हि ज्ञातुं न विधाताप्यलं, यतः—

दम्भसंरम्भिणां दम्भं, गर्जितं च पयोमुचाम्।
न क्वापि भवति ज्ञातुं, चतुरश्चतुराननः ॥ १ ॥

अपि च—

अहो अहो दम्भविजृम्भितं यत्प्रभावतः सिद्धिमुपैत्यसाध्यम्।
सितोपलाया क्षुरिके जघास, लोहच्छलाद्यज्जयसिंहभूपः ॥ २ ॥

तथाहि— **श्रीपत्तने नगरे सिद्धराजजयसिंहदेवे** राज्ञि सभायां स्थितेऽन्यदा शङ्ख-कुण्डलकङ्कणकेयूरकोटीरहारहारिण्यौ **सिद्धिबुद्धिसंज्ञे** द्वे योगिन्यौ पौरैः सविस्मयं वीक्ष्यमाणैः समं राजसभामेत्य राज्ञ इत्याशीर्वादं ददतुः—

राजन् **श्रीकर्ण**भूपाल-कुलाकाशनभोमणे!।
चिरं जीव चिरं नन्द चिरं पालय मेदिनीम् ॥ १ ॥

आगमनकारणं पृष्टे च ते राजानमिति वदतः स्म। **सपादलक्षशैले सिद्धनाथनामा-ऽस्मद्गुरुर्योगिपुङ्गवः सिद्धराज** इति त्वन्नामाकर्ण्य मयि **सिद्धनाथे** सति कोऽसौ **सिद्धराज** इति कुपितः, यो लोहमत्ति स **सिद्धराज** इति पत्तने गत्वा **सिद्धराजभूपं** वदतमिति शिक्षां दत्त्वा स स्वक्षुल्लिके आवामिह प्राहिणोत्। ततो हे राजन् ! यदि स्वख्यातिरक्षणे ते वाञ्छा, तदा लोहमये कटके इमे त्वं भक्षय, न चेत्सिद्धराज इति ख्यातिं जहि। इति तदुक्तमाकर्ण्य कथं करिष्यामीत्यन्तः खेदं वहन् भवदुक्तनिर्णयमुषसि विधास्यामीत्यभिधाय भूपोऽन्तःपुर-मलञ्चक्रे, योगिन्यावपि राजाऽऽदिष्टं स्थानं गते। राजापि तच्चिन्तातुरो निशि विहितश्यामवेषः पौरचर्यां विलोकयन् **धरणाख्यस्य** कान्दविकस्य द्वारे तस्थौ। तदा च योगिनीभ्यामभिहितां विस्मयकरीं वार्तां स्त्रीपुरः कथयन् स कान्दविकस्तयाऽभाणि, हे स्वामिन्नियमात्मस्वामि-भूस्वामिनश्चिन्ता कथं यातीति तयोक्तेऽहमत्रार्थेऽलमस्मीति वदति तस्मिन् कपाटमुद्घाट्य मुदितो मेदिनीशस्तद्गृहाऽन्तः प्राविशत्।

कान्दविकोऽपि राजानमुपलक्ष्य सत्कृत्य च प्राञ्जलिः पुरःस्थितो राज्ञोचे- हे भद्र ! मत्ख्यातिरक्षणोपायं विधेहीत्यभिहितः सोऽवोचत्— हे देव ! सादिनां पञ्चशतं, पञ्चाशत्सहस्र-सुवर्णटङ्काश्च मम दत्त्वा षण्मासं यावदन्तःपुरे स्थेयं, तयोश्च दर्शनं न देयं, पश्चात्सर्वं भव्यं भवितेति वदतस्तस्य राज्ञा तदेव सर्वमदायि, स्वयं च मान्द्यमिषेणान्तःपुरे तस्थौ। अथ

सोऽपि **मध्यदेशे कालपीनगरे** गत्वा सितोपलामय्यौ कङ्कलोहमयमुष्टिजटिते द्वे क्षुरिके स्वकौशलेन निर्ममे। लोहक्षुरिके इव ते अपि क्षुरिके मृदुललोहादिसर्ववस्तुच्छेदनसमर्थे समादाय तैः सादिभिर्वृतः स षण्मासान्ते मध्यदेशाधीशमन्त्री **सिद्धराजस्या**ऽर्थे प्राभृतमादायागतोऽस्तीति ख्यापयन् **पत्तने** प्रविष्टः। अथ पूर्वसङ्केतिते तस्मिन् दिने पर्षदि स्थिते भूपे ते योगिन्यावपि तत्रागत्य बहवो वासरा जातास्तेनाद्यास्मद्वार्तानिर्णयं विधेहीति राजानं जल्पतः स्म।

स **धरणो**ऽपि तदैव ते क्षुरिके पुरो विमुच्य प्रणम्य च क्षुरिकास्वरूपगर्भितलेखं राजकरे दत्त्वा प्राञ्जलिस्तस्थौ। भवदुक्तनिर्णयमद्य विदधदस्मीति तयोर्योगिन्योरभिधाय सविस्मयं सर्वेषु सभ्येषु पश्यत्सु राजा ते द्वे अपि क्षुरिके मुष्टिस्कन्धौ यावदत्ति तावत्तयोर्द्वे अपि मुष्टी धरणेन राजपुरःस्थितपयःपात्रान्तः क्षिप्ते, तल्लग्नशर्करालेशे च जलान्तर्गते तन्मुष्टिद्वयं योगिन्योर्दत्वैतद्भक्षणं विधीयतां यदि भवन्त्यौ योगिन्यौ स्तः, इति वदन्तं तं ते ऊचतुः, कङ्कलोहभक्षणात् सिद्धादधिकः सिद्धोऽसौ राजा, येनाऽऽवयोर्मृदुलोहाऽदने शक्तिर्वर्तते, परं च नाऽस्मिन्नित्यभिधाय राजानं च प्रणम्य ते योगिन्यौ स्वाऽऽस्पदं जग्मतुः, **धरणं** च नगरमुख्यं विधाय राजापि राज्यमपालयत्

॥ **इति दम्भनिर्माणे धरणाऽऽख्यकान्दविककथा** ॥ १२७ ॥

॥ १२८ ॥ कपटविजृम्भितं ज्ञातुं न कोऽप्यलमित्यर्थे कललकोलिककथा ॥

अस्मिन्नेवार्थे द्वितीया कथा-

अतिगुप्तस्य दम्भस्य । ब्रह्माऽप्यन्तं न गच्छति।
कोलिको विष्णुरूपेण । भेजे राजसुतां यथा ॥ १ ॥

तथाहि- **मकरन्दपुरे** पुरे **शक्रस्य** राज्ञः **कनकमञ्जरी** पुत्री, एकदा हेशयात्रायां यान्तीं स्मररमणीमिव सर्वाऽवयवाऽनवद्यां तां विलोक्य पथि स्थितः **कललो** नाम कोलिकः स्वमित्रं **कुशलं** नाम सूत्रधारमवादीत्— हे मित्र ! यात्रां गतेन मयाऽद्य **कनकमञ्जरी** भूपसुता दृष्टा, तेन तत्सङ्गं विना नाऽहं प्राणान् धर्तुमलम्, अतस्तदुपायं घटयेत्यभिहितः सोऽवदत्, मन्निर्मितं कीलिकासञ्चारचारिणं गरुडपक्षिणमारुह्य विष्णुवेषेण तस्याः प्रासादे गत्वा विष्णुरहं तव रूपमोहितोऽत्र समागामित्युदीर्य गान्धर्वविधिना च तां परिणीय तया समं सुखमनुभविष्यसि, नाऽन्यथेति। अथ तत्कृतगरुडाऽऽरूढः करधृतगदाचक्रशङ्खशार्ङ्गः परिहितपीताम्बरः श्रीवत्सलाञ्छनः कज्जलश्यामलः स निशीथे गवाक्षेण तन्मन्दिरमभ्यगात् । साऽपि साक्षाद्विष्णुं तमागतं विलोक्य प्रणम्य प्राऽञ्जलिः स्थितेत्यस्तवीत्-

गोपाङ्गनावदनचुम्बनलालसाय, भक्तोद्धृतौ प्रतिकलं विगताऽऽलसाय।
देवेन्द्रचन्द्रभुजगेन्द्रजनोत्तमाय, भूयान्नमो भगवते पुरुषोत्तमाय ॥ २ ॥

जय पयोधिसुतास्तनवारिज-स्तबककेलिकलो मधुसूदन ! ।
जय सुरासुरकामवतीमुखां-बुजमृगाङ्क ! विभो ! पुरुषोत्तम ! ॥ ३ ॥

इति स्तुतिपरां तां परिणीय तया समं तां रजनीं तत्राऽतिवाह्य गते तस्मिन् रात्रेरुदन्तः सर्वोऽपि प्रातः पित्रोः पुरस्तयाऽभाणि। ताभ्यामपि द्वितीयनिशि जालान्तरे स्थित्वा तथैवाऽऽगतं तं साक्षान्नारायणं निरीक्ष्य धन्यमावयोः कुलं, यत्रेयं स्त्रैणशिरोमणिः सुता जाता, परिणीता च भगवता पुरुषोत्तमेनेति मेने। अथ तथैवागत्य स प्रत्यहं तया समं सुखमनुभूय स्वस्थानं गच्छति। अथान्यदा तद्ग्रामोपरि पराऽनीकमागच्छन्निशम्य बलहीनेन राज्ञा सुता जगदे— हे सुते! स्वपतिमिति वद, यदबलस्य मत्पितुरुपरि रिपुसैन्यं समेति, अतस्तन्निवारणायोद्यमं क्रियतामिति तयोक्तं सोऽप्यङ्गीचकार।

अथ यथा यथा तद्बलं निकटमेति तथा तथा सा वक्ति— हे नाथ ! रिपुबलमासन्नमेति, क्षणेन वारयिष्यामीति सोऽप्यनिशं जगौ। अथ कियत्सु दिनेषु गतेषु तस्यां रिपुसेनायां पुररोधं विधाय स्थितायां तयोक्तः सत्त्वशाली स विष्णुरूपधरो गरुडारूढोऽम्बरे स्थितोऽहं पीताम्बरः क्षणेनेमां रिपुदलराजीं दलयिष्यामीति यावद्वदति तावत् क्षीरनीरनिधिशायिनो विष्णुना मदाकारधारिण्यस्मिञ्जितेऽहमेव जितोऽस्मि, हते चाऽहमेव हत इति मत्वा तद्वपुरन्तरात्मानं निधाय तद्रिपुकटकं जितम्। ते शत्रवोऽपि साक्षाज्जगन्नाथं प्रणम्य गताः, शक्रोऽपि प्रणम्य स्तुत्वा च स्वं धन्यं मन्यमानः स्वराज्यमवतिस्म। सोऽपि कोलिकस्तया समं निःशङ्कं भोगान् बुभुजे **॥ इति कपटविजृम्भितं ज्ञातुं न कोऽप्यलमित्यर्थे कललकोलिककथा ॥ १२८ ॥**

॥ १२९ ॥ खलकलाज्ञाने खला एवाऽलमित्यर्थे चतुरवासणचौरकथा ॥

पिशुनचरित्रावगमेऽपि पिशुना एव क्षमाः, यतः-

न सूरिः सुराणां गुरुर्नाऽसुराणां, पुराणां रिपुर्नाऽपि स्वयम्भूः।
खलानां चरित्रे खला एव विज्ञा, भुजङ्गप्रयातं भुजङ्गा विदन्ति ॥ १ ॥

अपि च-

कलाः खलानां कपटाऽऽकुलानां, ज्ञातुं खला एव भवन्त्यधीशाः।
रैबर्हिणं यन्निहितं श्मशाने, जग्राह चौरः श्रुतमुद्विलापः ॥ २ ॥

तथाहि—**केशवपुरे पुरुषदत्तनामा** राजा शिवभक्तः स्वयं कारितशिवचैत्यशिखरेऽर्धभारकनकमयं मयूरं न्यवीविशत्। तत्रैव पुरे चौराऽऽचारचतुरश्चतुरो नाम चौरो वसति।

एकदा **बलपुरवासी वासणनामा** तस्करस्तत्राऽऽगतस्तं मयूरं निरीक्ष्य चलितचित्तो मृतकमेकमर्भकमादाय करचरणग्रीवोदरजङ्घानिबद्धदृढपट्टको दीनवचनः सायं तत्र चैत्यपरिसरे

१.AH कला । २. ना वारिधिशायिना मदा° DP ॥

यामिकानामेकस्मिन् प्रदेशे दम्भनिद्रया निदद्रौ। निद्राणेषु च यामिकेषु गोधाप्रयोगेण तत्रारुह्य घटीवादनप्रहारैः सह टङ्ककप्रहारैस्तं बर्हिणं छित्त्वा उत्तिर्य च करगृहीतमृतार्भको हा वृद्धस्यैकाकिनो मम पुत्रो मृतो, हा! दैव! हा दैवेति पुनः पुनर्वदन् बाढस्वरेण स पूत्करोति-स्म। अथोन्निद्रैर्यामिकैरितो याहि याहीति हक्किते तस्मिंस्तथैव विलपति गच्छति च **रूपसेना**वेश्यौकसि सुप्तेन च तेन **चतुरेण** चौरेण साऽभाणि, हे सुन्दरि ! यदिदमस्य मानवस्य रुदितं तत्प्रमोदजनितं, न च शोकसमुत्थमित्यभिधाय तत्स्वोक्तं सत्यापयितुं तस्य पृष्ट एव ततो निर्गत्य स्मशाने प्रभूतपतितमृतकान्तः स पतितः।

तत्र भुवोन्तस्तं कलापिनं निदधद्वासणोऽपि शिवारुदितं निशम्य कोऽपि पश्यतीति निर्णीय क्षणं स्थित्वा च तथैव कुर्वंस्तथैव शिवाशब्दश्रवणाज्जीवन्मानुषाऽऽशङ्की समुत्थाय तत्र पतितानां शबानां करचरणग्रीवोदराऽऽद्यवयवेषु मृताऽमृतपरीक्षायै स शस्त्रीप्रहारान् ददौ। करतलतन्मुक्त-प्रहारश्चतुरो मृतक इव तद्व्यथारहितस्तत्र स्थित्वा रैबर्हिणं तत्र निधाय गते च तस्मिंस्तमादाय तस्या वेश्याया दत्त्वा च स स्वं सत्यापयति स्म। प्रातस्तं मयूरमनिरीक्ष्य विषण्णं राजानं श्मशाननिहितमयूराऽप्राप्तेश्चिन्तातुरो वासणो मयूरमहमाविष्करिष्यामीति व्यज्ञपयत्। घाताऽर्तानां नागलतापत्रैर्विना न सरतीति समुत्पन्नधिया तेन राजाऽऽज्ञया तानि पत्राणि भृशं महर्घाणि विधाप्य तदट्टनिकटे साधुवेषेण स्थिते तस्मिन् तस्या वेश्याया दासीं महर्घाण्यपि पत्राण्यादाय यान्तीं विलोक्य तद्गृहं च ज्ञात्वा नूनमत्र स चौरोऽस्तीति तेन राज्ञे विज्ञप्तम्। अथ गणिकागेहवेष्टनपुरस्सरं गृहीतेन तेन यथाजाते सर्ववृत्तान्ते कथिते अहो! द्वावपीमौ मतिमन्ताविति तस्करकर्म विमोच्य तौ भूपेनाऽऽसन्नसेवकौ कृतौ, राजमान्यौ च बभूवतुः ॥ **इति खलकलाज्ञाने खला एवाऽलमित्यर्थे चतुरवासणचौरकथा ॥ १२९ ॥**

॥१३० ॥ मोहकरणेऽनर्थ इत्यर्थे प्रियङ्गुविप्रप्रिया कथा ॥

मोहान्धं जगत्किमपि न पश्यति, यतः—

आदित्यस्य गतागतैरहरहः सङ्क्षीयते जीवितं,
व्यापारैर्बहुकर्मभारगुरुभिः कालो न विज्ञायते।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते,
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ १ ॥

तेन मोहजय एवाऽशेषकर्मभ्यो विषमतरः, यतः-

अक्खाणरसणी कम्माण, मोहणी तह वयाण बंभवयं।
गुत्तीण य मणगुत्ती, चउरो दुक्खेण जिप्पंति ॥ २ ॥

अपि च-

विप्रस्य मोहमूढात्मा, मृताया दुहितुः कृते।
अलङ्कारान् ददौ वृद्धा, धिग्मोहं द्रोहकारिणम् ॥ ३ ॥

तथाहि- **कमलपुरे** पुरे **गोविन्द**विप्रस्य **प्रियङ्गुः** प्रणयिनी, तत्कुक्षिप्रभवा **यमुना** सुता, अन्यदा चिन्तामणिरिव सुरलतेव च प्राणेभ्योऽप्यतिप्रेयसी सा पितृभ्यां **मणिपुर**वासि**श्रीधर**विप्रसुत**श्रीपतेः** परिणायिता। लघीयस्येव दैवयोगेन सा परासुरभूत्।

सुताशोकमनसि भृशं च कुर्वाणा **प्रियङ्गु**रन्यदान्यदैकेन विश्ववञ्चनाचञ्चु**चञ्चु**नाम्ना धूर्तेन कुतः समेतोऽसीति मोहमूढया तया पृष्टेनेति जगदे, हे प्रियङ्गो! स्वर्गादहमिहागमं, हे पुत्र! तत्र **यमुना** मन्नन्दना किं करोति? किमत्ति? सुखिनी दुःखिनी वेति कथय, इत्यभिहितः सोऽवदत् अस्ति स्वस्ति यमुनायास्ते तनयायाः, स्वपित्रो**र्गोविन्दप्रियङ्गु**नाम्नोः क्षेमाऽऽलापपूर्वं समाधिर्मन्मुखेन पृष्टास्ति, अन्येषां स्वजनानां च नामग्राहं कुशलं पृष्टमस्ति। परं स्वर्गे प्रदीपने लग्ने तद्गृहान्तःस्थं सर्वं वस्त्राऽऽभरणाद्यमज्वलत्। तेन वेषाऽलङ्काररहिता नाहं राजामीति च मन्मुखेन सा तवाऽज्ञापयत्। इत्युक्ते मोहार्तया तया दत्तं सर्वमादाय गते तस्मिन् गृहागतो गोविन्दोऽपि तं वृत्तान्तमाकर्ण्य करभाऽऽरूढस्तत्पृष्टे धावितः।

तमायान्तं दृष्ट्वा महति मार्गवटेऽधिरूढे तस्मिन् धूर्ते वटेस्कन्धे भूत्वा सोऽपि वटेऽधिरूढः तदा च स धूर्तो वटशाखयोत्तीर्य करभं चाधिरुह्य द्रुतमचलत्। करभारूढं गच्छन्तं तं विलोक्योभयभ्रष्टो **गोविन्दो** बाहुयुगमूर्द्धवीकृत्य— हे भद्र ! करभोऽपि **यमुनायै** देय इत्यभिधाय मनस्यतीवखिन्नो ववले। धूर्तोऽपि तत्सर्वं गृहीत्वा गृहे गतः ॥ **इति मोहकरणेऽनर्थ इत्यर्थे प्रियङ्गुविप्रप्रिया-कथा ॥ १३० ॥**

॥ १३१ ॥ सत्यप्रत्युत्तरे कुपितादपि फलमित्यर्थे वैष्णवीब्राह्मणीकथा ॥

तात्कालिकधिया यः प्रश्नोत्तरं दत्ते स श्रियं लभते, यतः-

श्रियं प्रतिवचश्चञ्चुः, प्राप्नोति कुपितादपि।
वैष्णवी विष्णुतः प्राप, सद्यो दत्तोत्तरा फलम् ॥ १ ॥

तथाहि- **गोविन्द**पुरनगरं, तत्र च ग्रामाद्बहि**र्मुरलीमनोहर**नाम्नी साऽधिष्ठायिका **विष्णु-मूर्तिः**, तत्र चैकदा देवशयनैकादश्या देवोत्थानैकादशीं यावत्काप्येकाशनं, काऽपि फलाऽशनं, कापि सिरोसधान्यनिराकरणं,कापि ब्रह्मव्रतं, कापि भूमिशयनं, कापि रात्रिभोजनप्रत्याख्यानं, कापि दुग्धाऽऽहारकरणं चेति नियमानङ्गीकुर्वन्तीषु बह्वीषु ब्राह्मणीष्वेका बुद्धिमती **वैष्णवी**नामविप्री हे विष्णो! तव शयनादुत्थानं यावन्नाऽहं भोक्ष्ये एवं प्राञ्जलिरजल्पत्। स्वं स्वं स्थानं गत्वाऽन्यासु

१. PD। सुताशोकं मनिस भृशं-मु. ॥.

विप्रीषु स्वस्वनियमान् पालयन्तीषु सतीषु सा **वैष्णवी** रात्रौ रहसि कुल्लरिमोदकमत्ति स्म। प्रभाते च यथा सर्वा अप्यन्याः स्वस्वनियमान् **विष्णु**मूर्तेः पुरस्तात्स्मारयन्ति, तथा सापि स्वं नियमं स्मारयति। एवं चाऽनिशं जायमाने तद्वचनश्रवणाज्जातेर्ष्या सा **विष्णु**मूर्तिस्तां **वैष्णवी**-मेवमाह— हे पापिनि ! हे मृषाभाषिणि ! त्वां धिक् ।

कथमहं मृषाभाषिणीति तयोक्ते **विष्णु**रभाणीत्, नक्तं कुल्लरिकामश्नासि प्रभाते चाहमुपोषितास्मीति मत्पुरो वदसीति मृषाभाषिणी भवती। अथ सावदत्, हे मुरलीमनोहर! हे पुरुषोत्तम ! यादृशाः स्वामिनस्तादृशैः सेवकैर्भाव्यमिति नीतिः, तेन यादृशस्त्वं मृषावादी तादृगहमपि मृषावादिनीति को मम दोषः ? कथमहं मृषावादीत्यभिहिते सा स्माह, चतुरोऽपि मासानहं सुप्तोऽस्मीति लोकान्तः ख्यातिं धत्से, परं नक्तं ममौकसि समेत्य मच्चरित्रं पश्यसीति त्वं मृषाभाषीति सत्ये प्रत्युत्तरे दत्ते तुष्टो **विष्णु**स्तस्यै महाफलं साक्षात्स्वदर्शनं दत्त्वा तिरोदधे ॥ **इति सत्यप्रत्युत्तरे कुपितादपि फलमित्यर्थे वैष्णवीब्राह्मणीकथा** ॥ १३१ ॥

॥ १३२ ॥ मतिविषये सरणसुवर्णकारकथा ॥

बुद्धिमान् स्वं विषममपि कार्यं साधयति, यतः—

कार्यं किं किं न कुर्वन्ति, दुःसाध्यमपि धीधनाः।
हस्तिकृत्स्वर्णकृत्स्तम्भा-दुत्ततार धियां निधिः ॥ १ ॥

तथाहि- **वसुदत्त**पुरे **देवराजो** राजा, तत्र सुवर्णकारकलाकलापशरणं **सरणो** नाम स्वर्णकारः, तस्य च मतिकौशलं विलोक्य लो**कैर्मतिचन्द्र** इत्यपरं निर्मितं नाम निशम्य राज्ञा तत्परीक्षायै तत्पार्श्वे शतभारकनकमयः करी कारितः। सकलकलाकुशलेन तेनापि नृपदत्त-सुवर्णचतुर्थांऽशेनाऽन्तःशुषिरः सीसकेनाऽन्तर्भृतः करी कृतो दत्तश्च राज्ञः। स्वदत्तस्वर्णभारादधिकं तं कनककरिणं विलोक्य विस्मितेन राज्ञादिष्टा मन्त्रिप्रिया तद्गृहे गत्वा मैत्रीमिषेण तत्प्रियातो ज्ञाततत्कपटा द्विरदोदरनिहितसीसकादिस्वरूपं राज्ञे जगौ । तद् ज्ञात्वा राज्ञा कृततापेन करिजठर-दम्भं विलोक्य पुनस्तेन तस्यातिकौशलविलोकनाय त्रिंशत्हस्तप्रमाणे दारुदण्डे शिरोनिहित-दशहस्तपृथुलफलके कथमितः समुत्तरतीति रात्रौ सोऽध्यारोहितः। मिथो ग्रन्थिदानसन्धित-स्वकेशैस्तेन दवरकोऽधो मुक्तः, तेन दवरकेण च स्वस्त्रिया दत्तां दृढां रज्जुमादाय तद्रज्जुप्रयोगेण च ततो दण्डादुत्तीर्य क्वाऽपि गते तस्मिन् राजा तन्मतिमहिमानमुद्दिश्य चमच्चक्रे। पुनर्मिलितं तं मतिमतां मुख्यं नगरसुवर्णकारमहत्तरं राजा चकार ॥ **इति मतिविषये सरणसुवर्ण-कारकथा** ॥ १३२ ॥

॥ १३३ ॥ स्वार्थे लुब्धा विरुद्धमपि कृत्यं कुर्वन्तीत्यर्थे मधुमथननृपकथा ॥

स्वार्थाऽभिभूता हि मृषावादिनः, यतः—

वणिक् पण्याङ्गना दस्यु-द्यूतकृत्पारदारिकः।
स्वार्थसाधक-निद्रालू सप्ताऽसत्यस्य मन्दिरम् ॥ १ ॥

तेन स्वार्थलालसा अवाच्यं वदन्ति, अकृत्यं कुर्वन्ति, अध्येयं ध्यायन्ति च। यतः—

धात्रीनरेशमहिषीसचिवा विवस्त्रा, भाण्डेन सार्धमगमन् पिहिताक्षिमार्गाः।
स्वर्लोकलब्धितरलास्तदहो निजार्थ-व्यग्राः सृजन्ति मनुजाः सुधियोऽप्यवश्यम् ॥ २ ॥

तथाहि- **मथुरायां** पुर्यां **मधुमथनस्य** भूपस्य **वसुमती** राज्ञी, **धीधनो** मन्त्री **यशोदा** च धात्री। तत्रैव राजबहुमानपात्रं जगद्वञ्चको **भीमो नाम** भाण्डोऽन्यदा यदि मां वञ्चयसि तदाहं तव लक्षप्रसादं करोमीति राज्ञा भणितो मौनवान् गृहं ययौ। एकदा मान्द्येन **भीमो** मृत इति पूर्वसङ्केतितास्तद्ज्ञातिजास्तत्पुत्तलकं चितायां दहन्ति स्म। हा ! गुणपात्रं **भीमो** मृत इति भूपेनापि खेदश्चक्रे। अथ कियत्सु दिनेषु गतेषु भूमिगृहान्निर्गत्य चर्मनिर्मितभुजगाभरणभूषितः स्वच्छाभ्रककृततृतीयनेत्रः त्रिशूलशालिपाणिपुटः प्रपञ्चितविपञ्चिकः कामोद्बद्धजटाजूटमुकुटः श्यामकम्बलरचितगजचर्मविभ्रमः प्रभूतभस्माभ्यक्तशरीरयष्टिः कपालमालामण्डितकण्ठपीठ एकशृङ्गवृषभारूढः सर्वथा विहितमहादेववेषः स **भीमो** निशीथे शिवभक्ताया भूपधात्र्या गृहमागात्। सापि साक्षान्महेशमालोक्याऽऽत्मानं धन्यं मन्यमानाऽऽसनादिना भक्तिं विधाय प्राञ्जलिः पुरः स्थिता तमवोचत्। हे भगवन् ! परमेश्वर ! तव दर्शनेनाहमद्य कृतार्थाभूवं किञ्च प्रतिदिनमागमनेन स्वदासी पवित्रीकरणीयाहमिति भणितः सोऽनिशं तदोकसि गमनं कुर्वन्नेकदा पुनस्तयाऽभाणि, हे नाथ ! मामनाथां जीवन्तीमेव दिवं नयेति तया भणिते सप्तमेऽहनि सुरेन्द्रमापृच्छ्य त्वां दिवं नेष्यामीति भणित्वा गते तस्मिन् सर्वोऽपि रात्रिवृत्तान्तस्तया नृपाग्रे कथितः।

अथ राजादिष्टया तया पुनरागताय तस्मै राजापि जीवन्नेव दिवमायियासुरस्तीति निवेदिते तथैवाभिधाय गते तस्मिंस्तद् ज्ञात्वा राज्ञापि सर्वं राज्ञ्यै ज्ञापितं, राजावद्राज्ञीमन्त्रिणावपि दिवं गन्तुमुत्कण्ठितौ तया समेतस्य तस्य निवेदितौ। अथ बाढाग्रहेण सोऽपि तथैव सङ्केतं दत्त्वाऽन्यत्र गत्वा सङ्केतदिने चागत्य तां भूपधात्रीमदो जगौ। हे यशोदे ! भवती राजा राज्ञी मन्त्री च सर्वेऽप्यमी वस्त्ररहिताः सप्तपुटवस्त्रबाढबद्धनयना मया सममायान्तु, यथा युष्मानहं सुरलोकं नयामीति तेऽपि स्वर्लोकलब्धिलुब्धास्तथैव भूत्वा तद्वृषभपुच्छलग्ना निशीथे तत्पृष्ठत एव गृहतो निर्गताः। यामिनीयामद्वयं यावत्तान् सर्वानपि ततः सकलेऽपि पुरे भ्रामयित्वा प्रभाते पुराद्बहिस्तटाकपालीमधिरुह्य च स स्माह, यूयमिह स्वर्गद्वारे तिष्ठत, सुरेन्द्रस्याज्ञया सर्वानपि युष्मान् स्वर्गे प्रवेशयिष्यामीति भणित्वा स स्वगृहं गतः। प्रभाते तान् सर्वांस्तथावस्थितान्

विलोक्य किमिदं किमिदमिति पौराणां वाग्भिः स्वपुरमेवेदमिति निश्चित्य मुक्तनेत्रबन्धपट्टकास्ते सर्वेऽपि लज्जिता मुखानि पिधाय राजलोकाऽन्तरुपागताः। अथ कियत्सु दिनेषु गतेषु परिहितनवीनवसनः स **भीम**नामा भाण्डो जयशब्दपुरस्सरमाशीर्वादं भणन् राजसभामागतः। रे **भीम** ! भवान् मृतोऽभवत्, कथमिहाऽऽगत इति भणितो राज्ञा सोऽभणत्, हे देव ! यादृशा यूयं देवलोकं गतास्तादृशोऽहं मृतोऽभूवमित्याकर्ण्याऽहो! अनेन भाण्डेन वञ्चितोऽस्मीति स्वप्रतिज्ञां मनसि निश्चित्य स्वप्रतिज्ञां च लोकानां पुरो निवेद्य च राज्ञा सपादलक्षप्रसादस्तस्मै कृतः ॥ **इति स्वार्थे लुब्धा विरुद्धमपि कृत्यकारिण इत्यर्थे मधुमथननृपकथा ॥ १३३ ॥**

॥ १३४ ॥ बुद्धिविषये वृद्धाकथा ॥

अपि पङ्गुर्गताक्षोऽपि, वामनोऽप्यधनोऽपि च ।
अप्यबालश्च बालोऽपि, मुख्यः सर्वत्र बुद्धिमान् ॥ १ ॥

धीमान् हि विषमेष्वपि कार्येषु निर्वाहकृत्। यतः-

दुःसाध्यकृत्यकृल्लोके, बुद्धिरेव विजृम्भते।
शशिकेति धियामोचि, वणिक्स्त्री व्याधतोऽक्षया ॥ २ ॥

तथाहि- [illegible]रम्भे पुरेऽतीवजडो **भरडो** नाम वणिक्। स चैकदा श्वशुरगृहे **भामिनी-नाम**स्वकामिनीमानेतुं गतः, तत्र श्वशुरादिभिः सत्कृतोऽयं तामादाय मार्गे गच्छन् 'बदरी-जालकेऽस्मिन्नस्ति किं शशक?' इति मार्गमिलितेन **करमणाह्वे**नैकेन मृगयुणा भणिते नास्तीति सोऽवदत् ।

व्याधेन स्वशिरस्तेन च स्वकलत्रमिति पणं कृत्वा शोधितात्तस्माज्जालकात् शशके निर्गते तत्कलत्रमादाय गच्छतो व्याधस्य पृष्टे रुदन् गच्छन् स वणिक् **अक्क**नामैकया वृद्धया स्त्रिया पृष्टः सर्वं वृत्तान्तमवादीत्। कथमस्य पत्नीं गृहीत्वा यासीति तयोक्तः स व्याधो मिथः कथितं पणं भूरिषु लोकेषु शृण्वत्सु तस्याः पुरो जगौ। अथ सा स्माह— रे मूढ मृगयो ! तज्जालकाभ्यर्णे मदीया भूरस्ति, तेन तस्मिन् जालके शशिका वसतीत्यहं वेद्मि, न च तत्र शशको वसति, न चेत्तामानय यथा तन्निर्णयः क्रियते। इत्युक्तः स व्याधस्तत्पत्नीं विमुच्य श्याममुखः स्वस्थानं ययौ। अथ **भरडो**ऽपि स्वस्त्रिया समं तामक्कां मातरमिव वित्तवसनादिना सत्कृत्य स्वं गृहं जगाम ॥ **इति बुद्धिविषये वृद्धाकथा ॥ १३४ ॥**

॥ १३५ ॥ विरुद्धं कुर्वतां विरुद्धकरणे न दोष इत्यर्थे विदुरकीरकथा ॥

कृते प्रतिकृतं कुर्वतां न नीतिनाशः, यतः—

कृते प्रतिकृतं कुर्या-न्नीतिरेषा वपुष्मताम्। पक्षोत्पाटनवैरं यत्-कीरोऽलान्मुण्डमुण्डनात् ॥ १ ॥

तथाहि— **देवभद्रपुरे भद्रसेनस्य** श्रेष्ठिनः काव्यश्लोकगाथागीतादिविदुरस्य सुवर्ण-पञ्जरस्थितस्य कनककिङ्किणीशृङ्खलाद्याभरणभूषितस्य **विदुरसंज्ञस्य** कीरस्य काव्यादिभणन-विनोदैः सुखमया इव यान्ति स्म वासराः। अन्यदा रूपयौवनरम्यायाः कामहर्म्याया गणिकाया गृहं गतः। ततस्तल्लुब्धः स तारुण्यलावण्योन्मत्तः श्रेष्ठी सदा तदोकसि ययौ। कदापि सापि तद्गृहमाययौ। एवं तयोः संस्तवं ज्ञात्वा शुकः श्रेष्ठिनमभाषिष्ट। हे नाथ ! एताः पण्याङ्गना निःस्नेहा उच्छिष्टा बहुभोज्याश्च। यतः-

यद्वक्त्रं विटकोटिवक्त्रनिपतन्निष्ठीवनानां घटी ।
यद्वक्षश्च जनङ्गमाऽऽदिजनतापाणिप्रहारास्पदम् ॥
यद्गात्रं बहुबाहुदण्डनिबिडक्रोडीकृतिभ्रंशितं ।
प्रेमैतासु दधाति [१]धावकिशिलातुल्यासु वेश्यासु कः ? ॥२ ॥

अपि च —

रत्येवाऽसमसायकः पशुपतिः पुत्र्येव भूमिभृतः ।
शच्येवाप्सरसां पतिर्मुररिपुः पुत्र्येव पाथोनिधेः।
रोहिण्येव सुधामरीचिरवनेः पुत्र्येव पौलस्त्यजि-
द्बाहुभ्यां परिरभ्यते गणिकया वित्तेहया कुष्ट्यपि ॥ ३ ॥

एवं कीरनिषिद्धस्यापि तस्याः परिचयमत्यजतस्तस्यैकदा विलम्बे जाते तयोक्तः स कीरप्रतिबोधवार्तां तत्पुरो जगौ।

असौ पापो मत्सुखेऽन्तरायकृदेवेत्येकदाऽहमप्येनं क्रीडयामीति मायया श्रेष्ठिपार्श्वात्तं शुकमादाय गृहमागत्य तत्पक्षावुत्पाट्य च मारणार्थं क्षुरिकामादातुं यावद् गृहान्तः सा प्रविशति, तावत्स धीरः कीरः शनैः शनैस्तद्गृहाङ्गणगततरुकोटरे निलीय तस्थौ । बहिरागता सा केनापि स पापो जग्ध इति निःशङ्का श्रेष्ठिना च कीरोदन्तपृष्टा क्वाप्यङ्गीय गतः स इति प्रत्युत्तरति स्म। कतिचिद्वासरेषु पुनः प्ररूढपक्षः स स्ववैरमादित्सुरेकदा तद्गोत्रजायाश्चण्डिकायाः पृष्ठे वेश्याऽऽगमनक्षणे प्रविश्य प्रणमन्तीं तां 'हे पुत्रि! तव भक्त्याहं तुष्टास्मि, वरं वृणु' इति स्पष्टमाचख्यौ । हे मातः! शश्वद्यौवनां सौभाग्यपावनां बहुधनां वशीकृताशेषजनां च मां विधेहीति तयोक्ते देवीपृष्ठस्थः शुकः स्माह, मूलश्रीव्ययं कृत्वा त्रपुकाचाभरणानि परिधाय

१.=रजकशिला ॥

सर्वथा निर्धनीभूय शिरो मुण्डयित्वा गर्दभमधिरुह्य काहलादिदुःस्वरवाद्यपुरस्सरं चत्वरमहापथ-राजपथादिषु च भ्रान्त्वा परिहितपीवरनीलीचीवरा मत्पुरस्तिष्ठ, यथा तवोक्तं सर्वं कुर्वे । अथ लोभाऽभिभूतया तया सद्य एव तथैव विधाय कौतुकोत्ताननयनजनैराकुले तत्र देवकुले यावत्स्थीयते, तावत् स कीरस्तत्र तरोर्मूर्द्धनि स्थित्वैवमपाठीत्—

कृते प्रतिकृतं कुर्या-न्न्यायमार्गोऽयमीरितः । भवत्योत्पाटितौ पक्षौ, मया मुण्डापितं शिरः ॥४॥

इति भणित्वा तत्राऽऽगतलोकानां पुरस्तस्याः स्वस्य च वृत्तान्तं निवेद्य यथास्थानं गते शुके लोकैर्निन्दिता सा वेश्यान्यत्र पुरे ययौ । **इति विरुद्धं कुर्वतां विरुद्धकरणे न दोष इत्यर्थे विदुरकीरकथा ॥ १३५ ॥**

॥ १३६ ॥ मूर्खो भक्तिमानप्यनर्थहेतुरित्यर्थे भूप-वानरकथा ॥

पण्डितैर्विरोधोऽपि वरं, न च मूर्खमैत्री। यतः—

पण्डितोऽपि वरं शत्रु-र्मा मूर्खो हितकारकः । वानरेण हतो राजा, विप्राश्चौरेण रक्षिताः ॥ १ ॥

अत्र कथाद्वयं, तथाहि-**गजधरपुरे रिपुदमनो** नाम राजाऽन्यदा विपरीतशिक्षितेन तुरगेणारण्यं नीतः । मृते च तस्मिन्नश्वे तृषाऽऽर्तो राजा जलार्थमितस्ततो भ्रमन्नेकेन वानरेणेक्षितः । शुष्कताल्वोष्ठरसनाऽऽननं तं तृषितं विज्ञाय तेन कपिना शीतलजलमञ्जुलफलपुष्पपत्रादिभिः तथा प्रतिचरितं, यथा स राजा तं कपिं मित्रपुत्रकलत्रादिभ्योऽप्यधिकं प्रेमपात्रं मेने। अथ पृष्ठतः समेतस्य स्वपरिवारस्य कपिवृत्तान्तं निवेद्य देवमूर्तिमिव तं च सुखाऽऽसने निवेश्य स्वपुरमानीय च वरवसनाऽऽभरणभूषितं तं भोजनमज्जनशयनादिषु स्वकृत्येषु राजाधिकारिणं व्यधात्। अन्यदा दोलाखट्वायां सुप्तस्य भूपस्योदरोपरि पतितं पन्नगं विलोक्याऽहो अयमनर्थहेतुरिति ससम्भ्रमेण भक्तिमताऽपि **निर्विवेकेन** तेन यामिकेन कपिना पाणिस्थनिशितकरवालः सर्पोपरि मुक्तः, तेनासिना स सर्पस्तदधस्तात् स्थितश्च स राजा, एवं तौ द्वावपि खण्डीकृतौ मृतौ च। ॥ **इति मूर्खो भक्तिमानप्यनर्थहेतुरित्यर्थे भूप-वानरकथा ॥ १३६ ॥**

॥ १३७ ॥ शत्रुरपि पण्डितो वरमित्यर्थे सम्भ्रचौरकथा ॥

अथ द्वितीया कथा, तथाहि— **मध्यदेशभूषणे सुरसेन**नामनगरे **लीलाधर-लक्ष्मी-धर-गदाधर-भूधर**नामानो जन्मदुर्गताश्चत्वारो द्विजन्मानो वसन्ति । मरणादपि दौर्गत्यमधिकमिति तैर्मेने । यतः—

उत्तिष्ठ क्षणमेकमुद्वह सखे! दौर्गत्यभारं मम।
श्रान्तस्तावदहं चिरान्मरणजं सेवे त्वदीयं सुखम्।

इत्युक्तो धनवर्जितेन सुधिया गत्वा श्मशाने शवो ।
दौर्गत्यान्मरणं वरं वरमिति ध्यात्वेव तूष्णींस्थितः ॥ १ ॥

दौर्गत्येन च तद्गृहेषु भूयान् कलहो जृम्भते । यतः—

अम्बा तुष्यति न मया न स्नुषया साऽपि नाऽम्बया न मया ।
अहमपि न तया न तया वद राजन् कस्य दोषोऽयम् ॥ २ ॥

इति दौर्गत्येन भूयः पराभूतास्ते स्वपुरतो निर्गत्य ग्रामाऽऽकरादिषु भ्रमन्तो **रोहणाऽचल-नाथं नरचन्द्रनाम**नरनाथं सिषेविरे। अन्यदाऽमी द्विजा इति भक्तिमन्तश्चेति प्रीणितेन तुष्टेन राज्ञा दत्तामेकां हस्तमितां रोहणाचलभूमिं खनित्वा ततो निर्गतं सपादलक्षसुवर्णमूल्यमेकैकं रत्नमादाय च ते स्वपुरं प्रति चलन्तोऽरण्यं प्राप्ताः । इतः पन्था विषम इति भिया स्वं स्वं रत्नमुदरान्तर्गिलितवतस्तान् दृष्ट्वा **सम्भरो** नाम तस्करोऽमून् क्वापि विषमे स्थाने हत्वा रत्नान्यादास्ये, इति मत्वा पथिकोऽहमिति जल्पंस्तैः सार्धं पञ्चमः सोऽपि वनं प्रविष्टः । अथ तानागच्छतो विलोक्य वटस्थः **वकीरो**नाम कीरोऽद्य पञ्चलक्षसुवर्णमेतीति भिल्लानाह । तैरपि शोधयित्वा मुक्तेषु तेषु पञ्चस्वग्रतो गच्छत्सु स कीरः पुनस्तथैवोक्तवान् ।

पुनरपि पादत्राणवस्त्रवेणीमुखकर्णादिषु शोधयित्वा मुक्तेषु तेषु [गच्छत्सु पुनरपि कीर आह, उदरस्थपञ्चलक्षसुवर्णमेतीति] चामीषां पञ्चानामप्युदराणि विलोकयिष्याम इति भिल्लस्वामिना ते पञ्चाऽपि रात्रिमेकत्र गृहान्तः क्षिप्ताः। अथ स चौरो दध्यौ यदमीषामेकतमस्याप्युदरे विदारितेऽवश्यं मम मरणं, ममोदरे च विदारितेऽमीषां जीवनमिति मत्वा प्रभाते तदुदरविदारणसज्जो भिल्लभर्ता **सम्भरेणा**भाणि, हे! स्वामिन्नादौ ममोदरे विदारिते यदि वित्तं निस्सरति तदामीषामप्येषैव गतिरिति तेनोक्ते भिल्लपतिना तथैव कृते तदुदरं रिक्तं विलोक्य सत्कारपूर्वकं मुक्तास्ते चत्वारोऽपि तस्करोपकारं मनसि स्मरन्तो द्विजाः स्वं स्वं स्थानं जग्मुः । **इति शत्रुरपि पण्डितो वरमित्यर्थे सम्भरचौरकथा ॥ १३७॥**

॥१३८॥ महद्भिः विरोधोऽप्यर्थसिद्धिहेतुरित्यर्थे शोभनमुनि-धनपालपण्डित कथा ॥

पण्डितैः सह विरोधोऽपि परत्र शर्मणे, यतः—

सद्भिः सह विरोधोऽपि, भवेदायतिसुन्दरः ।
शोभने कृतहास्योऽपि, धनपालः प्रबुद्धवान् ॥ १ ॥

तथाहि— **धारानगर्यां** नागरगोत्रीयो **वैकुण्ठो** नाम सूत्रकण्ठः, तस्य चाऽऽतीवमति-मन्तौ **धनपालशोभननामानौ** तनुजन्मानौ, एकदा गृहमध्यस्थं बहुधनं निधानमलभमानेन तेन

१. तुलना -प्रभावकचरित्रे ।

नष्टनिधानज्ञानविशारदा बहवः पृष्टास्तथापि तदप्राप्त्या वीक्षापत्रेन तेन तत्राऽऽगताः **श्रीयशोभद्रसूरयः** पृष्टा यैद्येकं पुत्रमस्माकं ददासि तदा तव निधिं दर्शयामस्तैरित्युक्ते तेनापि च तथेति प्रतिपन्ने गुरुपादैरहिवलयचक्राऽऽम्नायेन निधिः सद्यो दर्शितः । दैवादन्त्याऽवस्थां प्राप्तेन तेन विप्रेण स्वप्रतिज्ञा शोभनाय ज्ञापिता, प्रतिज्ञाभङ्गेन भृशं खेदं कुर्वाणं पितरं प्रति भवत्प्रतिज्ञामहं सफलीकरिष्यामीति तेनोक्ते तस्मिंश्च मृते परिवारमनापृच्छ्यैव स गुरुभिः सार्धं गतो दीक्षितश्च तैः, यदि कोऽपि जैनश्रमणो **मालवे** स्थास्यति तदा तं मद्भ्राता हनिष्यतीति तेनोक्ते गुरुभिर्द्विनवतिलक्षमिते मालवे स्वयतिविहारो निषिद्धः। **धनपालोऽपि** स्वसहोदरस्याऽमुमुदन्तमाकर्ण्य जैनयतिषु यम इव क्रुद्धो जैनदर्शनस्पर्शनकीर्तनेऽपि महत्पापमिति मिथ्यात्ववासितचेतास्तिष्ठति।

इतो द्वादशाब्दैः **शोभनो**ऽपि शोभनविनयप्रतिपत्त्या व्याकरण-नाममाला-साहित्यादि सर्वं शास्त्रमधीते स्म । एकदाऽनेन दीक्षितेन मालवदेशे विहारहानिरजनीति सङ्घाटकस्पर्धयाऽऽहारग्रहणार्थं गतः **शोभनो** 'भव्याऽम्भोज' इति चतुर्विंशतिजिनस्तुतिकरणाय व्यग्रमनाः पात्रस्थाने दृषत्खण्डमेवादायोपाश्रयमुपागतस्तत्स्पर्धाकारिभिर्हसितोऽहो अस्य लाभोदय! इति च **शोभनोऽपि** मालवविहारमहं करिष्यामीति गुरून् विज्ञप्यैकाक्येव **धारापुरीं** प्रविशन् बहिरागच्छता **धनपालेने**ति वितर्कणावचनं भणता नमश्चक्रे - 'गर्दभदन्त! भदन्त! नमस्ते ' रुष्टोऽप्यसौ भ्राता किं करिष्यतीति निर्भयो मुनिरपि नमस्काराऽनुसारिणमेवाऽऽशीर्वादमाह 'मर्कटिकास्य! वयस्य ! सुखं ते' इति नमस्कारपदाऽनुकारिपदमाकर्ण्य पण्डितोऽयमिति चमत्कृतेन विस्मृतपूर्वमुनिवैरेण **धनपालेन** कस्याऽतिथिरित्युक्तः स मुनिर्भवतामेवाऽहमतिथिरिति जगौ ।

अथ तदोकसि स्थिते मुनौ **धनपालो**ऽपि रन्त्वा गृहमागत्य विहितदेवार्चनश्च यावद्भोक्तुमुपविशति, तावत् स मुनिः स्मृतोऽशनार्थमाकारितश्च । अथ तस्मिन्नेवाहनि केनापि वैरिणा **धनपालस्य** मोदकान्तर्विषं दत्तम्, तस्मिन्नेव मोदके दीयमाने सविषोऽयमिति ध्यात्वा मुनिनापि तस्मिन्निषिद्धे किमन्तर्विषमस्तीति नाऽयमादीयते ? इति **धनपालेनोक्ते** विषमस्तीति मुनिराह । कथं ज्ञायते ? इति तेनोक्ते मुनिनापि तद्ज्ञापनायोष्णोदके मोदकखण्डे निक्षिप्ते शुकपिच्छोपमं तन्नीरं निरीक्ष्य विस्मितो **धनपालो**ऽहो! अद्याऽनेन महात्मनाऽहं जीवित इति विशेषतस्तस्मिँस्तुष्टः कथमिह विषं भवता ज्ञातमिति तमवोचत्, **शोभनो** मुनिराह—

दृष्ट्वाऽन्नं सविषं चकोरविहगो धत्ते विरागं दृशो-
र्हंसः कूजति सारिका च वमति क्रोशत्यजस्रं शुकः।
विष्टां मुञ्चति मर्कटः परभृतः प्राप्नोति मृत्युं क्षणात्।
क्रौञ्चो माद्यति हर्षवांश्च नकुलः प्रीतिं च धत्ते द्विकः ॥ २ ॥

१. तुला - उपदेशप्रसादे व्या. २३ ॥

तेनेमं मोदकं विलोक्य पञ्जरस्थोऽयं चकोरो नयने न्यमीलयत्, निकटस्थोऽयं मर्कटोऽपि विष्टां चकार, इति लक्षणैर्मया विषमज्ञायि। इति निशम्य विस्मितः स तस्मिन्नहनि मुनिगृहीतमेवाऽन्नं भुक्त्वा गोष्ठीं विधातुं मुनिपार्श्वे गत्वा च, **शोभनो** मद्भ्राता क्वाऽपि दृष्ट इति तमप्राक्षीत्। स समीप एवास्तीति मुनिनोक्ते सम्यक् तं स्वसहोदरमुपलक्ष्य बाहुभ्यां परिरभ्य च पुरः स्थितो मुनिनोपदिष्टमार्गमशृणोत्, स महात्मा मुनिरपि तां चतुर्मासीं तत्रैव स्थित्वा तं च कनकाऽचलमिव निश्चलं श्रावकं कृत्वाऽन्यत्र विजहार ॥ **इति महद्भिर्विरोधोऽप्यर्थसिद्धिहेतुरित्यर्थे शोभनमुनि-धनपालपण्डितकथा** ॥ १३८ ॥

॥ १३९ ॥ राज्यलुब्धानामनर्थकरणे न त्रपेत्यर्थे मुञ्ज-भोजकथा ॥

परिग्रहोऽसौ कलहादिपातकबीजं, यतः—

प्रद्वेषबन्धुः कलहैकसिन्धुः, प्रमादपीनः कुमताऽध्वनीनः।
औद्धत्यहेतुर्धृतिधूमकेतुः, परिग्रहोऽयं दुरिताऽद्भुतोऽयम् ॥ १ ॥

तेन परिग्रहग्रस्तानां हि न पित्राऽऽदिषु स्नेहः, यतः-

पित्रोरुपास्तिं सुकृतानुशास्तिं, प्राज्ञैः प्रसङ्गं गुणवत्सु रङ्गम्।
परिग्रहप्रेरितचित्तवृत्ति-र्जहाति चैतन्यमिव प्रमीतः ॥ २ ॥

तत्रापि राज्यपरिग्रहः पातकानां पदं, यतः—

राज्यलुब्धेन मुञ्जेन, मारणाय निजैनरैः।
भ्रातृव्योऽपि प्रैषि भोजो, धिग् राज्यं पदमंहसाम् ॥ ३ ॥

[1]तथाहि- **धारानगर्यां** साक्षात्सरस्वतीश्रीमान् **मुञ्जराजो**ऽन्यदा विश्वजननयनाऽऽनन्दनं सहोदरनन्दनं **श्रीभोज**कुमारमुत्सङ्गे निधाय सभास्थितः **पद्मचूलनाम**निमित्तज्ञं कीदृशोऽयं **भोजो** भवितेत्यप्राक्षीत्।

पञ्चाशत्पञ्चवर्षाणि, पञ्च मासान् दिनत्रयम्।
भोजराजेन भोक्तव्यं, **सगौडं दक्षिणापथम्** ॥ ४ ॥

इति तेन कथितमाकर्ण्य हा **भोजे** जीवति ममात्मजो न भावी। यदि चेमं मारयामि तदाऽवश्यं मम सुतः स्यादिति पातकवृत्तिराज्यलुब्धेन तेन रहसि भोजमारणाय-निजसेवकस्याऽऽदिष्टम्। पराधीनः सोऽपि निशि **भोज**मादाय तुरगाऽऽरूढो महाटवीं प्राप्यैकस्य वटस्य तले **भोजं** विमुच्य भूपोक्तमुक्तवान्। मत्तातादिष्टं सत्वरं विधीयतामिति **भोजे**नोक्ते, कथयसि किमपि **मुञ्ज**स्येति तेन भणिते च नेत्रजितस्मेराम्भोजो **भोजो** वटपत्रेऽर्कदुग्धेनेत्यलिखत्-

मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः।
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।

---

१. तुला- *प्रबन्धचिन्तामणौ मुञ्जराजप्रबन्धे* ॥

अन्ये चाऽपि युधिष्ठिरप्रभृतयो यावद्भवान् भूपतिः।
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति ॥ ५ ॥

न धरणी धरणीधर-स्युं गई, न नलभूपति भू सरसीलई ।
खयगया कुरुपंडवजगधणी, वसुमती किम कहियइ आपणी ? ॥ ६ ॥

इति लिखितं पत्रमादाय स **भोजमवोचत्**, हे **भोज** ! साक्षात्पापपुञ्जेन **मुञ्जेनेदं** पातकं कारितं, परमहं न करोमीति भणित्वा **भोजं** स्वगृहे विमुच्य सद्यो मारितमृगनेत्रे चाऽऽदाय, '**भोजो** मारितस्तन्नेत्रे चेमे' इति स **मुञ्जं** जगौ।

हन्यमानेन **भोजेन** किमुक्तमिति राज्ञा पृष्टः स तत्पत्रमदीदृशत्। **मुञ्जोऽपि** तत्पत्रं वाचयित्वा बाष्पितनेत्रो दध्यौ, हा मया पापिना राज्यलुब्धेन नररत्नं **भोजो** मारितोऽनेनाघेन घोरे नरकेऽपि मम स्थानं न भावीति पुनः पुनर्भणन् **भोज**मुखाम्भोजदर्शनं विना मम नाहार इति स्वं निर्णयं तस्य सेवकस्य सोऽवादीत्। अथ सप्तभिरप्यहोरात्रैरकृताहारस्य मुञ्जस्य सेवके यथास्थितमुक्तवति मुदितो मुञ्जो भोजं तद्गृहादानाय्य तस्मिन्नेवाहनि शुभे मुहूर्ते राज्ये न्यधात् ॥ **इति राज्यलुब्धानामनर्थकरणे न त्रपेत्यर्थे मुञ्जभोजकथा ॥ १३९ ॥**

॥ १४० ॥ स्त्रीणां रहस्यकथने अवश्यमनर्थ इत्यर्थे शेषनागकथा ॥

हरिणीदृशां मनसि रहस्यं न तिष्ठति, यतः-

स्त्रीणां गुह्यं न वक्तव्यं, प्राणैः कण्ठगतैरपि।
यन्नीतः पक्षिराजेन, यद्वशाद्भुजगेश्वरः ॥ १ ॥

तथाहि- एकदा भूयोभिर्भुजगैरुपद्रुतेन मनुष्यलोकेन विज्ञप्तेन देवेन्द्रेणाऽऽदिष्टो गरुडो भुजगानामष्टौ कुलानि मूलतो विनाश्य नवमं कुलं हन्तुमुद्यतः। प्रभूतं तस्य भयं ज्ञात्वा नागलोकात्प्रणष्टः पन्नगेश्वरो **वाणारसीपुरी**मेत्य विप्ररूपेण बहूनि छात्राणि पाठयन्नेकां **सुरूपा**नामद्विजसुतां परिणीय च देवशक्त्या पूरितसर्वसमीहितः सुखेन तत्रैकस्मिन् रहोगृहे तस्थिवान्।

हे प्राणाधिनाथ! राजाऽमात्यादिवृत्तिं विना त्वं यत्सकलं समीहितं सुखमनुभवसि तत्कुतः कथमिति भूयसा निर्बन्धेन **सुरूपया** पृष्टः स स्वं स्वरूपं जगौ। वैनतेयोऽपि चटकरूपेण तं गवेषयन् गङ्गापरिसरे जलार्थमागतायाः **सुरूपाया** घटोपरि निषण्णस्तया समं वर्त्मन्यचलत्। तदा च हे सखि ! तव भर्ताऽसौ राजसेवादिवृत्तिं विना कथमनुदिनमिदमनुपमं सुखमनुभवतीति **रत्नावल्या** सख्या पृष्टा **सुरूपा** निजपतिस्वरूपं यथास्थितमभणत्। वैनतेयोऽपि तदाकर्ण्य तथैव तद्गृहमागत्याऽऽत्मवैरिणं नागराजं केशेषु गृहीत्वा प्रकटितस्वरूपो गगनमुत्पपात। गत्वा च गहने वने हन्तुमुद्यतं तं जाततात्कालिकधीः सर्पाऽधिराजो जगौ—

स्त्रीणां गुह्यं न वक्तव्यं, प्राणैः कण्ठगतैरपि ।
हन्यते पक्षिराजेन, नागराजफणी यतः ॥ २ ॥

तथापि हन्तुमेव प्रवृत्तं तं पुनः सोऽवोचत्—

एकाक्षरप्रदातारं, यो गुरुं नैव मन्यते।
श्वानयोनिशतं गत्वा, याति चाण्डालयोनिषु ॥ ३ ॥

मया तु तुभ्यमेकः श्लोको दत्तस्तेन यथोचितं कुरु? सौपर्णेयोऽपि ममाऽयं गुरुत्वेन पूज्य इति तं सत्कृत्य मुमोच ॥ **इति स्त्रीणां रहस्यकथनेऽवश्यमनर्थ इत्यर्थे शेष-नागकथा ॥ १४० ॥**

॥ १४१ ॥ बुद्धिविषये मतिशेखरमन्त्रिकथा ॥

बुद्धिमद्भिरमरा अपि वञ्चयन्ते, यतः-

मातुः सुतायाः पितृ[ता]पुत्रयोश्च, कथाप्रपञ्चादमरोऽप्यवञ्चि ।
स्वबुद्धिबन्धात्सचिवेन चौर्यं, कृत्वाप्यहो धीपरिणाम एषः ॥ १ ॥

तथाहि— **दत्तपुरे नरसिंहस्य** राज्ञो **मतिशेखर**नामा मन्त्री । एकदा कियत्यः कलास्त्वया पठिताः सन्तीति राज्ञा पृष्टो मन्त्री कलानां त्रिसप्ततिमहमधीतोऽस्मीत्यवोचत्। कैषा कलाधिकेति भूपेन भणितेऽवसरे दर्शयिष्यामीति भणित्वा मन्त्री गृहं गतः। अन्यदा मन्त्रिणा मज्जनं सृजन्त्याः पट्टराज्ञ्या हारमादाय स्वदास्याः परिधापितः। राजाऽथ सम्यगुपलक्ष्य ममाऽसौ हारो भवता चोरित इति मन्त्रिणमतर्जयत् । मम पूर्वजानामसौ हारो न तु देवपादानामिति तेनोक्ते राजोचे यदीत्थं तदा **कुबेर**यक्षगृहप्रवेशरूपं दिव्यं कुरु स च यक्षः स्वगृहप्रविष्टमसत्यवादिनं हन्ति, सत्यवादिनं च पूजयतीति प्रसिद्धिः। सचिवोऽपि साहसं धृत्वा सायं पौरसमक्षं यक्षगृहं प्रविष्टः। अयमसत्यवादी पापात्मा ममौकसि प्रविष्टोऽस्तीति क्रुद्धो ज्वलनज्वालां वमन् भुवमान्दोलयन् लोहमुद्गरं च करे वहन् साक्षाद्यम इव स यक्षः प्रादुरभूत्। रे पाप ! असत्यवादिनं त्वामद्य मुद्गरेण खण्डशः करोमीति वादिनं तं मन्त्री प्रोचे, हे यक्षराज ! प्रथममाजन्मभवं ममैनं संशयं छिन्धि, तदनु यथारुचि कुर्या इति तेनोक्ते वद तं संशयमिति यक्षेण भणिते स स्माह-

तथाहि- **फडावासग्रामे धरणकरणनाम्नोः** कुटुम्बिनोः पितृपुत्रयोः पत्न्यौ मृते। अन्ये पत्न्यौ विधातुकामौ तौ **मनोरमं** पुरं प्रस्थितौ पुरो गच्छन्त्योर्द्वयोः स्त्रियोः पदानि पश्यतः स्म। ते स्त्रियौ मातृसुते अभूताम्। तत्र माता वामना, तेन तत्पदानि लघूनि, सुता च प्रलम्बा, तेन तत्पदानि गुरूणि। इति तत्पदव्यवस्थां विलोक्य **धरणो**ऽभणत्, हे पुत्र ! यदि दैववशादिमे स्त्रियावावामङ्गीकरिष्यतस्तदा गुरुपदा मम गृहिणी, लघुपदा च तवेति तौ मिथः प्रतिशृणुतः स्म ।

अथ मिलिताभ्यां स्त्रीभ्यां तद्वचने स्वीकृते पितृपुत्राभ्यां ते उभे अपि प्रतिपन्नरीत्या कलत्रत्वेन रक्षिते। अथ तेषां चतुर्णामपि जातानामपत्यानां मिथः कः सम्बन्ध इति ममोरसि संशयोऽस्ति। तस्मिन् संशयाऽऽवर्त्ते पतितस्य किं वच्मीति चिन्तयतः **कुबेरयक्षस्य** प्रातरभूत्। प्रभाते च तं मन्त्रिणं तथैव विमुच्य तिरोहिते यक्षे मन्त्री सत्य इति पूजकेन विज्ञप्ते विस्मितो राजा मन्त्रिणं सत्कृत्य व्यसाक्षीत्। अथ कियत्सु दिनेषु गतेषु मन्त्री तं हारं राज्ञे दत्त्वा हारचोरणयक्षवञ्चनादिकमाविष्कृत्य स्वप्रतिपन्ने समधिककलाभणनेऽभिहिते तुष्टो राजा तं विशेषतो बह्वमन्यत ॥ **इति बुद्धिविषये मतिशेखरमन्त्रिकथा ॥ १४१ ॥**

॥ १४२ ॥ भाग्ये सारङ्गतुरङ्गपालकथा ॥

कुञ्जकन्दरादिषु प्रविष्टमपि पुण्यवन्तं श्रीरनुसरति, यतः-

यद्यपि कृतसुकृतादरः, प्रविशति गिरिकन्दरोदरेषु नरः।
करकलितदीपकलिका, तथापि लक्ष्मीस्तमनुसरति ॥ १ ॥

अपि च-

पुंसां शिरोमणीयन्ते, धर्मार्जनपरा नराः।
आश्रीयन्ते च सम्पद्धि-र्लताभिरिव पादपाः ॥ २ ॥

तेन पुण्यप्राग्भारमाहात्म्यं विलोक्य कः पुण्ये स्थिरो न स्यात्? यतः—

भूपविप्रसचिवाश्वपालकान्, रूपशास्त्रमतिभाग्यभासुरान्।
श्रोत्रवर्त्मनि विधाय नाभवत्कस्यः धीः सुकृतवर्त्मनि स्थिरा? ॥ ३ ॥

तथाहि— **कूर्मग्रामे रूपचन्द्रस्य** राज्ञो **बुद्धिधनः** पुरोहितः, **सुबुद्धिः** सचिवः **सारङ्गाह्वश्च** तुरङ्गपालकः एकदा चत्वारोऽप्यमी स्वस्वगृहभारं स्वस्वपुत्रेषु निवेश्य स्वस्वगुणपरीक्षार्थं स्वपुरतो निर्गत्योत्तरां दिशमधिश्रयन्ति स्म। अथ प्रथमतः समेते **सिंहासने** पुरे हे स्वामिन्नद्य व्ययोचितं धनं पुरतस्त्वमानयेत्यन्यैस्त्रिभिरुक्तस्य पुरं प्रविष्टस्य भूपस्य रूपविस्मितैर्लोकै रजतशतं दत्तम् । तस्मिन्नहनि तेन धनेन वृत्तिं विधाय पुरतश्चलितेषु तेषु **रत्नरथे** पुरे प्राप्तेषु, हे पुरोहित! अद्य व्ययोचितं वित्तं पुरतस्त्वमानयेत्यन्यैरभिहितः स पुराऽन्तः प्रविष्टः। तदा च तत्र **सिंहराजस्य** सभायां **प्रतिष्ठानपुरादागतेन बलभद्रेण** कविनैषा समस्या पृष्टा—

अम्भोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः।
पण्डितपञ्चशतेनाऽस्यामपूरितायां विषादविधुरे च राज्ञि स पुरोधाः सद्यस्तामपूरयत्।
अम्बा कुप्यति तात! मूर्ध्नि निहिता गङ्गेयमुत्सृज्यतां।
विद्वन् ! षण्मुख! का गतिर्वद चिरादस्याः स्थिताया इह।

रोषोत्कर्षवशादशेषवदनैः प्रत्युत्तरं दत्तवा-
नम्भोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥ ४ ॥

चित्तचमत्कारकारककाव्यबन्धेन विशेषतस्तुष्टेन राज्ञा रजतद्विशतं तस्मै पुरोधसे दत्तम्। अथ तत्र तेन धनेन वृत्तिं कृत्वाऽग्रतः प्रस्थितेषु तेषु **सम्भलपुरं** च गतेषु तथैवान्यैरभिहितो मन्त्री पुरं प्राऽविशत्। तत्रापि **वैरिसिंहस्य** राज्ञो वैरिभूपैस्तोलनाय हस्ती प्रहितोऽभूत्, अत्रार्थे किङ्कर्तव्यमूढस्य राज्ञः पर्षदि स मन्त्री प्राप्तो हस्तितोलनं प्रतिपेदे । अथाऽध्यारोहितगजे पोते नदीजलाऽन्तर्नीते यावति पोते जलं लग्नं तावति पोते रेखां विधाय हस्तिस्थाने दृषद्भिर्भृते रेखां यावज्जलान्तर्गते पोते दृषन्मानेन हस्तिमानं कृत्वा राज्ञः कथिते तेनापि तस्मै रजतत्रिशतं दत्तम्। तथैव तेन प्राणवृत्तिं विधाय पुरो गच्छद्भिर्**भोजपुरं** प्राप्तैस्तैस्तथैवोक्तोऽश्वपालस्तत्पुरं प्रविशंस्तत्स्वामिनो **गुणसेनस्य** राज्ञोऽपुत्रिणो मृतस्य शृङ्गारितमासीत् पञ्चदिव्यं, हस्तिन्या च कुम्भेनाभिषिक्तः स तुरङ्गपालकः, तस्मिन्नेव भाग्यलब्धराज्ये राजनि सिंहासनस्थिते प्राभृतपाणयः पौरा अपि तं प्राणमन् । अथ तदनागमाद्विषादमाप्तास्ते राजादयोऽपि लोकेभ्योऽवगतसमाचारास्तत्समीपेऽभ्यगुः, तेनाप्युत्थाय तेषां यथोचितमादरे कृतेऽवसरकृतप्रणयः पुरोहितः श्लोकमेकमपाठीत्—

रूपेणैकशतं प्राप्तं, विद्यया द्विशतं मतम् ।
बुद्ध्या च त्रिशतं प्राप्तं, भाग्ये सङ्ख्या न विद्यते ॥ ५ ॥

अथ ते त्रयोऽपि तेन सत्कृता भाग्यमेव बलवत्तरं मन्यमानाः स्वस्थानं ययुः ॥ **इति भाग्ये सारङ्गतुरङ्गपालकथा ॥ १४२ ॥**

॥ १४३ ॥ स्त्रीचरित्रे हरिणीनामब्राह्मणीकथा ॥

हरिणीदृशो हि कपटनिकेतनं, यतः—

दुरितवनघनाऽऽली पापतोयप्रणाली, भवकमलमराली शोककासारपाली ।
विकटकपटपेटी मोहभूपालचेटी, विषयविषभुजङ्गी दुःखसारा कृशाङ्गी ॥ १ ॥

अपि च—

सुभ्रवां कुटिलचेष्टितौकसां, मन्महे कपटकेलिमद्भुताम् ।
स्त्रीचरित्रपठनाय पर्यटन्, प्रत्यबोधि हरिणीदृशा द्विजः ॥ २ ॥

तथाहि— **नारदपुर्यामुद्भवाह्वो** विप्रः, तस्य च स्वैरिणीनां शिरोमणि**र्भरणीनाम**गृहिणी, स च व्याकरण-तर्कादिशास्त्राणि भणितोऽपि लोकव्यवहारविकलत्वेन पठितमूर्खोऽयमिति लोके प्रसिद्धः । यतः—

काव्यं करोति परिजल्पति संस्कृतं वा, सर्वाः कलाः समधिगच्छति वाच्यमानाः ।
लोकस्थितिं यदि न वेत्ति जगत्प्रसिद्धां, सर्वस्य मूर्खनिकरस्य स चक्रवर्ती ॥ ३ ॥

एकदा विजनगृहे सुखेन स्वैराऽऽचारः स्यादिति मत्वा, हे नाथ! मूर्खोऽयमिति त्वां लोको हसतीति स्त्रियोक्ते स **वाणारसीपुरीं** गत्वा विशेषतः पठित्वा गृहमागतः।

अहो पुनरयं मम सम्भोगसुखे प्रत्यूहरूपः समेत इति कुलटया तया स पुनरूचे, हे नाथ ! त्वया किं पठितं स्त्रीचरित्रं ? नेति तेनोक्ते जीवं विना वपुरिव, नयनं विना मुखमिव, तद्विना पठितमपि सकलं शास्त्रं मुधेति पुनस्तया प्रेरितः स निरक्षरस्तदर्थं पर्यटन्**महेश्वरपुरे** प्राप्तो जलाऽर्थं व्रजन्तीं **हरिणी**नामद्विजगृहिणीमत्र पुरे स्त्रीचरित्रं किं कोऽपि पाठयतीत्यप्राक्षीत्। कयाऽपि स्वैरिण्या स्त्रियावश्यमयं मूढो वञ्चितोऽस्तीति मत्वाऽहमेव त्वां तत्पाठयिष्यामीत्या-ऽऽहूतः स तया सह तद्गृहमाययौ । तयाऽपि मत्सहोदरोऽयमागत इति स्वपतिप्रभृतीनां निवेद्य मज्जनभोजनादिभिः सत्कृतः स निशि गर्भगृहे सुप्तः। सम्भोगार्थमर्थितश्च त्वं मम स्वसेति तेन निषिद्धे तया द्वारं पिधाय 'कण्ठे लग्न' इत्यभीक्ष्णं भणित्वा धावत धावतेति बाढं पूत्कृते सति सर्वोऽपि तत्परिवारो द्वारमायातः, हे सुन्दरि! त्वदुक्तमहमवश्यं विधास्यामि, मां वराकमितः सङ्कटान्मोचयेति तेनोक्ते तद्भुक्तोच्छिष्टाऽन्नपूर्णमेकं पात्रं भुवि लोठयित्वोद्घाटिते द्वारेऽन्तरागतः परिवारस्तयोचे, मम भ्रातुर्विसूचिकायां जायमानायां कण्ठे ग्रासो लग्नस्तेन च कण्ठे लग्न इति भणन्त्या मया धावत धावतेति पूच्चक्रे ।

इति निशम्य गतेषु तेषु किं स्त्रीचरित्रमधीतमिति सा तमाह । नेति तेनोक्ते तद्गृहिणीस्वरूपे च तया कथिते सोऽपि गृहमागतः स्वस्त्रीचरित्रं निरीक्ष्य वैराग्येण तापसोऽजनि ॥ **इति स्त्रीचरित्रे हरिणीनामब्राह्मणी कथा ॥ १४३॥**

॥१४४॥ कुगुरुभ्रामितानां न सद्गुरुवचसि विश्वास इत्यर्थे पञ्चशत-गताक्षकथा ॥

कुगुरुभ्रामितानां पुंसां सुगुरुवचनेषु विश्वासो न स्यात्, यतः—

उन्मार्गे पातिताः पापैः, सत्सु सन्मार्गदर्शिषु ।
पश्यता भ्रामिता अन्धा, इव कुप्यन्ति देहिनः ॥ १॥

तथाहि—**नालाकच्छे** पुरे **सुरसेन**नामा राजा बधिर-पङ्गु-मूकाऽऽदीनामाजीविका सुकरा, परमन्धानां च दुष्करेति मत्वा स पटहवादनपूर्वमन्धानां पञ्चशतीं मेलयित्वा तेषामशनवसनादि यद्विलोक्यते तत्प्रयच्छति । भूपमानितत्वेन पौरैरपि ते सर्वेऽप्यन्धा भूपवत्सत्क्रियन्ते स्म। इतस्ततो गच्छतामात्मनां दुष्करमिति ध्यात्वा क्रमेण सधनैस्तैरेकः पश्यन् पुमान् सेवकत्वेन रक्षितः। **राजसेनपुरा**ऽधीशो **राजचन्द्रो** राजा गताक्षाणां भोजनादि प्रत्यहं प्रत्येकं चैकं सुवर्णं दत्ते, अतः सर्वेऽपि भवन्तस्तेनाऽऽकारिताः सन्तीति तेन धूर्तेनाऽन्यदा कूटलेखवाचनपुरस्सरं वञ्चिताः। द्विधाप्यन्धास्तेऽप्येनं पुरस्कृत्य तत्करदत्तवित्ता राजसेनपुरं प्रत्यचलन् । अथाऽरण्यं प्राप्तास्ते तेनोचिरे। इतो भृशं विषमे पथि भोजनादि न लभ्यते, तेन

भवतां कृते यावत्पाथेयमानयामि तावद्भवन्तोऽस्मिन् सरले पथि चलन्तु, यदि च कोऽपि वक्ति भवन्तो मार्गभ्रष्टास्तदा स तस्करः प्रस्तरैर्मारणीय इति शिक्षां दत्त्वा, तत्र चैकस्य गिरेः परितः प्रदक्षिणाऽऽवृत्त्या पर्यटतस्तान् कृत्वा च गते तस्मिन् धूर्ते तथैव भ्रमन्तस्ते यूयं मार्गभ्रष्टा इति केनापि पथिकेनोक्तास्ते चौरोऽयमिति तं पाषाणैर्घ्नन्ति स्म। एवमन्येनापि केनाप्यभिहितास्तं प्रहरन्तस्ते क्षुत्पिपासापीडिता मृत्वा नरकं ययुः॥ **इति कुगुरुभ्रामितानां न सद्गुरुवचसि विश्वास इत्यर्थे पञ्चशत-गताऽक्षकथा ॥ १४४॥**

॥ १४५॥ बुद्धिविषये कूरणाऽऽभीरकर्मकरकथा ॥

मन्तुमन्तोऽपि मतिमन्तो न गृह्यन्ते यतः—

प्रायः कृतापराधोऽपि, बुद्धिमान्नैव गृह्यते ।
मोदकान् जग्ध्वाप्याभीरः, सत्योऽभूद्भाण्डभञ्जनात् ॥ १॥

तथाहि—**सणासणग्रामे बलाहकस्य** कुटुम्बिनो बुद्धिमानाभीरकुलोद्भवः **कूरणा**ऽऽह्वः कर्मकरः । एकदा स **कूरणः** स्वस्वामिस्नुषामानेतुं रथस्थो **रथवर्तिनि पुरे** तत्पितृगृहं गतः। सुताया आकारणार्थमागतोऽयमिति तदम्बया जामातृवद्भोजनादिना स सत्कृतस्तत्र कियन्ति दिनान्यस्थात् ।अथ चारुकलिका-कर्पूर-केसर-कङ्कोल-जातिफल[1]-कस्तूरिका-खर्जूरा-ऽक्षोटक-लविङ्गैलादिमदकारिद्रव्यमिश्राणां मोदकानामष्टोत्तरशतमेकस्मिन् मृद्भाण्डे निधाय तन्मुखे च मुद्रां विधाय तत्सङ्ख्यासूचकं च लेखं **कूरणकरे** दत्त्वा सा सुस्थापितां स्वसुतां तेन सह **सणासणग्रामे** प्राहिणोत्। सोऽपि तद्भाण्डं रथमुखे निबध्य रथस्थस्तामादाय पथि चलन् दध्यौ, स्वगृहं गतस्य ममाऽमीषां मोदकानां लेशोऽपि नैष्यति, तेनाऽधुनैवैतानद्मीति मत्वा शोकेन मुखं पिधाय सुप्तायां तस्यां स कियतो मोदकानत्ति स्म।

लेखाद् ज्ञातप्रमाणो मत्स्वामी ममोपालम्भं दास्यतीति ध्यात्वा तद्भाण्डं च भङ्क्त्वा सद्यस्कानां तेषां मोदकानां क्षोदं तं च लेखं लात्वा गृहं गतः स स्वस्वामिने ददौ । वाचितलेखः सोऽपि तं मोदकक्षोदं विलोक्य तत्कपटमजानँस्तस्मिन् प्रीतिपरोऽभवत् । ॥ **इति बुद्धिविषये कूरणाऽऽभीरकर्मकरकथा ॥ १४५॥**

॥ १४६ ॥ नीचानामुपकारकरणेनाऽनर्थ इत्यर्थे हंस-मूषककथा ॥

पापाऽऽत्मसूपकृतमपि प्रत्युताऽनर्थाय स्यात्, यतः—

अनर्थाय भवेन्नीचे-षूपकारः सतामपि । पक्षाऽन्ताऽरक्षितो हंस-माखुः शीघ्रममारयत् ॥ १॥

१. जातिकोश AHPD।

॥ १५६ ॥ कौशल्ये चतुर्थी कथा ॥

अथ पुनरपि दीपवत्कन्याकञ्चुकमुद्दिश्य योगी कथां कथयति। तथाहि— **हरिचन्द्रपुरे हरिषेणनामा** राजा, तेनैकदा **शङ्करो** नाम विप्रस्तस्करत्वेन गृहीत्वा वध्यमानोऽब्रवीत्, हे नरेन्द्र! कुमारस्य विप्रस्य मरणेऽपि न स्वर्गगतिरिति श्रुतिः, तेन मम जङ्घातर्गतरत्नपञ्चकं वितीर्य कयाचिद्विप्रपुत्र्या मामुद्वाह्य पश्चान्मारयेति तद्विज्ञप्तेन रत्नपञ्चकदानपूर्वकमेकस्य द्विजस्य **प्रियमतीनाम**कन्यामुद्वाह्य स हतः। अथ मृते भर्तरि स्वैरिणी सञ्जाता [सा] कस्मादपि पुरुषाज्जातं सुतं स्वनाममुद्राऽन्वितं कृत्वा पुरबहिरौज्झत् । अथ **धर्माख्येन** कुम्भकारेण स बालः पुत्रत्वेन वर्धितः, अन्यदा सायं मृत्तिकाखानिसमीपे रूपरमणीयोऽयमेकाकी भ्रमन् **हरिषेणनृपेण** ददृशे। निर्धनिकोऽयं मम पुत्रो भूयादिति लात्वा राज्ञा राज्ञ्यै समर्पितः । मृते च राज्ञि स **रणसिंहो** नाम राजाऽजनि । अन्यदा श्राद्धाऽवसरे गङ्गां गत्वा पितुः पिण्डदातुमुद्यते तस्मिंस्तीर्थप्रभावाच्चत्वारः करा युगपत्पिण्डग्रहणाय गङ्गाजलतो बहिर्निस्सरन्ति स्म ।

एतत्कौतुकं विलोक्य विस्मितेन तेन शपथपूर्वं पृष्ठा राज्ञी यथाजातं जगौ । अथ मृत्तिकाखानितो ज्ञातसम्यक्तत्स्वरूपेण राज्ञा मृतपतिका सा कुम्भकारपत्नी पृष्ठा यथाजातं निवेद्य नामाऽङ्कितां तां मुद्रां ददौ । मुद्राऽक्षरतोऽवगततद्वार्तामूलेन राज्ञा भणितया तया ब्राह्मण्यापि सत्येऽभिहिते राजा गङ्गां गत्वा मम चत्वारः पितरः, तत्र यः पिण्डं प्राप्नोति स करं धरतु। इत्थमकथयत् । तदा हे कञ्चुक ! तेषां मध्ये कस्य करः पिण्डार्थं प्रगुणोऽभूदिति योगिना भणिते तां जल्पयितुमुत्सुकेन कञ्चुकान्तःस्थितेन वैतालेन जारस्य करः पिण्डं प्राप्नोति, तद्बीजजनितत्वात्, इत्थमत्यर्थमघटमानं भणितमाकर्ण्य जातरोषा विस्मृतस्वप्रतिज्ञाक्रमा सा पार्थिवपुत्री— रे पापकञ्चुक! मा मृषा कथयेति बाढस्वरेणाऽभणत्। चतुर्थवारं राजपुत्री जल्पितेति योगी निःस्वाने प्रहारमदापयत् । हे योगीन्द्र ! कस्य करः पिण्डं लभते ? इति कञ्चुकेनोदिते योगी जगौ, क्षेत्राधिप! शङ्करचौरविप्रस्य करः पिण्डं प्राप्नोति, तस्मिन्नेव मृते सा ब्राह्मणी रण्डाऽजनिष्ट ॥ **इति चतुर्थी कथा** ॥ १५६ ॥

॥ १५७ ॥ दानविषये विक्रमादित्यकथा ॥

अथ प्रभाते हे योगिन्नहं तव किङ्करी, भवांश्च मे स्वामीति वदन्त्यां तस्यां ज्ञातोदन्त-स्तत्पिता तत्रागत्य तं योगिनं प्रणम्य पुरस्तस्थौ । **विक्रमादित्यो**ऽपि स्वं स्वरूपं प्रकटीकृत्य यथास्थितं च निवेद्य तांश्च राजादिपुत्रान् मोचयित्वाऽनूढया तया युतः स्वां पुरीमाययौ । अथ राज्ञि भित्त्यन्तरे स्थिते राजसभां चित्रयन्तं चित्रकलागर्वधरमेकं चित्रकरमपरश्चित्रकरः प्राह, हे मित्र ! किं चित्रकलाहङ्कारं करोषि ? किं चित्रकलारञ्जितो राजा तुभ्यमद्याऽऽनीतामवादिनीं कन्यां दास्यति ? इत्याकर्ण्य दानशौण्डो **विक्रमार्कस्ता**मेतस्मै चित्रकारिणे दत्त्वा तं चित्रकरं देशाऽधीशं चकार ॥ **इति दानविषये विक्रमादित्यकथा** ॥ १५७ ॥

शतबुद्धिः शिरःस्थायी, सहस्रधीः प्रलम्बितः ।
एकबुद्धिरहं भद्रे!, क्रीडामि विमले जले ॥ ४॥

इति तया स्वपतेर्मतिरतिशायिनी मेने ॥ **इति साऽपायस्थानाद् गमने श्रेय इत्यर्थे कर्करभेक-बरण-वरणमकरकथा ॥ १४७॥**

॥ १४८ ॥ बुद्धिविषये बलकनामशशककथा ॥

मतिमान् यत्तनोति तत्र वित्तबलपरिवारराज्यपाण्डित्यवान् । यतः—

यत्कुर्यान्मतिमान्नूनं, तत्कुर्यान्न पराक्रमी । वने सिंहो मदोन्मत्तः, शशकेन निपातितः ॥ १॥

तथाहि— **श्वापदशरणा**ऽभिधे महत्यरण्ये **दुर्धरो** नाम केसरी, तत्रैव च मतिमान् **बलको** नाम शशकः, अन्यदा तस्य मृगारेस्त्रासमसहिष्णुभिः सिन्धुर-शूकर-शार्दूल-सारङ्ग-शम्बर-शृगालादिभिः श्वापदैस्तद्वधाय **बलको** विज्ञप्तः, मतिमान् सोऽपि तद्वधं प्रतिश्रुत्यैकदा मायया शनैः शनैर्गच्छन्— हे मातुल! जोत्कारं कुर्वन्नस्मीति च भूयो भूयो भणन् कन्दरोदरे सुप्तस्य तस्य पार्श्वे ययौ। प्रत्यहं तत्रैव तिष्ठन्नेकदा कस्त्वमिति तेनोक्ते स स्माह— हे मृगाधिराज! भवद्भयेन सर्वेऽपि श्वापदाः प्रणष्टाः, परमहं तु देवपादप्रेष्यत्वेन निर्भयोऽत्र स्थितोऽस्मीति तेन भणिते सिंहेनापि तदुक्तमङ्गीचक्रे । एवं मायया तमात्मसाद्विधायैकदा **बलकस्तं** जगौ, हे देवाऽस्मिन्नरण्ये भवतां प्रतिभटः कोऽपि समागतोऽस्ति।

स क्वाऽस्तीति, तेनोक्ते शशकः प्रोचे— आगम्यतां देवपादा ! यथा तमहं दर्शयामीति भणित्वा पुरस्ताद्बलकः पृष्टे च **दुर्धर** एवमेकस्य कूपस्य समीपे तौ द्वावपि प्राप्तौ। तदा च **बलके**नोक्तं— हे स्वामिन् ! पश्याऽस्मिन् कूपे भवत्प्रतिभटोऽस्ति । दुर्धरोऽपि तत्कूपजलाऽन्तः स्वप्रतिबिम्बे सञ्जातप्रतिभटबुद्धिः स्वं वैरिणं हन्मीति धिया तदुपरि कूपे पतितो मृतश्च। अथ शशकेन तन्मरणे ज्ञापिते सर्वेऽपि श्वापदाः सुखभाजो बभूवुः । ॥ **इति बुद्धिविषये बलकनामशशककथा ॥ १४८॥**

॥ १४९ ॥ गुरु-कुगुरुविषये सिंह-शृगालकथा ॥

सुगुरुर्हि स्वमन्यांश्च तारयेत् यतः—

अवद्यमुक्ते पथि यः प्रवर्तते, प्रवर्तयत्यन्यजनं च निःस्पृहः ।
स सेवितव्यः स्वहितैषिणा गुरुः, स्वयं तरंस्तारयितुं क्षमः परम् ॥ १॥

कुगुरुस्तु उभावपि मज्जयेत्, यतः—

जह लोह-सिला अप्पं पि, बोलए तह विलग्ग-पुरिसं पि ।
इअ सारंभो अ गुरू, परमप्पाणं च बोलेइ ॥ २॥

अपि च—

---

१. AHP कन्दरोदरे । २. AHP सु × । ३. AHP स्वयं तरंस्तारयितुं क्षमः परं । स सेवितव्यः स्वहितैषिणा गुरुः ॥

स्वं परांश्च गुरुरुद्धरेद्भवा-त्रेतरश्च बहुदुःखसङ्कुलात् ।
यन्निदर्शनमिहैणनायकः, फेरुकश्च शशिकर्षणोत्सुकौ ॥ ३ ॥

तथाहि—**भूरिभीषणनाम्नि** वने **कृशोदर**नामकेसरिणं सिन्धुर-शूकर-शृगालादयः सर्वेऽपि श्वापदाः सेवका इव सिषेविरे। एकदाऽतीवविशदे कूपोदके राकानिशि शशिनं सङ्क्रान्तं विलोक्य शृगालाः कृशोदरायेति व्यज्ञपयन्- हे नाथ ! साम्प्रतं गगनोदरं स्फुटितं, तेन शशी वराकः कूपान्तः पतितो ब्रूडन् भयेन भृशं कम्पते। दर्शयतां[1] कस्मिन्नन्धौ पतितोऽस्ति शशधरः, यथा तमहं निष्कासयामीति भणित्वा पुरः शृगालाः, पृष्ठतश्च स सिंहः, एवं सर्वेऽप्यमी तत्कूपोपकण्ठमागताः।

अथ तैर्दर्शितं शशिनं तत्राऽलोक्याऽहो मूर्खा एते, जले सङ्क्रान्तमिन्दुं ब्रूडितमिति यद्वदन्तीति मत्वा स तानाह- मम लाङ्गूलं लगित्वा कूपे प्रविष्टेन भवतामेकतमेन तत्पयसि विलोडिते शशी निःसरिष्यतीति तेनोक्ते तेषामेकतमेन तथैव विहिते शशिनं कूपान्तरदृष्ट्वा नभसि च दृष्ट्वा अहो अस्मत्स्वामिबुद्ध्या कूपात्समुद्धृतः शशीत्यमन्यन्त। सिंहेनापि स्वबलेन पुच्छलग्ने तस्मिन् कूपात्कर्षिते ते सर्वेऽपि स्वस्थानं गताः।

अथ पुनरप्येकदा तथैव शशिनं विलोक्य, किं स्वामिविज्ञप्त्या! वयमेवैनमिन्दुमितो निष्कासयिष्याम इति मत्वा तेष्वेकतमस्य प्रलम्बितं पुच्छमालम्ब्यैकः शृगालो यावत्कूपे प्रविशति, तावत्तद्भारमसहिष्णुः प्रलम्बितपुच्छो गृहीतपुच्छश्च द्वावपि तौ शृगालौ तत्र कूपे पतितौ मृतौ च। एवं सुगुरुकुगुरू सिंहशृगालाविव भवकूपोत्तारकाऽतारकौ ॥ **इति सुगुरुकुगुरुविषये सिंह-शृगालकथा ॥ १४९ ॥**

॥ १५० ॥ जिनभक्तिविषये जिनदत्तश्रेष्ठिकथा ॥

सौभाग्याऽऽदिगुणगणः पूज्यपूजाविधायिनमनुधावति, यतः-

ज्योतिर्जालमिवाब्जिनीप्रियतमं प्रीतिर्न तं मुञ्चति ।
श्रेयःश्रीर्भवतीह तत्सहचरी ज्योत्स्ना सुधांशोरिव ।
सौभाग्यं तमुपैति नाथमवनेः सेनेव तं काङ्क्षति ।
स्वर्निर्वाणसुखं वशेव तरुणं योऽर्चां विधत्तेऽर्हताम् ॥ १ ॥

सन्तापाऽऽदिदोषा अपि जिन[भक्ति]जुषां न स्युः, यतः—

उपसर्गाः क्षयं यान्ति, छिद्यन्ते विघ्नवल्लयः । मनः प्रसन्नतामेति, पूज्यमाने जिनेश्वरे ॥ २ ॥
[लघुशान्तौ-१८]

अपि च—

देवाधिदेवस्य यथोक्तरीत्या, भक्तिं सृजन् को न लभेत लक्ष्मीम्? ।
जामेयतामाप्य सुरश्चकार, श्रीशान्तिभक्तेर्वणिजोऽर्थसिद्धिम् ॥ ३ ॥

१. AHPD। कस्मिन् कूपे – मु.॥

तथाहि — **करणासरग्रामे जिनदत्तस्य** श्रेष्ठिनः **कमलश्रीः** कामिनी, **श्यामलिक**श्च सुतः ।

जिणभवणबिंबपुत्थय-संघसरूवेसु सत्तखित्तेसु ।
वविअं धणंपि जायइ, सिवफलयमहो अणंतगुणं ॥ ३ ॥

इत्यादिसुगुरूपदेशमाकर्ण्य बहुवित्तव्ययेन स श्रेष्ठी **श्रीशान्तिनाथस्य** प्रासादं प्रतिमां च कारयित्वा प्रत्यहं पूजां विधत्ते स्म । अथ तत्स्त्रिया कियति वित्ते जारेण सार्धं विनाशिते, कियति चात्मसाद्विहिते स श्रेष्ठी क्रमेण निर्धनः स्वपुराऽऽसन्ने **नन्दिसरे** पुरे कृषीबलत्वेनाजीविकां विदधाति स्म। इतः स्वस्वामिसेवकस्य दौर्गत्येन कम्पिताऽऽसनो **गरुड**यक्षो जामेयरूपवान् क्षेत्रस्थं तं श्रेष्ठिनमभ्यगात् । सोऽपि भागिनेयं बाहुभ्यां परिरभ्य स्वागतमप्राक्षीत् ।

देवोऽपि तस्य बहुदिनकृत्यमेकघटिकया कृत्वा तत्कणस-भारमुत्पाट्य च गृहागतो मातुलानीं प्रणम्य मातुलेन सह भोक्तुमुपाविशत् । तयाप्यकस्मात् सजामेये प्रिये समेते वेश्मस्थं जारं गमाणिमध्ये निक्षिप्य जारकृते कृतं परमान्नपक्वान्नादि वर्यभोज्यमेकान्ते पिधाय कदन्ने परिवेषिते देवोऽवदत्, हे मातुलानि! पिहितं भोज्यमानयेति भणिते सा दध्यौ, नूनमसौ डाकिनिकः, कथमन्यथा रहो विहितं वेत्तीति तया परिवेषितं परमान्नादि भुक्त्वोत्थितो जामेयः कणस-भारं जारोपरि निक्षिप्य कणांस्तृणेभ्यः पृथक् पृथक् कृत्वा तं जारं जर्जरीकृत्यैकान्ते स्थितः **श्यामलिक**विवाहमाश्रित्य श्रेष्ठिनमभाषिष्ट । हे महानुभाव! धनं विना विवाहवार्ता दुःसाध्येति तेनोक्ते, तेन च तया भुवि निहिते सर्वस्मिन् वित्ते दर्शिते स पुत्रविवाहममण्डयत्। तयाऽऽहूतः स जारो भोजनार्थमागन्तुमशक्नुवन् स्त्रीवेषेण स्त्रीमध्ये भोक्तुमुपविष्टो दृष्टश्च देवेन।

अथ देवेन मोदकपरिवेषणसमये गमाणिमध्ये त्वमासीरिति भणिते नेति च तेनोक्ते, अहो अस्या मोदका न कल्प्यन्ते, एवमन्यपक्वान्नपरमान्नादिष्वपि तेन देवेन तथैव भणिते, स जारस्तया स्वैरिण्या मुक्तान् दशमोदकानादाय गच्छन् देवेनावसितः, अथ देवेन मण्डपद्वारे स्थितेन गच्छतीनां तासां स्त्रीणां मण्डपवर्धापनार्थमुक्तेऽनुक्रमेण तथैव कुर्वतीषु तासु तत्कक्षान्तरालात्पतितेषु तेषु मोदकेषु तं जारं लोकसमक्षं बाढं निहत्य स्वरूपं च प्रकटीकृत्य **कमलश्रियः** शिक्षां दत्त्वा स्वाऽऽस्पदं गतः । स श्रेष्ठी ततो देवसांनिध्याद्वित्तवान् भूत्वा समये देवोऽभवत् । ॥ **इति जिनभक्तिविषये जिनदत्तश्रेष्ठिकथा ॥ १५०॥**

इति पं० श्रीकमलविजयगणि पं० श्रीहेमविजयगणिविरचिते
श्रीकथारत्नाकरे षष्ठस्तरङ्गः समाप्तः ।

॥ श्रीरस्तु ॥

॥ ७॥ सप्तमस्तरङ्गः ॥

॥ १५१॥ अज्ञानतः क्रियायां हास्यास्पदमित्यर्थे देवसीवणिक्कथा ॥

अज्ञानतः क्रियापरोऽपि हास्यं याति, यतः—

अज्ञानेन क्रियां कुर्वन्, हास्यस्थानं भवेन्न किम् ।
खीमसीवणिजा सार्धं, देवसीव वणिक् पुरा ॥ १॥

तथाहि— **मध्यमे** पुरे **खीमसी-देवसी**नामानौ द्वौ वणिजौ श्रावकौ सुहृदौ वसतः स्म। स च देवसी साधुश्रावकसंस्तवाभावादुपासकक्रियास्वकुशलत्वेन सर्वथा विस्मृतषडाऽऽवश्यकविधिरजनि। एकदा प्रतिक्रमणं कर्तुं गच्छता खीमसिना हठेनाऽऽकारितेन तेन मम किमपि नायातीति भणिते सोऽवोचत्, यथाहं करोमि भणामि तिष्ठाम्युपविशामि च, तथा त्वयापि कर्तव्यमिति भणितः स तेन सममुपाश्रयमागत्य तथैव व्यधात् । अथ क्रमेण दैवसिकप्रतिक्रमणस्थापनाऽवसरे 'देवसियपडिक्कमणं ठाउं' इति खीमसिनाऽभिहिते देवसी दध्यौ, अस्मिन्नवसरेऽहमनेन पृष्टस्तदाहमप्येनं पृच्छामीति मत्वा 'खीमसीअ ! पडिक्कमणं ठाउं' इति तेन देवसिना भणिते सर्वेऽपि तत्रस्थाः श्रावकाः साधवश्च जहसुः । **॥ इत्यज्ञानतः क्रियायां हास्याऽऽस्पदमित्यर्थे देवसीवणिक्कथा ॥ १५१ ॥**

॥ १५२॥ अज्ञातवक्तृ-श्रोतृविषये कुटुम्बिकमूरण-लाखणकथा ॥

अत्रार्थे द्वितीया कथा-**बूसाणाग्रामे** अतीवमूर्खो **मूरणो** नाम कुटुम्बिकः, स चैकदा मूल्येन **लाखण**नामानमेकमतीवमूर्खं कर्मकरमतीवपुष्टं क्षेत्रसीम्नि खलं निर्मातुमाकारितवान्। मम किमपि नाऽऽयातीति **लाखणेनो**क्तेऽपि यथाहं करोमि तथा त्वयापि विधेयमिति शिक्षितस्य तस्य शिरसि पयःपूर्णं कुम्भं दत्त्वा स्वशिरसि च निहितगोमयेन तेन खलोचितप्रदेशे गत्वोर्द्ध्व स्थितेनैव गोमये भुवि क्षिप्ते स तं कुम्भमपि तथैव न्यक्षिपत् । आः पाप ! किमिदमकारि? तेनाप्येवमेव भणितं, **मूरणस्तं** निहन्तुमुद्यतः, **लाखणो**ऽपि तं हन्तुमेवोद्यते पुरतो मूरणः पृष्ठतश्च लाखण एवं धावमानयोस्तयो**र्मूरण**स्य परिधानवस्त्रे कण्टके लग्ने मूरणं नग्नं विलोक्य **लाखणो**ऽपि नग्नोऽभूत्। तयोर्नग्नयोस्तथैव धावमानयोरथ जलार्थं पुराद्बहिर्यान्त्याः स्वपत्न्या उत्तरीयवस्त्रमादाय **मूरणेन** परिहिते **लाखणो**ऽपि तस्याः परिधानवस्त्रं बलात्कारेणाऽप्यादाय परिहितवान् । अथ तां नग्नां तौ च धावमानौ विलोक्य सविस्मयैर्लोकैः पृष्टे **लाखणेन** यथास्थितमभिहिते अहो अहो मूर्खाविमावित्यभिधाय लोकेषु गतेषु तेऽपि स्वस्थानं गतवन्तः ॥ ***इत्यज्ञातवक्तृ-श्रोतृविषये कुटुम्बिकमूरण-लाखणकथा ॥ १५२॥***

॥ १५३ ॥ कौशल्ये एका कथा ॥

दानशौण्डानामर्थिसङ्गमः प्रमोदाय स्यात्, यतः—

सञ्जातात्मजसम्भवादिव महासिद्धिप्रसादादिव, प्राप्तैश्वर्यपदादिव स्थिरतरश्रीभोगयोगादिवै[1]।
लब्धस्वर्णरसायनादिव सदा सङ्गादिव प्रेयसां, देहीत्यक्षरकर्णनादपि भवेद्दातावदाताननः ॥ १ ॥

तेन दानिनां किमप्यदेयं न स्यात्, यतः—

कष्टात्प्राप्तामपि प्रीतो, विक्रमश्चित्रकारिणे ।
अवादिनीं ददौ कन्यां, किमदेयं हि दानिनाम् ॥ २ ॥

एतत्कथानकान्तर्गतं कथाचतुष्टयं वर्तते, तथाहि— **उज्जयिन्यां** नगर्यां परदुःखकातरः परस्त्रीसहोदरः श्रीमान् **श्रीविक्रमादित्य**भूपतिरेकदा राजपाटिकायां व्रजन्नेकं शीर्णाम्बरं त्रुटितचरणत्राणं दूरदेशादागतं दूतं विलोक्य कुतस्त्वं समागा एवमप्राक्षीत् । **कनकसार**पुरादहं समागामिति तेनोक्ते तत्र किमप्याश्चर्यं त्वया दृष्टमिति नृपेण भणिते स स्माह— देव श्रूयतां तत्रत्यमद्भुतं, तत्र **कनकसुन्दरस्य** राज्ञः स्त्रैणशिरोमणिस्तिलकश्रीः सुता।

अन्यदा पितृभ्यां विवाहार्थं भणिता सा कथामकथयत्, रात्रौ चतुरो वारान् यो मां जल्पयिष्यति स मम स्वामी, न चेत्स मम किङ्कर इति तन्निर्णयवार्तां सर्वत्र प्रथितामाकर्ण्य बहवो राजाऽमात्यश्रेष्ठिसार्थवाहसेनानीप्रभृतिसूनवस्तदर्थमागतास्तामजित्वा तदौकसि मुण्डित-मुण्डा मलिनतुण्डा निगडितचरणाः स्त्रीवेषाऽऽभरणाः प्रत्यहं पानीयं वहन्तीति तत्रत्यमद्भुतमहमद्राक्षम्, इत्यद्भुतनिवेदिनि तस्मिन् सत्कारपूर्वकं विसृष्टे तेषां राजादिपुत्राणां दुःखं तस्याश्चाऽभिमानं निराकरिष्यामीति राजा **वैतालिकं** स्वकिङ्करं सुरं मनसि कृत्वा तत्पुरमगात् । तत्र च योगिवेषेण भ्रमन् राजा राजद्वारे निःस्वाने प्रहारमकरोत् । अस्मत्स्वामिनीं जेतुं कोऽप्यागत इति तत्रागताभिस्तच्चेटीभिः स योगी विलोकितः, कथितं च तत्स्वरूपं स्वस्वामिन्यै, तयाऽऽकारितः सोऽप्यन्तर्गत्वा दीपकरम्ये वासहर्म्ये योगिवेषेणैव विष्टरे स्थितो विष्टरस्थायाः सकलालङ्कारशोभितायास्तस्याः कथां कथयितुमुद्यतः स्माह- हे दीपक ! इयमश्मतोऽप्यतिकठिना हुंकारमपि न दत्ते, तेन यदि त्वं हुंकारं दत्से तदा किंचित्कथानकं वच्मि, तदा च दीपान्तःस्थितेन वैतालिकेन तथेति प्रतिपन्ने राजा कथां कथयति स्म। तथाहि—

कलासरग्रामवासी **नारायणो** नाम विप्रः **कमला**नामस्वगृहिणीमानेतुं सप्तवारान् श्वशुरौकसि गतः, परं सा केनापि कारणेन नैति स्म । अथाऽष्टमं वारं तामानेतुं गच्छता **केशवा**ऽऽह्वमित्रयुतेन पथि प्राप्ते **मृत्युञ्जय**नाम्नि तीर्थे **महेश्वरस्य** पुरस्तादित्यभाणि, हे देव ! अस्मिन् वारे यद्यहं स्वप्रियामादायाऽऽगमिष्यामि तदा तव कमलपूजां करिष्यामीति भणित्वा

१. प्रकटित प्रौढ प्रमोदादिव ।

स तामादाय **देवकुलपुरः** समेतो मित्रमवोचत् । हे मित्र! महादेवं प्रणम्य यावदागच्छामि तावद्भवताऽत्रैव स्थेयमिति मध्ये गत्वा करवालकृत्तस्वशिरःकमलेन **महेश्वरस्य** पूजां विधाय मृते तस्मिंस्तत्रैव पतिते विलम्बं विलोक्य मध्ये समेतः **केशवस्तं** तथाविधं विलोक्य दध्यौ, यद्यहमेनामादाय गृहे गच्छामि, तदाऽवश्यमस्यां लुब्धेनाऽनेन मित्रद्रोहिणा पापिना स्वसुहृन्निहत इति मम कलङ्को भवितेति तस्मिन्नपि तथैव पतिते, द्वयोरपि विलम्बेन भृशं भीता मध्ये गता सा तयोरिमामवस्थां विलोक्य दध्यौ, यद्यहं श्वशुरस्य पितुर्वा गृहमेकाकिनी यामि, तदा स्वैरिण्याऽनया पतिदेवरौ हताविति कलङ्कः स्यात्तेन ममाप्यनयोरिव युक्तमिति तेनैवाऽसिना स्वं शिरश्छेत्तुमुद्यतां तां प्रत्यक्षीभूतो भूतेशः स्त्रीहत्यापातकं नाऽऽददेऽहमिति वदन् तत्करादसिमपनयति स्म।

कलङ्ककलितायाः पतिरहितायाश्च मम जीवितेन किं? तेन यदीमौ जीवयिष्यसि तदा मम प्राणा नान्यथेति तन्निर्णयं ज्ञात्वा, मम प्रक्षालनवारिणाभिषिक्तौ द्वावपीमौ जीविष्यत इति भगवता शम्भुना भणितमाकर्ण्य तयाप्यौत्सुक्येन विपरीततया सन्धितमस्तकौ तथैवाऽभिषिक्तौ तौ जीवितौ। हे दीप! तदर्थं मिथः कलहायमानयोस्तयोः कस्येयं गृहीणीति योगिना पृष्टे तां जल्पयितुमुत्सुकेन दीपान्तःस्थेन **वैतालेन** पतिमुखस्य पत्नीत्यसमञ्जसं भणितमाकर्ण्य जातकोपाऽऽटोपा विस्मृतस्वनिर्णया सा— रे पापदीप ! मा मृषा ब्रूहीति बाढस्वरेणाऽभणत् । राजकन्यैकशो जल्पितेति निःस्वाने प्रहारमदापयत् । हे योगीन्द्र ! कस्येयं पत्नीति दीपेन प्रतिपादिते मित्रमुखस्येति योगिनाऽभिहिते कथमिति दीपः पुनरप्राक्षीत् । विवाहावसरे हि दक्षिणः करो दीयते, स तु कबन्धगत एव स्यादिति योगिना भणिते एकशोऽनेनाऽहं जल्पिता त्रयो वाराश्चावशिष्यन्ते, तेन विशेषतो मौनवती सा तस्थौ । **इत्येका कथा ॥ १५३ ॥**

॥ १५४ ॥ कौशल्ये द्वितीया कथा ॥

अथ पुनरपि दीपवत्कन्याकुण्डलमाभाष्य योगी कथां कथयति स्म । तथाहि- **धनरथे** नगरे **बलदत्त**श्रेष्ठिनो द्विधा **रूपवती** सुता, सा च पितृमातृभ्रातृमातुलैः पृथक्पृथक्वरेभ्यो दत्ता। अथ विवाहार्थमागतांश्चतुरोऽपि मिथो विवदमानान् विलोक्य मदर्थमहो महान् कलह इति सा जीवन्त्येव वह्नौ प्रविश्य भस्मसादासीत् । तदा तेषामेकस्तया सममग्नौ प्रविष्टः, द्वितीयस्तु स्मशाने भूमिगृहं कृत्वा तस्थौ । तृतीयस्तु भिक्षाचरो भूत्वा भिक्षया लब्धस्यांऽशं चितोपरि विमुच्य शेषं स्वयमत्ति स्म । चतुर्थस्तु तदस्थीन्यादाय गङ्गां गच्छन् पथि प्राप्ते **महानन्दिपुरे** भिक्षार्थं प्रविष्टो **मानदत्त** श्रेष्ठिनो गृहं गतः । तदा च पतिव्रतां **कमलश्री**नाम्नीं तदङ्गनां भिक्षादानेऽन्तरायं कुर्वाणं भृशं रुदन्तं स्वं बालं चुल्हीवह्नौ प्रक्षिप्य भिक्षां दातुमुपस्थितां सोऽवोचत् । हे मातर्मदर्थं बालहत्या जाता, तेनेमां भिक्षामहं न लास्यामीति निषिध्य प्रतिनिवृत्ते

तस्मिन् साऽमृतसेकेन तं बालमुज्जीव्य पुनस्तस्मै भिक्षां दातुमुपस्थिता तेन जगदे- हे मातरेतस्याऽमृतस्यांऽशं वितरेत्यभ्यर्थितया तया दत्तेनाऽमृतेन समं ज्वलितेन तेन सह तत्र गतः स तां जीवयामास ।

अथ हे कुण्डल! तस्यां जीवितायां तदर्थं मिथश्चतुर्णामपि तेषां कलहायमानानां मध्ये कस्येयं पत्नी ? इति योगिनाभिहिते तां जल्पयितुमुत्सुकेन कुण्डलान्तःस्थितेन वैतालेन जीवयितुः पत्नीति भृशमसमञ्जसं भणितमाकर्ण्य कामं सञ्जातेर्ष्या विस्मृतस्वप्रतिज्ञाक्रमा राजपुत्री— रे पापकुण्डल! मा मृषा वदेति बाढस्वरेण जजल्प । द्वितीयवारं राजसुता जल्पितेति स योगी निःस्वाने प्रहारमदापयत् । हे योगीन्द्र ! कस्येयं पत्नी ? तदन्यैश्च कः सम्बन्ध ? इति कुण्डलेनोक्ते स योगी जगौ, अमृतेन जीवयिता पिता, चितामध्यात्सहोत्थितो भ्राता, चितास्थानरक्षिता दासः, भिक्षालब्धांऽशेन भोजनवसनादिदाता पतिः। वस्त्रालङ्कारभोजनादिदानं हि प्रियतमाऽऽधीनमिति योगिना गदिते द्विवारमहमेतेन समं जल्पिता, वारद्वयं चाऽवशिष्यते, इति सा विशेषतो मौनमाधाय स्थितवती ॥ **इति द्वितीया कथा** ॥ १५४ ॥

॥ १५५ ॥ कौशल्ये तृतीया कथा ॥

अथ पुनरपि दीपवत्कन्याहारमुद्दिश्य योगी कथां कथयति, तथाहि—**नरसारे** नगरे **नरपालस्य** भूपालस्य **पुण्यपाल**नामा सुतः, तत्रैव पुरोहितसूत्रधारस्वर्णकारकुविन्दानां **बुद्धिसार-गुणसार-रूपसार-धनसार**नामानः सूनवो राजपुत्रस्य सुहृदः । एकदा पितुर्निदेशेन देशत्यागं चिकीर्षुणा पुण्यपालेन चत्वारोऽपि ते सुहृदः पृष्टाः प्रोचिरे- वयं देहच्छायेव त्वां न त्यजामः, इति तैरन्वितः स स्वपुरतो निर्गतो गहनं वनं प्राप्तः । तत्र तेषु चतुर्षु क्रमेण यामिकेषु राजसुतः सुष्वाप । प्रथमे प्रहरे **गुणसारः** श्रीखण्डखण्डमयीं सर्वाऽवयवशोभितां सुररमणीव रमणीयामेकां पुत्रिकां निर्माय प्रसुप्ते द्वितीये प्रहरे **धनसार** उदस्थात् । तस्मिन्नपि यथोचितचीवरोत्तरीयादिदुकूलानि तस्याः शरीरे परिधाप्य सुप्ते तृतीयप्रहरे **रूपसार** उदस्थात्।

तस्मिन्नपि मणिसुवर्णाद्याऽऽभरणैस्तामलङ्कृत्य सुप्ते चतुर्थे प्रहरे **बुद्धिसार** उदस्थात्। तेनापि मन्त्राऽऽकृष्टस्य भगवतो भानुमालिनः प्रयोगेण जीवितायां तस्यां प्रातरभूत् । हे हार! तां विलोक्य स्वं स्वं कृत्यं **पुण्यपालपुरतो** निवेद्य तदर्थं मिथः कलिं कुर्वतां तेषां मध्ये कस्येयं पत्नी ? इति योगिना भणिते तां जल्पयितुमुत्सुकेन हारान्तःस्थितेन वैतालेन जीवयितुः पत्नीति काममसमञ्जसं कथितं निशम्य जाताऽसूया भूयो विस्मृतस्वनिर्णया राजाऽङ्गजा— रे पापहार! मा मृषा भाषस्वेति बाढस्वरेणाभणत्। तृतीयवारं राजसुता जल्पितेति योगी निःस्वाने प्रहारमदापयत्। हे योगीन्द्र! कस्येयं गृहिणी ? तस्यास्तैश्च कः सम्बन्ध ? इति हारेणोदिते योगी जगौ जीवयिता पिता, घटयिता माता, भूषणदाता मातुलः, वसनदाता प्रेयान्, यतो नग्नां रमणीं पतिरेव पिधत्ते । इति योगिनाऽभिहिते त्रिवारमहमनेन जल्पिता, वारैक्यं चाऽवशिष्यते, इति सा विशेषतो मौनपरा तिष्ठति स्म ॥ **इति तृतीया कथा** ॥ १५५ ॥

तथाहि—**मनोरमानामकुलङ्कषाया:** कुले मराली-मरालौ दम्पती वसत: स्म। अन्येद्युस्तत्कुले क्रीडन्तौ तौ तत्प्रवाहे वहमानमेकं मूषकं पश्यत: स्म। तदा च तत्पयोभैरैरितस्ततो हन्यमानं ब्रुडन्तं तं विलोक्य जातकरुणेन सरलाऽऽत्मना हंसेनाहमेनमितो निष्कासयामीति भणिता हंसी व्याहरत्— हे नाथाऽमी द्विधापि वज्रदशना: पापाऽऽत्मनो नीचाश्च, तेनामीषामुपकारकरणेन नाऽऽत्मनां कल्याणमिति निषिद्धोऽपि द्विधापि धवलात्मा स जले मज्जन्तं शीतेन कम्पमानं च तं मुखेनाऽऽदाय पक्षान्तराले ररक्ष। निर्वाते तत्र स्थित: स पापात्मा सज्जीभूतो वज्रकठिनै: स्वदशनैस्तत्पक्षांश्चकर्त । हंसोऽपि क्षणान्तरेण तं सुखिनं जातं मत्वा तं मुखेनादाय नभस्युत्पतन् कृत्तपक्षो नदीप्रवाहे पतितो मृतश्च, स मूषकोऽपि तथैव मृत्वा नरके ययौ । ॥ **इति नीचानामुपकारकरणेनाऽनर्थ इत्यर्थे हंस-मूषककथा ॥ १४६ ॥**

॥ १४७॥ सापायस्थानाद् गमने श्रेय इत्यर्थे कर्करभेक-बरण-वरणमकरकथा ॥

व्यसनाऽऽगमे हि परत्र गमनं श्रेय:, यत:—

व्याधिमालिन्यदौर्गत्या-पमानव्यसनाऽऽगमे ।
परदेशं विना न स्या-दिह श्रेयो मनस्विनाम् ॥ १ ॥

तेन व्यसनवति स्थाने स्थितानामकल्याणं, ततो नष्टानां च कल्याणं, यत:—

समायातेष्वनर्थेषु, यो नश्यति स जीवति । निदर्शनमिह स्पष्टं, भेकश्च मकरावपि ॥ २॥

तथाहि— **पद्माकरनाम्न्येकस्मिन्** महति द्रहे **कर्करो** नामैको भेको, बरण-वरणनामानौ द्वौ मकरौ, त्रयोप्यमी सुहृद:, एकदा तस्मिन् ह्रदे समेतान् कैवर्तान् विलोक्यैको भेको मकरौ प्रति जगौ— हे भ्रातराविदं स्थानं साऽपायं, तेनाऽऽत्मनामिहाऽवस्थाने न भद्रमिति तेनोक्ते तावूचतु:, मम धियां शतं, मम च धियां सहस्रमित्यनुक्रमेण ताभ्यामभिहिते भेकोऽभणत्— हे सुहृदौ! धियां शतं सहस्रं च युवयो: प्रत्येकमस्ति, तथापि तेष्वात्मवैरिष्वागतेषु नैकापि धी: स्फुरिष्यति, किं च ममैकैव धीरस्ति, यद्वैरिवासे न श्रेय:, यत:—

विष बालि रंडापणुं, विष गायन नइं खास ।
विष दालिद्री गोठडी, विष वइरिनउ वास ॥ ३॥

हे भेक! भवान् भीरुरस्तीति ताभ्यां भणिते निशि ततो निर्गत्य सपरिवारो भेकोऽधीवराऽऽगमेऽगाधे क्वाऽपि जलाऽऽशये सुखं तस्थिवान्। इतोऽन्यदा तत्रागतै: कैवर्तकैस्ततो जालेन तावाकर्ष्य मकरौ हत्वैक: शिरस्थो द्वितीयश्च करेण प्रलम्बित इति तौ नीयमानौ विलोक्य तेन भेकेन **भद्रानाम्नी** स्वमहिलाऽभाणि—

॥ १५८ ॥ पुण्यादेवाऽर्थसिद्धिरित्यर्थे चन्द्रश्रेष्ठिकथा ॥

पुण्योदये हि सकलं फलजनकं, यतः-

यावच्चन्द्रबलं ततो ग्रहबलं ताराबलं भूबलं ।
तावत्सिध्यति वाञ्छिताऽर्थमखिलं तावज्जनः सज्जनः ।
विद्यागारुडमन्त्रयन्त्रविषयैस्तावत्कृतं पौरुषं ।
यावत्पुण्यमिदं नृणां विजयते पुण्यक्षये क्षीयते ॥ १ ॥

किं बहुना? पुण्ये सति विरुद्धं कुर्वतां जल्पतां चाऽपि सिद्धिः, यतः-

यत्तद्वा वदतां पुंसां, सिद्धिर्भवति पुण्यतः ।
कडुआ बडुआ सोही-त्यालापे चन्द्रश्रेष्ठिवत् ॥ २ ॥

तथाहि- '**सारपद्रे** ग्रामे **चन्द्रश्रेष्ठी**, तेन चाऽपुत्रिणा **सोही**नामा क्षेत्रदेवताऽभ्यर्थिता, हे देवि ! यदि मम पुत्रो भविता तदा तवैकमहिषं सुवर्णतिलकं कुण्डलयुगलं च दास्यामीति। अथ पुत्रे जाते देव्या भाले तिलकं कर्णयोः कुण्डले च विन्यस्यैको मदोन्मत्तो महिषस्तच्चरणे निबद्धः, बलिनैवेद्यपुष्पादिपुरस्सरं पूजयित्वेति स जगौ, हे देवि ! तिलकं पुत्रस्य शेषा, कुण्डले च मम पत्न्याः शेषेति भणित्वा तत्सर्वं पश्चादादाय वादित्रेषु वादित्रेषु देवीपादबद्धः स महिषो भाट्चक्रे। महिषाऽऽकर्षिताया देवीमूर्तेः कर-चरणादि भूयो भग्नम्। अथ श्रेष्ठिनि गृहं गते सा रुष्टैकाकिनी तस्य विरूपं विधातुमशक्ता **कडुआबडुआसंज्ञयोः** स्वमित्रयोः क्षेत्रपालयो**र्बोहि**संज्ञायाः क्षेत्रदेव्याश्च तं व्यतिकरं जगौ ।

अथ चतुर्ष्वपि तेषु तत्सुताऽऽदानाय सायं तद्द्वारनिरोपरि देवशक्त्या तिरोहितात्मसु स्थितेषु बुभुक्षितोऽस्मीति मातरं सुतः स्माह, हे पुत्र! गृहकोणस्थितांस्तिलान् भुङ्क्ष्वेतिमात्राऽभिहिते कटुकानिमान् कथमद्मीति लघुना स्वरेण बालः पुनरवोचत् । '**कडुआ बडुआ सोही बोही**' इमान् भक्षयेति बाढस्वरेण तन्मात्रा भणिते चत्वारोऽपि दध्युः, अहो तिरोहिताऽऽत्मानो वयमिह स्थिताः कथमनया ज्ञाताः? आत्मभ्योऽपीयं बलीयसी, तस्यास्तनयोऽवश्यमस्मान् भक्षयिष्यतीति ते सर्वेऽपि ततः काकनाशं नश्यन्ति स्म ॥ **इति पुण्यादेवाऽर्थसिद्धिरित्यर्थे चन्द्रश्रेष्ठिकथा ॥ १५८ ॥**

॥ १५९ ॥ धूर्त्तचरित्रे धरणद्विजकथा ॥

अवञ्चितोऽपि धूर्तो वञ्चनां तनुते, किं पुनर्वञ्चितः? यतः-

धूर्त्तेन वञ्चितो धूर्तो, वञ्चनां तनुते क्षणात् ।
दम्पतीभ्यां द्विजोऽवञ्चि, तेन तावपि वञ्चितौ ॥ १ ॥

तथाहि— **लोहागरनगरे गरुडाह्वो** द्विजो **वसुमती** च तत्कलत्रं, द्वावपीमौ दम्पती धूर्तकलाकुशलौ, एकदा भोजनवेलायां निष्पन्नायां रसवत्यामकस्मादेको धूर्तधुरीणो **धरण**नामा द्विजातिस्तद्गृहे प्राघूर्णोऽभ्येति स्म। तं विलोक्याहो इमां रम्यां रसवतीमसौ पापात्मा भोक्ष्यतीति धूर्ताभ्यां ताभ्यां मुधैव मिथः कलहे विधीयमाने **वसुमती** रुष्टा पितृगृहं गता। अथ कियद्वेलां विलम्ब्य सर्वामपि तां रसवतीं वंशमयबृहदलिञ्जरस्याऽधस्ताद्विमुच्य कलत्राऽऽकारणमिषेण **गरुडो**ऽपि गृहतो निर्ययौ । अथ गतयोस्तयोरहमेताभ्यां वञ्चितोऽस्मीति ध्यात्वा **धरणो**ऽपि तां रम्यां रसवतीं भुक्त्वा तस्यैवाऽलिञ्जरस्याधस्तस्थौ। अथ वेलाऽतिक्रमं कृत्वा स्वगृहमागतैः- हे प्रिय! पश्य मम कलां? यदागतोपि प्राघूर्णको राटिमिषेण पितृगृहं गतया मया वञ्चितः, हे प्रिये! मुधैव तव कला तव पृष्ठमेव निर्गच्छता मयैव स प्राघूर्णको वञ्चितः, इति स्वां स्वां वञ्चनचातुरीं स्तुवतोस्तयोरलिञ्जरस्याऽधस्तात्प्रकटितः स **धरणो**ऽभ्यधात्, भो दम्पत्यौ! ममापि कलां पश्यत, यन्मयैकाकिनापि भवन्तौ वञ्चितौ ।. तं तथास्थितमवलोक्य तौ श्याममुखौ जातौ ॥ **इति धूर्तचरित्रे कथा ॥ १५९ ॥**

॥ १६० ॥ परद्रोहविषये कलसीनामकुटुम्बिनीकथा ॥

महत्सु द्रोहकरणेऽनर्थ एव, यतः—

पूज्यद्रोहादवश्यं स्या-दात्मनो जीवितक्षतिः ।
मनोभूर्भस्मसादासी-द्यदीशं हन्तुमुद्यतः ॥ १ ॥

अपि च—

आत्मनः कुशलाऽऽकाङ्क्षी, परद्रोहं न चिन्तयेत् ।
वृद्धायै विहितो द्रोहो, वधूमूर्ध्न्यपतद्यथा ॥ २ ॥

तथाहि— **वनपल्लीग्रामे दत्तया** कुटुम्बिन्या **श्यामलो** नाम स्वपुत्रः **कलसी**नामकन्यां परिणायितः । अथ यदा सा स्नुषायाः शिक्षां दत्ते, तदा सा तस्यां वैरं वहते । एकदा तया **दत्तया** जरत्या काष्ठान् गोधूमान् याचिता स्नुषा पतिं प्राह, हे नाथ ! भवन्माता जरती जाता काष्ठानि याचते, इत्याकर्ण्य तत्कारणं पृष्टा सा **दत्ता** दध्यौ । मया स्नुषा शिक्षितैव विरूपं चिन्तयति, तेन सा विषादिप्रयोगेणाऽवश्यं मां मारयिष्यति, तेन स्वयमेवाऽग्नौ प्रवेशः श्रेयानिति काममभ्यर्थितः सुतस्तदर्थं प्रत्यशृणोत् । अथ चिन्तितेऽहनि दारुसहितामम्बां स्मशाने लात्वा चिताऽन्तस्तामुपविश्य विस्मृतमग्निमादातुं पुराऽन्तर्गते पुत्रे किं मुधा मरणेनेति मत्वा **दत्ता** निकटवटमारुरोह । तदा चाऽऽगतः स वह्निना चितां दग्ध्वा रुदन् गृहं गतः । अथ तस्मिन्नेव ग्रामे निशि स्तेयं विधाय तस्यैव वटस्याऽधो लोप्त्रस्य भागान् कुर्वाणाश्चत्वारश्चौरा इति वदन्ति स्म। यो लोप्त्रस्य भागे लोभं करिष्यति तन्मस्तके खट्खटिति शब्दं कुर्वाणा वटवासिनी

देवता पतिष्यतीत्याकर्ण्य दत्ता तथैव राटिपूर्वं तेषामुपरि न्यपतत् । लोष्त्रं हित्वा नष्टेषु तेषु करचरणकण्ठहृदयादिषु तान्याभरणानि परिधाय सुरस्त्रीव रम्यवेषा सा प्रभाते गृहमागता। किमेतदिति ताभ्यां पृष्टा साऽभाषिष्ट, हे पुत्र ! स्वयमनाकारिता चलित्वा यमराजौकसि गताऽहं, तेन मयि विशेषतस्तुष्टेन तेनैतदाभरणादि दत्त्वा मानिता विसृष्टाऽहमिहाऽऽगां, तत् श्रुत्वा हे मातरन्योऽपि यः कोऽपि यमाभ्यर्णं याति तस्य स किं करोतीति स्नुषयोक्ते हे पुत्रि! मत्तोऽपि विशेषतस्तस्मिंस्तुष्टः स बहुमानं दत्ते ।

अथ लोभाऽभिभूता सा तथैव चिताऽन्तः प्रविष्टा, निहिते च वह्नौ प्राप पूज्यस्य द्रोहफलं मरणमिति, अथ कियत्सु वासरेषु व्यतीतेषु श्यामलो मातरमाह हे अम्बाऽद्यापि तव स्नुषा कथं नाऽऽयाता ? हे पुत्र ! हे देवानांप्रिय ! पावके प्रविष्टानां न पुनरागतिः, इत्युक्त्वा स्वं सर्वं व्यतिकरं तस्मै कथयित्वैकां सुवंशजां सुन्दराऽऽकारां कन्यां परिणायितो दत्तया पुत्रः स्वं धर्ममपालयत् ॥ **इति परद्रोहविषये कलसीनामकुटुम्बिनीकथा ॥ १६० ॥**

॥ १६१ ॥ मधुरभाषणेनाऽपि सम्पत्तिरित्यर्थे मणिमतीकथा ॥

मधुरभाषिणी जिह्वा सुधाखण्डमेव, यतः-

सुधाखण्डा हि सा जिह्वा, या जानाति सुभाषितम् ।
मन्ये राहुभयान्नष्टा, प्रविष्टा वदनाऽन्तरम् ॥ १ ॥

किञ्च मधुरवचनानामिहैव सम्पत्तिर्यतः-

वाग्भिः सुधादीधितिसोदराभिः, शीतोष्णवर्षासमयाः समानाः ।
कृता ददुः कामघटं जरत्यै, तदत्र वाचां विभवोऽतिरम्यः ॥ २ ॥

[1]तथाहि- **मणिसारे** नगरे **मणिचूलो** वणिक्, तस्य **मणिमती** माता, **मणिहरी** च गेहिनी। एकदा **मणिमत्या** सुधाधन्याभिरपि वाग्भिः शिक्षितायाः प्रियाया वचनैः प्रेरितो **मणिचूलो** मातरं निशि गहने वनेऽमुञ्चत् । तत्र **करणसागरा**ऽऽह्वसरसस्तीरे स्वयं निर्मित-तृणौकसि तस्थुषी सा तृणेन्धनहारिभिर्दत्ताशना सुखेन वासरान् गमयति स्म । एकदा त्रिदशौकसि शीतोष्णवर्षाकालाः स्वस्वोत्कर्षेण विवदमाना मानुषलोकमागता **मणिमती**सन्निधौ समेत्य स्वं स्वं गुणमूचिरे । तथाहि-

स्निग्धं भोज्यमनर्गलं मृगदृशामालिङ्गनं निर्भरं ।
कौशेयं वसनं द्युतिर्द्युतिपतेर्वातोज्झितं मन्दिरम् ।
तैलोद्वर्तनमन्नमुष्णमुषसि प्रोल्लासिका तूलिका ।
ताम्बूलं च सुखाय शीतसमये लीलामये भोगिनाम् ॥ ३ ॥

१. तुला-धर्मरत्नकरण्डके पत्र ३८५ ॥

वासः स्वच्छतमं वने विचरणं धारागृहेऽवस्थितिः ।
क्रीडास्मेरसरोजभासि सरसि श्रीखण्डखण्डद्रवैः ।
अम्भः शीततरं लघिष्ठमशनं सौरभ्यरम्याः स्रजो ।
ज्योत्स्नौघाश्च सुखाय घर्मसमये भोगाङ्गसम्पन्मये ॥ ४ ॥
आहारो लघुरम्बरेष्वरुणिमा रम्येषु [1]धूपव्रजै-
स्तोयैस्तोयमुचां पतद्भिरनघे वातायनेऽवस्थितिः ।
कान्तायां हरिताङ्कुरैर्वनभुवि स्वैरं विहारक्रमः ।
केकाः केकिभिरीरिताः सुमधुरा हर्षाय वर्षास्वलम् ॥ ५ ॥

हे मातरस्माकं स्वस्वगुणोत्कर्षमयं सुरासुरनाथैरप्यभग्नमिमं विवादमद्य त्वमवसानं नय। हे पुत्रा! युष्माकं गुणा एकया जिह्वया वक्तुं न शक्यन्ते, यतः-

तूलिकातैलताम्बूल - तरुणीतरणित्विषः ।
तप्ताऽन्नं हुतभुक्तापः शीते सप्त सुखाऽऽवहाः ॥ ६ ॥
यत्पुंस्कोकिलकूजिते मधुरिमा पुष्पेषु यत्सौरभं ।
यन्माकन्दमहीरुहे फलतती रम्या रतिर्यद्वने ।
यद्वाल्लभ्यमघर्मरश्मिरुचिषु प्रीतिर्यदम्भोभरे ।
यत्कामोत्सवकृद् ध्वनिर्मधुलिहां तद्ग्रीष्मविस्फूर्जितम् ॥ ७ ॥
यत्र स्वर्मणिभिः प्रघूर्णितमलं दग्धं च देवद्रुमैः ।
शीर्णं सिद्धिभिरस्तमासमनघैर्मन्त्रैरमर्त्यैर्मृतम् ।
कामं कामघटैर्विनष्टमटितं दूरे द्युसद्धेतुभि-
स्त्वं तस्मिन् समये समस्तवसुधाऽऽधारोऽसि धाराधर! ॥ ८ ॥

अपि च-

सम्प्रति न कल्पतरवो, न सिद्धयो नापि देवता वरदाः ।
जलद! त्वयि विश्राम्यति, सृष्टिरियं भुवनकोशस्य ॥ ९ ॥

किञ्च सम्यग्ज्ञानदर्शनचारित्रैर्मुक्तिरिव, स्वर्गमर्त्यपाताललोकैश्च जगदिव, भवद्भिरेव संवत्सरः, तेन त्रयोऽपि भवन्तो मान्याः पूज्याः समानसम्पत्तयश्चेति तया तेषां विवादे निर्णीते ते त्रयोऽपि विशेषतः सन्तुष्टास्तस्यै कामकुम्भमेकं दत्त्वा तिरोदधिरे । अथाऽन्यदा पान्थादिजनमुखादवगतमातृस्वरूपेण पुत्रेण सा महोत्सवपुरस्सरं स्वमगारमानीता पौरैः पृष्टा यथाजातं कथयति स्म। पौरैरथ मञ्जुवादिनीयमिति भणिता सा **मञ्जुवादिनीति** चापरं नाम लेभे। कामघटप्रसादाच्च सा सुखिनी समजनि ॥ **इति मधुरभाषणेनाऽत्रापि सम्पत्तिरित्यर्थे मणिमतीकथा ॥ १६१ ॥**

---

१. AHPD । मेघव्रजैः - मु. ॥

॥ १६२॥ कटुभाषिणामिहैवाऽऽपदित्यर्थे नागिणीवृद्धाकथा ॥

दुर्जनानामेव जिह्वा विषविनिर्मिता, यतः-

विसहरखंड खंडहालाहल, विज्जलिखंड खंड दावानल ।
एच्चारइ मेलवि समभायह, दुज्जण जीहघडी विहिरायह ॥ १ ॥

तेषां कटुभाषिणां दुर्जनानामिहैवाऽनर्थः, यतः-

शीतोष्णवर्षाकालानां, युगपत्कटुभाषणात् ।
दुःखभाग्जरती जज्ञे, धिगस्तु कटुभाषिताम् ॥ २ ॥

तथाहि- तत्रैव नगरे **मणिमत्याः** प्रातिवेश्मिकी **नागिणी**नामजरती नारी तं **मणिमती**प्रभावं विलोक्य तत्स्पर्द्धया तत्र तटाकतीरे तस्थुषी, एकदा शीतोष्णवर्षासमयाः स्वस्वोत्कर्षेण विवदमाना मानुषं लोकमागतास्तत्रैव **नागिणी**समीपे समेत्य स्वस्वगुणानूचिरे, 'स्निग्धभोज्यमि'त्यादिपूर्ववत्। इति तेषां वचनान्याकर्ण्य स्वभावेन शुनीव कटुभाषिणी साऽभाषिष्ट, रे दुर्मुखा ! रे विश्वविडम्बकाः पापपुञ्जमूर्तेः कलिकालस्य च भवतां च न कोऽपि विशेषः तथाहि-

निर्दग्धाः कमलाकराः सुमनसो मम्लुः कलावानपि ।
प्रीत्यै नो किल क्लृप्तवर्मसु जनः प्रायेण बद्धादरः ।
जाड्येनोल्लसितं जगत्सु महिते मित्रेऽपि यन्मन्दता ।
तन्नूनं कलिरेष दुःसहतया शीतर्तुना स्पर्धते ॥ ३ ॥

विधत्ते यत्तोषं जडपरिचितेर्गोःपतिकराः। कठोरा जायन्ते कथमपि न तृष्णा विरमति ।
मुदे दोषारम्भो भुवि भवति वैरस्य घटना। किमेष ग्रीष्मर्तुः किमुत कलिकालः प्रसरति ? ॥ ४॥

सर्वत्रोद्गतकन्दला वसुमती वृद्धिर्जडानां परा ।
जातं निष्कमलं जगत्सु मलिनैर्लब्धा घनैरुन्नतिः ।
सर्पन्ति प्रतिमन्दिरं द्विरसनाः सन्त्यक्तमार्गो जनो ।
वर्षाणां च कलेश्च सम्प्रति जयत्येकैव मार्गस्थितिः ॥ ५ ॥

तेन विश्वेषां दुःस्थिताऽदुःस्थितपण्डितापण्डिततरुणातरुणादिजनानां दुःखहेतून् युष्मान् धिगस्तु । इति स्वभावेन कटुभाषिण्या भर्त्सितास्ते त्रयोऽपि रुष्टास्तस्यै विपत्तिघटं दत्त्वा तिरोदधिरे। अथ सापि तस्य घटस्य लाभात्तुष्टा सती वसनाऽशनादिप्राप्तये तं घटमयाचिष्ट। सोऽपि विपत्तिघटस्तां यष्टिमुष्टिमुद्गरलताऽऽदिना बाढं जघान । तेन हता सा मृता नरकं ययौ

॥ इति कटुभाषिणामिहैवाऽऽपदित्यर्थे नागिणीवृद्धाकथा ॥ १६२ ॥

॥ १६३॥ विनयोपरि भिल्लकथा ॥

आस्तामन्यो गुणगणः एकेन विनयेनैव पुमांसो गुणभाजो भवन्ति, यतः-

अन्यैर्गुणैरलमलङ्करणाऽनुरूपै-रप्यस्ति चेद्विनयमण्डनमेकमङ्गे ।
आयान्ति नायकमिव ध्वजिनीजना यत्-सर्वे गुणाः स्वयमिदं हृदये वहन्तम् ॥ १ ॥
प्रेमपात्रं प्रजायन्ते विनीताः पशवोऽपि हि ।
तस्माद्विनय एवायं स्वीकार्यः कार्यकोविदैः ॥ २ ॥

किं बहुना ? विनयेन पाषाणमयादपि देवादिप्रतिबिम्बात् साक्षात्स्थितादिवाऽर्थसिद्धिः, यतः-

विनयं विदधद्विद्यां, द्रोणाचार्यादवाप्तवान् ।
मृन्मयादपि यद्भिल्लो, विनयस्तदहो! गुणः ॥ ३ ॥

तथाहि- **हस्तिनागपुरे** धनुर्विद्यामहोदधेः कुम्भोद्भवप्रतिमस्य **द्रोणाचार्यस्य** समीपे सकलामपि धनुर्विद्यामधीत्य **द्रोणाचार्यस्याऽपरा** मूर्तिरिव भूत्वा बहुमणिमौक्तिककनककरितुरगादिभिर**र्जुनेन** भृशं सन्मानितो विद्यागुरुस्तमाह, **हे पार्थ** ! वरं वृणु ।

हे भगवन्! यदि तुष्टोऽसि तदा मां विनाऽन्यः कोऽप्येतादृशीं धनुर्विद्यां नाऽध्यापनीय इति, महतां गुरूणां वचनं नाऽन्यथेति द्रोणाचार्योऽपि तदुक्तमङ्गीचकार। एकदा **'पार्थ एव** धनुर्धरस्तद्विद्यामूलं च **द्रोणाचार्य'** इत्याकर्ण्य **कर्णाट**निकटगङ्गातटवासी **भीमलो** नाम भिल्लस्तदर्थमागत्य द्रोणाचार्यमूचे । तेनाऽपि स्वप्रतिज्ञायां कथितायां स स्वस्थानं गत्वा मृन्मयीं द्रोणाचार्यमूर्तिं विधाय पुष्पचन्दनादिना तामभ्यर्च्य 'हे द्रोणाचार्य ! मम धनुर्विद्याप्रदो भूया' इत्यभिधाय तदग्रे धनुर्विद्याऽभ्यासं व्यधात्। तद्भक्तिभावनिर्भरमना भिल्लः कियता कालेन द्वितीयः **पार्थ** इवाऽभवत्।

एकदा गङ्गायां स्नानं विधाय पुरमागच्छन्तं द्रोणाचार्यमनुगच्छन्नर्जुनः स्वं श्वानमेकमविद्धाऽधरोष्ठतालुरसनादशनैः शरैः पूर्णमुखमालोक्य मां विना न कोऽप्येतादृशीं शक्तिं बिभर्तीति विस्मितः स्वश्वमुखबाणाऽनुसारेण गच्छन् पुरस्तात्तं भीमलं भिल्लं विलोक्य पृष्टवान्-केनाऽमी मार्गणाः शुनो मुखे निहिताः ? मयेति तेनोक्ते कस्ते गुरुरिति चाऽर्जुनेनाऽभिहिते द्रोणाचार्यो मम गुरुरिति भिल्लो बभाण । तन्निशम्याऽर्जुनो द्रोणाचार्याय तदुक्तं निवेद्येति प्रोचे, हे स्वामिन् ! यदि युष्मादृशा वचनसीमानमुल्लङ्घयन्ति तदा के वयं वराकाः ? कथमिति गुरुणोक्ते पार्थो भिल्लोक्तमुक्तवान् । अथ द्रोणाचार्येण तत्र गत्वा क्वाऽऽस्ते तव गुरुरिति भणितो भिल्लः स्वनिर्मितां तां मूर्तिमदीदृशत् प्रोचे च स्वव्यतिकरम्। 'हे पार्थ! मद्भक्तिरेवाऽस्य फलिते'ति निशम्य धूर्तः पार्थस्तमाह- यतः-

नावी सेतंबर सोनार, धाधक चोर अनइं जूआर ।
नगरलोक वेसा वाणिआ, ए आठइ धूरत जाणिआ ॥ ४ ॥

'हे भिल्ल! रभसाऽस्मान्मिलितानामेषां **द्रोणाचार्याणां** स्वदक्षिणकराङ्गुष्ठेन पूजां

विधेही'ति भणितेन तेन तथैव सद्यो विहिते 'हा **पार्थ** ! नगरवासिना धूर्तेन भवता वनेचरोऽसौ सरलाऽऽत्मा वञ्चितः । अथ मत्प्रसादादेतेषामदृष्टेन विनापि बाणमुक्तिर्भूयादिति गुरुस्तं भिल्लं प्रसादपात्रीकृत्य स्वं स्थानमगात् । ततोऽद्यापि भिल्लस्तर्जनीमध्यमाभ्यामेव बाणान्मुञ्चति **इति विनयोपरि भिल्लकथा ॥ १६३ ॥**

॥ १६४ ॥ स्त्री चरित्रे श्रीविक्रमादित्यस्त्री-तिलकश्रीकथा ॥

स्त्रीचरित्रं सुधियामप्यगम्यं, यतः-

नहपारं जलहिजल-जलहरपारं च पुहवीपारं च ।
जाणंति केवि निउणा, न हु हिअयं हरिणनयणाणं ॥ १ ॥

तेन यत्नरक्षितापि महिला स्वाभाविकीं स्वैरतां न जहाति । यतः-

विक्रमप्रियतमाऽपि यदेक-स्तम्भसौधमुषिता कुलटाऽभूत् ।
स्त्रीजनस्तदवितोऽप्यतियत्नात्, स्वैरतां न विजहात्यतिलोलः ॥ २ ॥

तथाहि—**उज्जयिन्यां** परकायप्रवेशादिबहुशक्तिशालिनं **श्रीविक्रमादित्यं** भूपं सभास्थितऽऽमागत्य कोऽपि कोविद इदं पद्यमेकमपाठीत्-

अश्वप्लुतं माधवगर्जितं च, स्त्रीणां चरित्रं भवितव्यतां च ।
अवर्षणं वाप्यतिवर्षणं च, देवा न जानन्ति कुतो मनुष्याः ? ॥ ३ ॥

इदमाकर्ण्य सकर्णो राजा जगौ, हे विद्वन् ! सर्वेऽप्यन्येऽर्थाः सत्याः परं स्त्रीचरित्रमिदं न सर्वथा श्रद्दधामीति भूपोक्तं निशम्य सोऽवोचत् हे राजन्निदमपि पदं सागरः सीमानमिव समीचीनतां न जहातीति श्रुत्वाऽस्य पदस्य परीक्षां विधाय तुभ्यं दानं दास्यामीति विसृष्टे तस्मिन् राजा निशि निशाचर्यां विलोकयन्नेकस्य सौधस्याऽधस्तात् स्थितयोः **कनकश्री-तिलकश्री**संज्ञयोर्द्वयोर्बालिकयोर्वार्त्तामश्रौषीत् ।

तदा **तिलकश्रिया कनकश्रीः** पृष्टा, हे सखि ! परिणीता पतिगृहं गता त्वं किं करिष्यसीति सा स्माह-

शय्योत्पाटनगेहमार्जनपयःपावित्र्यचुल्हीक्रिया,
-स्थालीक्षालनधान्यपेषणभिदो गोदोहतन्मन्थने ।
पाकैस्तत्परिवेषणैः समुदितैर्भाण्डादिशौचक्रियां,
भर्तृश्वश्रूननान्दृदेवृविनयैः कष्टं वधूर्जीवति ॥ ४ ॥

किं च पतिचित्ताऽनुगामिन्यहं सर्वं भव्यं विधास्यामि । अथ च **कनकश्रिया**ऽभिहिता सा स्माह- हे सखि ! त्वदुक्तमहं सर्वं सर्वदाऽन्यथा करिष्ये, इति तयोः परस्परमभिहितं वचनं श्रुत्वा पार्थिवः प्रभाते तां **तिलकश्रियं** परिणीय 'स्त्रीणां चरित्रमिति पदस्य' परीक्षां कर्तुमेकस्तम्भे तां विमुच्य स्वयमेव वैतालिकप्रयोगेणाऽन्नपानादिकां तच्चिन्तां चकार । अथ सा सौधाधस्तादुत्तीर्णं **कामनन्दसार्थ**वाहं विलोक्य स्मराऽतुराऽजनि, सोऽपि तामुदीक्ष्य कामार्तोऽभूत् ।

सुरङ्गया समेतेन तेन समं सा राज्ञि च गते भोगान् बुभुजे । एकदा सभास्थितो राजा 'सब जग भीना एकज कोरी' इति पदं वारंवारं भणन्तं भिक्षार्थं च चत्वरादिषु भ्रमन्तं **धन्यानाथ**नामयोगिनं विलोक्येति, दध्यौ । नूनमसौ स्वां पत्नीमेवैकां सतीं मन्यमान इति भणन् भ्रमति, तेनाऽस्य स्वरूपं पश्यामीति मक्षिकान्तः प्रविश्य सायं स राजा तस्य योगिनः पृष्ठे लग्नः । योगिन्यपि कुसुमताम्बूलपक्वान्नादि लात्वा पुराद्बहिर्गत्वा **सिद्धवट**स्याऽधस्तादेकां महतीं शिलामुत्पाट्य तदधःस्थिते भूमिगृहे प्रविष्टे राजाऽपि मक्षिकारूपेण तत्र प्राविशत् । अथ तस्मिन् योगिनि स्वजटामध्यगतसमुद्गकाऽन्तर्गतभस्मतः प्रकटितया यौवनाधिरूढया स्त्रिया सह रन्त्वा सुप्ते सति सा स्त्री स्वकण्ठस्थितसमुद्ग-कान्तर्गतभस्मतः प्रकटितेनैकेन यूना समं चिरं चिक्रीड ।

योगिजागराऽवसरे तया स युवा पुनर्भस्मरूपो निर्ममे । गतनिद्रेण तेनापि सा कन्या भस्मरूपा विहिता । एतच्चरित्रं विलोक्य चकितो राजा प्रभाते कीररूपेण **तिलकश्री**करमल-ञ्चकार । अथ सा तं शुकं पञ्जरे निधाय शृङ्खलाचालनतः समेतेन **कामनन्देन** सह सम्भोगाऽऽदिविनोदं व्यधात् । चिरं तच्चेष्टितं दृष्ट्वा सत्यं तत्कोविदकथितं पदमिति मन्यमानो राजकीरस्ततः समुड्डीय स्वस्थानं गत्वा कीरशरीरं हित्वा च राजसभायां राजा तस्थौ । अथ तं योगिनं तथैव पुरे भ्रमन्तं भोजनार्थं निमन्त्र्य **तिलकश्री**गृहे गत्वा राजा षडासनानि भोजनार्थं मण्डयित्वा प्रोचे, हे योगिन् ! प्रकटय स्वां पत्नीं, न चेदसिना त्वां हनिष्यामीति भूपेनोक्ते योगिना तथैव प्रकटिता साऽपि तथैव भणिता तं युवानमाविश्चकार । **कामनन्द**माऽऽकारयेति तथैव राज्ञा प्रेरितया तया शृङ्खलाचालनतः समेतः **कामनन्दो** राजादींस्तानवलोक्य पश्चाद्बलमानो राज्ञा प्रोचे, हे **कामनन्द** ! मा याहि, समागच्छ इहेति राज्ञो वचनेन तस्मिन्नागते ते सर्वेऽपि बुभुजिरे। अथ स योगी तां कन्यां तस्मै यूते दत्त्वा स्वयं सत्यो योगी जातः, राजापि **कामनन्दाय तिलकश्रियं** दत्त्वा तं पण्डितं मणिमौक्तिकस्वर्णकरितुरगादिभिः सत्कृत्य विससर्ज ॥ **इति स्त्रीचरित्रे श्रीविक्रमादित्यस्त्री-तिलकश्रीकथा ॥ १६४॥**

॥ १६५॥ भाग्योपरि वस्तुपालमन्त्रिकथा ॥

भाग्यभरे जागरुके पुंसामसम्भाव्यमपि भवति । यतः-

भाग्यात्सम्पद्यते पुंसा-मसम्भाव्यमपि क्षणात् ।
वस्तुपालस्याविरासी-च्छिरश्छायाक्षितौ निधिः ॥ १ ॥

तथाहि– **धवलके** नगरे **वीरधवलस्य** राज्ञो **वस्तुपालनामा** महामन्त्री, एकदा शिरश्छायाधरायां निधिराविर्भवतीति तद्वितरणमुखरैर्मार्गणैर्भूयोभूयो भणितं **वस्तुपाल**स्येदं बिरुदं श्रुत्वा दुर्बलकर्णेन राज्ञा मन्त्री भणितः, हे मन्त्रिन् ! घृत-तैल-हिङ्गु-लवणादिव्यवसायपराणां भवतामियं ख्यातिर्नोचिता यत् शिरश्छायाक्षितौ निधिः प्रादुर्भवतीति । तेन वार्यतामसौ मार्गणगणः, मन्त्रिणा निषिद्धा अपि मार्गणास्तां ख्यातिं राजसभायां समेतस्य मन्त्रिणः प्रोचिरे।

तदा च राज्ञा भणितो मन्त्री, हे मन्त्रिन्! प्रातरेनां परीक्षां विधास्ये, यदा सत्यं तदा तव ख्यातिरस्तु, न चेत्तदा मार्गणानां जिह्वोच्छेदं करिष्ये, भवतश्च सर्वस्वदण्डः, इति कथिते गते च मन्त्रिणि राज्ञा मन्त्रिशिरश्छायास्थाने निश्येका महती शिला निदधे । प्रातश्चाऽऽगते मन्त्रिणि खनितायां तस्यां भुवि शिला निर्गता, तदा राज्ञा मन्त्री प्रोचे, हे सचिव ! तव भाग्यं भूरि, यदिदं हषत्खण्डं निर्गतं, तदा च सचिवभाग्यनुन्नेन केनापि सभ्येनाऽभाणि, हे राजन्नियं शिला भज्यतां, को वेत्ति यदेतदन्तर्गतं निधानं भवितेति।

तदा च भाजितायां तस्यां मध्यतो निर्गतमहिमवलोक्य सर्वेऽपि सभासदो नेशुः, अहो मन्त्रिणो भाग्यं! यत्पाषाणादपि सर्पो निर्गतः, इति भणता राज्ञा प्रोचे, हे मन्त्रिन्! गृहाणेदं निधानं भवद्भाग्यतो निर्गतं, मन्त्री तु तं सपादकोटिकनकमूल्यं द्वात्रिंशन्मणिमयं हारं पश्यति। मन्त्रिणा च नमस्कारस्मरणपूर्वं तदुपरि हस्ते न्यस्ते तदधिष्ठायकसुरे च नष्टे सर्वेऽपि तं हारं पश्यन्ति स्म। अथ मन्त्री तं हारं कण्ठे निधाय सभायां तस्थिवान्। सत्यं मन्त्रिणो बिरुदमिति भूयो भूयो भणन् भूपतिस्तान् मार्गणान् सत्कृत्य मन्त्रिणं बहुमानपात्रं चक्रे ॥ **इति भाग्ये वस्तुपालमन्त्रिकथा ॥ १६५॥**

॥ १६६॥ वचनकलायां डामरदूतकथा ॥

कुरूपाणामपि वचनकलाकलितानां सर्वत्र सम्पत्तिः यतः—

कामं कामदुघाधेनु-र्वाक्कला कथिता बुधैः। यद्वशाड्डामरो जज्ञे, मान्यो भूमिभुजामपि ॥ १॥

तथाहि— **पत्तने श्रीभीमस्य** भूपस्य वाग्मी समयज्ञः कुरूपो विप्रो **डामरो** नाम दूतः, एकदा **मालवा**ऽधिपस्य **भोजस्या**ऽभ्यर्णे तं दूतं प्रेषयितुमना **भीमो** भूयसीं शिक्षां ददौ। ततः स्थानादुत्थानाऽवसरे वस्त्रप्रान्तं धूनयन् स दूतः किमेतदिति **भीमेना**ऽभाणि, हे देव! भवता दत्ता शिक्षा इहैव तिष्ठतु, किञ्चाहं तु तत्र समयोचितं वक्ष्ये, येन वयं दूताः सर्वत्र वचनकलयैव सुखमनुभवामः, इति श्रुत्वा गूढकोपेन राज्ञा तन्मारणं मनसि विधाय दुकूलवेष्टितं मध्यनिहितभस्मसञ्चयं कनकसमुद्गकं **भोज**प्राभृताय तस्य करे दत्त्वा प्रेषितः स दूतो धाराधीश**श्रीभोज**राजसभां प्राप्तः। तदा च श्यामलं दन्तुरं तुन्दिलं चिपटाऽक्षं पिङ्गकेशं स्फुटितनखं कुब्जं भृशं कुरूपं च तं विलोक्य **भोजो**ऽभ्यधात्—

यौष्माकाऽधिपसन्धिविग्रहपदे दूताः कियन्तो द्विज! ।
त्वादृक्षा बहवोऽपि मालवपते! ते सन्ति तत्र त्रिधा।
प्रेष्यन्तेऽधममध्यमोत्तमधियः प्रेष्यानुरूपक्रमा-
त्तेनाऽन्तःस्मितमुत्तरं विदधता धाराधिपो रञ्जितः ॥ २॥

तद्वचनकलया तुष्टेन भोजेन स्वागतप्रश्नालापमालापितः स तं समुद्गकं प्राभृतीचक्रे।

अस्मिन् सुवर्णसमुद्गके किं भावीति समुत्सुकेषु सभ्येषु तन्मुखे चोन्मुद्रिते मध्यतो निर्गतां रक्षां वीक्ष्य वीक्षापन्ने किमिदमिति ध्यायति **भोजे** दूतो दध्यौ, नूनं पापिना मम स्वामिना मन्मारणोपायोऽयं व्यधायीति चिन्तयन् स केयं रक्षेति राज्ञा जगदे। हे देव! मम स्वामिना **तुरङ्गमेधो** महान् यागो व्यधायि, तस्येयं रक्षा वर्तमानसर्वाऽऽमयहरी, षण्मासं चाऽस्याः प्रभावेण कोऽपि रोगो नोत्पद्यते, तेनाऽस्या लवोऽपि देव-दानव-मानवानामपि दुर्लभोऽस्ति। तुष्टेन **भोजेन** सा रक्षा आत्मपरिवारस्य दत्ता, तेनाऽपि स्वमस्तके निदधे । अथ मणिकनक-तुरगादिदानेन सत्कृतः स **डामरः** पत्तने **भीम**सभासमेतो राज्ञा पृष्टः सर्वं यथाजातं जगौ। एकदा स्मयं सृजन्तं तं **भीमो**ऽभाषिष्ट, रे मूढ! किं स्वकलागर्वं करोषि? मत्प्रसत्तेरेव जीवसि। हे देव! वाचां कलया वयं दूताः सर्वत्र श्रियं लभामहे ।

अथ भूयो **भीमेन** मुद्रितलेखं दत्त्वा प्रेषितो **डामरः** स्नातुमुपविष्टस्य भोजस्य पार्श्वे गतः, **भोजेनापि** स्वागतप्रश्नपूर्वं प्रोचे, हे दूत! तव स्वामी **भीमडो** नाम **पत्तन**वासी नापितः किं करोति? हे भोज ! भूरिभूपशिरसां मुण्डनव्यापारप्रह्वत्वेन जलक्लिन्नशिरसस्तव शिरोमुण्डनं कर्तुं स वारकं न लभते। इति चमत्कारिणा वचनेन रञ्जितो **भोजो** लेखान्तस्तन्मारणं लिखितं ज्ञात्वा किमेतदिति भणन् लेखस्वरूपं तस्याऽग्रे जगाद। धूर्तधुरीणो **डामरो**ऽपि जगौ, हे देव! विधीयतामेतत्कृत्यं, यतो ज्ञातैत्कारणेन भवता नैतत्कृत्यं विधास्यते, तेनाऽत्र कर्मणि क्षणमपि न विलम्बनीयम्। अथ च बाढनिर्बन्धतो **भोजेन** भणितः सोऽभणत्, हे देव! मम जन्मपत्रिकायां लिखितमस्ति यदस्य पञ्चाशत्तमे वर्षे घातोऽस्ति, यत्र चाऽस्य मरणं तत्र द्वादशाब्दिकं दुर्भिक्षमिति तेन तव वैरिणा मत्स्वामिनाऽहमत्र प्रेषितोऽस्मि, तेन मत्स्वामिलोकोपकारपरस्य मम मरणमिहैवास्तु, इत्युदित्वा यावदसौ दूतोऽसिना स्वशिरः स्वयं छिनत्ति, तावद्भोजेन करे धृत्वा निषिद्धः। हे देव! कथमहं मरणान्निषिद्धः ? अवश्यं यातारः प्राणा यदि स्वामिकार्ये यान्ति तदाऽवश्यं स्वर्ग इति निषेधं मा विधेहि । तदा च **भोजेन** सद्य एव सहस्रसुवर्णं पञ्चाशत्तुरगादि भूयो धनं च दत्त्वा स स्वदेशसीमतो बहिरकारि। सोऽपि महाऽऽडम्बरेणाऽऽगत्य प्रणम्य च राज्ञा पृष्टः सर्वं यथाजातं जगौ। तद्दिवसाद्विशेषतो **डामरो भीमादि**भूरिभूपानां मान्यः ख्यातिमांश्चाऽभूत्। ॥ **इति वचनकलायां डामरदूतकथा** ॥ १६६ ॥

॥ १६७॥ श्यामम्स्तकानां विश्वासो न कार्य इत्यर्थे दुर्धर-केसरिकथा ॥

सिंहादिभ्यः सबलसत्त्वेभ्यो मनुजा ओजस्विनः, यतः—

ओजस्विनोऽपि पशवः, शक्तिमन्तः सुरा अपि।
नरैर्नूनं निबध्यन्ते, नरा हि बलवत्तराः ॥ १ ॥

१. अस्त्यावलिका, यत्र- AHDR ॥

अपि च—

सिंहो वार्धकिनाऽक्षेपि, पञ्जरे बलवानपि। विश्वासो नोचितः श्याम-मस्तकानां कदापि तत् ॥२॥

तथाहि— **भयङ्करे** नाम वने **अरिण्याः** केसरिण्या **दुर्धरनामा** केसरी सुतः, स च यौवनं प्राप्तो मात्राऽभाणि, हे पुत्र! श्याममस्तकानां विश्वासो नोचितः, तव त एव रिपवः, इति श्रुत्वा वनं भ्रमता तेन शृगाल-शम्बर-शशक-सारङ्ग-शार्दूलादयः श्वापदाः श्याममस्तकस्त्वं? श्याममस्तकस्त्वम्? इति च प्रत्येकं पृष्टास्ते स्वं स्वं शिरो दर्शयित्वा न श्याममस्तका वयमिति च भणित्वा स्वं स्वं स्थानमगुः।

एकदा तरुच्छेदनपरायणमेकं सूत्रधारं त्वं श्याममस्तकः? इति स पृच्छति स्म। तस्य त्वं किं करिष्यसीति तेनोक्ते स स्माह, मम मात्रा स एव मे मूर्धनि रिपुरुदितोऽस्ति, तेन तं निहत्य निष्कण्टकः सुखभाग् भवामीति तं गवेषयन्नस्मीति। [सूत्रधारेणोक्तं यदि] मदुक्तं करोषि तदाऽहं तं दर्शयामीति तद्वचनं प्रतिपन्ने सिंहे सूत्रधारेण सद्यः कठिनं काष्ठपञ्जरं घटितं, कथितं च सिंहस्य अत्र त्वं प्रविश, यथा ते दर्शयामि। बलवत्यपि पशौ तस्मिन् सिंहे तत्र प्रविष्टे तेन भृशं कर्कशां लोहकीलिकां पञ्जरमुखे निधाय श्याममस्तकोऽहमिति पञ्जरच्छिद्रेण स्वं शिरो दर्शयित्वा स स्वस्थानं गतः। अथ सोऽपि सिंहस्तत्र पञ्जरे स्थितो मृत्वा नरकं ययौ। ॥ **इति श्याममस्तकानां विश्वासो न कार्य इत्यर्थे दुर्धरकेसरिकथा ॥ १६७॥**

॥ १६८॥ भाग्ये सुरदासकथा ॥

सम्पदो हि पुण्यैरेव स्युः, यतः—

आरोग्यं सौभाग्यं, धनाढ्यता नायकत्वमानन्दः।
कृतपुण्यस्य स्यादिह, भवान्तरे वाञ्छिताऽवाप्तिः ॥ १॥

किं बहुना? विपदोऽपि सम्पदः स्युर्भाग्यभाजां यतः—

विपद्यपि भवेत्पुंसां, पुण्यतः सर्वमीप्सितम्।
खातिकायां द्विजो लेभे, श्रियं श्रीफलभञ्जनात् ॥ २॥

तथाहि— **धणासणे** पुरे **सुरदास**नामा द्विजः, तस्य च दुर्मुखा चण्डा कोपनशीला **कालिनी**नामगेहिनी। एकदा नक्तं भुञ्जानेन तेन निर्लवणां रब्बां ज्ञात्वा गाढतर्जनातो जातकोपप्राग्भारया तया कोपप्राग्भारेण सा रब्बाहण्डिका तन्मस्तके भग्ना। अथ द्वितीयामपि हण्डिकां तस्य शिरसि भञ्जयितुमुद्यतां तां विलोक्य भृशं भीतः स तदैवार्धभुक्त एव नष्टः, पुरजलमार्गेण निर्गत्य च प्रखातिकायां पतितः। तदा च तस्मिन्नेव पुरे चौराश्चौर्यं विधाय तस्यां खातिकायामुपविश्य लोप्त्रस्य भागान् विदधिरे।

तदा च लोष्त्रमध्यान्निर्गतमेकं नालिकेरं विलोक्यैकेन चौरेण मुण्डिते तस्य द्विजस्य मुण्डे पाषाणधिया स नालिकेरः स्फोटितः, तेन द्विजेन पुनरागता मम गेहिनी मम मस्तके हण्डिकां भनक्तीति मन्यमानेन 'खाउं रे खाउं रे' इति बाढस्वरेण जल्पितमाकर्ण्य कोऽपि भूतः प्रादुर्भूत इति मत्वा ते तस्करास्तत्सर्वं लोष्त्रं तत्रैव विमुच्य काकनाशं नेशुः। अथ द्विजोऽपि प्रभाते तत्सर्वं मणिमौक्तिककनकरजतादि भूरिधनं विलोक्य लात्वा चाऽन्यत्र पुरे गतोऽन्यां स्त्रियं परिणीय सुखभागभूत्। ॥ **इति भाग्ये सुरदासकथा ॥ १६८ ॥**

॥ १६९ ॥ आत्माऽनुचित-कृत्य-करणेऽनर्थ इत्यर्थे सरट-रासभकथा ॥

शुभमशुभं वाऽऽत्मनोऽनुचितं कृत्यं कुर्वन्नरोऽनर्थभाग् भवति। यतः—

कृत्यं यद्यस्य तत्तस्य, उचितं नेतरस्य तत्। शुनः क्षणे रटन्नुच्चै, रजकेन हतः खरः ॥ १ ॥

जिसका काम तिसेकुं छाजइ, और करे [1]तो लाठी वाजइ।
कुकरठोडे गद्दह पोकारे लाठी लेइ करी धोबी मारे ॥ २ ॥

तथाहि— **पर्वतसरे** पुरे **भूरणो** नाम रजकः, तस्य च **बूचिको** नाम श्वानः। **सरटो** नाम रासभश्च। एकदा तस्यौकसि निशि तस्करैर्ह्रियमाणं वस्त्रधनादिकमालोक्य **सरटो बूचिक**मूचे, हे भद्र! आत्मस्वामिगृहं तस्करै र्मुष्यते, तेन त्वं तस्कराऽभिमुखं शब्दं कुर्वन् धावस्व, यथाऽऽत्मस्वामी जागर्ति, तस्मिंश्चोत्थिते चौराः प्रणश्यन्ति, भवतश्च स्वामिभक्तिः सफला भवति । इति निशम्य **बूचिकः** प्रोचे **हे सरट!** रजकोऽयमिदानीं मम भक्तादि न दत्ते, तेनात्रार्थे नाहमात्मवीर्यं सज्जयामीति निषेधपरे तस्मिन् शुनि **सरटो** धनिकप्रबोधाय बाढस्वरेणारटत् । तदा च तस्मिन् रटति जागरितं धनिकं ज्ञात्वा तस्कराः प्राणश्यन् ।

रजकोऽपि खरशब्देन प्रातरभूदिति विदन् वसनधावनार्थमुत्थितस्तारकितमम्बरमालोक्य निशां च भूयसीं मत्वा मम निद्रान्तरायोऽवसरं विना रटतानेन पापिना स्वरेण निर्मित इति कामं कुपितः स्थूलयष्टिमुष्टिप्रहारैस्तं **सरटं** हन्ति स्म। तेन रजकेन बाढतरबहुप्रहारनिहतं भग्नकटितटं **सरटं बूचिकः** प्रोचे, 'जिसका०' ॥ **इत्यात्मानुचितकृत्यकरणेऽनर्थ इत्यर्थे सरट-रासभकथा ॥ १६९ ॥**

॥ १७० ॥ विपद्वतामेव विपदित्यर्थे पुष्पवतीकथा ॥

यद्विषये रुष्टो दैवस्तं भृशं खेदयति, यतः—

दइव विलग्गउ जेहनइं, पुंठि न मुकइ तास ।
पिता-मरण सीता-हरण राम भमे वनवास ॥ १ ॥

अपि च—

लग्ना पृष्ठे यदीये तं, विपन्नोज्झति जातुचित्। अत्र पुष्पवती श्रेष्ठि-प्रिया स्पष्टं निदर्शनम् ॥ २ ॥

१.तउ (तु D)डींगा वाजइ- P ॥

तथाहि— **वारासणे** ग्रामे **धनदत्तस्य** श्रेष्ठिनः **पुष्यवती** प्रिया, तस्याः कुक्षिभवः **कुबेरसेनश्च** पुत्रः। एकदा तत्र नगरे **सिंहशूरस्य** पल्लीपतेर्धाटी समागता, तदा च **पुष्यवती** पल्लीपतिना गृहीता, स्त्रीत्वेन रक्षिता च ।

अथ **धनदत्तस्तस्याः** शुद्धिं कुर्वंस्तां पल्लीमागत्य नापितौकसि स्थित्वा स्वप्रियां च तत्र ज्ञात्वा नापितप्रियां तदभ्यर्णं प्राहिणोत्। सापि पतिमागतं ज्ञात्वा **कालिका**देवीगृहे चतुर्दशीरात्रावहमागमिष्यामीति सङ्केतं नापितप्रियया स्वपतेरज्ञापयत्। मम महती व्यथा निवृत्तास्तीति **कालिकायाः** पूजां चतुर्दशीरात्रौ करिष्यामीति दम्भेन पल्लीपतियुता सा तत्रागता पल्लीपतिमसिना निहत्य देवकुलं प्रविष्टा । तत्र स्वपतिं दैवदोषेण च सर्पदष्टं मत्वा तत्तुरगमारूढा रात्रावेव ततो निर्ययौ ।

प्रभाते च पथि चौरैः लात्वा **खण्टायणनगरे** सा **कामरूपाया** वेश्याया विक्रीता। एकदा रूपयौवनवती सा वेश्याकर्म कुर्वन्ती तत्राऽऽगतेन **कुबेरसेनेन** स्वसूनुना सह सम्भोगं व्यधात्। रहसि तया पृष्टेन तेन मातृ-पितृ-ग्राम-नामादिस्ववृत्तान्ते कथिते हा पापया मया सुतसङ्गो विहित इति विषण्णा सा वेश्यावृन्देन वार्यमाणापि जीवन्त्येव चितां प्रविष्टा। तदा च दैववशतः समागतेनोपरितनेन नदीपूरेण सा चिता वाहिता। अथ महति काष्ठे स्थिता तरन्ती यान्ती सा **सारणेना**ऽऽभीरेण निष्कास्य स्त्रीत्वेन रक्षिता । एकदा गोपकुलोचितकम्बल-वेषवती सा तक्रं विक्रेतुं **मथुरायां** नगर्यां गता। तत्र विपणौ राजपुत्रवाजिना हता सा पपात। अथोत्थिता सा भग्नभाण्डा पतितेऽपि तक्रे विशेषतः स्मितमुखा तदनुपलक्षणपरेणैकेन पुंसा हे सुन्दरि! पतितमपि तक्रं न शोचयसि तत्किमिति जगदे।

तमनुपलक्षमाणा सा निजं स्वरूपं जगौ—

हत्वा नृपं पतिमवेक्ष्य भुजङ्गदष्टं, देशान्तरे विधिवशाद्गणिकास्मि जाता।
पुत्रस्य सङ्गमधिगम्य चितां प्रविष्टा, शोचामि गोपगृहिणी कथमद्य तक्रम् ॥ ३॥

इति श्रुत्वा स्वस्वरूपं च निवेद्य तेनापि कुबेरसेनेन तत्पुत्रेण संयतीनां पार्श्वे नीता तपस्यां जग्राह। आलोचिताऽशुभकर्मविपाका सा कृतविविधतपाः सुगतिभाग्बभूव। ॥ **इति विपद्गतामेव विपदित्यर्थे पुष्यवतीकथा ॥ १७०॥**

॥ १७१॥ दैवो बलवानित्यर्थे महाबलकथा ॥

सर्वत्र विधिरेव बलवान्, यतः—

हरिपितुः सुभगैकशिरोमणेः, श्रितनभश्चरभूचरसम्पदः।
दहनतो मृतिरानकदुन्दुभे-र्विधिरहो बलवानिति मे मतिः ॥ १॥

१. आनकदुन्दुभि=वसुदेव ॥

नरपतेः सुभटान्तिमचक्रिणो, गुणवशीकृतसर्वमहीभुजः ।
नयनपङ्कजहानिरभूतमां, विधिरहो बलवानिति मे मतिः ॥ २॥
निजभुजार्जितसर्वमहीभुजः, समरकोटिसमर्जितसम्पदः ।
यदि शरेण हरेरभवन्मृति-र्विधिरहो बलवानिति मे मतिः ॥ ३॥
न योगेन न भूपेन, रक्ष्यते च कदापि हि। निबद्धो वटशाखायां, कर्मणा हि महाबलः ॥ ४॥

तथाहि— **तिलकपुरे पुरे तिलकसारो** नाम राजा, तस्य च **तिलकश्री** राज्ञी, एकदा दोलापर्यङ्के राज्ञीयुते राज्ञि सुप्ते तन्नगरवासिनो **धनबलस्य** श्रेष्ठिनो **महाबल**नामा पुत्रश्चौर्यार्थं निशि भूपसौधं प्रविष्टः ।

तदा च पर्यङ्कशृङ्खलयोत्तीर्यैकः सर्पो राज्ञीं दष्ट्वा गवाक्षेण गच्छन् **महाबलेन** दृष्टः । **महाबलो**ऽपि तस्य पृष्ठे द्रुतमेवोत्तीर्य पुरतो वृषभं पुरतश्च नरं तं निरीक्ष्य विस्मितः करे धृत्वा किमिदमकारीति तमप्राक्षीत् । अयं राजा मम पूर्वभववैरी, तेनास्य प्रिया मया देवेन सर्परूपेण दष्टा। हे सुरोत्तम! कथय कथं मे मृतिरिति तेनोक्तेऽमुष्य वटस्य शाखायां लम्बितस्य तव मरणमिति भणित्वा स सुरस्तिरोऽजनि। देववचनमन्यथा कर्तुमुद्यतः स तापसो भूत्वा विजने वने तस्थौ । एकदा एकेन चौरेण **तिलकपुरे** चौर्यं कृत्वा नष्टः, तस्य पृष्ठे च राजनरा लग्नाः। अथ सायं राजनरानागतान् ज्ञात्वा स तल्लोप्त्रं **महाबल**स्यौकसि निधाय क्वाऽपि सुष्वाप। प्रातश्च लोप्त्रं कुटीरे विलोक्य चौरोऽयमिति तैः स **महाबलो** राज्ञोऽग्रे निन्ये। निहन्यतामयमित्यादिष्टेऽपि स्मितमुखं तं राजा स्मितकारणमप्राक्षीत्। सोऽपि राज्ञीमरणतः प्रारभ्याऽऽत्मकथां सर्वां निवेद्येति प्रोचे, हे देव! देवोक्तं यदा सत्यं भवति, तदा कः शोकः इति मम स्मितम् । सर्वकार्यधुरीणे मयि सति वराकाणां सुराणां वाग् मिथ्या भूयादित्यभिधाय सुतमिव तं रक्षन्तं राजानं सोऽवोचत्।

हे देव! रम्यवसना-ऽशन-शयन-वाहनादिभिर्भवता लालितोऽप्यहमिमं वटं पश्यन् सशल्य इव खेदं प्राप्नुवन्नस्मि, तेनेमं वटं छिन्धि मां चाऽन्यत्र प्रहिणु, राज्ञोक्तं हे पुत्र! यदि त्वदुक्तं करोमि तदा देववाक् सत्यैव। तेन वटे सत्यपि त्वमिहैव वसन् यदि क्षेमभाक् भवसि तदैव मम पौरुषम्, एवं गच्छत्सु दिनेष्वेकदा **महाबल**युतो राजा मृगयार्थं वने गतो गृहान्तर्विस्मृतं स्वमसिमानेतुं **महाबलं** प्राहिणोत्। सोऽप्यसिं लात्वा द्रुतमागच्छंस्तस्य वटस्याऽधः प्राप्तस्तुरङ्गमं कशया जघान। पृष्ठपदाभ्यां चोल्ललिते तस्मिन् वाजिनि कण्ठस्थामलकमितमौक्तिकहार-*मध्यस्थरज्जुर्वटशाखायां प्रविष्टः, अथ पदान्तरालतो निर्गते तुरगे* **महाबलो** वटशाखायां लम्बितो रज्जुपाशितकण्ठो मृतिमाप। एनमुदन्तं निशम्य देवादिभ्योऽपि विधिरेव बलवत्तरं इति राजा निश्चिकाय। ॥ **इति दैवो बलवानित्यर्थे महाबलकथा ॥ १७१ ॥**

॥ १७२॥ भाललिखिताक्षरनिर्णये चन्द्रश्रेष्ठिकथा ॥

ललाटपट्टस्था वर्णा नान्यथा स्युः, यतः—

आरोहतु गिरिशिखरं, समुद्रमुल्लङ्घ्य यातु पातालम् ।
विधिलिखिताक्षरमालं, फलति कपालं न भूपोऽलम् ॥ १ ॥

अपि च—

यमे नाकसदां नाथे, कुबेरे वरुणे तथा । चित्रगुप्तगृहं प्राप्ते, चन्द्रश्रेष्ठी मरिष्यति ॥ २॥

तथाहि— **सावरायां** नगर्यां धनद इव धनी **चन्द्रश्रेष्ठी**, स चैकदा हरि-हर-सुर-पुरन्दर-स्कन्द-विनायक-दुर्गादिदेवाराधनपरं पौरवर्गं विलोक्य दध्यौ, धिगिमं पौरवर्गं यदेतान् वराकान् देवानाराधयति, यतस्तुष्टा अप्यमी मरणतो न रक्षन्ति, तेन किममीभिर्गलस्तनीगलस्तन-तुल्यैर्मुधाप्रयत्नैः? जीवितमरणदानशौण्डं यममेवाऽहमाराधयामीति मत्वा स स्वपुरीतो दक्षिणस्यां दिशि यमचैत्यं विधाय तत्र महिषाऽधिरूढां दण्डमण्डितकरां [1]धूमोर्णाऽध्या-सितोत्सङ्गां श्यामलां महाक्रूरां यममूर्तिं न्यवीविशत्।

अथ बलि-पुष्पादिभिरुपवैणवं [2] पूजयन्तं तं तुष्टो यमो वरं याचस्वेति प्रोचे। तेनोक्तं हे धर्मराज! हे सूरनन्दन! हे कालिन्दीसोदर! यदि मम तुष्टोऽसि तदा मामक्षयजीवितं कुरु, इत्यर्थितः स स्माह मयैकाकिनैतत्कृत्यं न भवति, तेन तवोपरोधेन त्रिभिरन्यैर्लोकपालैः सार्धं सम्भूयैतत्कृत्यं करिष्ये, अथ यम-सुरेन्द्र-कुबेर-वरुणाश्चत्वारोऽप्यमी क्रमेण सम्भूय तमादाय यमलेखकस्य चित्रगुप्तस्यौकसि गताः, तत्रैकस्मिन् देशे चन्द्रश्रेष्ठिनि स्थिते सति ते चित्रगुप्तमूचुः, हे भद्र ! चन्द्रश्रेष्ठिनो नाम भवतो लेखकान्निराकृत्यैनं चिरं जीविनं कुरु । अस्मिन् प्रस्तावे यत्र स चन्द्रश्रेष्ठी स्थितोऽभूत्, तद्गृहभारपट्टे भग्ने तद्गृहं चन्द्रश्रेष्ठिशिरसि पपात। गृहपतनान्मृते च तस्मिन् चित्रगुप्तलेखाऽन्तरिदं लिखितं निरगात्।

यमे नाकसदां नाथे, कुबेरे वरुणे तथा । चित्रगुप्तगृहं प्राप्ते, चन्द्रश्रेष्ठी मरिष्यति ॥ ३॥

॥ इति भाललिखिताऽक्षरनिर्णये चन्द्रश्रेष्ठिकथा ॥ १७२ ॥

॥ १७३॥ परद्रोहकृतामनर्थाऽवाप्तिरित्यर्थे सुरवमानाम-श्रेष्ठिपत्नीकथा ॥

पापकारिणो हि स्वयमेव निधनं यान्ति, यतः-

अपकारिषु माऽपायं, चिन्तय त्वं कदाचन । स्वयमेव पतिष्यन्ति, तीरजाता इव द्रुमाः ॥ १॥

अपि च—

पातकं सृजतां पुंसां, न स्यात्कल्याणसङ्गमः । सपत्न्यै पापकृज्ज्ञे, सपत्नीद्वयमन्थलम् ॥ २॥

तथाहि— **लक्ष्मीनिवासे** नगरे **मदनश्रेष्ठिना** क्रमेण **सुखमा-सुरमा-सुरवमानामा**-नस्तिस्रः पत्न्यः परिणीताः। तत्र लघुत्वेन पतिर्मानपात्रे सुरवमायामन्ये द्वे पत्न्यौ द्वेषं वहतःस्म। यतः—

---

१. धूमोर्णा यमपत्नी ॥ २. उपवैणवं = त्रिसन्ध्या ३. परत्रे - AP॥

आज्ञाभङ्गो नरेन्द्राणां, गुरूणां मानमर्दनम् ।
पृथक् शय्या च नारीणा-मशस्त्रो वध उच्यते ॥ ३॥

एकदा स्वस्ववेश्मस्थिताभ्यां ताभ्यां पृथक् पृथक् परमान्न-शर्करा-घृतादिभिः पात्रपूरणतस्तोषितौ मन्त्र-यन्त्रादिकुटिलकर्मकर्मठौ **कमठ-शमठ**नामानौ द्वौ योगिनौ सुरवमानामाऽस्मत्सपत्नी गतलोचना क्रियतामिति प्रार्थितौ। तदा कमठेन सुरवमेति सपत्नीनाम यैन्त्राऽन्तर्लिखनाऽवसरे औत्सुक्यवशेन रकार-वकारयोर्मिथः शिरःसन्धानेन सुखमेति तदीयमेव नाम यन्त्रे लिखित्वा यन्त्रस्समर्पितः, कथितं च ज्वालितेऽस्मिन् यन्त्रे सा नेत्रहीना भवितेति।

शमठेनापि तथैवोत्सुक्यवशेन वकारविस्मरणतः सुरमेति तन्नाम लिखित्वा यन्त्रो दत्तः, प्रोक्तं च तथैव। अथ योगिनोर्गतयोस्ताभ्यां खदिराऽङ्गारैस्तयोर्यन्त्रयोः पृथक् पृथक् दग्धयोः सतोः सद्यः स्वयमेव लोचनरहिते ते बभूवतुः। ॥ **इति परद्रोहकृतामनर्थाऽवाप्तिरित्यर्थे सुरवमानामश्रेष्ठिपत्नीकथा ॥ १७३॥**

॥ १७४॥ शीलविषये वासिनीनाम-वणिक्स्त्रीकथा ॥

शीलं हि पालितं निर्वाणसम्पत्तिं सृजति। यतः—

वाञ्छभ्यं वितनोति यच्छति यशः पुष्णाति पुण्यप्रथां,
सौन्दर्यं सृजति प्रभां प्रथयति श्रेयःश्रियं सिञ्चति ।
प्रीणाति प्रभुतां धिनोति च धृतिं सूते सुरौकःस्थितिं,
कैवल्यं करसात्करोति सुभगं शीलं नृणां शीलितम् ॥ १॥

तेनोपायैरपि शीलं पालनीयमेव। यतः—

रक्षन्त्युपायैरपि काश्चिदार्याः, स्वशीलमुन्मीलितवर्यशौर्याः ।
यद्रूपवत्या कणपेषणाय, द्विजं नियोज्याऽवितमात्मशीलम् ॥ २॥

तथाहि— **श्रीनिवासे** नगरे **वासवदत्त**स्य वणिजो **वासिनी**नामगेहिनी, तयोश्च **सुन्दर**नामा सुतः, एकदा रूपसौभाग्यजितरतिरूपा सा नारायणस्य विप्रस्य लेखशालायां पठतः स्वसुतस्याऽऽकारणार्थं गता। **नारायण**ोऽपि तां विलोक्य स्मराऽऽतुरोऽजनि। अथ तत्सुताकारणमिषेण प्रत्यहं तद्गृहमागच्छता तेन विप्रेण तत्संस्तवो निर्ममे। विशेषतस्तत्सुतं पाठयता पालयता च तेनान्यदाऽभ्यर्थिता शीलवती । सा कार्यान्तरदम्भमुद्दीश्याऽद्य वा कल्ये वेति भणन्ती तमवञ्चयत्। अथ बाढाभ्यर्थनपरस्य तस्य शिक्षार्थं मध्यरात्रावागन्तव्यमिति तया सङ्केतितः स पुष्पादिसामग्रीमादाय सायं तद्गृहं ययौ। रहसि स्थिते तस्मिन् श्वश्रूदत्तकणपेषणपरायां तस्यां च द्वारे तत्पतिराययौ।

१. यन्त्रन्तर्लिखतौत्सुक्यवशेन० AHD।

[तदा तया **नारायणं** प्रति प्रोक्तं— भो **नारायण**! त्वं] स्त्रीवेषमाधाय तावत्कणपेषणं कुरु? यावदयं मम भर्ता मया सह रन्त्वा शेते। सुप्ते चाऽस्मिन् आवाभ्यां स्वैरं रहःक्रीडा करिष्यते। अथ तस्मिंस्तथैव कुर्वति मध्ये समेतेन पत्या केयं कणपेषणं करोतीति पृष्टे प्रातिवेश्मिकवधूरिति तया चोक्ते सुखेन तयोः क्रीडतोः सर्वापि शर्वरी व्यतिचक्राम। प्रभाते श्रेष्ठिनि बहिर्गते **नारायणो**ऽपि तत्सुखाऽनाप्त्या कणपेषणेन च भृशं खेदमापन्नो गृहं गतः अथैकदा पथि मिलितः स द्विजस्तयाऽभाणि—

सुं आजकालि दीसउ न पीसउ, सोऽवोचत्- **सु पहिलु पीसउ सघलूं घटिउं**, तदा च बाल्यमित्रेणोक्तः स स्वचरित्रमूचे- **भुंडिइ कीधूं, न करावितं सारी राति दलाविउं काज न केवउ मालीनउ सह रामदेवउ ॥ इति शीलविषये वासिनीनाम-वणिक्स्त्रीकथा ॥ १७४॥**

॥ १७५॥ असदृश्योगे अशोकश्रीकथा ॥

दैवो हि परस्परमघटमानमेव सम्बन्धं विधत्ते यतः—

देव दोहिलु दोष बुझे, छेतरवा छयल्ल ।
जस घरि नारी पदमिनी, तस घरि पुरुष बयल्ल ॥ १॥
महियलि-माहि भमंतडां, अम्हं अच्छेरुं दिट्ठ ।
जस घरि पुरुष पुरंदरु, तस घरि नारी कुकट्ठ ॥ २॥

अपि च-

ससि न किउ निकलंक, काय न दिट्ठी मयणह;
सुहडां घरि दालिद्द, लाछी लिइ आली कृपणह ।
लोअण दीध कुरंग, हीण-लोअण किअ नारी;
नागवेलि किय निफल, सफल तुंबिणी धारी ॥ ३॥
परिमल-हीण सोवण्ण किय, अमुक-मनि एह विभ्रम हुउ ।
हा हा दैव ज दैव, कारण किमु, ठामि ठामि भूलवि गउ ॥ ४॥
चारितं दयितया समाहृतं, बीटकं वृषभयोर्जडात्मना ।
धिग् विधिं प्रविदधात्यनीदृशं, यः सदा तनुमतामिति स्थितिः ॥ ५॥

तथाहि— **पुरस्थले** ग्रामे **नन्दनस्य** श्रेष्ठिनोऽशोकश्रीश्चतुःषष्टिकलापात्रं पुत्री, निर्धनत्वेन तेन सा **बूरस्थले** ग्रामे ग्रामीणस्य मूर्खस्य **धनदेवस्य** दत्ता। तत्र ग्रामे तस्यौकसि तस्थुषी सा काककण्ठे कनकमालेव न शुशुभे। तथापि पतिव्रता सा तेन सार्धं विषयसुखमनुभवति स्म। नागरी सा नगरोचिताऽशन-मण्डन-वचन-गमन-शयन-गानादिकृत्यं विदधती सर्वेषां ग्रामलोकानां मनांसि रञ्जयामास। अन्यदा सा क्षेत्रहलकर्षणं कुर्वाणस्य स्वपतेः कृते भक्तमादाय गच्छन्ती पितुर्गृहादागतमहिलतादलबीटकं भक्तभोजनान्तर्निधाय क्षेत्रं ययौ।

अथ जलाऽऽनयनार्थं कूपे गतायां तस्यां तद्बीटकं विलोक्य स दध्यौ, अहो! चतुराऽसौ वृषभयोरपि कृते घासग्रासमानिन्ये। अथ तेन मूर्खेण कराभ्यां तद् बीटकं द्विधा विधाय युगपत्तयोर्बलिवर्दयोर्मुखान्तर्निक्षिप्तम्। अथ तत्रागता सा वृषभाऽऽनने रक्ते विलोक्य विषादवती पतिमुद्दिश्य जगौ—

हल हक्कंता जम्म गउ, नाह न हूउ छयल्ल ।
विण-सींगि विण-पूंछडी, विहि-निम्मिउ बयल्ल ॥ ५॥
सही-सुहाणी-मांहि तंइ, भली लजावी कंत ।
देखिइ दइव ना दूहव्या, बलदह रत्ता दंत ॥ ६॥

इत्यभिधाय असदृशसङ्गघटनपटीयांसं विधिं निन्दन्ती सा गृहं ययौ। **॥ इत्यसदृशयोगे अशोकश्रीकथा ॥ १७५॥**

इति पं० श्रीकमलविजयगणिशिष्य पं० श्रीहेमविजयगणिविरचिते
कथारत्नाकरे सप्तमस्तरङ्गः समाप्तः
॥ श्रीरस्तु॥

॥ ८॥ अष्टमस्तरङ्गः ॥

॥ १७६॥ अभयमन्त्रिवञ्चने कामपताकागणिकाकथा ॥

लोलेक्षणानां मतिप्रपञ्चो हि सुधियामप्यगम्यः, यतः—

तज्ज्ञनैर्न परिवारराजिभि-स्तद्बलैर्न हि विशामधीश्वराः ।
तद्धनैरपि न वित्तशालिनो, यद्धिया विरचयन्ति सुभ्रुवः ॥ १ ॥

अपि च—

धियां प्रपञ्चश्चपलेक्षणानां, न वञ्चयेत्कांश्चतुरानपीह ।
प्रद्योतभूपाय पणाङ्गनाभि-रानीय दत्तो ह्यभयोऽपि मन्त्री ॥ २॥

तथाहि— **अवन्त्यां पुर्यां चण्डप्रद्योतो** भूपः, तं चैकदा सबलवाहनं **राजगृह**पुरोपरि समायान्तमाकर्ण्य भृशं भीतः **श्रेणिकः**—कथं करिष्यते? इत्यभयमन्त्रिणमाह। धियां निधिरभयोऽपि सैन्योत्तरणस्थानेष्वादावेव भूरि कनकादिधनं निधाय तत्रोत्तीर्णं **चण्डप्रद्योतं** निशि दूतेनेति व्यज्ञापयत्। मम मातृस्वसुः शिवायाः पतिर्भवान् मम पितेव, तेन तव हितं ज्ञापयन्नस्मि, यद्भवतः सर्वेऽपि सैनिकाः **श्रेणिके**न भेदं नीताः सन्ति। ते च भवन्तं निबध्य श्रेणिकाय दास्यन्ति, तन्निश्चयकरणार्थं भवत्सैनिकपटकुटीमध्यभुवि गतं **श्रेणिक**नामाऽङ्कितं धनं विलोक्य त्वया यथारुचि विधेयमिति श्रुत्वा **चण्डप्रद्योतो**ऽपि तत्तथैव निरीक्ष्याऽभयोक्तं सत्यं च मत्वा रात्रावेव प्रणश्य स्वपुरीमगात्।

पृष्ठतः समेतस्वसैनिकमुखादवगताभयमन्त्रिप्रपञ्चश्चण्डप्रद्योतोऽन्तःसभमित्यभणत्, अस्ति कोऽपि यः **श्रेणिक**पुत्रमभयमन्त्रिणं बद्ध्वाऽत्राऽऽनयेदिति। तदा च तच्चामरधारिणी **कामपताकानाम**गणिका तद्वचनमङ्गीकृत्य रूपसम्पन्नाभ्यामन्याभ्यां द्वाभ्यां गणिकाभ्यां सहिता साध्वीसमीपे श्राविकासामाचारीमधीत्य बहुपरिवारयुता यात्रामिषेण श्राविकारूपधारिणी **राजगृहे** पुरे ययौ। अथ भुवनत्रयवञ्चनोद्यताया मायायास्तिस्रः मूर्त्तय इव ताः सकलेऽपि पुरे यतिवन्दनपुरस्सरं चैत्यपरिपाटीं विधाय राजलोकमध्यस्थिते चैत्ये दशत्रिकादि सम्यग्विधिना जिनान् पूजयन्त्यस्तत्रागतेनाऽभयेन ददृशिरे। तदा च विशेषतस्ताः कपटेन देवभक्तिं व्यधुः। अभयोऽपि तथाऽवस्थाऽवस्थितास्ता विलोक्य धन्या इमा धर्मात्मानः श्राविका इति दध्यौ। अथ ता अपि विधिना देवान् पूजयित्वा स्तुत्वा च बहिरागताः, स्वागतप्रश्नादिपूर्वमभयेना-

ऽभिदधिरे, तदा च **कामपताका** मुखं पाणिना पिधाय सविनय-मधुरवचनैरूचे, हे धर्मबान्धव! **कौशाम्बी**वासिनी श्रमणोपासिकाहं **श्रीमती**नामवाणिजी, इमे च मत्स्नुषे, अनयोः पतिर्मत्सुतः परदेशे मृतः, तेन संसारवासाद्विरक्ते इमे तपस्यामादातुमनसौ मामूचतुः, मया चोक्ते— हे पुत्र्यौ! तीर्थयात्रा-सङ्घवात्सल्य-जिनभुवनादिषु धनव्ययं विधायाऽहमपि भवतीभ्यां सह तपस्यामादास्यामीति तीर्थयात्रां विधातुमहमिहागताऽस्मीति श्रुत्वाऽभयोऽपि बलात्कारेण भोजनार्थमात्मधामनि ता आनयति स्म।

अथ ताभिर्भोक्तुमुपविष्टाभिः सचित्तवस्तु-विकृति-गुडनिष्पन्नवस्तु-हरितशाकादिप्रत्याख्यानेन चतुर्दशनियमविवेकेन च रञ्जितो मन्त्री तद्भोजनेन स्वं कृतार्थं मेने। ता अपि भोजनार्थं मन्त्रिणं निमन्त्र्य स्वोत्तरणस्थानं ययुः। सरलात्मा सचिवोऽपि भोजनवेलायां तत्र जगाम। ताभिर्भोजनप्रान्ते दधिस्थाने **चन्द्रहास**[1]मदिरां भोजितो मन्त्री मदिरामूर्च्छितो बाढं बद्ध्वा रथे निधाय स्तोकैरेव दिनैश्चण्डप्रद्योताय दत्तः। ॥ **इति स्त्रीमतिविषयेऽभयमन्त्रिवञ्चना-चतुरकामपताकागणिकाकथा ॥ १७६ ॥**

॥ १७७॥ जलस्नानैर्नान्तरो मलो यातीत्यर्थे गोविन्दसार्थवाहकथा ॥

तपोभिरेवाऽऽत्मा नैर्मल्यभाग्भवति, यतः—

क्षारैरिवाऽम्बरमपां प्रकरैरिवाङ्गं, शाणैरिवाऽस्त्रमनलैरिव जातरूपम् ।
भूर्गोमयैरिव च नेत्रमिवाऽञ्जनैश्च, नैर्मल्यमावहति तीव्रतपोभिरात्मा ॥ १ ॥

तेन जलस्नानेनाऽन्तरात्मा कालुष्यं नोज्झति। यतः—

न बाह्यशौचैरमलीभवन्ति, जीवा दुरन्तैर्दुरितैः प्रलिप्ताः ।
मिष्टा सुतीर्थे स्नपिताऽपि मातु-र्वाग्भिस्तनूजेन न तुम्बिकाऽऽसीत् ॥ २॥

तथाहि— **विष्णुस्थले** परमश्राविका **गोमती** सार्थवाही, तस्याश्च परममिथ्यादृष्टि**र्गोविन्दः** सुतः, मात्रा जैनं धर्मं प्रतिबोधितोऽपि पुत्रश्चन्द्रः कलङ्कमिव मिथ्यात्वं नाऽत्याक्षीत्।

एकदा तीर्थयात्रायां यातुमुद्यतं तं माता स्माह, हे वत्स! लौकिकतीर्थयात्रया जन्मनः फलं नाऽऽप्यते, किन्तु धनव्ययादिक्लेश एव। किञ्च गङ्गा-गोदावरी-सरस्वती-यमुनात्रिवेणीसङ्गमे जल-दर्भ-मृत्तिकादिस्नानेनाऽऽत्मनः प्राणातिपात-मृषावादादिसम्भवमालिन्यं न यातीति बहु शिक्षितोऽप्यसौ यदा न न्यवर्तत, तदा तत्प्रतिबोधनाऽभिप्रायेण सा चैकां कटुकां तुम्बिकां तत्करे दत्त्वैवमूचे। हे पुत्र! यत्र यत्र तीर्थे येन येन विधिना त्वया स्नानं

१. *हास्या AH। °हास्य – D॥*

विधीयते तत्र तत्र तीर्थे तेन तेन विधिना अस्यास्तुम्बिकाया [अपि] स्नानं कारणीयमिति मदुक्तं विधेयमिति मात्रोक्तमङ्गीकृत्य यथारुचितेषु तीर्थेषु च गत्वा मात्रोक्तं विधाय च मुण्डितमुण्डः प्रभूतमुद्राऽङ्कितबाहुदण्डः स महोत्सवपुरस्सरं स्वपुरमागात्। गङ्गादिभ्योऽपि सर्वतीर्थेभ्यो जननी-जनकौ परमं तीर्थमिति ध्यात्वा विनयेन स मातुः पादौ प्रणम्य यथाऽभिहित-विहिततुम्बिकाव्यतिकरं चाऽभिधाय भोक्तुमुपविष्टस्य तस्य स्थाले तस्यास्तुम्बिकायाः शाकं विधाय माता पर्यवेषयत्।

सोऽपि तं शाकमास्वाद्य— अहो! अखाद्यं विषभूतं चेति वदन्तं च तं माता बभाण, हे पुत्र! त्वमित्थं मा वादीः, या तुम्बिका भवता तीर्थजलैः स्नपिता, तस्या अपि शाके कटुकत्वं कुतः? तेनोक्तं हे मातर्जलैर्मज्जिताया अपि तुम्बिकाया अन्तरङ्गं कटुकत्वं कथं याति ?, मात्रोक्तं— हे वत्स! जलैः स्नपिताया अप्यस्याः कटुकत्वदोषो न गतस्तदा हिंसा-मृषावाद-स्तेय-मैथुनादिजनितमान्तरमात्मनि लग्नमघजालं जलस्नानेन कथं यातीति मात्रोक्तं सत्यं मत्वा **गोविन्दो** मात्रा सह **धर्मधोषगुरोः** पार्श्वे श्रावकधर्ममङ्गीकृत्य प्रपाल्य च द्वादशे देवलोके सुरः समजनि। ॥ **इति जलस्नानैर्नाऽऽन्तरो मलो यातीत्यर्थे गोविन्दसार्थवाहकथा** ॥ १७७॥

॥ १७८॥ दानविषये श्रीविक्रमादित्यकथा ॥

शूर-पण्डितेभ्योऽपि दाता दुर्लभः यतः—

शतेषु लभ्यते शूरः, सहस्रेषु च पण्डितः। वक्ता शतसहस्रेषु, दाता भवति वा न वा ॥ १॥

दातारो हि सर्वं यच्छन्ति यतः—

खात्र-स्वरा-ऽन्तःस्थितवस्तु-नाद-विदां चतुर्णामपि तस्कराणाम् ।
श्रीविक्रमोऽदान्मुदितः स्वपेटी-र्यच्छन्ति तत्किं न हि दानवीराः ॥ २॥

तथाहि— **अवन्त्यां** नगर्यामन्यदा चौरैः प्रकाममभिभूतः पौरवर्गः सभाऽऽसीनं **श्रीविक्रमा**दित्यमेत्येति पुरीस्वरूपं जगौ। राज्ञाऽपि साक्षेपं हक्कितास्तलारक्षा आचख्युः, हे देव! पवनघटिता इव तस्करा अस्माभिर्गृहीतुं न शक्यन्ते, अथ भवतां भव्यं भवितेत्यभिधाय पौरवर्गं च विसृज्य निशि चौरवेषधारी राजा यावच्चत्वरे तिष्ठति, तावत् श्यामाऽम्बरधारिणोऽङ्गीकृत-चौरोपकरणाश्चत्वारः **श्रीचन्द्र-गुणचन्द्र-भूरिचन्द्र-धीरचन्द्र**नामानश्चौराः समागताः।

अथ तैस्तस्करसंज्ञयाऽऽकारितो राजापि चौरोऽहमिति जल्पंस्तत्पार्श्वे समेत्य कः कः श्रीमतां गुणोऽस्तीति वक्ति स्म। तेष्वेकेन खात्रविधौ विशारदोऽस्मीति कथिते द्वितीयः प्राह, सर्वेषां विहगादीनां स्वरज्ञानतः शकुनेषु मम वैदग्ध्यमस्तीतितेनोक्ते तृतीयः स्माह, पेटीमञ्जूषादिमध्यस्थं वस्तु घ्राणेन वेद्मीति तेनाभिहिते चतुर्थः प्रोवाच, यस्य कस्यापि पुरुषादेर्दिवा-नक्तं वाप्येकशः शब्दः श्रुतो भवति [तत्] शब्दाऽनुसारेण वर्षशतप्रान्तेऽपि

तमुपलक्षयामीति। अथ कस्तव गुणः ? किंनामा च त्वमिति तैः पृष्टे राजोचे, यत्र चौरवृन्देऽहं भवामि तेषां चौरदण्डेन न मरणं, **विक्रम**श्च मम नामेति। अथ ते पञ्चाऽपि राजमन्दिरे गताः, तत्र च खात्रदाननिपुणेन खात्रे दीयमाने शिवाशब्दं श्रुत्वा किमेषा वक्तीति क्रमेण पृष्टः शाकुनिकः स्माह, धनिको जागर्ति धनिको जागर्तीत्यसौ वक्ति। अहो! शकुनकलाऽस्य ! इति ध्यायता तेन च पुनर्घूकशब्दमाकर्ण्य किमयं वेदयतीति पृष्टः स प्राह- धनिकः पश्यतीत्ययं ब्रूते। अथ सौधान्तः प्रविष्टेषु तेषु पुरतो निबद्धस्यैकस्य शुनः शब्दं निशम्य विक्रमेण पृष्टः स पुनरवोचत्, अत्र मा प्रविशन्तु मा प्रविशन्तु इत्ययं वदति। तदैव च तन्निकटस्थस्य द्वितीयस्य शुनः शब्दमाकर्ण्य किमयमपि वदतीति पृष्टः स पुनरवादीत्, पार्श्वस्थं वदन्तं श्वानमयमिति वक्ति, हे मित्र! मौनभाग्भव, आत्मनां धनिकोऽभ्येतीति। एतदुक्तमाकर्ण्य विस्मितो विक्रमोऽस्य कला वरीयसीति दध्यौ।

अथ पुरतो गत्वा पेटीषट्कं प्राप्य किमासां मध्येऽस्तीति पृष्टस्तृतीयो जगौ। सर्वासु षट्सु चेमासु पेटीषु मणि-रत्न-रजत-कनक-माणिक्यादि भूरि वस्तु वर्तते। अथैकां पेटीं खात्रमुखे विमुच्यैकैकां चादाय ते पञ्चापि माणिक्यचतुष्के श्वेत-रक्त-श्याम-नील-पीतवस्त्राणामात्मनां सङ्गम इति सङ्केतं कृत्वा स्वं स्वं स्थानं गताः। अथ प्रातरहो अद्य राज्ञि रक्षितरि राजौकसि खात्रं पतितमिति वदन् कोट्टपालस्तां पेटीं स्वगृहे विमुच्य खात्रस्वरूपं राज्ञो व्यज्ञपयत्। अद्य रात्रौ चौरग्रहणमहं करिष्यामीति भणित्वा सभास्थितो राजा रात्रिसङ्केतितवेषचिह्नेन तांश्चतुरोऽपि निबध्य स्वपुरुषैरानयत्।

निहन्यतामी चौरा इति वदन्तं राजानं चतुर्थः स्माह, हे देव! रात्रावस्माकं पञ्चमस्त्वममिलः, तेनाऽस्मदुक्तममिलत्, भवदुक्तं तु मुधा भवतीति वदन्तं तं स्वरज्ञाननिपुणं मत्वा तेषां चतुर्णामपि ताः पेटीर्दत्त्वा राजा तान् स्वसेवकत्वेनाऽरक्षत्। तां पेटीं च लात्वा कोट्टपालं स्वदेशान्निरवासयत्। ते श्रीचन्द्रादयोऽपि विमुक्तचौर्यव्यसना राजमान्याः सञ्जज्ञिरे।

॥ **इति दानविषये श्रीविक्रमादित्यकथा** ॥ १७८ ॥

॥ १७९ ॥ शीलविषये रूपश्रीश्रेष्ठिनीकथा ॥

मृगीदृशो हि शीलेनैव शोभन्ते, यतः—

नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना शर्वरी।
शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मन्दिरम्।
वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः।
सत्पुत्रेण कुलं वनानि कुसुमैर्नीत्या प्रभुत्वं यथा ॥ १ ॥

धन्याः स्त्रियः कपटेनाऽपि शीलं पालयन्ति, यतः—

रक्षन्त्युपायैरपि काश्चिदार्याः, स्वं शीलमुन्मीलितवर्यशौर्याः ।
यत् श्रेष्ठि-नार्या कपटेन जारं, पेट्यां निधायावितमात्मशीलम् ॥ २ ॥

तथाहि— **वणस्थले** नगरे **रत्नसेनस्य** श्रेष्ठिनो रूपसौभाग्यशालिनी **रूपवती** गेहिनी। एकदा तस्या भर्तरि देशान्तरं गते **रणमल्ला**ऽभिधः कश्चिद्युवा जारस्तां प्रार्थयाञ्चक्रे। शीलरक्षा-विचक्षणा सापि कल्ये तवेप्सितं विधास्यामीति विलम्बेन कालक्षेपं चकार। सोऽपि मनोज्ञवसना-ऽऽभरण-कुसुम-ताम्बूलाऽऽदि तद्गृहे प्राहिणोत्। धीमती साऽपि तत्प्रहितं समस्तमरक्षत्।

अथ भर्तरि गृहमागते रात्रेः प्रथमे यामेऽद्य त्वयाऽऽगन्तव्यमिति तया सङ्केतितः स कामी तथा व्यधात्। वासगृहद्वारं पिधाय तेन सह दम्भेन प्रेमाऽऽलापप्रह्वायां तस्यां पूर्वदत्तसङ्केतस्तस्याः पतिर्द्वारि समेति स्म। यावदसौ मम पतिर्मया रन्त्वा शेते तावद्भवानस्यां मञ्जूषायां प्रविशतु, इत्यभिधाय विवस्त्रं तं मञ्जूषान्तर्निधाय तन्मुखेन च बृहत्तालकं दत्त्वा पत्या सह सम्भोगं विधाय च सा निर्भरं शेते स्म। अथ दैवयोगेन देशान्तरादागतस्याऽस्य गृहे भूरि धनं भावीति धिया तस्यामेव निशि तस्करैस्तस्यौकसि खात्रं पातितम्। अन्यद्वस्तु गृहान्तरनिरीक्ष्य दत्तबृहत्तालका सा मञ्जूषा तैश्चौरैः स्वगृहं नीता। अथ प्रभाते हा! हा! मञ्जूषा गतेति भृशं खेदं विदधतं पतिं सा सकौतुकमवक्।

न करंता ते कीधु, कीधु ते चोरे लीधु ।
मुध उठइ इहां जे घासइ, तिंहा सातपांच मिलससइ हससइ हाथ घससइ ॥ १॥

इत्यभिधाय सर्वमुदन्तं सा विस्तरतो जगौ। अथोद्घाटितायां तस्यां मञ्जूषायां नग्नं मुक्तकेशं च तं निर्गतं विलोक्य ते चौरास्तालवादनपुरस्सरं जहसुस्तमाम्। ॥ **इति शीलविषये रूपश्रीश्रेष्ठिप्रियाकथा ॥ १७९ ॥**

॥ १८०॥ असत्यविरतौ मृगाङ्कभूपकथा ॥

असत्यवचनैर्भूरयो दोषाः स्युः, यतः—

असत्यवचनाद्वैर-विषादाऽप्रत्ययादयः।
प्रादुःषन्ति न के दोषाः। कुपथ्याद् व्याधयो यथा ॥ १॥ [योगशास्त्रे २/५८]

तदसत्यं धन्या एव केऽपि विमुञ्चन्ति, यतः—

मिष्टानि मांस-मधु-जार-मृषा-वचांसि, श्रुत्वा कथामिति चतुर्वरकन्यकोत्थाम्।
नाऽसत्यमार्गविरता इह के भवन्ति, राजेव पण्यरमणीरचितप्रपञ्चः ॥ २ ॥

तथाहि—**श्रीपुरे** नगरे **मृगाङ्को** राजा, तत्र च श्रेष्ठि-पुरोहित-मन्त्रि-वेश्यापुत्र्यः **कनकश्री-यमुना-श्रीमती-कामसेना**संज्ञाश्चतस्रः कन्यका मिथः सौहार्दभाजो वसन्ति। एकदा रात्रावेकत्र मांस-मदिरा-पारदारिकत्व-मृषावचनानि मनोहराणीत्यनुक्रमेण मिथः पृष्टानां तासां रहःकथां रात्रिचर्यायां भ्रमन् भूपो निशम्य दध्यौ।

अहो वणिग्-विप्र-मन्त्रिकुलानुचितं मांस-सुरा-जारत्वचारुत्वं कथमेता बालिका अपि विदन्ति? कथं चैषा बालाऽपि वेश्यासुता मृषावादसौष्ठवं वेत्तीति मत्वा राजा गृहमागत्य

प्रभाते सौधाऽन्तः श्रेष्ठिसुतामाकार्य कथं मांसं मिष्टमित्यप्राक्षीत्। हे स्वामिन्नेकदा स्वैरं रममाणाऽहमेकस्य द्वारे पतितस्य मांसमिश्रस्याऽस्थिखण्डस्योपरि कीटिका-काक-श्वान-शकुनिका-श्येनाऽऽदीन् भूरीन् जीवान् मिलितानद्राक्षम्। तदा च मया चिन्तितं प्रथमं धनिकेनाऽऽमिषमुपभुज्यैतदस्थिखण्डं बहिः क्षिप्तं? तल्लग्नस्याऽऽमिषलेशस्य कृते कीटिकादयोऽमी जीवा भ्रमन्ति, मिथः कलहायन्ते चेति मांसमेव मिष्टमित्यहमभणम्। सत्कृत्य विसृष्टायां तस्यां राजा तथैव पुरोहितपुत्रीमाहूय कथं मद्यं मिष्टमित्यपृच्छत्। हे स्वामिन्नेकदा सुरापानपराणां भवत्सेवकानां मिथो भूयान् कलिरभूत्। तदा चैकेन सुरामत्तेन जनेनाऽसिना कोऽपि महान् भवत्सेवको हतः। तद्वैरापनोदाय च तेन हन्त्रा हतस्य सुताय स्वसुतां दत्त्वा पुनः प्रीतिकृते गोष्ठीस्थाने सुरापानमेव सम्भूय व्यधायि, तथा च मया ध्यातं यद्वशेन मानुषमरणमासीत्, तदेव च सुरापानं यदि प्रीतिकृते विधीयते तदा मद्यमेव मिष्टमित्यहमवोचम्। अथ तस्यां गतायां तथैवाऽऽकार्य राजा कथं जारत्वं रम्यमिति मन्त्रिपुत्रीमपृच्छत्।

तयोक्तं हे तात! अत्रैव पुरे **धनदत्तो** युवा **धनश्रियं** श्रेष्ठिप्रियां सेवमानो भवत्पुरुषैर्ज्ञातः खराऽऽरोहणपुरस्सरं बहु विडम्ब्य धनं लात्वा च मुमुचे, स पुनरपि तां कामयन् मया ददृशे, तदा च मया ध्यातं, यदयमेव विडम्बितो दण्डितोऽपि च यदि जारत्वं नोज्झति तदा पारदारिकत्वमेव रम्यमित्यहमकथयम्। तस्यामपि गतायां राजा कथं मृषा वचनमिष्टमिति पृष्टा वेश्यासुता सप्तदिनमर्यादां कृत्वा गृहं गता। अथ राज्ञा पृष्टं सुतामुखादाकर्ण्य **कामपताकया** तन्मात्रा सप्तदिनं सा भूमिगृहे निदधे। सप्तमेऽहनि राज्ञा समाहूतायाः सुतायाः स्थाने तन्माता राजसभां गत्वा राजानं जगौ, हे देव! मत्सुता नित्यं शक्रपुरो नृत्यं कर्तुं याति, यदा च स शक्रस्तां विसृजति, तदा सा गृहमेति, तेन सप्त वासरा जाताः, साऽद्याऽपि गृहमागता नाऽस्तीति श्रुत्वा विस्मितो राजा यदा सा गृहं समेति तदा द्रुतमेवाऽत्र प्रेष्येत्यभिधाय तां व्यसृजत्। अथैकदा ततो निर्गता विशेषतो वसनाऽऽभरणभूषिता सा राजसभायां गता, राज्ञाऽपि सा बहुमानमूचे, हे पुत्रि! त्वमिन्द्रस्य विशेषतो मान्या तेन यथा सुरेन्द्रस्य दर्शनमस्माकं स्यात्तथा विधेहि ? तयोक्तं हे देव! देवेन्द्रं पृष्ट्वा निर्णयं वक्ष्ये।

अथ पुनरपि सप्तदिनानि गृहान्तः स्थित्वा सभामागत्य च राजानमवक्, हे देव! बाढाऽऽग्रहेण पितृपक्षशुद्धानां मम दर्शनं भवितेति वदता शक्रेण मद्वचो मानितमस्ति, तेनैकं चतुर्द्वारं विमानोपमं रम्यं भूषितं गृहं कारय, तत्राऽऽगत्य सुरेन्द्रदर्शनं तव भवितेति भणित्वा सा गृहमगात्। अथ राजा राज्ञी मन्त्री पुरोहितश्चाऽमी चत्वारोऽपि सुरराजदर्शनोत्सुकास्तयोक्तवासरे तत्र गृहे प्राभृतपाणयः सावधानास्तस्थुः। अथ चामर-च्छत्रशोभितस्य नानामणिरम्यस्य सपादपीठस्य गृहमध्यमण्डितस्य सिंहासनस्य पार्श्वे शृङ्गारशालिनी सा तस्थौ। अथ हे दम्भोलिपाणे! हे सुरराज! हे पुरन्दर ! मनोहरमिदमासनमलङ्क्रियतामलङ्क्रियतामिति वादिनी सा क्षणान्तरे समुत्तस्थौ।

चालितचामरायां तस्यां राजा प्राभृतं पुरो विमुच्य प्राणमत्। राज्ञीमुख्या अन्येऽपि तथैव व्यधुः अथ क्षणान्तरे सुरराजा व्रजतीति वादिनी सा पुनरुत्तस्थौ। हे राजन्! दृष्टो देवेन्द्रः? इति तदुक्तं श्रुत्वा राजा दध्यौ, यदि न विलोकितः स्वर्लोकनाथ इति वक्ष्ये, तदैषा मम पितृदोषं ज्ञास्यतीति मत्वा स तामवोचत्, हे पुत्रि! तव प्रसादात्सुरेन्द्रो मया दृष्टः, राज्ञीप्रमुखा अन्येऽप्येवमेव प्रोचुः अस्मिन्नवसरे पार्श्वस्थो नृपसेवको **धरणो** नाम राजानं जगौ, हे देव! मम पितुर्द्वयं चतुष्टयं वा भूयात्, परं मया सुरराजो नेक्षितः,एतदाकर्ण्य स्मितमुखो राजाऽपि जगाद, हे **धरण**! मयाऽपि शक्रो नेक्षितः, अन्येषु राज्ञीमुख्येष्वपि तथैव वदत्सु सा **कामसेना** राजानमवक्, हे स्वामिन्नवगतमसत्यचारुत्वं? यदि भवादृशा अपि मेधाविनो मदुक्तमसत्यतरमपि सत्यतरं विदन्ति, तदान्येषां स्वल्पमतीनां का वार्ता? हे स्वामिन्नतोऽहमेवमसत्यं मिष्टमत्यभणम्। एषा मम प्रतिबोधदायिनीति मत्वा सत्कारपूर्वं तां विसृज्य राजा विशेषतोऽसत्याद्विरमति स्म। ॥ **इत्यसत्यविरतौ मृगाङ्कभूपकथा** ॥ १८० ॥

॥ १८१ ॥ मूर्खचरित्रे सबलसूत्रधारकथा ॥

अवगतापराधा अपि मूर्खास्तोषभाजो भवन्ति, यतः—

साक्षाद् दृष्टाऽपराधोऽपि, तोषं याति निरक्षरः। रथकारो दधत्स्कन्धे, भार्यां जारं च हर्षभाक् ॥ १ ॥

तथाहि— **धनावासे** ग्रामे धनवान् **सबलो** नाम सूत्रधारः, तस्य क्रमेण परिणीताः सप्त प्रियाः सर्प-शूल-विष-विसूचिकादिनोपद्रवेण मृताः, धनवता तेन वार्धकेऽप्यष्टमी परिणीता, अथ वृद्धत्वेन तेनाऽनीहिता सा स्वैरं परपुरुषैः समं रेमे। यतः—

अनभ्यासे विषं शास्त्र-मजीर्णे भोजनं विषम् ।
विषं गोष्ठी दरिद्राणां, वृद्धस्य तरुणी विषम् ॥ २ ॥

अन्येद्युः स्वैरं रममाणां तां विलोक्य परिवारः सबलस्य तद्विलसितमूचे। यावत्स्वदृशा न पश्यामि तावदहं न प्रत्येमीति भणित्वा स मूर्खो ग्रामान्तरगमनमिषेण गृहात्सायं निर्ययौ।

अथ पतिं गतं मत्वा सा स्वैरिणी सायमेवाऽभिमतमेकं युवानमाकार्य विहितवस्त्राऽऽभरणशृङ्गारा पर्यङ्के तेन सह तस्थौ। अथ पृष्ठद्वारेण गृहान्तरागत्य पर्यङ्काधः स्थितं पतिं दैवयोगाद् ज्ञात्वा पीनस्तनमञ्जुलवक्षःस्थले पाणिं निदधन्तं तं सा प्रोवाच, 'हे सुभग! मा मां स्पृश' हे शठे ! किमर्थमहमाकारितः? किमर्थं च वारयसीति भणिता साऽवोचत्, हे सुभग! **चण्डिकां** देवीमनिशमहमाराधयामि, एकदा तु तुष्टां तां मम भर्तुरायुर्वर्षशतमितं विधेहीति प्रार्थयन्तीं मां साऽवादीत्, तव पतिरद्यतः सप्तमे दिने मरिष्यति, तेन कथमहं तस्याऽऽयुः प्रभूतं करोमीति वादिनीं देवीमहमवोचं, हे मातर्यदि तुष्टाऽसि तदैनमेव ममाऽभिमतं यच्छ, तयोक्तं हे पुत्रि! यदीदमेव वाञ्छसि तदाऽन्येन यूना पुंसा सममेकत्र शयने त्वया

स्थित्वा वक्षःस्थलं स्पृशन् स वारणीयः, ततो भवत्याः पतिर्वर्षशतमितजीविता भवितेति देवीगिराहमिदमकार्षम्। एतदाकर्ण्य विशेषादेषा मयि भक्तिमतीति मन्यमानः प्रमुदितः सूत्रधारो द्वयोः स्कन्धयोस्तावारोप्य ननर्त। ॥ **इति मूर्खचरित्रे सबलसूत्रधारकथा ॥ १८१ ॥**

॥ १८२॥ धनलुब्धानां प्रेम मुधेत्यर्थे सुरूपानाम-द्विजपत्नीकथा ॥

धनेन सर्वोऽपि वशमुपैति। यतः—

जिण दीट्ठइ मुनिमन चलइ, तरुणी पसारइ हत्थ ।
[1]कनक एक वशीकारण, अवर सवि अकयत्थ ॥ १ ॥

तेन धनलुब्धाः पुरातनमपि प्रेम त्यजन्ति। यतः—

विप्रप्रिया द्रविणलोभवशाद्विमुच्य, प्रेमैकपात्रमपि जीवितवल्लभं स्वम् ।
दग्ध्वा च धाम निरगाद्वणिजा सहाऽहो!, अस्थैर्यमम्बुजदृशां मनसां महीयः ॥ २ ॥

तथाहि— **केशवावासे** ग्रामे **शङ्करनामा** द्विजः, **सुरूपानाम्नी** च तस्य पत्नी, एकदा निशि तौ दम्पती मिथो वार्तामिति कुरुतः स्म। विप्रो जगौ— हे प्रिये! त्वयि मृतायामहमन्यां पत्नीं न परिणेष्यामि, हे प्रिय! त्वयि च मृतेऽवश्यमेवाऽहमग्नौ प्रवेशं विधास्यामीति मिथः स्नेहेन शपथपूर्वं तयोर्वार्तां श्रुत्वा गृहद्वारे सुप्तः **पुण्यावासवासी देवा**ऽभिधो वणिग् दध्यौ, नित्योत्सङ्गे स्थिता अपि स्त्रियो नाऽऽत्मीयाः, यतः—

शास्त्रं सुनिश्चितधिया परिचिन्तनीय-माराधितोऽपि नृपतिः परिशङ्कनीयः।
अङ्कस्थितापि युवतिः परिरक्षणीया, शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वम् ?॥ ३ ॥

अयं च मूर्खोऽस्याः प्रेम दृढतरं मन्यते, तेनैतत्परीक्षां करिष्यामीति मत्वा स गृहमगात्। अन्यदा शङ्करं ग्रामान्तरगतं मत्वा विच्छायमुखो भूत्वा स धान्यान्तः कनकरजतादि नाणकं निधाय तद्गृहमागतः। धान्यमाददाना सा मध्ये नाणकं विलोक्य किमिदमिति तं जगौ, तेनोक्तं मदोकसि धनस्य भूयस्त्वेन नाणकं धान्येष्वपि तिष्ठति, तेन पाश्चात्यनिशि धान्यमादाया-ऽत्राऽऽगच्छतो मम धान्यमध्ये नाणकमागतं, एतदाकर्ण्याऽहो धनवानेष इति ध्यात्वा सा विच्छायवदननिदानमपृच्छत्। मत्पत्नी मृता तेन सचिन्तोऽस्मीति तेन भणिते सा स्माह यदि मामीहसे तदा त्वत्पत्नी भवामि, तव पतिर्जीवन्नास्ति, तेन कथमेतत्करिष्यसीति तेन भणिते सा अवोचत् तथा करिष्ये यथा कोऽपि मद्विलसितं न ज्ञास्यति, तदा स जगौ— हे शुभे! तथा कुरु, यथाऽहं त्वां गृहस्वामिनीं करिष्ये। अथेयमात्मनः स्थाने मृतामेकां स्त्रियं, तुरगीस्थाने च मृतामेकां रासभीं गृहान्तर्निधाय गृहं दग्ध्वा निशि तेन समं [तुरग्यारूढा] ययौ। गृहं गतः स स्वप्रियां प्राह, हे प्रिये! स्वननान्दरँमिमामालिङ्ग पादयोश्च प्रणामं कुरु, एतदाकर्ण्य किमिदमसमञ्जसमसौ वक्तीति ध्यायन्ती सुरूपा तेनोचे, हे भगिनि! ममौकसि तिष्ठ, यथारुचि च सुखमनुभवेति भणिता सा विहितविधवावेषा तदोकसि तस्थौ।

---

१. कंता - DS ॥ २ ननन्दर - D ।

अथ प्रभाते दग्धे तदोकसि दग्धां तां स्त्रियं रासभीं च विलोक्य खेदवांस्तत्परिजनः सुरूपां तुरगीं च दग्धे मत्वा तत्प्रेतक्रियां व्यधात्। गृहाऽऽगतः शङ्करोऽपि गृहोदन्तं निशम्य स्ववाग्निर्वाहपरो योगी भूत्वा ततो निर्ययौ। अथैकस्मिन् ग्रामे मिलितः स योगी तेन वणिजाऽभिहितो यथाजातं स्ववृत्तान्तमवक्, अतीतं पण्डिता न शोचन्ति, तेन मुञ्च योगिनो वेषं, विधवां मम भगिनीं चैकां तुरगीं तुभ्यं यच्छामीत्याऽऽग्रहेण स वणिक् सायं मुक्तयोगिवेषं तं स्वगृहं निनाय। शङ्करोऽपि तद्गृहे तां वाजिनीमुदीक्ष्य किं मदीयैषा स्यान्न वेति संशयं गतो यावच्चिन्तयति, तावद्वणिगपि मुहूर्ताऽवसरे वसनालङ्कारशालिनीं नीरङ्ध्रीपिहितमुखीं सुरूपामादायोपस्थितः, साऽपि स्वच्छवस्त्रान्तस्तं निरीक्ष्य दध्यौ, मम पतिरेव मामादातुमागतोऽस्ति, अथ जल्पनेनाऽलमिति ध्यायन्ती सा तेन परिणीता। अथ तेन वणिजा दत्तां बहुधनयुतां तां तुरगीमादाय तया सह रात्रावेव चलितः स प्रातस्तां विलोक्य स्वपत्नीं च मत्वा विस्मितः पूर्ववृत्तान्तमप्राक्षीत्। साऽपि यथाजातं स्वचेष्टितमभिधाय पतिमभिदधे— हे स्वामिन्नथ मौनमेवोचितं, किञ्चाऽऽत्मग्रामे गमनं नोचितमिति मत्वा तौ दम्पती अन्यत्र गत्वा गृहवासं पालयतः स्म । ॥ **इति धनलुब्धानां प्रेम मुधेत्यर्थे सुरूपानामद्विजपत्नीकथा॥ १८२॥**

॥ १८३॥ नियमपालने कमलश्रेष्ठिकथा ॥

नियमनिर्वाहवतां निर्वाणशर्माणि सुलभानि, यतः—

नाणं नियमग्गहणं, नवकारो नयरुई य निट्ठा य ।
पंचनयभूसिआणं, न दुल्लहा सग्गई होई ॥ १ ॥

अपि च—

अल्पीयानपि नियमः, सुखाय सम्यक्प्रपालितो भवति ।
घटकृट्टाल्याऽवलोकन-रूपः कमलाभिधस्येव ॥ २ ॥

[1]तथाहि— **श्रीपुरे** नगरे **श्रीपति**श्रेष्ठिनः **सुन्दरी**जातः **कमला**भिधः सुतः, सम्यक्त्वमूलद्वादशव्रतवता पित्रा प्रतिबोधितोऽपि पुत्रो मक्षिकाणां चन्दनमिव धर्मं नैच्छत्। एकदा हितेन पित्रा तत्राऽऽगतानां **शीलन्धरा**ऽऽचार्याणामभ्यर्णे स नीतः, अस्मन्मुखमेवाऽवलोकनीयमित्यभिधाय धर्मोपदेशदानाऽनन्तरं त्वया किमप्यवगतमिति गुरुभिः पृष्टः स प्राह, अष्टोत्तरशतवारं जल्पतां भवतां कण्ठमणिरचलत्, किञ्चौत्सुक्येन स बहुः चलितस्तदहं तु न ज्ञातवान्, इति गुरूणां हासं कुर्वन् पित्राऽयमयोग्य इत्युपेक्षितः। अन्यदा पुनरपि पित्रा तत्राऽऽगत**गुणसागर**गुरूणां समीपे स नीतः, श्रुतपूर्वोदन्तैर्गुरुभिरधस्तादेवा-ऽवलोकनीयमित्यभिधाय धर्मकथाप्रान्ते तथैवोदीरितः सोऽवोचत्, इतो विवरादष्टोत्तरं शतं कीटिकानां निर्गतमिति हास्यपरः सोऽन्यश्राद्धैर्हसितः। अन्यदा च तत्राऽऽगत**ज्ञानसागर**सूरयः पूर्ववृत्तान्तमाकर्ण्य तत्प्रबोधाय तमाकारयामासुः। पुरस्तस्थुषि तस्मिन् धर्मं कथयद्भि र्गुरुभिः पृष्टः स हे कमल! वेत्सि कामभूपस्य सैन्यं ? नेति तेनोक्ते तैरूचे। यतः—

---

१. तुला – उपदेशप्रासादे व्या. २६॥

परिजनपदे भृङ्गश्रेणिः पीकाः पटुबन्दिनो, हिमकरसितच्छत्रं मत्तद्विपो मलयानिलः।
कृशतनुधनुर्वल्ली लीलाकटाक्षशरावलि-र्मनसिजमहावीरस्योच्चैर्जयन्ति जगज्जितः ॥ ३॥

इति श्रुत्वा पण्डिता अमी गुरव इति ध्यायन् स गृहं ययौ। अथ द्वितीयदिने पुनरपि अनाकारित एव तस्मिन्नागते तथैव गुरुभिरूचे, हे कमल! स्त्रीणां भेदान् जानासि ? नेति तेनोक्ते तैरूचे—

पद्मिनीं तदनु चित्रिणीं ततः, शङ्खिनीं तदनु हस्तिनीं विदुः ।
उत्तमा प्रथमभाषिता ततो, हीयते युवतिरुत्तरोत्तरा ॥ ४ ॥

कमलमुकुलमृद्वी फुल्लराजीवगन्धा[1], सुरतपयसि यस्याः सौरभं दिव्यमङ्गे ।
चकितमृगदृगाभे प्रान्तरक्ते च नेत्रे, स्तनयुगलमनर्घ्यं श्रीफलश्रीविडम्बि[2] ॥ ५॥
तिलकुसुमसमानां बिभ्रती नासिकां या, द्विजगुरुसुरपूजां श्रद्दधाना सदैव ।
कुवलयदलकान्तिः काऽपि चाम्पेयगौरी, विकचकमलकोशाऽऽकारकामाऽऽतपत्रा ॥ ६॥
व्रजति मृदु सलीलं राजहंसीव तन्वी, त्रिवलि-वलितमध्या हंसवाणी सुवेषा ।
मृदु शुचि लघु भुङ्क्ते मानिनी गाढलज्जा, धवलकुसुमवासा वल्लभा पद्मिनी स्यात् ॥ ७॥

इति **पद्मिनी**लक्षणं, एवं तृतीयेऽहनि चित्रिणीस्वरूपं सूरयो जगुः—

सुगतिरनतिदीर्घा नाऽतिखर्वा कृशाङ्गी, स्तनजघनविशाला काकजङ्घोन्नतोष्ठी ।
मधुसुरभिरताम्बुः कम्बुकण्ठी च काक-स्वरवचनविभागा गीतनृत्याऽऽद्यभिज्ञा ॥ ८॥
मदनसदनमस्या वर्तुलोच्छूनमन्त-र्मृदु मदनजलाढ्यं लोमभिर्नाऽतिसान्द्रम् ।
प्रकृतिचपलदृष्टिर्बाह्यसम्भोगरक्ता, रमयति मधुरोक्तिश्चित्रिणी चित्ररक्ता ॥ ९॥

इति **चित्रिणी**, एवं चतुर्थे दिने शङ्खिनीलक्षणमाहुः—

तनुरतनुरपि स्याद्दीर्घदेहाऽह्निमध्या-प्यरुणकुसुमवासःकाङ्क्षणी कोपशीला ।
अनिभृतसिरमङ्गं दीर्घनिम्नं वहन्ती, स्मरगृहमतिलोमक्षारगन्धिस्मराम्बु ॥ १०॥
सृजति बहुनखाङ्कं सम्प्रयोगे लघीयः— स्मरसलिलपृषत्का किञ्चिदुत्तप्तगात्री ।
न लघु न च बहु स्यात्प्रायशः पित्तलास्या, पिशुनमलिनचित्ता शङ्खिनी रासभोक्तिः ॥ ११॥

इति **शङ्खिनी**। एवं पञ्चमे दिवसे हस्तिनीस्वरूपं जगुः—

अललितगतिरुच्चैः स्थूलपादाऽङ्गुलीकं, वहति चरणयुग्मं कन्धरां ह्रस्वपीनाम् ।
क्वथितकचकलापा क्रूरचेष्टाऽतिगात्री, द्विरदमदविगन्धिः स्वाङ्गकेऽनङ्गके च ॥ १२ ॥
द्विगुणकटुकषायप्रायभुग् वीतलज्जा, चलदतिविपुलोष्ठी दुःखसाध्या प्रयोगे ।
बहिरपि च विरुक्षाऽत्यन्तमन्तर्विशालं, वहति जघनरन्ध्रं हस्तिनी गद्गदोक्तिः ॥ १३॥

१. गन्धी-AH। २. मत्यर्थं-AH। ३. CD उ. प्र. । वर्तुलं लम्बम° मु. ॥ ४. वासाः-AH ॥

इति **हस्तिनी**स्वरूपम्। इत्याकर्ण्य शास्त्रज्ञा अमी सूरय इति मन्यमानः स गृहं ययौ। एवं षष्ठेऽहनि कासु तिथिष्वेताः पद्मिन्यादयः सेविताः प्रीतिमत्यो भवन्तीति गुरुभिः पृष्टो न जानामीति स स्माह। अथ सूरयोऽभ्यधुः—

नयन २ युग ४ शर ५ र्तु ६ बुध्न १२ दिग् १० नाग ८ संख्या—
स्तिथय इह रते स्युः प्रीतये चित्रिणीनां ।
ग्रह ९ तिथि १५ भुवनाख्या १४ द्वीपयुक्ताः करिण्या—
स्तदितरा ऽतिथयस्तु शङ्खिनीनां चतस्रः ॥ १४ ॥

एतासामेष वशविधिः—

मोर्वाकन्दरसेन जातिफलकं कुर्याद्वशां चित्रिणीं,
पक्षौ माक्षिकसंयुतौ च करिणीं पार्तापतभ्रामरौ।
शंङ्खिन्यामशकृच्च गन्धतगरं मूलान्वितं श्रीफलं,
ताम्बूलेन सह प्रदत्तमचिरान्मन्त्रैरमीभिः क्रमात् ॥ १५॥

मन्त्रा यथा—ॐ पच पच विहङ्ग विहङ्ग कामदेवाय स्वाहा, अनेन मन्त्रेण चित्रिणी। ॐ धिरि धिरि वश्यं कुरु कुरु स्वाहा, अनेन मन्त्रेण हस्तिनी। ॐ हर हर पच पच कामदेवाय स्वाहा, अनेन मन्त्रेण शङ्खिनी। हे कमल! स्त्रीणामङ्गेषु स्मरावस्थितिं शृणु—

अङ्गुष्ठे पद-गुल्फ-जानु-जघने नाभौ च वक्षःस्थले ।
कक्षा-कण्ठ-कपोल-दन्त-वसने [1]नेत्रेऽलिके मूर्धनि ॥
शुक्ला-ऽशुक्लविभागतो मृगदृशामङ्गेष्वनङ्गस्थिति-
मूर्ध्वाऽधोगमनेन वामपदगां पक्षद्वये लक्षयेत् ॥ १६ ॥

स्मरस्थाने मर्दिता मृगलोचनाः सद्यो वश्या स्युः। पुनर्हे कमल! वयोविभागतो बालादिस्त्रीणां वशविधिरयमेव—

बाला ताम्बूलमालाफलभरसरसाऽऽहारसन्मानहार्या,
मुग्धाऽलङ्कारहारप्रमुखवितरणै रज्यते यौवनस्था।
सद्भावा रम्यगाढोद्भवरतसुखिता मध्यमत्वेन लघ्वी,
मृद्वालापैः प्रहृष्टा भवति गतवया गौरवेणातिदूरम् ॥ १७॥

पुनर्हे कमल! रक्तविरक्तस्त्रीलक्षणं शृणु—

स्त्री कान्तं वीक्ष्य नाभिं प्रकटयति मुहुर्विक्षिपन्ती कटाक्षान्,
दोर्मूलं दर्शयन्ती रचयति कुसुमापीडमुत्क्षिप्य पाणिम्।

१. DP मु.। पारापत-AH॥ २. CD । शङ्खिन्या वशकृच्च - मु.। ३. नेत्रेऽलके - इति उपदेशप्रासादे ॥

रोमाञ्चस्वेदजृम्भान् श्रयति कुचतटस्रंसि वस्त्रं विधत्ते,
सोत्कण्ठं वक्ति नीवीं शिथिलयति दशत्योष्ठमङ्गं भनक्ति ॥ १८॥
नेशं पश्यति नाऽभिनन्दति मुहुर्मित्रैः प्रतीकस्थिता।
योगे सीदति दुष्यतीह विरहे यात्याऽऽनतं चुम्बिता ।
नाऽस्मादिच्छति मानमीर्ष्यति रते प्रत्युत्तरं नाऽऽश्रयेत् ।
स्पर्शादुद्विजते स्वपत्युपगता शय्यां विरक्ता सती ॥ १९॥
आकारैः कतिचिद् गिरा कुटिलया काश्चित् कियन्त्यः स्मितैः,
स्वैरिण्यः प्रथयन्ति मन्मथशरव्यापारवश्यं मनः ।
कासांचित्पुनरङ्गकेषु मसृणच्छायेषु गर्भस्थितो,
भावः काचघटीषु पुष्करमिव प्रव्यक्तमुत्प्रेक्ष्यते ॥ २० ॥

एवमनिशं शृङ्गारसुन्दराणि गुरुवचांसि शृण्वानः कमलो गुरुरागवानासीत्। मयि भक्तिभागयमिति गुरवोऽपि प्रथमं शृङ्गाररसमभिधाय वैराग्यमभ्यधुः, यतः—

शृङ्गाराऽङ्गारान् यदि, नादावुद्दीपयन्ति विबुधजनाः।
शान्तरसरसवतीयं, कथय कथं पाकमायाति ॥ २१॥

वैराग्यं यथा—

भवारण्यं भीमं तनुगृहमिदं छिद्रबहुलं, बली कालश्चौरो नियतमसिता मोहरजनी ।
गृहीत्वा ध्यानाऽसिं विरतिफलकं शीलकवचं, समाधानं कृत्वा स्थिरतरदृशो जागृत जनाः ॥ २२॥

अन्यदा ततश्चलनाऽवसरेऽनुयातः स गुरुभिरूचे, हे कमल! किञ्चित्प्रत्याख्यानं कुरु, हास्यरुचिना तेनोचे—

मर्तव्यं बत नेच्छया च वितथं वर्षे द्विपक्षीं विना ।
पक्षेनाऽक्षतनालिकेरवदनक्षेपो[1] न कार्यो मया ॥
पक्काऽन्नेषु च वेल्लुकानि मिहिरस्नुह्यादिदुग्धानि[2] च ।
दुग्धेषु छगणं गणीन्द्र ! हरितेष्वाऽऽहारणीयं न मे ॥ २३॥

अस्माभिरपि सह हास्यमिति भणितः सोऽभणत्—

गुरुणाऽपि समं हास्यं, कर्तव्यं कुटिलं विना। परिहासविहीनस्य, जन्तोर्जन्म निरर्थकम् ॥ २४॥

पुनर्गुरुणा भणितः सोऽप्यवोचत् मद्गृहपुरो वसतः सीमाह्वस्य कुम्भकारस्य टल्लिकामवलोक्य भोक्ष्ये, इति प्रत्याख्यानमङ्गीकुर्वन्नस्मीति तेनोक्ते लाभाऽलाभज्ञा गुरव एवं भूयादित्यभिधायाऽन्यत्र विहरन्ति स्म।

१. वक्ष्ये - C। वक्षे - AHD॥ २. मिहिर-स्नुहि = वृद्ध थोर ॥

सोऽपि प्रतिदिनं गृहमागच्छन् पुरःस्थितस्य तस्य टल्लिकां प्रयासं विनैवाऽऽलोक्य भुञ्जानस्तं नियममपालयत्। अथैकदा स कुलालो मृत्तिकामादातुं खानौ गतः, तदा गृहमागच्छता तेन तस्य टल्लिकामविलोक्यैव भोक्तुमुपविशता स्मृतनिजनियमेन माताऽभाणि, हे मातर्मयाऽद्य टल्लिका विलोकिता नाऽस्ति, तेनैतत्कृत्यं कृत्वा भोक्ष्ये। इत्यभिधाय कुलालस्य च शुद्धिं विधाय स तस्यां खानौ ययौ। तदा च स कुलालस्तत्र स्वर्ण-मणिभृतामेकां कटाहिकां लब्धामितस्ततो गोपयन्नभूत्।

सोऽपि तस्य टल्लिकामेव दूरतो विलोक्य दृष्टा दृष्टेति च भणन् चलमानस्तेनाऽभाणि, रे भद्र! समागच्छ, अर्धं तव अर्धं च ममेति तद्वचनमाकर्ण्य वलितः स तदर्धभागेन बहुस्वर्णमणिधनं लात्वा गृहं गतः। अहो! धन्यं जिनशासनं, यत्रेदं स्तोकमपि प्रत्याख्यानं बहुफलदं जातमिति चिन्तयन् सोऽन्यदा तत्राऽऽगतानां तेषामेव गुरूणामभ्यर्णे श्रावकोऽभूत्। क्रमेण निरतिचारं श्रावकधर्ममाराध्य स द्वादशे कल्पे सुरः समजनि। ॥ **इति नियमपालने कमलश्रेष्ठिकथा** ॥ १८३ ॥

॥ १८४ ॥ लोकाऽनुगतिको लोक इत्यर्थे मुकुन्दविप्रकथा ॥

जनो हि जनाऽनुगत एव प्रायः परमार्थवन्ध्यमेवाऽनुतिष्ठति, यतः—

लोकाऽनुगतिको लोको, न लोकः पारमार्थिकः ।
रजःपुञ्जे मुकुन्देन, कृते सर्वोऽपि तद्व्यधात् ॥ १ ॥

तथाहि— **शुभवास**ग्रामवासी **मुकुन्दो** नाम पण्डितद्विजन्मा तीर्थयात्रां कुर्वन्नेकदा गङ्गां गतः, तत्र च स्नातुमुद्यतः स स्वं ताम्रपात्रं वालुकान्तर्निधाय तत्स्थानोपलक्षणार्थमुपरि रजःपुञ्जं विधाय तदुपरि चैकं तृणं निधाय स्नानं व्यधात्। तेन पण्डितेन विप्रेण तथा निर्मितं निरीक्ष्य स्नानार्थमागतैरन्यैर्लोकैश्चिन्तितं, यदसौ पण्डितोऽपि महानपि विप्रश्चेदित्थं विधत्ते, तदा चाऽस्मिंस्तीर्थ एवं करणे महान् लाभ इति मत्वा स्नानादर्वाक् सर्वैरपि लोकैस्तथा चक्रे। स्नानं विधाय निर्गतः स मुकुन्दः सर्वतो बहुनि रजःपुञ्जानि विलोक्य स्वं पुञ्जमलक्ष्यमाणः स्वं पात्रं हारितवान्। ॥ **इति लोकाऽनुगतिको लोक इत्यर्थे मुकुन्दविप्रकथा** ॥ १८४ ॥

॥ १८५ ॥ कलहे तापसकथा ॥

कलहो हि विपत्तिमूलं, यतः—

न पूज्या यत्र पूज्यन्ते, यत्र नीतेरतिक्रमः । यत्र वाक्कलहो नित्यं, श्रियस्तत्र वसन्ति न ॥ १ ॥

किं बहुना ? कलहाश्रितानां पार्श्वे स्थितिरपि न श्रेयसी, यतः—

न स्थेयं जातुचित्सद्भिः, पार्श्वे कलहकारिणा ।
नाऽऽपुः किं कलितः क्लेशं, शरटानां तपोधनाः ?॥ २ ॥

तथाहि— **भूरमणीये** नामवने **देवशर्मा**दयो बहवस्तापसा वसन्ति स्म। तत्र चैकदा कलिं कुर्वतः शरटान् दृष्ट्वा **देवशर्मा**ऽऽह्वेन तापसपतिनाऽन्ये तापसाः प्रोचिरे, अत्र वने यत्र तत्राऽपि शरटानां युद्धं दृश्यते, तेनाऽस्मिन् वने आत्मनां स्थितिर्न श्रेयसीति प्रतिदिनं भणिता अपि केऽपि तापसा मत्ता मतङ्गजा अङ्कुशमिव तद्वचनमवजानन्ति स्म।

केऽपि तापसास्तद्वनं हित्वाऽन्यत्र गच्छता **देवशर्मणा** सममितरवनं गत्वा भद्रभाजो बभूवुः। अन्येद्युरेकस्मिन् सरसि पानीयं पिबत्सु मत्तमातङ्गेषु तत्पालिरूढकर्कन्धुमूर्धनि कलिं कुर्वाणं शरटद्वयं ततोऽधस्तान्निपतत्तटाक-तोयमादायोर्ध्वीकृतायामेकस्य करिणः शुण्डायां पपात। शुण्डाविवरेण तत् शरटयुग्मं तस्य गजस्य कुम्भस्थले प्राप्तम्। अथ तद्व्यथया बाढं व्याकुलीभूतो भूतार्त इव स द्विरदस्तांस्तापसान्निहत्य तमाश्रमं मूलादुन्मूल्य मृतः ॥ **इति कलहे तापसकथा** ॥ १८५॥

॥ १८६॥ मतिविषये भोजराजकथा ॥

सुधियो हि संज्ञामात्रेण परमनो विदन्ति। यतः—

विदन्ति मूर्खा अपि कार्यमीरितं, हयाश्च नागाश्च वहन्ति नोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः, परेङ्गितज्ञानफला हि बुद्धयः ॥ १॥

अपि च—

विदन्ति हृदयं संज्ञा-मात्रेण मतिशालिनः। मृन्मयौ गोलकौ वीक्ष्य, दानं दत्ते स्म भूपतिः ॥ २॥

तथाहि— **धारायां** नगर्यां **भोजराजा** राज्यं करोति स्म। इतस्तत्परिसरे **सारण**ग्रामे महामूर्खो **गोविन्द**नामा द्विजो निर्व्यापारस्तिष्ठन् **पुण्यश्रिया** पत्न्या प्रोचे, हे नाथ! निर्व्यापाराणामात्मनां गृहनिर्वाहो दुष्करः, तेनाऽऽत्मकुलोचितं राजसेवा-पौरजनयाचनादि विधेहीति भणितः सोऽभणत्, हे प्रिये! निरक्षरोऽहं किमपि वक्तुं कर्तुं च न वेद्मि, तेन राजसेवाऽऽदि कथं करोमि? अथ धीमती साऽवादीत् हे स्वामिन्निमौ मृन्मयौ गोलकौ लात्वा **धारानगर्यां** गच्छ, तत्र च सभासीनस्य भवत्संमुखं पश्यतो **भोजराजस्यैकोऽयं** गोलको दर्शनीयः, तदा च यदि स किमपि न ब्रूते न च दत्ते तदा द्वितीयो दर्शनीयः, इति शिक्षितेन तेन तत्र गत्वा तथैव विहिते **भोजेन** सपादलक्षस्वर्णमदायि।

तदा च सञ्जातेर्ष्याभरैरन्यैः पण्डितैः प्रोचे, हे देव! यदीदृशस्याऽपि जडस्यैतावत्कनकं त्वया वितीर्णं, तदा का भवतो गुणज्ञता विदग्धता चेति भणितो दानशौण्डो राजा प्रोवाच, भोः पण्डिता ! अनेन यत्सूचितं तद्बुद्धिः किमवगतं? नेति तैः प्रतिपादिते पुनर्**भोजो** बभाण, एकं गोलकं दर्शयतामुनैतदसूचि, यदहं गोलकतुल्यो निर्धनो निरक्षरश्चाऽस्मि, तथाऽपि मयि किञ्चिदप्यददाने पुनर्द्वितीयं गोलकं दर्शयताऽनेनेति ज्ञापितं, यथाऽहमेको गोलकस्तथा भवानपि द्वितीय इति। अथ यदि नाऽस्य दानं ददामि तदाऽहमस्मादपि मूर्खतमो भवामीति मयाऽस्मै विशेषतो दत्तमिति पण्डितान्निरुत्तरीकृत्य विशेषतो मानितोऽसौ द्विजो गृहं गतः सुखवानासीत्। ॥ **इति मतिविषये भोजराजकथा** ॥ १८६॥

॥ १८७॥ दैवविषये सुदर्शनकथा ॥

भावि भवेदेव, यतः—

गमितव्यं गमत्येव, गजभुक्तकपित्थवत्। भवितव्यं भवत्येव, नालिकेरफलाऽम्बुवत् ॥ १॥

अपि च—

अवश्यं भाविनो भावा—न्न रोध्धुं वासवोऽप्यलम् ।
सर्पीभूतोऽपि पद्मां स्त्रीं, परिणिन्ये सुदर्शनः ॥ २ ॥

तथाहि— **वित्तसारे** नगरे **नरसिंहस्य** राज्ञो दानशौण्डः **सुदर्शनः** सुतः, तं चैकदा प्रभाते दानशालायां दानं ददतं विलोक्य पठनार्थं व्रजन्ती **पद्माऽभिधा नन्दिश्रेष्ठिसुता** रागातुराऽजनि। सोऽपि रतिमिव रम्यां तामुदीक्ष्य विषमशरशरैः पीडितोऽजनिष्ट। अथोत्तरदिङ्नगरद्वारपुरोवर्त्तिनो वटस्याऽधस्तादावयोः सायं सङ्गम इति करपल्लव्या तस्मै ज्ञापयित्वा सा स्वं स्थानं गता। **करपल्लवी** यथा—

अहिफण कमल चक्र टंकाल, तेग पाणि योवन सिरवाल ।
अङ्गुलि अक्षर चिपटीमात, सीता भणइ सुणउ पिउ वात ॥ ३॥

अहिफण अवर्गः, कमलं कवर्गः, चक्रं चवर्गः, टंकाल टवर्गः, तेग तवर्गः, पाणि पवर्गः, योवन यवर्गः, सिरवाल सवर्गः। अथ षोडशशृङ्गारशालिन्यां तस्यां तत्र स्थितायां चतुरचूडामणिः सोऽपि तस्या अभिप्रायं ज्ञात्वा सायं सङ्केतितस्थानमगात्। अथ प्रहेलिकाप्रश्नोत्तरगूढाऽर्थवृत्तैर्मिथो वार्तापरयोस्तयोः पतितोत्तरीयायाः पद्माया वेणीबन्धे सञ्जाताऽपरपन्नगभ्रमो वटकोटरवासी सर्पो दशमद्वारे तां दशति स्म। शनैः शनैः प्रसर्पता सर्पविषेण मूर्च्छितां पतितां मृतां च तां मत्वा प्रकाममकार्यमभूदिति खेदवान् स चितार्थमितस्ततो दारूणि संगृह्य तां चितान्तर्निधाय निशीथे दवीयांसं वह्निं विलोक्य तत्र ययौ। तेन वह्निं याचितो निकटस्थो योगी तं विलोक्य द्वात्रिंशल्लक्षणोऽसौ वह्नौ हूतः स्वर्णनरः स्यादिति मत्वा तं जगौ, हे भद्र! अयमपूतः स्मशानस्य वह्निः, अतोऽत्रोपविश, अन्यतोऽन्यमग्निमानीय तुभ्यं यच्छामि, किञ्चेह तिष्ठतस्तवोपसर्गो भावी, तेन तन्निवारणार्थमिमां दवरकरक्षां भवत्कण्ठे निबध्नामीति तेनाऽपि तदुक्ते स्वीकृते योगिनाऽपि च श्यामदवरके तत्कण्ठे बद्धे स सर्पः सञ्जातः, अथ पाषाणपिहिते भूमिगते घटे तं सर्पं निधाय रात्रावेव तस्य होमार्थमौषधीर्मठान्तर्विलोकयन् स योगी सर्पेण दष्टो मृतः।

तदा च तस्मिन् पुरे शाकिनीनामुपद्रवेण बालका म्रियन्ते स्म। तन्निग्रहणार्थं राजपुरुषाश्चत्वराऽऽदिषु भ्रमन्ति स्म। अहो अद्य राजाऽङ्गजः क्वापि गतः केनाऽपि हतो वेति *विशेषतो राज्ञा नियुक्ताः सुभटा पर्यटन्ति स्म। तदा च दैववशतश्चितामध्यगतनागदमनीखण्डयोगेन* गतविषा सा तं कुमारं च तत्राऽदृष्ट्वा नगरजलनिर्गमद्वारेण नगरं प्रविशन्ती राजनरैर्दृष्टा बद्धा च कारायां क्षिप्ता।

अथ प्रभाते नेत्रपट्टबन्धं कृत्वा तां राज्ञः पुरस्तैरानीय कथितं, हे स्वामिन्नेषा महाशाकिनी पौरवर्गविनाशिनी रात्रावस्माभिर्जगृहे। सुन्दराऽऽकारवेषधारिणी नैषा शाकिनीति निश्चित्य राज्ञा पृष्टा मुक्तनेत्रबन्धा साऽवादीत्। हे देव! नाऽहं शाकिनी, किञ्च वणिक्सुता कार्यवशेन **जङ्घहिर्गत्वा** मध्ये प्रविशन्ती भवत्पुरुषैर्विधृता। यदि च भवतः संशयस्तदा ज्वलन-जल-भुजङ्गमाऽऽदिदुःसाध्यमपि दिव्यं करोमि। सर्पदिव्यमुद्दिश्य राजप्रहितैर्नरैः **काकतालीयन्यायेन** तस्मिन्नेव सर्पे समानीतेऽभीष्टदेवतानामस्मृतिकारिण्या तया पौरेषु पश्यत्सु करः सर्पघटे निदधे। पुष्पमालाया इव करे गृहीतस्य तस्य सर्पस्य फणाऽभ्यर्णे तं दवरकं विलोक्य चकिता सा निराकरोत्। तदा चाऽभ्रपटलान्निर्गतमिन्दुमण्डलमिव रम्याऽऽकारं विभूषितं सुदर्शनं राजपुत्रं विलोक्य सर्वेऽपि राजाऽऽदयो विस्मिताः अथ राज्ञा पृष्टौ तौ स्वं स्वं वृत्तान्तमूचतुः। अथ राजा दध्यौ—

गजभुजङ्गविहङ्गमबन्धनं, शशिदिवाकरयोर्ग्रहपीण्डनम् ।
मतिमतां च निरीक्ष्य दरिद्रतां, विधिरहो बलवानिति मे मतिः ॥ ३॥
अघटितघटितानि घटयति, सुघटितघटितानि जर्जरीकुरुते ।
विधिरेव तानि घटयति, यानि पुमान्नैव चिन्तयति ॥ ४॥

अथ प्रमुदिताः पितरस्तयोः पाणिग्रहणं कारयामासुः ॥ **इति दैवविषये सुदर्शनकथा ॥ १८७॥**

॥ १८८॥ सुकृते नरदत्तश्रेष्ठिकथा ॥

सुकृतेषु प्रायेण प्रमादो न श्रेयान्, यतः—

भोज्ये निर्जरराजभोज्यमधुरे हालाहलोऽक्षेपि तैः।
दुग्धे स्निग्धरसे रसेन निदधे तैरालनालं जलम् ॥
[1]क्षिप्ता तैः कर्पिकच्छूरच्छशिशिरे श्रीखण्डखण्डद्रवे।
यैर्धर्मेऽनवधानता प्रविदधे स्वर्गाऽपवर्गप्रदे ॥ १॥

तेनाऽनवरतसुकृतकरणादेव कार्यसिद्धिः, यतः—

नानाविधं विदधतां सुकृतं नराणां, मोक्षोचितं क्वचिदुपैति तदात्मकृत्यम् ।
यत् पिप्पले कवलयन् वृषभस्तृणानि, दिव्यौषधीं समधिगम्य पुमान् बभूव ॥ २॥

तथाहि—**भोजपुरे** पुरे **नरदत्त**श्रेष्ठिनो **भानुमतीश्रीमती**संज्ञे द्वे प्रिये। तत्र लघीयस्या रूपयौवनवत्या **श्रीमत्या** सह भृशमासक्तं पतिं विलोक्य सञ्जातेर्ष्या **भानुमती** तयोर्विरूपकरणार्थं मन्त्र-यन्त्रादिकौटिल्यं गवेषयामास। अन्यदा गृहमागतो **बन्धुनाथ**नामा योगी तया परमाऽन्नाऽऽदिपात्रपूरणतो भृशं तोषितः। अथ मन्त्र-मूलादिविद्याविशारदेन गाढं प्रीतेन तेन

१. D – क्षिप्तौघैः शिशिरे च चन्दनरसे तैरात्मगुप्ताजडैः AH॥ २. कपिकच्छू = कुवेच॥

यथारुचि याचस्वेति भणिता सा स्वमभिप्रायमभणत्। हे पुत्रि! गृहाण मूलमिदं, अस्मिंश्च घ्राते नरः पशुर्भवितेत्यभिधाय तन्मूलं च दत्त्वा गते तस्मिन् योगिनि **श्रीमत्यां** च क्वाऽपि गतायामवसरं प्राप्य पुरो नीतं तन्मूलमाघ्राय स श्रेष्ठी वृषभो बभूव। परिवारेण तद्भानुमती-विलसितं मत्वा सा धिक्चक्रे, हे पापिनि! पतिवैरिणि ! गृहाणेमं वृषभं पालय चेति भणिता खेदवती सा प्रतिदिनं तं वृषभं स्वयं चारयामास।

अन्यदैकस्य पिप्पलस्याऽधस्तं वृषभं चारयन्तीं रुदन्तीं च तां ज्ञात्वा तत्र पिप्पले स्थिता वटवासिनी निकटस्थं स्वपतिं प्रोवाच। हे नाथ! किमियमबला भृशं विलपतीति पृष्टोऽसौ तच्चेष्टितं समस्तं जगौ। हे नाथ! येनोपायेनाऽस्मिन् वृषभे पुरुषीभूतेऽमुष्याः शर्म स्यात्तमुपायं वदेति प्रियायाः कामाग्रहेण प्रेरितो यक्षो जगौ, हे प्रिये! मध्याह्ने यावतीं भुवमस्य तरोरच्छाया व्याप्नोति तदन्तराले चैका दिव्यौषधिरस्ति, तां च यदि वृषभोऽयमत्ति तदा स पुमान् स्यादित्यभिधाय स्वैरविहारिणोस्तयोर्गतयोः श्रुततद्वार्ता **भानुमती** दध्यौ, कथं सौषधिरुपलक्षयिष्यते, कथं चैष प्रियः पुमान् भावीति? अथवा किं विकल्पैः? मध्याह्नच्छायाऽलङ्कृतभुवि रूढं सर्वं चारयामि, तदन्तः सा दिव्यौषधिरप्येष्यतीति मत्वा मध्याह्नच्छायाऽन्वितायां तत्पिप्पलाऽधोभुवि रूढेषु तृण-लता-काष्ठ-दर्भादिषु सर्वेष्वप्यनुक्रमेण सयत्नं तया चारितेषु तदन्तःस्थया भक्षितया तया दिव्यौषध्या स वृषभः सद्यः पुमानासीत्। एवं दान-शील-तपो-भावेषु सुकृतेष्वनुष्ठीयमानेषु क्वाऽपि कदाऽपि कुतोऽपि कथमपि च मोक्षोचितं सुकृतमुपलभ्यते। ॥ **इति सुकृते नरदत्तश्रेष्ठिकथा** ॥ १८८ ॥

॥ १८९ ॥ गुणज्ञानादेवाऽऽदर इत्यर्थे नन्दमणिपरीक्षककथा ॥

गुणवान् हि गुणज्ञैरेव मान्यते, यतः—

दृषदेषेति दम्भेन, नन्देन मणिराददे। यो जानाति गुणान् यस्य, स तत्राऽऽदरभाग्भवेत् ॥ १ ॥

तथाहि— **दिल्ल्यां** महानगर्यां **नन्द**नामा मणिपरीक्षकः, तस्य **शिवदत्त-रामदत्तौ** पुत्रौ, दैवयोगेन **नन्द**स्य भार्या मृता, दौर्गत्यं च जातम्, अन्यदा स्त्रीमरणदुःखेन पीडितः स्नुषावचनदग्धः पुत्रायत्तविभवश्च स परदेशमगमत्। यतः—

वृद्धस्य मृतभार्यस्य, पुत्राऽऽधीनधनस्य च । स्नुषावचनदग्धस्य, जीवितान्मरणं वरम् ॥ २ ॥

तत्र च ग्रामादौ मणिकारव्यापारपरायणो भ्रमन्स एकत्र पुरे कस्याऽपि गृहे दधि क्रीणंस्तत्पत्नीकण्ठे काचमणिमध्ये स्थितं सपादकोटिमूल्यं महामणिमालोक्य तमादित्सुस्तां स्वसारमिव मन्यमानस्तदोकसि तस्थौ। ताम्बूल-कुसुम-कुङ्कुम-सिन्दूर-मृद्विकाऽऽदिदानेन तामात्मसात्कुर्वाणः सोऽन्यदा तत्पुरः कूटलेखं वाचयामास, यत् **शिवदत्त-रामदत्ताभ्यां** लिखितम्, हे तात! अस्मदपरमातुः सीमन्तोत्सवः कृतोऽस्तीति। अथ हे भगिनि! यदि तव

भ्रातृजायायाः सुतः स्यात्तदा आत्मनः भगिन्याः कण्ठादेतदल्पतरमूल्यं काचभूषणमपाकृत्य रजतशृङ्खलां परिधाप्य गृहे यामीति मायया भृशं मधुरं भणन् सोऽन्यदा तथैव कूटलेखप्रयोगेण सुतो जात इत्युक्त्वा मुदितमुखकमलः स नन्दस्तत्कण्ठात्तत्काचाऽऽभरणमुत्तार्य तत्स्थाने रजतशृङ्खलां च निधाय तन्महामणिहारं चाऽऽदाय गृहे समेतः। ततस्तद्धनेन कृतपाणिग्रहणो भृशं समृद्धिमानासीत्। ॥ **इति गुणज्ञानादेवाऽऽदर इत्यर्थे नन्दमणिपरीक्षककथा ॥ १८९ ॥**

॥ १९० ॥ भाग्ये अन्ध-कुब्ज-त्रिस्तनीराजपुत्रीकथा ॥

यथा भूयसा भाग्येन सर्वं समीहितं सम्पद्यते, न तथा विद्या-मन्त्र-यन्त्रौषध-पौरुष-सौन्दर्याऽऽदिभिरनेकैरपि गुणैः, यतः—

नैवाऽऽकृतिः फलति नैव कुलं न शीलं, विद्या न चाऽपि बहुयत्नकृता न सेवा ।
भाग्यानि पूर्वतपसा किल सञ्चितानि, काले फलन्ति पुरुषस्य यथा हि वृक्षाः ॥ १ ॥

अपि च—

अन्धश्च कुब्जश्च सुता च राज्ञो, भाग्यैर्बभूवुः पटवस्त्रयोऽमी ।
अन्यायवृत्तावपि सक्तचित्रा, अहो! अहो! भाग्यविजृम्भितं तत् ॥ २ ॥

तथाहि— **भूभूषणे** नगरे **नगराजस्य** राज्ञः **सुलोचना**ऽभिधा सुता, क्रमेण वृद्धिं प्राप्तां प्रादुर्भूतप्रोत्तुङ्गस्तनत्रयां तामालोक्य चकितेन राज्ञा पृष्टा अष्टाङ्गनिमित्तज्ञा नैमित्तिका महदमङ्गलमिति जगुः। अथ किं कर्तव्यमिति राज्ञा पृष्टास्ते चैवमभ्यधुः, हे देव! सुताया मारणमपरिणीतायाश्च त्याग एतत्सतामनुचितं। यतः—

बालक बंभण बारहट, बेटी बंधु बइल्ल ।
जिण मूरक्ख ए छ हण्या, निंदे तास छयल्ल ॥ ३ ॥

हे स्वामिंस्तेन येन केनाऽप्युद्वाह्यैषा त्यज्यतामिति प्रेरितेन राज्ञा केनचिदन्धेन बहुसुवर्णदानपुरस्सरं सा परिणायिता। अथ तन्मित्रेण कुब्जेन सहितः सोऽन्धः सा च त्रिस्तनी राजसुता, एवं त्रयोऽप्यमी तेन राज्ञा दवीयसि परदेशे प्रापिताः, तत्राऽमी तेन धनेन समृद्धाः सुखिनो जाताः। अथ सा सुलोचना स्मरवशवर्तिनी तेन कुब्जेन साकं लुब्धा प्रत्यूहभूतं तमन्धपतिं मारयितुमीहते स्म। यतः—

नितम्बिन्यः पतिं पुत्रं, पितरं भ्रातरं क्षणात् ।
आरोपयन्त्यकार्येऽपि, दुर्वृत्ताः प्राणसंशये ॥ ४॥ [योगशास्त्रे २/८६]

अथैकदा तन्मारणधिया विविधमुपायं ध्यायन्ती सा भ्रमन्ती क्वाऽपि पतितं मृतमहिमवलोक्य पिधाय च गृहेऽनैषीत्। अथ बहुशः खण्डीकृतमहिं पात्राऽन्तर्निधाय मत्स्याऽऽमिषमिदं पच्यमानमस्तीत्यभिधाय मत्स्याऽऽमिषलुब्धं तमन्धपतिं तत्समीपे संस्थाप्य

च सा स्वैरिणी तेन कुब्जेन सह सुरतं विधातुं प्रवृत्ता। अथ दैवाऽऽनुकूल्यतो वह्निना पच्यमानस्य तस्य सर्पस्य धूमेन ध्वस्तनेत्रतिमिरोऽसौ तयोर्दुश्चेष्टितं विलोक्य चुकोप। अथ तथैवाऽन्धवत्कपटेनोत्थाय बलवता तेन बाढं मुशलेन हतस्य तस्य कुब्जस्य शिरसः प्रहारेण वक्षसि निहतायास्तस्यास्तृतीयो वक्षोरुहो न्यपतत्। मर्मणि लग्नेन तेन प्रहारेण कुब्जोऽप्यकुब्जतां भेजे। एवं दैवेन शुभदशा दृष्टास्ते त्रयोऽपि पटवो बभूवुः। **॥ इति भाग्ये अन्ध-कुब्ज-त्रिस्तनीराजपुत्रीकथा ॥ १९०॥**

॥ १९१॥ स्त्रीचरित्रावलोकनाद् वैराग्यमित्यर्थे चन्द्रचूडराजकुमारकथा ॥

हाव-भाव-विलास-विभ्रमचेष्टाविशेषैरपि केवलं कमललोचनाः संसारबन्धनमेव, यतः—

स्मितेन हावेन च लज्जयाऽभितः, पराङ्मुखैरर्धकटाक्षवीक्षितैः।
वचोभिरीर्ष्याकलहेन लीलया, समस्तपाशैः खलु बन्धनं स्त्रियः ॥ १॥

तेनैतासां चरित्रैर्महाशया विरक्ताः स्युः, यतः—

दम्भात्सुरङ्गाऽऽगतमन्त्रिपत्नी-स्वरूपमुद्भाव्य विरक्तचित्तः ।
जग्राह दीक्षां नृपतेस्तनूजो, न के विरक्ताः सुदृशां चरित्रैः ॥ २॥

तथाहि— **चन्द्रपुरे** पुरे **चन्द्रसेन**स्य राज्ञश्चन्द्रचूडः सुतः, सोऽन्यदोद्याने गतः, तत्र च जलक्रीडां कुर्वाणां सुवर्णाऽऽभरणयुक्तां सुवर्णवर्णां स्वच्छदुकूलकलितां **ललिता**नाम-ललितलोचनां मन्त्रिपत्नीं निरीक्ष्य स स्मराऽऽतुरो जज्ञे।

साऽपि श्रीनन्दनमिवाऽऽनन्ददायिनं तं राजनन्दनं विलोक्य कामपीडिता कृतजलक्रीडा वलितकन्धरं तं पश्यन्ती पुराऽभिमुखमचलत्। सोऽपि कुतश्चिज्जनादवगततद्गेहनामाऽऽदि-स्वरूपः स्वगृहं गतः। तदैव तेन दूतीमुखेन तस्यै स्वमनोविलसिते ज्ञापिते सति सतीतरा साऽपि दूतीमुखेन तस्मै जगौ— हे सुभग! तव गृहेऽत्यन्तमागन्तुमना अस्मि, परं तथा समेष्यामि, यथा कोऽपि न मां न च भवन्तं निन्दयिष्यतीति, तेन भवता भवत्सौधस्याऽधो-वर्तिनीं वापीं यावत्सुरङ्गा देया, तदनन्तरमावयोर्मनोरथः फलेग्रहिर्भवितेत्यभिहितया दूत्या तदभिहिते स राजाऽङ्गजस्तथैवाऽकरोत्। अथ सा स्वैरिणी प्राणपतिना सह मुधा कलिं कृत्वा निशि तस्यां वाप्यामादौ पाषाणखण्डमेकं निक्षिप्य स्वयं च तया सुरङ्गया राजपुत्रौकसि गत्वा तेन सह भोगान् बुभुजे। प्रभाते च मन्त्रिपत्नी वाप्यां पतितेति तत्पितृभ्यां राज्ञोऽज्ञापि।

हे स्वामिन्! विनाऽपराधमनेन चण्डेन पापिना मन्त्रिणा हताऽस्मत्सुता वाप्यां पतितेति *नीतिविदा कुपितेन राज्ञा प्रहितैः स्वपुरुषैः सर्वस्वहरणपुरस्सरं स मन्त्री बाढं विडम्ब्य यष्टि-मुष्टि-पदप्रहारैर्हन्यमानो बद्धश्चतुष्पथे नीयमानश्च राजपुत्रपार्श्वे स्थितया गवाक्षगतया ददृशे,* ऊचे च हे प्राणनाथ! पश्यैतन्मम कलाकौशल्यम्! असौ मत्पतिः पार्थिवपत्तिभिर्बाढं

विडम्ब्यते, अहं भवांश्च द्वावपि निष्कलङ्कौ सुखमनुभवावः। इत्याऽऽकर्ण्य सकर्णः स दध्यौ, धिग्मामना-चारनरशिरोमणिं, यद्वशेनाऽयमदोषोऽपि मन्त्री क्लेशमापन्नः, इति ध्यायन् स तस्मिन्मन्त्रिणि तथैव राज्ञः पुरस्तात्तैरानीते तत्राऽऽगत्य राजानमूचे, हे तात! नाऽयं निग्रहमर्हति, किं त्वहमेव निग्रहोचित इत्यभिधाय सर्वं स्वकीयं तस्याश्च चरितं सोऽब्रवीत्। तत्सर्वं यथाजातं मनसि ध्यात्वा राजा राजाङ्गजो मन्त्री च सर्वेऽपि वैराग्येण तपस्यामादाय सिद्धाः।

॥ इति स्त्रीचरित्राऽवलोकनाद् वैराग्यमित्यर्थे चन्द्रचूडराजकुमारकथा ॥ १९१ ॥

॥ १९२ ॥ पण्डितवचने श्रीकण्ठद्विजकथा ॥

एकमेव वचनं वदन्तो मेधाविनः सर्वं स्वसमीहितं साधयन्ति, यतः—

मेधाविनामेकमपि प्रभूता-नर्थान् स्पृशेद्वाक्यमनाकुलानाम् ।
आसां तिसृणां रमणो भवेय-मेवं वदन् विप्र इहाऽस्ति वाच्यः ॥ १ ॥

तथाहि— **दिल्लीदुर्गे** सर्वथा दौःस्थ्यभाजो भृशं प्रवयसो निष्परिवाराः परगृहकर्मभिः कृतनिर्वाहव्यापारा **नारायणी-वैष्णवी-पार्वतीनाम्न्यस्तिस्रो** विप्रयोषितो वसन्ति स्म। एकदा सर्वथा निराधारा एता दुःखाऽग्निदग्धदेहाः पुण्यबुद्ध्या **हिमालये** गलनार्थं स्वस्वगृहात्पृथक् पृथक् निर्गताः प्राप्ताश्च तत्र। तत्र प्रवेष्टुमुद्यतास्तास्तद्रक्षाऽधिकारिनैर्रभाषिरे, हे मातरो! हिमालय-स्वामिनरेशनिर्देशं विना भवतीनामत्र प्रवेशं कर्तुं न दास्याम इति। अथैता राज्ञः समीपं गत्वा तदाऽऽज्ञापत्रमादाय तेषामार्पयन्। तदा हिमालयगलनजातपुण्येन का का युष्माकमीहा? इति तैर्भणिते **नारायणी** बभाण, मम पतिः सर्वथा निरक्षरोऽभूत्, तेन पतिमौर्ख्यदुःखेनाऽहं भृशमुद्विग्ना, ततोऽनेन पुण्येन मम पण्डितः पतिर्भूयादिति, सर्वथा पण्डित एव लोकानां प्रियः, यतः—

पंडितसरसी गोठडी, मुज मन खरी सुहाय ।
चाली जई बोलावीयें, माणिक आपी जाय ॥ २ ॥
बलिहारी पंडिततणी, जस मुख अमीय झरंत ।
जास वचन श्रवणें सुणी, मन रति अतिह करंत ॥ ३ ॥

तथैव— **वैष्णवी** प्रोचे, मम पतिरतीवदुर्गतोऽभूत्, तेन पन्नगेनेव पतिदौर्गत्येन जग्धाऽहमसुखभागभूवम्। ततो मम श्रीपतिः पतिरस्तु, यतो धनवानेव बहुजनेषु मान्यः, यतः—

वंश विलास विनोद विधि, विद्या विनय विवेक ।
वेष वडापण वातडी, धन विण भलुं न एक ॥ ४ ॥
भामिणि भोग भलप्पण, भलिभूमि भडवाय ।
भुजबल भोयण भावतु, जस घरि लच्छी-पसाय ॥ ५ ॥

१. आलइजइ - AH।

ततः **पार्वती** प्राह मम दौर्गत्यमूर्तिरिव कुरूपः पतिरासीत्, तेन पतिदौर्भाग्येन नितरामहमर्तिमत्यभवम्, ततः स्मर इव सौभाग्यवान् मम भर्ता भूयात्, प्रथमं हि रूपमेव सर्वत्र मान्यते, यतः—

पहिलु माणस दीसणुं, बीजु माणस वउण । त्रीजु माणस बोलणुं, चउथु माणस कउण ॥६॥
रूपें रामा राचीयें, रूपे रंजे भूप। रूपें रसीया रंजीयें, तेह थी रुडूं रूप ॥ ७॥

अथ तस्मिन्नैवाऽवसरे **लाभपुरवासी श्रीकण्ठ**नामैकः प्रवया द्विजन्मा तथैव तत्राऽऽगतः, तैरपि तथैव सोऽभाणि, हे विप्र! एकेनैव वचसा त्वमपि स्वसमीहितं सुखं याचस्वेति। हिमालयगलनजन्यसुकृतेनैतासामेव पतिरहं भूयासमिति वदता तेन पाण्डित्यं धनित्वं सौभाग्यं च याचितमिति। ॥ **इति पण्डितवचने श्रीकण्ठद्विजकथा ॥ १९२॥**

॥ १९३॥ रागविषये कमलश्री-वसुभूतिकथा ॥

रागो हि यत्करोति, न तत्समर्थोऽपि रिपुवर्गः, यतः—

नवि तं कुणइ अमित्तो, सुट्ठु वि सुविराहिओ समत्थोवि ।
जं दोवि अणिग्गहिआ, करंति रागो अ दोसो अ ॥ १॥

किञ्चैकपक्षविहितोऽपि रागो द्वयोरनर्थाय, यतः—

भ्रातृवध्वाऽर्दितः पत्यु-र्भ्राता जन्मसु भूरिषु। रागोदयादरागोऽपि, रागस्तद्बलवत्तरः ॥ २॥

तथाहि—**वसन्तपुरे** पुरे **शिवभूति-वसुभूति**नामानौ द्वौ भ्रातरौ। अन्यदा ज्येष्ठस्य भ्रातुर्जाया **कमलश्रीः** स्मरसोदरं पतिसोदरं निरीक्ष्य रागात्सम्भोगार्थमयाचत। सम्बन्धेऽपि वधूनां न मनःशुद्धिः, यतः—

सुरूपं पितरं दृष्ट्वा, भ्रातरं देवरं तथा। योनिः क्लिद्यति नारीणा-मामपात्रमिवाऽम्भसा ॥ ३॥
उन्मत्ताः प्रेमसंरम्भा-दारभन्ते यदङ्गनाः। तत्र प्रत्यूहमाधातुं, ब्रह्माऽपि खलु कातरः॥ ४॥

वसुभूतिरपि तस्या रागं बलीयस्तरं निरीक्ष्य ज्येष्ठभ्रातुर्जाया मातेति विचिन्त्य गृहान्निर्गत्य यतिरभूत्। यतः—

अपसर सखे! दूरादस्मात्कटाक्षविषाऽनलात्।
प्रकृतिविषमाद्योषित्सर्पाद्विलासलसत्फणात्।
इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधै-
श्चटुलवनिताभोगिग्रस्तं त्यजन्ति हि मन्त्रिणः ॥ ५॥

इति वनितासङ्गमं विषमिव विषमं विचिन्त्य स महात्मा सर्वथामुक्तमानिनीसंस्तवो विजहार। **कमलश्री**रपि तं प्रव्रजितं निशम्य रागोदयान्मृत्वा च क्वाऽपि ग्रामे शुनीत्वेनोत्पन्ना।

१. रागोऽपितद्० - AH।

तत्राऽपि गोचर्यामटन्तं तं मुनिमुदीक्ष्य पूर्वभवाऽभ्यस्तरागवशात्सा शुनी कायच्छायेव तं नाऽमुञ्चत्। सर्वदा सर्वत्र च तां पृष्ठे लग्नां विलोक्य लोकैः स शुनीपतिरित्यभिधायि। तादृशैर्जनवचनैर्लज्जमानो मुनिः कथञ्चिदपि तस्या दृशं वञ्चयित्वा नष्टः, अथ तत्र तमपश्यन्ती साऽऽर्त्तध्यानेन विपद्य क्वाऽपि वानरीत्वेनोत्पन्ना। तत्राऽपि कदाचित्पथि विहरन्तं तं दृष्ट्वा शुनीवत्तस्य पृष्ठे लग्ना। तां च तथाऽवस्थां विलोक्य लोकैः स मुनिर्वानरीपतिरिति कथ्यते शुनीमिवेमामपि हित्वा क्वाऽपि गते मुनौ सा मृत्वा क्वाऽपि जलाशये हंसीत्वेनोदपद्यत। तत्र शीतपरीषहसहनार्थं जलाऽभ्यर्णे प्रतिमया स्थितं तं दृष्ट्वा भुजाभ्यां भामिनीव जलभृताभ्यां पक्षाभ्यामालिलिङ्ग। तस्मिन्मुनौ चाऽन्यत्र गते तमपश्यन्ती तन्मनाः सा हंसी मृत्वा व्यन्तरी जाता। अवधिना च तस्याऽऽत्मनश्च सर्वं वृत्तान्तं विज्ञाय तेन मम देवरेण मद्वचनितं नाकारीति कुपिता सा तं हन्तुमुपस्थिताऽपि तत्तपसा हन्तुं न शक्नोति स्म। क्रमेण कलितकेवलः स मुनिर्लोकानां पुरस्तादात्मनस्तस्याश्च पूर्वसम्बन्धमभिधाय सिद्धः ॥ **इति रागविषये कमलश्री-वसुभूतिकथा ॥ १९३ ॥**

॥ १९४॥ द्वेषे नन्दनादिक-युगन्धरमुनिकथा ॥

सर्वथाऽनर्थकरणतत्परो हि द्वेष एव, यतः—

य: कीर्त्तिं विनिहन्ति दन्तितिलको वीथीं वनानामिव ।
ज्ञानाऽभ्यासमपाकरोति मुदिरस्तोमं नभस्वानिव ॥
सौभाग्यं पिदधाति पङ्कजसुहृद्बिम्बं तडित्वानिव ।
त्याज्यः पुण्यपरम्पराप्रलयकृद् द्वेषः स दोषैकभूः ॥ १ ॥

किञ्चैकस्मिन्नपि जन्मनि विहितोऽपि पापीयान् द्वेषोऽयमनेकजन्मसु क्लेशहेतुः स्यात् यतः-

अमारि जीवः खलु नाविकस्य, द्वेषं सृजन् द्वेषवशं गतेन ।
मुमुक्षुणा यद्बहुशस्तदेति, द्वेषोऽसुभाजः परजन्मक्लृप्तः ॥ २ ॥

तथाहि— तेजोलेश्याऽऽद्यनेकलब्धिधरो **युगन्धर**नामा महामुनिर्ग्रीष्मसमये नावा गङ्गामुत्तीर्याऽन्यत्र गच्छन् भाटकार्थं **नन्देन** नाविकेन रुद्धस्तमाह, हे भद्र! वयमकिञ्चनाः साधवः, तेन मम पार्श्वे किमपि धनं नास्तीत्यभिहितः सोऽभ्यधात्, धनं भवतु मा वा, तथाऽपि भाटकं विना त्वामहं न मोक्ष्ये, इत्युक्त्वा तेन नन्देन बाढं कदर्थितो दग्धपादश्चोष्णतरैः पांसुपूरैः, सन्तप्तशरीरश्चोष्णरश्मिरश्मिभिः प्रकामं प्रकुपितः स मुनिस्तं तेजोलेश्यया भस्मसात्कृत्वाऽन्यत्र गतवान् ।

नन्दोऽपि द्वेषजनितेनाऽऽर्तध्यानेन विपद्य क्वाऽपि सभायां गृहगोधकोऽभूत् । तत्राऽपि तं मुनिमागतं वीक्ष्य पूर्वभवाभ्यस्तद्वेषवशेन स गृहगोधकस्तस्य मुनेर्वस्त्रपात्रभोजनोपरि रजः क्षिपति। मुनिना तथैव भस्मसात्कृतो मृतो गङ्गातीरे हंसः समभूत्। तत्राऽपि पक्षद्वयेनाऽऽनीतेन पानीयेन तस्य मुनेरुपसर्गं कुर्वन् स हंसो मुनिना तथैव दग्धोऽञ्जनगिरौ सिंहो जातः।

तत्राऽपि हन्तुमुद्यतो मुनिना तथैव दग्धो **वाराणस्यां बटुको**ऽभवत्। तत्राऽपि बाढमुपसर्गं कुर्वन् मुनिना ज्वालितस्तत्रैव राजाऽजनिष्ट। एकदा स राजोद्याने विचरन् कमपि मुनिमुदीक्ष्यैतादृशं वेषं क्वाऽप्यपश्यमिति ध्यायन् मूर्च्छया जातजातिस्मृतिः पूर्वभववृत्तान्तं विदन्निदं दध्यौ, अहो! एतादृशा महात्मानः कोपिता न श्रेयसे, तेन यदि कथञ्चित्स मुनिर्मिलति, तदा तं क्षामयामीति मत्वा पदषट्कमिदं विधायेति सर्वत्र घोषणां चक्रे। यतः—

गंगाए नाविओ नंदो, सभाए घरकोइलो। हंसोवि गंगतीरे य, सिंहो अंजणपव्वए ॥ ३॥
वाणरसीए बडुओ। राया इत्थेव आसीओ।

एतेषां षट्पदानामग्रेतनं पदद्वयं यो वक्ति तस्मै राज्याऽर्द्धं यच्छामीति घोषणामाकर्ण्य बहवः पण्डिता राज्यार्थिनो नव्यं नव्यं पदद्वयं विधाय राज्ञोऽग्रे वदन्ति, परं स्वमनीषितपदद्वयकथनाऽभावेन राज्ञाऽवज्ञातास्ते सर्वे यथाऽऽगतं यान्ति। ततश्चेदं पदषट्कं पठन्तः सर्वेऽपि लोकाः पर्यटन्ति। अस्मिन्नवसरे स मुनिस्तत्रोद्याने स्थित एकेन गोपेन पठ्यमानमिदं षट्पदमाकर्ण्येति दध्यौ- अहो! इदं सर्वं मद्विलसितं कथमसौ वेत्ति? हे भद्र! केनैतत्पदषट्कमकारीति मुनिनोक्तो गोपोऽपि पुरस्वामिना कृतमिदमित्यभिधाय सर्वं वृत्तान्तं जगौ। अथ मुनिना निर्मितमग्रेतनं पदद्वयमधीत्य स राज्ञोऽग्रे पपाठ—

एएसिं घायगो जो उ, सो हु इत्थ समागओ ॥ ४ ॥

वने स्थितेन मुनिना कृतमिति गोपोक्तं श्रुत्वा राजा सत्कृतेन गोपेन दर्शितं वनं प्रत्यचालीत्। चलपत्रमिव भयेन कम्पमानं तमायान्तं मुनिराह, हे राजन्! मादृक्संयमिभ्यो मा भैषीः। अथ प्रणम्योपविष्टे राज्ञि सर्वं द्वेषफलमिति च मुनिना भणिते, राज्यमिदं गृहाणाऽनुग्रहाण च मां वराकमिति राज्ञा व्याहृते मुनिराजो बभाषे। हे राजन्! मुक्तसङ्गानामस्माकं किं तृणतुल्येन राज्येन? किञ्चाऽनर्थवनवीथीघनाघनोऽसौ द्वेषः सर्वथा न करणीय एवेति तमुपदिश्य मुनिरपि पापमालोच्य सुगतिमासदत्। राजाऽपि चिरं पालितराज्योऽन्ते तपो विधाय सद्गतिभागभूत्। ॥ **इति द्वेषे नन्दनाविक-युगन्धरमुनिकथा ॥ १९४॥**

॥ १९५॥ परेषां कृतमहितं स्वयं लभ्यते, इत्यर्थे धनश्रीकथा ॥

आत्मनो हितमिच्छता जनेन परस्मिन्नहितं न चिन्तनीयं, यतः—

यो यादृशं कर्म करोत्यवश्यं, पुमानवाप्नोति फलं स तादृक् ।
यद्योगिनोऽदाद्विषमोदकौ या, सुतौ तदीयौ मृतिमापतुश्च ॥ १॥

तथाहि—**आधोरणपुरे** पुरे **धन्य**श्रेष्ठिनो **धनश्री**सञ्ज्ञातौ **कनकरथ-कनकबाहु**नामानौ द्वौ सुतावभूताम् । तत्र चैको **धवलनाथ**नामा योगी '**जो जयसा करे सो तेसा पावे**' इति भूयो भूयो भणन् राजमार्ग-चतुष्पथ-चत्वर-वणिग्वीथी-देवकुलादौ भिक्षार्थं दिवानिशं भ्रमति। एकदा

धनश्रिया योगिवचनं श्रुत्वा किमस्य कथितं सत्यं न वेति ध्यात्वा तीव्रतरविषमिश्रौ मोदकौ योगिने दत्तौ । स योग्यपि तौ मोदकावन्यां च भूयसीं भिक्षां लात्वा पुराद्बहिः सरस्तीरे गत्वा जलेन हस्तमुखादि प्रक्षाल्य यावद्भोक्तुमुपविशति, तावत्तावुभौ धनश्रीसुतौ तत्र क्रीडार्थमागतौ।

अथ सुरूपौ सुकुमालौ तौ द्वौ विनीतौ बालौ विलोक्य प्राप्तप्रमोदेन तेन योगिना तौ मोदकौ तयोर्दत्तौ। तावपि तौ मोदकौ जग्ध्वा जलं च पीत्वा तत्रैवैकस्य तरोस्तले सुतौ विषाऽऽघ्रातौ च मृतौ। स योगी तु स्वं स्थानमगात्। **धनश्रीरपि** सुतौ मृतौ ज्ञात्वा सर्पादिप्रयोगेण तयोर्मरणं निश्चित्य कालेन गतशोका जाता। अथैकदा पुनरपि तं योगिनं तथैव भणन्तं भ्रमन्तं च निरीक्ष्य चकिता धनश्रीः किं तौ मोदकावनेन न जग्धाविति संशयमापन्ना तमाह, हे योगिन्! हे नाथ! तौ मोदकौ भवता किं जग्धौ क्षिप्तौ वा कस्याऽपि दत्तौ? इति पृष्टोऽसौ स्वयं कृतं तं वृत्तान्तं जगौ। साऽपि तन्निशम्य तद्वचसि जातनिर्णया सर्वं स्ववृत्तान्तमभिधाय योगिनं च विसृज्य धर्मपरा जाता। ॥ **इति परेषां कृतमहितं स्वयं लभ्यते, इत्यर्थे धनश्रीकथा॥ १९५॥**

॥ १९६॥ लोकव्यवहारवैकल्ये चतुर्णां विप्राणां कथा ॥

अधीतशास्त्रा अपि लोकव्यवहारविकला निजाऽर्थभ्रंशभाजो भवेयुः, यतः—

शास्त्रं भणित्वाऽपि निजार्थमेके, विनाशयन्ति प्रसभं विवर्णाः ।
चतुष्टयं नष्टहविर्वृषान्न-शाकं यथा हास्यमियाय मैत्रम् ॥ १ ॥

तथाहि—**हरिस्थले** ग्रामे अधीततर्क-ज्योतिष-लक्षण-वैद्यकशास्त्रा अपि लोकव्यवहारविवेकविकलाश्चत्वारो द्विजन्मतनवः सुहृदो वसन्ति स्म। अन्यदा ते चत्वारोऽपि स्वस्वविद्यागर्वभाजः परदेशं कौतुकाऽवलोकनाय स्वपुरतश्चलन्ति स्म। क्वाऽपि च पुरे भोजनार्थं तस्थिवांसः। अथ ते तार्किक-नैमित्तिक-लाक्षणिक-वैद्याः क्रमेण घृताऽऽनयन-बलिवर्दचारणाऽन्नपाचन-शाकग्रहणरूपेषु स्वस्वकार्येषु प्रवृत्ताः, तेषु चैकस्तार्किको घृतमादायाध्वन्यागच्छन्निति दध्यौ, कं घृताधारं पात्रं वा पात्राधारं घृतम्? इति वितर्क्य तद्घृतपात्रमधोमुखमकरोत्, तेन तद् घृतं च भुवि न्यपतत्। अथ द्वितीयो बलिवर्दचारको बलिवर्देषु हरिततृणाङ्कुरोत्करचरणवशादतिदूरं गतेषु ज्योतिःशास्त्रं पश्यति स्म, ममाऽमी वृषा अन्धे वा केकराक्षे वा चिपटाक्षे वा दिव्यचक्षुषि वा नक्षत्रे गताः? चरे वा स्थिरे वा लग्ने गताः? इति यावच्चिन्तयति तावत्ते वृषभा दवीयांसोऽभवन् ।

तृतीयो वैयाकरणोऽन्नपाचनक्षणे 'खद्खद्' इति शब्दं कुर्वाणां खिच्चडिकां निभाल्येति दध्यौ, अहो! असौ शब्दः कस्मिन् व्याकरणे केन सूत्रेण निष्पन्नः? इति ध्यायत्येव तस्मिन्नपि सा खिच्चडिका दग्धा। अथ चतुर्थोऽपि शाकग्रहणार्थं गच्छंश्चतुष्पथे रम्भाफलाऽऽम्र-

१. AH – मत्वा ।

फल-त्रपुषी-कर्कटिका-सर्षप-जीवन्ती-तिबुकादीन् बहून् शाकादीन् दृष्ट्वेति चिन्तयाञ्चक्रे, अहो! अमीभिर्वात-पित्त-कफ-श्लेष्म-त्रिदोषादिमहारोगनिबन्धनैः शाकैरलम् ।

निम्बो वातहरः कलौ सुरतरुः शाखाप्रशाखाकुलः।
पित्तघ्नः कृमिनाशनः कफहरो दुर्गन्धनिर्नाशनः।
कुष्ठव्याधिविषापहो व्रणहरो द्राक्पाचनः शोधनो।
बालानां हितकारको विजयते निम्बाय तस्मै नमः ॥ २॥

इति वैद्यकशास्त्राऽभिहितबहुगुणनिम्बतरुशाकमादायाऽऽययौ। एवमधीतशास्त्रा अपि लोकव्यवहारविकलाश्चत्वारोऽपि ते स्वस्वाऽर्थभ्रंशभाजो बभूवुः। ॥ **इति लोकव्यवहारवैकल्ये चतुर्णां विप्राणां कथा ॥ १९६॥**

॥ १९७॥ लोकव्यवहारवैकल्ये द्वितीया विप्रपुत्रकथा ॥

अत्राऽर्थे पुनरप्येका कथा, यतः—

अधीतशास्त्रा अपि लोकरीति-हीना न केऽनर्थमवाप्नुवन्ति ।
महाजनो येन गतेति वाक्यैः, कार्यं सृजन्ताविव विप्रपुत्रौ ॥ १॥

तथाहि— **धारावासनगरे श्रीकण्ठ-वैकुण्ठनामानौ** द्वौ विप्रपुत्रौ वसतः स्म। पठितनानावाङ्मयावपि पूर्वाऽपरशास्त्राऽर्थसम्बन्धविधुरौ लोकनीति-रीतिबठरौ तौ द्वावन्यदा चिन्तयाञ्चक्रतुः। परदेशपरिभ्रमणं विना प्रसिद्धिर्न स्यात्, यतः—

जह गुणठाणं नाणं, नाणट्ठाणं च होइ जह विणओ ।
विणयस्स विबुहसंगो, तस्स ठाणं च परिब्भमणं ॥ २॥

इति निश्चित्य परदेशयियासया स्वपुरपरिसरे समेत्य पुरतः प्रतिष्ठाऽऽशया सुभाषितानि स्मरतः स्म। तदा चैकं कमपि मृतं नरं महाजनैः श्मशानभूमौ नीयमानं निरीक्ष्य 'महाजनो येन गतः स पन्था' इति पदं च स्मृत्वा तेषां पृष्ठतश्चलितौ तौ, तन्मृतकं च दग्ध्वा स्वस्थानं गतेषु लोकेषु तौ पठितमूर्खौ तत्रैव स्थितौ पुनरपि सुभाषितानि चिन्तयतः स्म।

तदा चैकं रासभं तत्र स्थितं विलोक्य 'राजद्वारे श्मशाने च, यस्तिष्ठति स बान्धवः' इति पद्यं च स्मृत्वाऽऽवयोरिह स्थितत्वादयं बन्धुरिति तं रासभमादाय तौ पुरश्चेलतुः। अग्रे च भृशं सत्वरमायान्तमेकं करभं दृष्ट्वा 'धर्मस्य त्वरिता गतिः' इति तं करभं धर्मं मन्येते स्म। 'इष्टं धर्मे नियोजयेत्' इति च सुभाषितं स्मृत्वेति तौ चिन्तयतः स्म, बान्धवत्वादसौ खर इष्टः, सत्वरगतित्वादयं करभश्च धर्मः, तेनेष्टं धर्मे नियोजयेदिति तं खरं धर्मरूपे करभकण्ठे बद्ध्वा पुरश्चेलतुः। मध्याह्ने च क्षुधितौ तौ क्वाऽपि ग्रामे कस्याऽपि द्विजस्यौकसि *तत्पितृश्राद्धभोजने भोक्तुमुपविष्टौ* ।

तत्र च भोक्तुं परिवेषितानतिमनोहरान् सच्छिद्रान् वटकान् दृष्ट्वा 'छिद्रेष्वनर्था बहवो भवन्ति' इति पदानुसारतस्तान् वटकान् हित्वा तथैव क्षुधाऽऽर्त्तौ तौ पुरः प्रस्थितौ। अग्रे च पयःपूरप्लावितततरुस्तोमां महतीमेकां नदीं तौ प्रविष्टौ। तत्र च पूरे वहमानं यान्तं श्रीकण्ठं विलोक्य वैकुण्ठो दध्यौ, हरिहरि इति भूयो भूयो ब्रुवाणस्य-सहजसुभगवया मम सवयाअयं वहन् यातीति चिन्तयतस्तस्यैष श्लोकोऽस्मार्षीत्—

सर्वनाशे समुत्पन्ने, अर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं, सर्वनाशो हि दुस्सहः ॥ ३॥

इति पठितमातृमुखमुख्यो वैकुण्ठोऽकुण्ठेनाऽसिना तं श्रीकण्ठं द्विधाकृत्य तदर्धमादाय च नद्या बहिराययौ। एवमेतौ द्वावपि क्लेशभाजौ जातौ। ॥ **इति लोकव्यवहारवैकल्ये द्वितीया विप्रपुत्रकथा ॥ १९७॥**

॥ १९८॥ अभ्यासप्राधान्यार्थं कनकसेनाराज्ञीकथा ॥

सकलं गीतनृत्यचित्रकृत्त्वादिनानाकलाकलापकौशलमभ्यासवशात्सुलभं स्यात्। किं बहुना ? सर्वासामपि विद्यानां मूलमभ्यास एव, यतः—

धणमूलं वावारो, मूलं रूवस्स जुव्वणं भणिअं ।
मूलं गुणाण विणओ, विज्जामूलं च अब्भासो ॥ १॥

किञ्चाऽभ्यासवशान्नरो दुःसाध्यमपि कार्यं साधयति, यतः—

दुःसाध्यमभ्यासवशात्सुसाध्यं, जायेत पुंसां विहितोद्यमानाम् ।
क्ष्मापेन बाणैर्निहता निशाटाः, राज्ञ्या स्वयं पीलुरुदञ्चितश्च ॥ २॥

तथाहि— रामपुरे नाम पुरे **दुर्गेशो** नाम राजा, **कनकसेना**भिधा च तस्य राज्ञी, तस्य राज्ञः सर्वास्वपि कलासु प्रावीण्ये सत्यपि पार्थस्येव विशेषतो धनुःकलाकौशलमासीत्। एकदा सुखसुप्तया राज्ञ्या प्रथमे यामिनीयामे कर्णकोटरे विषमिव कटु निशाटरटितमाकर्ण्याऽहं बिभेमीति राज्ञोऽभाणि। शब्दवेधिबाणकलाकुशलो राजाऽपि तच्छब्दानुसारेण बाणं मुमोच।

तस्मिन्नेव स्थाने तथैव पुनरपि द्वितीये यामे घूकघूत्कारमाकर्ण्य राज्ञी राजानमवोचत् हे नाथ! क्व गता तव शब्दवेधिनी सायककला ? सर्वं ज्ञातं, यदहं शब्दवेधीत्ययमाडम्बरः शारदीनघनगर्जितमिव मुधैव त्वया लोके विधीयते, यतोऽसौ घूको जीवन्नस्ति, भूयश्च रटतीति। राजाऽपि तद्वचनं निशम्य मनाग्मन्दाक्षमन्दोऽभूत्, तथा पुनरपि च राजा निशाटरटितमाश्रित्य मार्गणं मुमोच, पुनरपि तथैव तृतीये चतुर्थे च यामे तत्रैव तरौ कौशिकक्वणितमाकर्ण्य राज्ञ्या सस्मितमवनीपतिरभाणि, तद्वचोभिर्लज्जितेन राज्ञा तथैव बाणौ मुमुचाते। अथ प्रभाते बाणानानेतुं

राज्ञा प्रेषिताः प्रेष्याश्चतुरोऽपि मृतानुलूकान् सबाणानादाय समेताः, शब्धवेधितया मया हतान्मृतान् घूकान् पश्येति राज्ञीमभिधाय स्वयं स्वकलाकौशलमभीक्ष्णमस्तवीत्। एवं भृशं स्मयं कुर्वन्तं राजानं राज्ञी स्माह, हे नाथ! वनानां वनवह्निमिव गुणानां नाशं कुर्वाणमहङ्कारं मुञ्च, मुधा गर्वं मा विधेहि, यतः—

दिग्पालांश्चन्द्रमौलिर्वहति रविरयं वाहवैषम्यकष्टं,
राहोः सातङ्कमिन्दुर्विचरति गरुडान्नागवर्गो बिभेति ॥
रत्नानां धाम सिन्धुस्त्रिदशपतिगिरौ स्वर्णमद्याऽपि यस्मात् ।
किं दत्तं रक्षितं वा किमुत जगत्यर्जितं येन गर्वः ॥ ३॥

किञ्च हे स्वामिन्नभ्यासेन सर्वमपि दुःसाध्यं सुसाध्यं भवतीत्यभिधाय बाढं बद्धपरिकरा सा राज्ञी तद्दिनप्रसूतमेकं करिबालमुत्पाटयामास। एवं प्रतिदिनं तया राज्योत्पाट्यमानः स करिशावः षोडशाब्दिकः समजनि। तादृशं च तं हस्तिनं यान्तं निरीक्ष्य राज्ञी राजानमूचे, हे स्वामिन्नस्ति कश्चिदेतादृशो भवद्राज्ये य एनं हस्तिनं स्वयमुत्पाटयति। नास्तीति राज्ञोदिते सन्नद्धबद्धकक्षया तया राज्ञ्या तद्दिनप्रसूत इव स करी स्वयमुदपाटि। अथाऽधिकतरं तत्कलाकौशलमालोक्य भृशं विस्मयमापन्नस्य राज्ञो राज्ञी स्वमभ्यासव्यतिकरमब्रवीद्। एवं तद्वचनौषधेन गर्वगदमपहृत्य राजाऽपि सर्वत्राऽभ्यासमेव मुख्यं मन्यमानो मेदिनीमवति स्म।

॥ इत्यभ्यासप्राधान्यार्थे कनकसेनाराज्ञीकथा ॥ १९८॥

॥ १९९॥ मूर्खचरित्रे भरटकनामविप्रकथा ॥

निरक्षरा हि नोपदेशाऽर्हाः, यतः—

उपदेशो हि मूर्खाणां, प्रकोपाय न शान्तये। पयःपानं भुजङ्गानां, केवलं विषवृद्धये ॥ १॥

अपि च—

जे कुग्गहगहिआणं, मूढाणं देइ धम्मउवएसं ।
सो चम्मासिअकुक्कर-वयणंमि खवेइ कप्पूरं ॥ २॥

किञ्च बालिशविलसिते न काऽपि प्रतिक्रिया, यतः—

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्याऽऽतपो,
नागेन्द्रो निशिताऽङ्कुशेन महता दण्डेन गो-गर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं,
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ ३॥

अयशसां भाजनं हि मूर्खाः स्वयं रहसि विनिर्मितमनाचरणं स्वयमेव प्रकटयन्ति, यतः—

रन्ध्राणि नीरन्ध्रजडत्वभाजः, प्रकाशयन्ति स्वयमेव मूर्खाः ।
यथाब्रवील्लोकपुरः करम्भं, भुक्तं द्विजन्मौकसि धावकस्य ॥ ४॥

[1]तथाहि— **धणसारग्रामे भरटकनामा** विप्रः पुत्रकलत्रादिरहितो दुर्भिक्षे भिक्षार्थं प्रतिगृहं भ्रमन् **धूसरस्य** रजकस्यौकसि सायं करम्भं भुक्तवान्।

अन्यदा स्वग्रामतो निर्गत्य सर्वत्र ग्राम-नगरपुरादौ पर्यटन् शुभभाग्योदयवशतः **क्षितिप्रतिष्ठित**पुरस्वामिनो नरचन्द्रस्य राज्ञः पुरोहितो जातः, **गोविन्द** इति नामान्तरेण स्वं नाम प्रकटीकृत्य स भरटको **नरचन्द्रस्य** राज्ञः प्रकामं प्रसादपात्रमासीत्। किं बहुना तत्कृतं सर्वमप्यसमञ्जसं समञ्जसं च राजा प्रमाणमेव मन्यते स्म। पुंसां हि भाग्यं स्थानान्तरितं, यतः—

गन्तव्यं नगरशतं, विज्ञानशतानि शिक्षितव्यानि ।
नरपतिशतं च सेव्यं, स्थानान्तरितानि भाग्यानि ॥ ५॥

अथान्यदा तत्र पुरे गीत-सङ्गीत-नृत्य-नटादिकलाकुशलः **कुशलो** नाम नटः समागात्। स च राज्ञः पुरः सुराणामपि विस्मयकरीं निजकलां दर्शयामास। परं तत्कलामपश्यन्निव राजा तस्मै किमपि दानं न दत्ते स्म। तदा चैकेन केनापि मध्यस्थेन पुंसा नटस्येत्यभिदधे।

हे नटोत्तम! उत्तरमारुतं विना घनाघन इव राजा पुरोहितदृशं विना तुभ्यं दानं न दास्यति, तेन तन्मनोरञ्जनाय तस्य पुरः स्वकलां दर्शय, येन तद्वचोभिर्भूपस्तुभ्यं प्रभूतं दानं यच्छतीति श्रुत्वा पुरोहितगृहे च गत्वा स कुशलः सकललोकपूरितायां तस्य पर्षदि विशेषतो विस्मयकारिणीं नानावेषहारिणीं नानापुरातनपुरुषचरित्रविस्तारिणीं पूर्वशास्त्राऽनुसारिणीं स्वकलामदर्शयत्, परं चित्रलिखित इव गोविन्दः किमपि न विवेद, न तुतोष, न जहर्ष च। स नटोऽपि चतुर्थे यामिनीयामे नृत्यं कुर्वन् खिन्नः सन्नीश्वरवेषेण नृत्यं चिकीर्षुरुपतस्थे।

करकलितनरकपालः, कर-कर्ण-कण्ठ-कटी-प्रमुखावयवेषु यथोचितन्यस्तभुजङ्ग-भूषणकरालः, कण्ठकन्दलप्रलम्बितरुण्डमालः, स्फुरत्तेजस्तृतीयलोचनललितभालः, क्रोडी-कृतकौत्यायनीकायः[2], प्रकटितमहामायः, क्षरद्रुधिरबिन्दुकरम्बितकरिचर्मोद्दामप्रचुरतरभस्मभरा-भिरामः, पिङ्गतरविकटजटामुकुटः, रिपुकुल-प्रतिकूल-त्रिशूलप्रमुखशस्त्रश्रेणिप्रकामोत्कटः, शिरोधृतसुरसरित्प्रवाहः, शारीरतेजःपराभूतसप्तवाहः, प्रोत्तुङ्गशृङ्गवरवृषभमध्यासितः, कर्पूरपूर-कुन्द-कुमुदचन्द्र-चन्दनसूत्रितमहानटवेषः स नटो महानटभक्तस्य तस्य पुरोहितस्य मनस्तुष्टयै इदमभणत्—

'अथ भरडयचरिअं पवक्खामि' इति श्रुत्वा माऽसौ पापो रजकगृहभुक्तकरम्भकरूपं मच्चरितं वदतु, इति च मत्वा स तदवसरभञ्जनार्थं प्रभूतं जातरूपादिदानं तस्मै ददौ। तद्दानं दृष्ट्वा सोऽस्तोकोऽपि सभालोको बहुधनादि ववर्ष। इदं दानं प्राप्य स इति दध्यौ, अहो! भरटकस्य

१. तुला भरटक द्वात्रिंशिका कथा ९ ॥ २. कात्यायनी = पार्वती ॥

भगवतो महादेवस्य चरित्रप्रादुर्भावप्रारम्भेऽपि यदीदृशं दानमसौ ददौ, तदा पूर्णचरित्रकथनेऽयं किं दानं दास्यतीति ध्यात्वा स द्वितीयस्मिन्नहनि तथैवाऽऽगत्य तदेवाऽबीभणत्। तमप्यवसरं पुरोहितो दानेन भनक्ति स्म। तृतीयस्मिन्नप्यहनि तथैव जल्पनोत्सुकं तं महामूर्खमुख्यः स इदमवादीत्-रे! रे! पापिष्ठ! दुष्ट! त्वं किं कथयिष्यसि ? यथेच्छं ब्रूहि याहि, मया रजकौकसि करम्भो भुक्तोऽस्ति, अस्त्यन्यदपि किमपि तव कथनीयम् ? अथेति तदुक्तमाकर्ण्य सर्वेऽपि तं प्रकामं धिक्चक्रुः। हा हा! अनेन दुराचारेण सर्वेऽपि वयमुच्छिष्टाः कृताः, तदाकर्ण्य राज्ञापि विडम्ब्य पुरान्निष्कासितः स्वकीयमूर्खतादोषेण सर्वत्र दुःखभागासीत्। ॥ **इति मूर्खचरित्रे भरटकनामविप्रकथा ॥ १९९ ॥**

॥ २००॥ कृतघ्नविषये सुवर्णकारकथा ॥

ये कृतमुपकारं मन्यन्ते ते स्तोका एव, यतः—

न तं पश्यामि सौमित्रे!, कृते प्रतिकरोति यः। सर्वस्यापि कृतार्थस्य, मतिरन्या हि जायते ॥ १ ॥

अपि च—

न हि मे पर्वता भारा, न मे भाराश्च सागराः ।
कृतघ्नाश्च महाभारा, भारा विश्वासघातकाः ॥ २॥

किञ्च पशुभ्योऽपि ते नरा अधमा ये परोपकृतं न मन्यन्ते, यतः—

विद्मः पशुभ्योऽप्यधमान्नरांस्तान्, यैर्मन्यते नैव परोपकारः ।
सन्मानितो व्याघ्र-कपि-द्विजिह्वै-र्नीतो द्विजः स्वर्णकृता ह्यवस्थाम् ॥ ३॥

तथाहि— **बहलसर**ग्रामवासी सरलाऽऽत्मा **सारको** नाम दुःस्थो द्विजः स्वोदरपूरणार्थम-क्षमो भिक्षार्थं नगरादौ भ्रमन्नरण्ये यममुखरूपे क्वापि कूपे पतितान् व्याघ्र-कपि-सर्प-नरान् वीक्षयामास, शुश्राव च तेषामिति गिरं, हे नरशेखर! हे पुरुषपुण्डरीक! अस्मानस्याः क्लेशविपत्तितः समुद्धर वसुधाभरणभूतानां पुंसामयमध्वा, यतः—

विहलं जो अवलंबइ, आवइपडिअं च जो समुद्धरइ ।
सरणागयं च रक्खइ, तेहिं तेहिं अलंकिया पुहवी ॥ ४॥
गिरुआ सहजइ गुण करइ, कारण किंपि म जाण ।
करसण सींचइ सर भरइ, मेह न मग्गइ दाण ॥ ५॥

इति तेषां करुणस्वरमाकर्ण्य स तानुद्धर्तुं कूपोपकण्ठमाययौ। सन्तो हि परोपकारप्रह्वाः स्वयमेव स्युः, यतः—

कस्यादेशात्क्षपयति तमः सप्तसप्तिः प्रजाना-
मभ्यर्थ्यन्ते नवजलमुचः केन वा वृष्टिहेतोः।

छायां कर्तुं पथि विटपिनामञ्जलिः केन बद्धो,
जात्यैवैते परहितविधौ साधवो बद्धकक्षाः ॥ ६ ॥

अथ परोपकारपुण्यात्मा स लता-तरुत्वक्प्रभृतिभिर्विनिर्मित-महारज्जूपायेन व्याघ्रादीं-स्त्रीननुक्रमेणोद्धृत्य चतुर्थं सुवर्णकारमुद्दिधिर्षुरयं कपिना प्रोचे, हे नरोत्तम! असौ सुवर्णकारस्तेन कृतघ्नस्योपकारो नोचितः, अयं हि नाऽऽत्मीयः, यतः—

अक्ष अग्नि असपति असिधार, वेश्या वनिता सलिल सुनार ।
इहनो नवि कीजइ वीसास, सोए वरसे नहि सहवास ॥ ७॥
पासा वेसा असि जल, ठग ठक्कुर सोनार ।
एता न होए आपणा, मंकड बटुअ बिडाल ॥ ८॥

एवं तेन वारितोपि परोपकार-रसिकोऽसौ सुवर्णकारमप्युद्दधार। हे उपकारकारिन्! त्वं **कादम्बरीं** पुरीमागच्छेरित्यभिधाय ते स्वं स्वं स्थानं जग्मुः। अथ कादम्बरीपुरीपरिसरे समायातं तं सारकमुपलक्ष्य व्याघ्रः प्रत्युपचिकीर्षुस्तत्र रममाणं राजतनुजन्मानं निहत्य बहुमूल्यानि तदाभरणानि तस्मै दत्त्वाऽऽत्मानं चाऽनृणीकृत्य स्वयं कानने ययौ। एवमुपलक्ष्य बहुफल-पुष्प-पत्रादिना कपिनापि सत्कृतोऽसौ कादम्बरीपुरीं प्राविशत्। तत्र च तेन सुवर्णकारेण स उपलक्षितो निवेशितश्च स्वहट्टे। ततस्तेन विप्रेण राजपुत्रा-भरणानि विक्रयाय तस्मै दत्तानि।

ततः सुवर्णकृतापि राजनामाऽङ्कितानि तानि भूषणानि राजपुत्रस्य ज्ञात्वा राज्ञो दर्शितानि। राज्ञापि पुत्रहन्ताऽसौ पापाऽऽत्मा वधार्थं मातङ्गानामर्पितो वधभूमौ नीयमानोऽसावध्वनि गच्छन् कृतज्ञेन तेन भुजङ्गेन ददृशे। अहो! ममोपकारिणोऽमुष्य पुण्याऽऽत्मनो दुर्दशा पतितास्ति, तेनास्मै प्रत्युपकारं कृत्वाहमनृणीभवामीति मत्वा तत्र पार्श्वे क्रीडन्ती राजदुहिता तेनाऽहिना दष्टा। नाग-मन्त्रप्रयोगतोऽस्या राजदुहितुर्मुखेऽवतीर्णोऽसौ सर्प इत्यवादीत्, यदसौ द्विजन्मैनां जीवापयिष्यति नाऽन्य इति, तस्य पाणिस्पर्शमात्रेण सा जीविता। अतिप्रियायाः स्वपुत्र्या जीवातुमिव जीवितप्रदं विप्रं राजा सच्चकार। किञ्चेमं वृत्तान्तं मूलतः श्रुत्वा कुपितो भूपस्तं सुवर्णकारं देशत्यागमकारयत्। ॥ **इति कृतघ्नविषये सुवर्णकारकथा ॥ २००॥**

॥ २०१॥ भाग्ये दामोदरविप्रकथा ॥

देव-दानव-मानवेभ्योऽपि दैवं बलवत्तरं, यतः—

वैदेहीदयितेऽपि दुष्टहृदयः पार्थेऽप्यनर्थप्रदो।
[1]जीमूतेऽपि यथोचितव्यवहतिः कर्णेऽपि कर्णेजपः।
भीमो भीमसुतापैंतावपि हरिश्चन्द्रेऽपि रौद्राशयः।
शक्रेऽपि श्रितवक्रिमा हतविधिर्यस्तस्य केऽमी वयम् ?॥ १ ॥

---

१. *विशेषार्थं द्रष्टव्यं* ***नागानन्द*** *नाटकम् ॥ २. PD । "पिता" मु.। भीमसुतापति = नलराजा ॥*

किञ्च चिन्त्यतेऽन्यदेव, दैवं त्वन्यदेव विधत्ते, यतः—

पुंसां फलन्ति भाग्यानि, न देवा न च पार्थिवाः।
यदन्यस्मै ददौ राजा, कुष्माण्डं चेतरोऽलभत् ॥ २॥

तथा हि— **सणकच्छ**पुरे पुरन्दरनामा राजा, शुभाऽशुभं सर्वं स्वकृतमेव भवतीति स्वचित्तचिन्तितोन्नतिमानसो दैव-देव-दानव-मानवपुण्यादि सर्वं तृणमिव मन्यते। तस्य च **दामोदर-सुन्दरनामा**नौ द्वौ द्विजन्मानौ नित्यं पर्षदि तिष्ठतः, परं तयोरेको **दामोदरो** राज्ञो वचो न मन्यते, वक्ति च— शुभाऽशुभं सर्वं पुंसां प्राक्कृतैः सुकृतैरेव स्यात्, यतः—

नैवाकृतिः फलति नैव कुलं न शीलं, विद्याऽपि नैव न च जन्मकृताऽपि सेवा ।
कर्माणि पूर्व तपसा किल सञ्चितानि, काले फलन्ति पुरुषस्य यथेह वृक्षाः ॥ ३॥

अपि च—

उद्यमं कुर्वतां पुंसां, भाग्यं सर्वत्र कारणम् । समुद्रमथनाल्लेभे, हरिर्लक्ष्मीं हरो विषम् ॥ ४॥

अपरः सुन्दरस्तु शुभा-ऽशुभं सर्वं राज्ञा कृतं स्यादिति नित्यं राजानमेव स्तौतीति स्वस्तुति-कर्तारं राजा यादृक् तं सुन्दरं बहु मन्यते, न तथा चेतरमिति। एकदा कृतवादि-पुण्यवादिनो-स्तयोर्विप्रयोर्विवादभञ्जनार्थं स्वमतस्थापनार्थं च राजा सुन्दराण्यामात्रवसनानि द्वयोर्ददौ।

किन्तु सभानां पश्यतामेकं कुष्माण्डमधिकं स **सुन्दरस्य** दत्ते स्म। स्त्रीवशः स **सुन्दरो**ऽ-ऽपि स्त्रिया प्रेरितस्तत्कुष्माण्डफलं सद्य एव शाकापणे विक्रीतवान्। **दामोदरो**ऽपि सर्वमामात्रादि राजदत्तं स्वस्त्रियै दर्शितवान्, कथितवांश्च कुष्माण्डाऽन्तरम्। अथ सोऽपि स्त्रीगिरा कुष्माण्डाऽऽ-दानाय शाकाऽऽपणे प्राप्तो दैववशात्तदेव कुष्माण्डफलं लात्वा गृहं प्राप्तः, ततो रहसि स्थित्वा यावत्तत्कुष्माण्डं स विदारयति, तावत्तन्मध्यान्निर्गतं मणि-मौक्तिक-कनकाद्याभरणादि धनं पश्यति स्म। बुबोध च राजदत्तं तदेव फलमिदमिति राज्ञा कृतमिदमन्तरं, परं मद्भाग्येन सुन्दरं जातम्।

अथ द्वितीयाऽह्नि दामोदर इव दामोदरस्तद्वरवसनाऽलङ्कारादि परिधायाऽऽशीर्वादं वदन् राजसभायामुपतस्थे। **सुन्दरस्तु** शीर्ण-मलिनवस्त्रो निरलङ्कारश्च पर्षदि प्राप्तः। अथ राजापि साऽलङ्कारं दामोदरं, सुन्दरं चाऽसुन्दरं दृष्ट्वा पृष्ट्वा च तयोस्तत्कारणं स्ववृत्तमखिलमजागलस्तन-तुल्यं पूर्वपुण्यकृतं च सर्वं समीचीनं मन्यमानः सभ्यसमक्षं समस्तं स्वविलसितमभिधाय पुण्यमेव प्रत्यहं निर्ममे। ॥ **इति भाग्ये दामोदरविप्रकथा ॥ २०१॥**

इति पं० श्रीकमलविजयगणिशिष्य पं० श्रीहेमविजयगणिविरचिते
कथारत्नाकरेऽष्टमस्तरङ्गः समाप्तः
॥ श्रीरस्तु॥

॥ ९॥ नवमस्तरङ्गः ॥

॥ २०२॥ स्त्रीपराभवे वइजीकुटुम्बिनीकथा ॥

कलत्रकृतकलहपराभवो हि पुंसां भृशोद्वेगनिदानं यतः—

माठो धोरी ठोठ गुरु, कूइ ते खारुं नीर ।
ग्रामि कुठाकुर घरि कुघर[णी] पंचइ दहइ सरीर ॥ १ ॥

किं बहुना? प्रातिवेश्मीभूतभूतानामपि स्त्रीकलहभयं भूरि भवति, यतः—

कुस्त्री कलेः पराभूतिः, सुराणामपि दुस्सहा ।
नश्य रे भूत साऽऽयाता, वैजीत्याकर्ण्य सोऽगमत् ॥ २ ॥

तथाहि— **भाणभाटके** ग्रामे **जयता**भिधः कुटुम्बिकः, तस्य च कामं कठोरा, व्याघ्रीव घोरा, कुरूपा दुष्टस्वरूपा कलहकारिणी दुराचारिणी कुलकलङ्कदायिनी सततं मायाविनी धनिकाद्यस्नेहिनी **वइजी**तिनामगेहिनी। सा परिवारेण पत्या च समं कामं कलहायते। किं बहुना? पतिस्तु तां कलिकन्दलं मत्वा प्राणानपि परिजिहिर्षुरासीत्। यतः—

आः किं सुन्दरि! सुन्दरं न कुरुषे किं नो करोषि स्वयं,
हा पापे! प्रतिजल्पसि प्रतिदिनं पापस्त्वदीयः पिता ।
धिक् त्वां कोपमुखीमलीकमुखरस्त्वत्तोऽपि कः कोपनो?,
दम्पत्योरिति नित्यदन्तकलहः क्लेशार्थिनोः किं सुखम्? ॥ ३ ॥

इत्थमहर्निशं मिथो मर्म-शंसनैर्विरूपशंसनैः कामं कलहायमानयोरनयोः कर्णशूलतुल्यै-र्वचनैरुद्वेजितः निकटन्यग्रोधवासी[1] ततः प्रणश्याऽन्यत्र पुरपरिसरे तटाक-तटतरु-शाखामधितस्थौ। इतश्च जयतोऽपि तयोद्वेजितो निशि वेश्मतो निर्ययौ। यतः—

लुखु भोअण धूअ धण रंगह विण घरवास। माणस निमाया वाउए चिहुं केही आस ॥ ४ ॥

अथ भ्रमन् स तत्रैव तटाकतटतरोस्तले तस्थौ। अथ स भूतोऽपि तमुपलक्ष्य प्रातिवेश्मिकप्रीत्या प्रादुर्भूय च यथोचितस्वागतप्रश्नपूर्वमुपचरति स्म। अथ कस्त्वमिति जयतेनोक्तः स स्माह, हे मित्र! त्वन्निकटनिवासी भूतोऽहं त्वत्कलत्रकलिवचनैरुद्वेजितोऽत्र वसामि, त्वां च तेन सत्कुर्वन्नस्मीति। किञ्चाऽत्र रममाणां राजपुत्रीमहं गृह्णन्नस्मि, सा च त्वत्करस्पर्शमात्रेण सज्जीभविष्यति, तुष्टश्च राजा तव भूरि धनं दास्यतीत्यभिधाय स सुरस्तत्र क्रीडन्तीं राजपुत्रीं जग्राह। यो राजसुतां सज्जीकरोति स कामितं धनं प्राप्नोतीति पटहं स्पृष्ट्वा तथैव च तां सज्जीकृत्य नृपदत्तं घनं धनं च प्राप्य जयतः सुखी जातः ।

अन्यदा तत्रैव प्रदेशे रममाणं रमणीयरूपं **सुरूप**नामसार्थवाहसुतं तेनैव भूतेन गृहीतं ज्ञात्वा तथैव पटूकर्तुमागतं जयतं [प्रति भूतो ब्रूते, अस्याऽहं न मोक्ष्यामीति, तेन] किमर्थमत्र

१. न्यग्रोधवासी = यक्षः ॥

त्वमागतोऽसीति कर्णे प्रविश्य स भूतस्तमभिदधे। अथ सद्यः समुत्पन्नमतिर्जयत इत्यब्रवीत्, रे भूत! रे मित्र! नश्य! सा वइजी मम स्त्री समागतास्तीति मित्रस्य कथयितुमिहागतोऽस्मीति। तद्वचनं श्रुत्वा स भूतः काकनाशमनश्यत्। जयतोऽपि सार्थवाहाद्भूरि धनं लेभे ॥ **इति स्त्रीपराभवे वइजीकुटुम्बिनीकथा ॥ २०२॥**

॥ २०३॥ यथास्थितकथने शारदानन्दपुरोहितकथा ॥

मूर्खाणां प्रभूणामपि पुरो यथास्थितं न वाच्यं, यथास्थितकथनेनाऽपि मूर्खाः पापा एव स्युः, यतः—

अज्ञः सुखमाराध्यः, सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं, ब्रह्मापि नरं न रञ्जयति ॥ १ ॥

अपि च—

यथास्थितं नैव निवेदनीयं, पुरो जडानां स्वहितैषिमुख्यैः ।
तिलं वदन् भानुमतीभगस्थं, पुरोहितोऽनर्थमवाप येन ॥ २॥

[1]तथाहि— **विशालायां** नगर्यां **नन्दो** राजा, **विजयपालः** पुत्रः, **बहुश्रुतनामा** मन्त्री, **शारदानन्दः** पुरोहितः, **भानुमती** च राज्ञी। राजा तस्यां भृशमासक्तः सभायामपि तामभ्यर्णे स्थापयति। किं बहुना ?

आसने शयने याने, मज्जने जल्पनेऽशने। गाने पानेऽर्जनस्थाने, नाऽमुञ्चन्महिषीं नृपः ॥ ३॥
वैद्यो गुरुश्च मन्त्री च, यस्य राज्ञः प्रियंवदाः। शरीर-धर्म-कोशेभ्यः, क्षिप्रं स परिहीयते ॥ ४॥

इति मत्वा स्वस्वामिहितैषी मन्त्री प्रोचे, हे देव! देव्याः सर्वदा सर्वत्राऽन्तिकेऽवस्थानमनुचितं, यतः—

अत्यासन्ना विनाशाय, दूरस्था न फलप्रदाः। सेव्या मध्यमभावेन, राज-वह्नि-गुरु-स्त्रियः ॥५॥

अतो राज्ञीरूपं चित्रस्थं कारय तच्च सभायां पार्श्वे स्थापयेति श्रुत्वा राजापि चित्रस्थं राज्ञीरूपं कारयित्वा पुरोहितस्य दर्शयामास।

शारदानन्दपुरोहितोऽपि विस्मृतनीतिवचाः स्वज्ञानकौशलज्ञापनार्थं प्रोचे, हे वसुमतीनाथ! राज्ञ्या वामोरुप्रदेशे तिलको विस्मृतः, इमं तिलकमहं वेद्मि राज्ञी वा, कथमयम्? नूनं राज्ञ्या सममस्य सम्बन्धोऽस्तीति कुविकल्पेनाऽसौ राजा मन्त्रिणमाह, पुरोहितो मारणीय इति, मन्त्री दध्यौ—

सहसा विदधीत न क्रिया-मविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव सम्पदः ॥ ६॥

१. *तुला-उपदेशप्रासादे व्या. १३०।*

इति नीतिशास्त्रं मत्वा मन्त्रिणा स पुरोहितः स्वगृहे रहसि रक्षितः अन्यदा राजसुतः पापर्द्धयै शूकरमनुव्रजन् दूरमरण्यं गतः। सायं सरसि जलं पीत्वा निशि व्याघ्रभिया तरोरुपरि तस्थौ; अथ तद्वासिना वैटवासिना गृहीतेन कपिनाऽसौ राजसूः पूर्वं स्वोत्सङ्गे शायितः, पश्चात्तस्योत्सङ्गे स कपिः शेते स्म।

दैवात्तत्राऽऽगतस्य क्षुधार्त्तस्य व्याघ्रस्य वचसा स कपिः कुमारेणाऽधो मुक्तः व्याघ्रमुखे पतितः राजसुतस्याऽसमञ्जसं चरित्रं वीक्ष्य हसित्वा व्याघ्रस्य मुखान्निर्गत्य रुदन् स व्याघ्रेण पृष्टः प्राह—

निजजातिं परित्यज्य, परजातिषु ये रताः। तानहं रोदिमि व्याघ्र!, कथं ते भाविनो जडाः॥ ७॥

अथ लज्जितः कुमारस्तेन वटवासिनाऽधिष्ठितो ग्रहिलो जातः, सर्वत्र 'विसेमिरा' इत्यक्षरचतुष्टयं पठन् तुरङ्गपदानुसारेण [तं वनगतं] ज्ञात्वा राज्ञा गृहमानीतः, प्रभूतैर्मन्त्र-यन्त्र-तन्त्रप्रयोगैर्गुणमज्ञात्वा राज्ञा स **शारदानन्दः** स्मृतः, सकलकलासु कुशलोऽनन्यसामान्य-सौजन्ययुतः पुरोहितः क्वेति खेदं बिभ्रता भूभृता यः कोऽपि मत्सुतं समाधिभाजं करोति, तस्मै राज्यार्धं ददामि इति पटहोद्घोषणं कारितं श्रुत्वा मन्त्रिणोक्तं, हे देवाऽत्रार्थे मम सुता निपुणाऽस्ति, तत् श्रुत्वा ससुतो राजा मन्त्रिगृहं प्राप्तः, तत्र च जवनिकाऽन्तरितः सर्वकलाविशारद **शारदानन्दो** बालस्त्रीस्वरेण जगौ—

विश्वासप्रतिपन्नानां, वञ्चने का विदग्धता ?। अङ्कमारुह्य सुप्तानां, हन्तुः किं नाम पौरुषम् ?॥ ८॥

इत्याकर्ण्य कुमारेणाऽऽद्याऽक्षरं मुमुचे।

सेतुं गत्वा समुद्रस्य, गङ्गासागरसङ्गमे। ब्रह्महा मुच्यते पापै-र्मित्रद्रोही न मुच्यते ॥ ९॥

इति श्रुत्वा तेन द्वितीयमक्षरं मुक्तम्।

मित्रद्रोही कृतघ्नश्च, स्तेयी विश्वासघातकः। चत्वारो नरकं यान्ति, यावच्चन्द्र-दिवाकरौ॥ १०॥

इति निशम्य स तृतीयमक्षरं मुमोच।

राजंस्त्वं राजपुत्रस्य, यदि कल्याणमिच्छसि। देहि दानं सुपात्रेभ्यो, गृही दानेन शुध्यति ॥ ११॥

इति श्रुत्वा स तुर्यमक्षरमत्यजत्। **विजयपालो**ऽथ सुस्थोऽजनि, ऊचे च वनसम्भवं व्याघ्रादिविलसितम् । तदनन्तरं राजा स्माह—

ग्रामे वससि हे बाले!, वनस्थं चरितं खलु। कपि-व्याघ्र-मनुष्याणां, कथं जानासि पुत्रिके !?॥१२॥

अथ पुरोहितः स्वकीयेनैव स्वरेण राज्ञः स्वान्तःशल्यमुद्दिधीर्षुरूचे—

देवगुर्वोः प्रसादेन, जिह्वाग्रे मे सरस्वती। तेनाहं नृप जानामि, [1]भानुमत्यास्तिलं यथा ॥ १३॥

ततः पुरोहित-राजानौ मिलितौ मिथः सन्तुष्टौ च ॥ **इति यथास्थितकथनेऽपि कस्याप्यनर्थः स्यादित्यर्थे शारदानन्दपुरोहितकथा ॥ २०३॥**

१. यक्षेण ॥ २. भानुमतीतिलकं यथा AHD ॥

॥ २०४॥ कपटे शेखरसुवर्णकारकथा ॥

सुधियां दम्भस्य पारं न कोऽपि याति, यतः—

यान् वञ्चयन्ति धीमन्तः, साऽपराधान् सृजन्ति तान् ।
यत्स्वर्णकृल्ललौ हारं, भूपोऽभूच्चाऽपराधवान् ॥ १ ॥

तथाहि— **सङ्कुलसरग्रामे महसेनो** नृपः, तत्र च पटु-कपटपटीयान् सुधीशेखरः **शेखरो** नाम सुवर्णकारः। एकदा राज्ञा बहुमूल्य-मनोज्ञमणिमयो हाटक-जटितो हारस्तेनैव सुवर्णकारेण कारयितुमारब्धः। स शेखरो दिवा राज्ञोऽग्रतस्तं हारं घटयति, नक्तं च काच-कृत्रिममणिमयं [1]भारकुटजटितं हारं स्वौकसि करोति। राज्ञो हारघटनाऽवसरे दम्भवान् स सुवर्णकारश्छलान्नीव्रे मांसं मुमोच, तन्मांसपिण्डं च प्रत्यहं शकुनिका जग्राह। एवं तत्र राजहारः स्वौकसि स्वहारश्च, द्वावपि सदृशौ हारौ षण्मासैः पूर्णौ बभूवतुः। प्रान्तेऽहनि च पयःपूर्णे घटे स्वहारं निधाय तं घटं चाऽऽदाय स्वर्णकृद् भूपाऽऽलये प्राप्तः, अथ राज्ञो हारं गैरिकेण रक्तं कृत्वा, तत्र घटे च मुक्त्वा सुवर्णकृत्तत्स्थाने स्वहारं च निष्कास्य राज्ञः पश्यतो मांसस्थाने नीव्रे मुमोच। अथ सा शकुनिकापि पूर्ववन्मांसलम्पटा मांसपिण्डमिव तं राजहारं लात्वोड्डीय चाऽऽकाशे दवीयसा ययौ।

अथ सुवर्णकृदपि दूरं गतां तां विलोक्य कपटेन भूरीण्यश्रूणि मुञ्चन् स्वमूर्धानं मेदिन्यामाहन्ति स्म, उवाच च हे देव! हे देव! प्रभूतप्रयासलभ्यं मम हारघटनमूल्यं तुष्टिदानं चाऽपि निष्फलीभूतमिति विलपन् मुहुर्मुहुर्भूमौ पपात। तं च तादृशं खेदं कुर्वाणं [2]निर्वण्य भूपः प्राह, हे भद्र! खेदं मा कुरु, ममैवायमपराधः, यदसौ हारो मयैव साधु न रक्षितः, ममैव चाऽऽलस्यं यदीदृशं रत्नवस्तु मत्करादनश्यत्। इत्याद्युक्त्वा राज्ञा दत्तं हारघटनमूल्यं तं च सहारं घटमादाय स स शेखरो निजं गृहं गतः ॥ **इति कपटे शेखरसुवर्णकारकथा ॥ २०४॥**

॥ २०५॥ हयपरीक्षाज्ञाने रूपचन्द्रकथा ॥

ज्ञानं हि सर्वश्रियां मूलं, यतः-

ज्ञानं स्यात्कुमतान्धकारतरणिर्ज्ञानं जगल्लोचनं, ज्ञानं नीतितरङ्गिणीकुलगिरिर्ज्ञानं कषायापहम्।
ज्ञानं निर्वृतिवश्यमन्त्रममलं ज्ञानं मनःपावनं, ज्ञानं स्वर्गगतिप्रयाणपटहो ज्ञानं निदानं श्रियाम् ॥ १ ॥

किं बहुना ? स्वल्पमपि ज्ञानं महत्त्वं यच्छति, यतः-

सुशिक्षितोऽल्पोऽपि कलाविलासः, पुंसां प्रदत्ते महिमानमुच्चैः।
न किं चतुर्णां हय-भुक्ति-शय्या-नृज्ञानभाजामजनिष्ट मानः ॥ २ ॥

तथाहि— **सुन्दरपुरे** नगरे **नरसुन्दरस्य** राज्ञः सभायां **रूपचन्द्र-रूपसेन-चन्द्रसेन-गुणरत्ननामानश्चत्वारः** सुन्दराकारा नरा आशीर्वादं [दत्त्वा] सेवार्थिनो वयमिति च वदन्तः

१. D। मारकत° P। पित्तल° मु. ॥ २. PD। निवार्य - मु. ॥

समुपेयिवांसः। कस्यां कलायां युष्माकं कौशलमिति व्याहृतास्ते प्रोचिरे, हे देव! क्रमेण तुरङ्गम-भोजन-शयन-नरज्ञानभाजो वयमिति ब्रूवाणास्ते राज्ञा सेवकत्वेन रक्षिताः।

एकदा तेष्वेकं हयज्ञानिनं राजा व्याजहार, हे भद्र! मम मन्दुरायाममी सुन्दरा बलवत्तरजनकजाताः कुलीनाः समानपोषिताः सहजा इव समानवयसोऽपिः केचिद्वाजिनः पञ्चस्वपि धारामुख्यासु गतिषु मन्दायन्ते, केचिच्च न मन्दायते, किमत्र निदानमिति पृष्टः सोऽभाषिष्ट, हे देव! तावत् तानहं पश्यामि, तदनु च कारणं वक्ष्ये। तेषु वीक्षितेषु सोऽवोचत्, हे देव! तेषु कैश्चित्तुरङ्गमैर्महिषीणां दुग्धं पीतमस्ति, कैश्चिच्च गवामिति तत्कृतोऽयममीषां गतिविशेषः। कथं तद् ज्ञायते ? इति पृष्टः सोऽवादीत्, भृशं भ्रामयित्वा भ्रामयित्वा जलपानार्थं तटाके मोच्याः, यथाऽमीषां व्यक्तिं विदधामीति श्रुत्वा राज्ञा तथैव विहितम्।

हे देव! ये हयाः पयः पीत्वा तत्रैव पयसि पतन्ति स्म, तैः शैशवे माहिषं क्षीरं पीतं, ये च जलं पीत्वा त्वरितं बहिरायय्युस्तैर्गवां पयः पीतम्। राजापि मूलतः किशोरपरिचारकेभ्योऽमुं वृत्तान्तं ज्ञात्वा तं च हयलक्षणविचक्षणं मत्वा बाढं बहुमन्यते स्म। ॥ **इति हयपरीक्षाज्ञाने रूपचन्द्रकथा ॥ २०५ ॥**

॥ २०६ ॥ भोजनज्ञाने रूपसेनकथा ॥

अन्येद्युर्द्वितीयस्य रूपसेनस्य भुक्तिकौशलं दिदृक्षुः क्ष्मापस्तं भोजनार्थमुपवेश्य कनकपट्टे[1] सरत्नकच्चोलके मणिस्थाले सतैलां कोद्रवक्षुद्रधान्यपूपिकां पत्रशाकं च परिवेषयामास। **रूपसेनो**ऽप्यासनस्थालाऽनुचितं भोजनं वीक्ष्य तां पूपिकां पाणौ निधायोत्कटिकीभूय बुभुजे। तस्यैतत्कौशलं वीक्ष्य चमत्कृतो राजापि तमित्यप्राक्षीत्, हे भद्र! अभ्यर्णवर्तिनः शालिग्रामस्य शालितण्डुलानाशैशवाद्ययावद् भुञ्जानस्य ममाऽजीर्ण-पित्त-वात-नैर्बल्य-कार्श्य प्रभृतिरोग-लेशोऽपि नासीत्, अस्मिन् वर्षे तु तानेव तण्डुलान् भुञ्जानस्य मम भूयांसो रोगाः सञ्जाताः, तत्र किं कारणम्? ।

इत्याकर्ण्य सोऽवोचत्, तांस्तण्डुलान् जग्ध्वा तन्निदानं वक्ष्ये, द्वितीयेऽहनि योग्यस्थले परिवेषितांस्तांस्तण्डुलान् भोक्तुं हस्तेनाऽऽदायाऽभुक्त एवोदस्थात्। पृष्टश्च सोऽभाषिष्ट, हे राजन्! यत्र क्षेत्रेऽमी तण्डुला निष्पन्नास्तत्र ग्रीष्मे पानीयमध्ये चैकः करभो मृतोऽस्ति, तेनाऽमी तण्डुला रोगहेतवो जाताः, राजापि क्षेत्रस्वामिनो मूलतस्तण्डुलवपनक्षेत्रस्वरूपं सम्यग् ज्ञात्वा तच्चातुरीचमत्कृतो भोजनकलादक्षं तं विशेषतः प्रसादपात्रं व्यधात्। ॥ **इति भोजनज्ञाने रूपसेनकथा ॥ २०६ ॥**

---

१. कनकाडणिकायां AHDP ॥ २. - तन्दु° AHDP एवमग्रेऽपि॥

॥ २०७॥ शयनविज्ञाने चन्द्रसेनकथा ॥

अथाऽन्येद्युस्तृतीयस्य **चन्द्रसेनस्य** शय्याकौशलं जिज्ञासुर्भूपस्तमाह, हे भद्र! अस्मिन् पल्यङ्केऽस्यां च तूलिकायां सुप्तोऽहं शोभनं निद्रासुखं न लभे, वपुरपाटवं च बहु प्राप्नोमि, दुःस्वप्नांश्च भूरि पश्यामीति किं कारणम्? इति पृष्टः स प्रोचे, हे देव! तावदहमत्र शये, पश्चात्तत्कारणं कथयिष्यामि। राज्ञा तथा कृते स तस्मात्पर्यङ्कात्सद्य एवोत्थाय बहिरागत्य राजानमूचे, हे स्वामिन्नस्मिन् पल्यङ्के काष्ठदोषोऽस्ति, काष्ठदोषो यथा—

खट्वां जीवाकुलां ह्रस्वां, भग्नकाष्ठां मलीमसाम् ।
प्रतिपादाङ्कितां वह्नि-दारुजातां च सन्त्यजेत् ॥ १॥

शयनासनयोः काष्ठ-माचतुर्योगतः शुभम्। पञ्चकाष्ठादियोगे तु, नाशः स्वस्य कुलस्य च ॥ २॥

अस्यां तूलिकायां च शूकरवालोऽस्ति, तेनाऽत्र शयने सुखं न स्यात्, किं बहुना? ममाप्यस्यां तूलिकायां सुप्तस्य कुपितकामिनीव क्षणमात्रमपि निद्रा नैति स्म।

कथमनेन काष्ठदोषः सूक्ष्मतमकर्पासपक्ष्मपेशलायां तूलिकायां च वालो ज्ञातः? इति ध्यात्वा सूत्रधारतो दारुनिर्णयं तूलिकारूततश्च शूकरचिकुरनिर्णयं कृत्वा, अहो! अस्य शयनकौशलमिति विस्मितेन गुणज्ञेन राज्ञा अयमपि सत्कृतः कामं प्रसिद्धोऽभूत्। ॥ **इति शयनविज्ञाने चन्द्रसेनकथा ॥ २०७॥**

॥ २०८॥ मनुष्यगुणज्ञाने गुणरत्नकथा ॥

अथैकदा मनुष्याणामन्तर्बहिर्गुणज्ञानविज्ञस्य **गुणरत्नस्य** वैदग्ध्यमवगन्तुमनाः स राजा तमाह, हे भद्र! भृशं सुभगाऽसौ मम **सुभगा**नामराज्ञी प्राणेभ्योऽप्यतिवल्लभा प्रतिवर्षप्रसविनी तेन मम सम्भोगसुखाऽन्तरायो अस्तीति किं कारणं ? इति श्रुत्वा स जगाद, हे देव! त्वं मम जनकः, इयं तव राज्ञी च मे जननी, किञ्चैकशोऽसौ स्नाना-ऽञ्जन-वसन-ताम्बूल-कुसुम-कनकभूषणादिभूषिता निशि रहसि ममाभ्यर्णेऽभ्येति तदाहमस्याः स्वरूपं सम्यग् वच्मि। कौतुकिना राज्ञा तथाकृते तामागच्छन्तीमालोक्य सोऽपि भुजङ्गया इव तस्यास्त्रस्तस्त्वरितं बहिरेत्य राजानमवादीत्, हे देवाऽस्याः शैशवे माता मृता, ततोऽसावजादुग्धेन वृद्धिं नीता, तेनैषा प्रतिवर्षं प्रसविनी। किञ्चाऽस्याः शरीरमुखजातेन वातेन सोढुमशक्येन सर्वतः प्रसारिणा दुरामोदेन ज्ञातं, यद्बाल्ये बाढमजापयोऽनया पीतम्। राजाऽपि पट्टराज्ञीपितृगृहाद् बाल्ये मातृमरणमजापयःपानं च सम्यगवगम्य विशेषतस्तुष्टो नरपरीक्षापरीक्षकमुख्यस्य अस्य विशेषतः प्रसादं विहितवान् **॥ इति मनुष्यगुणज्ञाने गुणरत्नकथा ॥ २०८॥**

॥ २०९॥ धर्मोद्यमे मित्रत्रयकथा ॥

सर्वत्र धर्म एव हि पुंसां सर्वसम्पत्तिनिदानं, यतः—

धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं, धर्मेणैव भवन्ति निर्मलयशो-विद्या-र्थसम्पत्तयः।
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते, धर्मः सम्यगुपासितो भवति हि स्वर्गाऽपवर्गप्रदः ॥१॥

तेन मित्र-कलत्र-पुत्र-शरीर-परिवार-धन-धान्यादिमोहं हित्वा सुधीः सततं धर्ममेव करोति यतः—

भूपापराधभयभीरुनरप्रणीतां, नित्योत्सवप्रणतिमित्रकथां निशम्य ।
कः कीर्तिमांस्तनुकुटुम्बरतिं विहाय, धर्मं न सारशिवशर्मकरं करोति ? ॥ २॥

तथाहि—

[1]क्षितिप्रतिष्ठितपुरे, जितशत्रोर्महीपतेः। पुरोधाः सोमदत्तोऽभूत्, सर्वत्राऽप्यधिकारकृत् ॥ ३॥
तस्य मित्रमभूदेकं, नित्यमित्राऽभिधानतः। सर्वत्र मिलितः पान-खादनादिभिरैक्यवान् ॥ ४॥
पर्वमित्रोऽभिधानेन, तस्याभूदपरः सुहृत्। आगतेषूत्सवेष्वेव, सन्मान्यो नाऽन्यदा पुनः ॥ ५॥
प्रणाममित्रनामाभूत्, सुहृत्तस्य तृतीयकः। यथादर्शनमालाप-मात्रोपकृतिभाजनम् ॥ ६॥
पुरोधसोऽन्यदा तस्य, क्राप्याऽऽगसि समागते। कुपितस्तं न्यजिघृक्षद्, भूपतिश्चण्डशासनः ॥७॥
विज्ञाय तदभिप्रायं, रात्रावेव पुरोहितः। मित्रस्य नित्यमित्रस्य, सदने दैन्यभाग् ययौ ॥ ८॥
ममाऽद्य रुष्टो राजेति, कथयित्वा पुरोहितः। तमूचे त्वद्गृहे मित्र!, गमयाम्यशुभां दशाम् ॥ ९॥
हे मित्र! ज्ञायते मित्र-मापत्काले ह्युपस्थिते। स्वगृहे गोपयित्वा मां, तन्मैत्रीं चरितार्थय ॥ १०॥
नित्यमित्रो जगादैवं, मैत्री सम्प्रति नाऽऽवयोः। तावदेवाऽऽवयोर्मैत्री, यावद्राजभयं न हि ॥ ११॥
त्वं ममाप्यापदे राज-दूषितो मद्गृहे वसन्। ऊर्णायुं ज्वलदूर्णं हि, क्षिपेत्को नाम वेश्मनि ? ॥ १२॥
तवैकस्य कृते नाह-मात्मानं सकुटुम्बकम्। अनर्थे पातयिष्यामि, व्रजाऽन्यत्राऽस्तु ते शिवम् ॥ १३॥
एवं च नित्यमित्रेण, सोमदत्तोऽपमानितः। पर्वमित्रस्य मित्रस्य, त्वरितं सदनं ययौ ॥ १४॥
राजाऽप्रसादवृत्तान्तं, पर्वमित्रस्य स द्विजः। तथैव कथयामास, तदाश्रयकृताऽऽशयः ॥ १५॥
पर्वमित्रोऽपि तत्पर्व-मैत्र्या निष्क्रयकाम्यया। महत्या प्रतिपत्त्या तं, ददर्शेदमुवाच च ॥ १६॥
त्वया पर्वस्वनेकेषु, तैस्तैः सम्भाषणादिभिः। स्नेहप्रकारैर्मत्प्राणा, अपि क्रीताः सखे ! ध्रुवम् ॥ १७॥
न भवामि तव भ्रात-र्यदि व्यसनभागहम्। कौलीनं मे कुलीनस्य, तदानीमुपतिष्ठते ॥ १८॥
किन्तु त्वत्प्रीतिविवशो-ऽनर्थमप्यात्मनः सहे। कुटुम्बमपि मेऽनर्थं, गच्छेदिति सुदुस्सहम् ॥ १९॥
कुटुम्बमपि मे प्रेयः, प्रेयांस्त्वमपि हे सखे! । किं करोमि द्विधाचित्त, इतो व्याघ्र इतस्तटी ॥ २०॥
डिम्भरूपैरहं ह्यस्मि, सकीटकपलाशवत्। तस्मात्तेभ्योऽनुकम्पस्व, स्वस्ति तेऽन्यत्र गम्यताम् ॥ २१॥
सत्कृत्यापि हि तेनैवं, पुरोधाः स निराकृतः। निर्ययौ तद्गृहाद्दैवे, दुष्टे पुत्रोऽपि दुष्यति ॥ २२॥

१. तुल्यप्रायं **परिशिष्टपर्वणि** सर्ग ३, पत्र १०७ ॥

आचत्वरं चाऽनुगम्य, पर्व मित्रे गते सति। दध्यौ पुरोधा दुष्प्राप-रोधा व्यसनवारिधेः ॥ २३ ॥
मया ययोरुपकृतं, परिणामस्तयोरयम्। तद्भवाम्यधुना दीनः, कस्याऽहं पारिपार्श्वकः ॥ २४ ॥
अथ प्रणाममित्रस्य, यामि मित्रस्य सन्निधौ। तत्रापि नास्ति प्रत्याशा, प्रीतिस्तस्मिंश्च वाङ्मयी ॥ २५ ॥

यद्वा विकल्पैः पर्याप्त-मासः सोप्यस्ति मे मनाक् ।
प्रेक्षे तमपि कस्यापि, कोऽपि स्यादुपकारकृत् ॥ २६ ॥

इति प्रणाममित्रस्य, मित्रस्य सदनं ययौ। सोऽथाभ्यागतमात्रं त-मभ्युदस्थात्कृताञ्जलिः ॥ २७ ॥
उवाच च स्वागतं वः, किमवस्था तवेदृशी। प्रयोजनं मया किं वो, ब्रूथ यत्करवाण्यहम् ॥ २८ ॥
मा भैषीरेष ते पृष्ठि-रक्षोऽहं मयि जीवति। न कश्चिदीश्वरः कर्तुं त्वद्रोम्णोऽपि हि विप्रियम् ॥ २९ ॥
पृष्ठोत्तंसिततूणीरो-ऽधिज्यीकृतशरासनः। प्रणाममित्रोऽग्रे चक्रे, निःशङ्कस्तं पुरोहितम् ॥ ३० ॥
ययौ पुरोहितस्तेन, सह स्थानं समीहितम्। अन्वभूच्च निराशङ्क-स्तत्र वैषयिकं सुखम् ॥ ३१ ॥
अत्र चोपनयो जीवः, सोमदत्तस्य सन्निभः। नित्यमित्रस्य मित्रस्य, तुल्यो भवति विग्रहः ॥ ३२ ॥
विग्रहोऽयं कर्मराज-कृतायां मरणापदि। सत्कृतोऽपि हि जीवेन, सह नैति मनागपि ॥ ३३ ॥
पर्वमित्रसमानाश्च, सर्वे स्वजनबान्धवाः। श्मशानचत्वरं गत्वा, निवर्तन्ते हि तेऽखिलाः ॥ ३४ ॥
प्रणाममित्रसदृशो, धर्मः शर्मनिबन्धनम्। यः परत्राऽपि जीवेन, गच्छता सह गच्छति ॥ ३५ ॥

॥ इति धर्मोद्यमे मित्रत्रयकथा ॥ २०९ ॥

॥ २१० ॥ मित्रमतिविषये सुवर्णकारक्षेमाकथा ॥

आपद्वारिधौ पतितस्य प्राणिनो मित्रमेव तरण्डायते, यतः—

पापान्निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले, सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ १ ॥

अपि च—

सन्मित्रधीर्मित्रमपास्तदुःखं, करोति किं कल्पलतेव नैव ।
यत्स्वर्णकृत्कल्पितकूटनाण-प्रपञ्चतः श्रेष्ठ्यजनिष्ट तुष्टः ॥ २ ॥

तथाहि—**वसन्तपुरे धनस्य श्रेष्ठिनः श्रीमतीकुक्षिजन्मानः सूर-पूर-धीर-वीरनामानश्चत्वारस्तनुजन्मानः**। अन्यदा **श्रीमत्यां** दिवं गतायां ते चत्वारोऽपि सकलत्राः पुत्राः पृथग् जाताः।

धन-धान्य-सुवर्ण-रूप्य-द्विपदादि सर्वं गृहपरिग्रहं विभज्य समाददानैस्तैः पितुः स्वस्वगृहे भोजनवारकः प्रतिष्ठितः। पुत्राधीनधनः स धनोऽपि वार्द्धकेऽनया रीत्या भुञ्जानः परस्परमीर्ष्यापराभिः स्नुषाभिः साधारणत्वेनाऽनुपचरितो मज्जन-भोजना-ऽऽसन-शयनादिसौष्ठवरहितः श्रेष्ठी काममसुखवानासीत्। एवं च तमसुखिनमाकर्ण्य शैशवसुहृत्**क्षेमाख्यः** सुवर्णकृत्तस्य समाधिं प्रष्टुं तद् गृहं समेतः। ज्ञातश्रेष्ठिसर्ववृत्तान्तः स सुवर्णकृत्तमाह, हे सुहृत्त्वया सुन्दरं

नाऽकारि, यन्मामनापृच्छय सर्वं धनं सुताधीनं व्यधायि। श्रेष्ठी ब्रूते स्म, हे मित्र! धनं सर्वं सुतायत्तं, स्नुषा अपि कटुकभाषिण्यः, तेन मृतकलत्रस्य मम मरणमेव श्रेयः, यतः—

वृद्धस्य मृतभार्यस्य, पुत्राऽऽधीनधनस्य च। स्नुषावचनदग्धस्य, जीवितान्मरणं वरम् ॥ ३॥

इत्याकर्ण्य सुहृदशर्मवार्त्तया दुर्मनाः सुवर्णकृदवादीत्, हे मित्र! मत्कृतैः कूँटैरारकूट-दीनारैस्तदुपरि चैकेन कनकदीनारेण भृतामेकामेनां वासिनीकां गृहाण या स्नुषा मनागपि त्वयि भक्तिमती स्यात्तस्यां पश्यन्त्यामेकं कनकदीनारं वासिनिकातो निष्कास्य, मत्कृते मोदकादि सर्वं सुन्दरमशनादि विधेयमित्यभिधाय, स दीनारस्तस्याः समर्पणीयः। तन्मतिविनिर्मितं तदवितथं मन्यमानेन तेन श्रेष्ठिनाऽपि तथैव विहितम्। तयाऽपि स दीनारो रहसि स्वपत्युर्दर्शितः, सोऽपि तल्लोभलालसः पितुरन्तिके च सुवर्णदीनारभृतां वासिनीकां निशम्य शयनाऽऽसनभोजन-मज्जनाऽऽच्छादनादिना विशेषतः प्रत्यहं तस्य परिचर्यां चकार। क्रमेण तद्दीनारवासिनीकावार्तां निशम्याऽन्येऽपि पुत्रास्तेषां स्नुषाश्च तत्प्रेमपात्रीभवितुं तस्य जरठस्याहंपूर्विकया भोजनादिभक्तिं कर्त्तुं लग्नाः, श्रेष्ठ्यप्येवं पुत्र-स्नुषादिभिरुपचरितः कल्पलतयेव तया सुहृद्बुद्ध्या भृशं सुखी जातः। **॥ इति मित्रमतिविषये खेमाऽभिधानसुवर्णकारकथा ॥ २१०॥**

॥ २११॥ विधिना लिखितमन्यथा न स्यादित्यर्थे विप्रपुत्रीकथा ॥

जलदपटलीमिव मारुतवृन्दं पुंसां विलसितं विधिर्विघटयति :—

अघटितघटितानि घटयति सुघटितघटितानि जर्जरीकुरुते ।
विधिरेव तानि घटयति, यानि पुमान्नैव चिन्तयति ॥ १॥

जं किर विहिणा लिहियं, तं चिअ परिणमइ सयललोआणं ।
इय जाणिऊण धीरा, विहुरे वि न कायरा हुंति ॥ २॥

ललाटे लिखितान्यक्षराणि नान्यथा भवन्ति। यतः—

शक्यते नान्यथा कर्तुं, धीमद्भि र्वैधसीलिपिः। विप्रपुत्र्याः शुभं लग्नं, घटीरोधेऽन्यथाभवत् ॥ ३॥

तथाहि—**वालासर**ग्रामवासिनः शब्दानुशासन-साहित्य-छन्दःप्रभृतिप्रभूतविद्याऽनवद्यस्य **विद्यानन्दस्य** विप्रस्य विशेषतो ज्योतिःशास्त्रे वैदग्ध्यमासीत्। तस्य च वार्द्धके **यमुना**कलत्रकुक्षिजा सुता जाता। अथ प्रवयाः स विप्रः स्वयं तस्याः सुताया जन्मपत्रिकां विदधानः परिसंज्ञस्य सप्तमस्थानस्य निर्णयं चिन्तयन् पाणिग्रहणान्तरं षष्ठे मासे पतिमरणमज्ञासीत्। अहो! मम सुतायाः शैशवे वैधव्यमस्ति। किंच नूनं जन्मपत्रीस्थिता हि ग्रहाः प्राक्तनं दैवं सूचयन्ति, दैवं हि सर्वत्र बलवत्तरम्। यतः—

यद्भग्नं धनुरीश्वरस्य शिशुना यज्जामदग्न्यो जित-
स्त्यक्ता येन गुरोर्गिरा वसुमती बद्धो यदम्भोनिधिः ।

---

१. AH । कूटैः पित्तलदीनारैर्भृतामेकां वासिनीकां त्वं गृहाण, तस्या उपरिभागे चैकं कनकदीनारस्त्वया रक्षणीयः, ततो या स्नुषा - मु. ॥ २. जरठ = वृद्ध ॥

एकैकं दशकन्धरस्य भयकृद्रामस्य किं वर्ण्यते ।
दैवं वर्णय येन सोऽपि सहसा नीतः कथाशेषताम् ॥ ४॥

तस्य दैवस्य पुरस्तात् कैषा वराकी मामकीना सुता? कोऽहं च नृणां तृणमिति मत्वा सुखेन छात्रांणां[1] शास्त्राणि पाठयतस्तस्य सुता विवाहोचिता जाता। अथैकदा ज्योतिःशास्त्रं पाठयन् **विद्यानन्दो**ऽस्मिन् लग्ने विवाहिता कन्याऽवश्यं वैधव्यं नाऽऽप्नोतीति लग्नं निर्णीय चिन्तयाञ्चक्रे, अहो! मत्सुतायाः षष्ठे मासेऽवश्यं वैधव्यम्, इदं लग्नं चेदृशं, यदत्र परिणीता कन्याऽवश्यं विधवा न स्यात्, तेन विलोकयामि, द्वयोर्मध्ये किं बलत्तरमिति निर्णीय पित्रा **कस्मैचिदिभ्याय** द्विजन्मसूनवे सुता वितीर्णा, अथाऽष्टादशदोषरहिते घटिकासाध्ये तस्मिन्नेव लग्ने पुत्री विवाहयितुमारब्धा।

विशेषतो निःशेषज्योतिःशास्त्रकुशलो विनिर्मितकुङ्कुम-तण्डुलतिलकः स विप्रः—
दशताम्रपलावर्त-पात्रे वृत्तीकृते सति। घटिकायां समुत्सेधो, विधातव्यः षडङ्गुलः ॥ ५॥
विष्कम्भं तत्र कुर्वीत, प्रमाणाद् द्वादशाङ्गुलम्। षष्ठाम्भःपलपूरेण, घटिका सद्भिरिष्यते ॥ ६॥

इत्यादिपरिपूर्णप्रमाणोपेतं घटिकापात्रं स्वच्छनीरभृते कुण्डे भगवतो भानोरस्तगमनसमये मुमोच। 'मा कांते पक्षस्यान्ते पर्वाकाशे स्वाप्सीः' इत्यादि पलवृत्तपठनतो मनसो दुःसावधानतया पुत्रीपाणिग्रहणोत्सवौत्सुक्येन वार्द्धकेन च घटिकापात्रं पयःकुण्डे मुञ्चतस्तस्याऽलिकतिलकात्पतन्नेकस्तण्डुलो घटिकारन्ध्रे रुरोध। रुद्धे च घटिकारन्ध्रे सा लाग्निकी वेला व्यतिचक्राम।

तेन विप्रेणाऽपि घटिकाभरणविलम्बेन तण्डुलजनितं घटिकारोधं ज्ञात्वेति चिन्तितम्, अहो ज्योतिःशास्त्रं सत्यं, यतोऽमुष्मिन् लग्नेऽस्याः पाणिग्रहो नाऽभवत्, वैधव्यस्याऽवश्यं भावित्वात्, इति ध्यात्वा तेन गतेऽपि लग्ने पुत्री परिणायिता, षण्मासान्तरे च दन्दशूकदंशान्मृते भर्तरि सा विधवा जाता। ॥ **इति विधिना लिखितमन्यथा न स्यादित्यर्थे विप्रपुत्रीकथा** ॥ २११ ॥

॥ २१२॥ मतिविषये मन्त्रिकथा ॥

मन्त्रिणां मतिरेव राज्ञां राज्याऽवष्टम्भकारिणी, यतः—

इहास्तीति चतुर्भङ्ग्या, वेश्य-र्षि-श्रेष्ठि-भिक्षुकान् ।
प्रेष्य प्रत्युत्तरोऽदायि, मन्त्रिणा धीस्ततोऽद्भुता ॥ १॥

तथाहि—**वसन्तपुरे** पुरे **पुरन्दरनामा** राजा, अन्यदा सहसैव मृते राज्ञि लघुरेव तस्य सूनुर्मन्त्रिणा राज्ये निदधे। तस्मिन्नवसरे तं लघीयांसं राजानमाकर्ण्य तदरिः **कच्छदेशाधिपः पारसिक**नामा राजा तमुपद्रोतुमागच्छन् **वसन्तपुर**परिसरे प्राप्तो मन्त्रिणाऽभाणि, हे स्वामिन्! स्तम्भेन मन्दिरमिवास्य राज्यं मन्त्रिणां धियैव सुस्थितं वर्त्तते, तेन यदि राज्यजीवितव्यादिसुखाऽभिलाषः स्यात्तदा विलोक्यतेऽस्य कोऽपि प्रवयाः सचिवोऽस्ति नाऽस्ति वेति, तदनुसारेणाऽस्मिन् गमनं विधास्यते।

१. छात्राणि AHDP ।

इति निशम्य राज्ञाऽभाणि तदत्रार्थे सत्वरमुद्यमो विधीयतां, मन्त्रिणापि तन्मन्त्रिपरीक्षा-निमित्तं तत्र सलेख एको वाग्मी दूतः प्रहितः, राजापि दूतेनाऽर्पितं लेखमवाचयत्। तद्यथा—

इहाऽस्ति तत्र नाऽस्ति, तत्रास्ति इह नास्ति, तत्राप्यस्ति इहाप्यस्ति, इहापि नास्ति तत्रापि नास्तीतीदृशं प्रेष्यमिति। एतदुत्तरमजानन् राजा किं-कर्तव्यजडत्वेन भृशं विलक्षोऽजनिष्ट। अथ सदसि समेतेन वृद्धेन **सुबुद्धिना** मन्त्रिणा वैलक्ष्यनिदानं पृष्टोऽसौ प्रतिपक्षलेखस्वरूपम-भाषत। हे देव! का चिन्ताऽत्रार्थे, अहमुत्तरं दास्यामीत्युक्त्वा गृहे गत्वा निशि विमृश्य प्रभाते सान्वर्थनामैका **रूपसुन्दरी** वेश्या, मूर्तिमान्मुनिधर्म इवैको जैनमुनिश्च **सत्याऽभिधः**, **कुबेरनामा** चैकः श्रेष्ठी, शीर्णैकाऽम्बरो भग्नघटकपालधरो दुर्भरोदरो भिक्षाचरो भिक्षुरेकश्च, एवं सर्वेऽप्यमी संमेल्य तेन दूतेन सार्धं प्रहिताः। तेनापि प्रतिपक्षमन्त्रिणापि वेश्यादींस्तानवलोक्य स्वस्वामिनोऽभ्यधायि, हे स्वामिन्नस्य राज्याऽऽशा न कार्या, यतोऽसौ मन्त्री धिया दुर्जेयः, राजा स्माऽऽह भवता किं पृष्टं, तन्मन्त्रिणा च किमुत्तरमदायीत्यभिहितो मन्त्री जगौ, हे स्वामिन्निहाऽस्तीति चतुर्भङ्गी मया मार्गिता, तदर्थं च वेश्यादयश्चत्वारोऽमी तेन प्रहिताः सन्ति। तदर्थश्चाऽयं—

इहाऽस्मिन् जन्मन्यस्या वेश्यायाः स्वेप्सितपुरुषसम्भोगसामग्रीजनितं सुखमस्ति, तत्र परस्मिन् जन्मनि नरकगतित्वेन सुखं नास्तीत्येको भङ्गः १। तत्र परस्मिन् जन्मन्यस्य साधोः स्वर्गाऽपवर्गपदप्राप्तिजनितं शर्माऽस्ति, इहाऽस्मिन् जन्मनि च नीरसभैक्ष्यभोजनं स्नानराहित्यं केशलुञ्चनं भूमिशयनं च, तेन सुखं नास्तीति द्वितीयो भङ्गः २। तत्राऽपीति परस्मिन्नपि जन्मन्यस्य श्रेष्ठिनः श्रावकत्वेन स्वर्गादिसुखसामग्रीभवं सुखमस्ति, इहाप्यस्मिन्नपि जन्मनि समृद्धत्वेन विषयादिसकलसामग्रीजनितं सुखमस्तीति तृतीयो भङ्गः ३। इहाप्यस्मिन्नपि जन्मनि भिक्षाचरत्वेनास्य भिक्षुकस्य सुखं नास्ति, तत्रापि परस्मिन्नपि जन्मन्यकृतधर्मत्वेन नरकगतित्वेन सुखं नास्तीति चतुर्थो भङ्गः ४। इत्यर्थं सम्यगवगम्य अहो ! अस्य मन्त्रिणो मतिरतिशायिनीति चमत्कृतो राजा पश्चाद्वलित्वा स्वस्थानं ययौ ॥ **इति मतिविषये मन्त्रिकथा ॥ २१२॥**

॥ २१३॥ बुद्धिकौशल्ये लघुककथा ॥

सर्वत्र मतिरेव महियसी, यतः—

षट्पदः पुष्पमध्यस्थं, यथा सारं समुद्धरेत्। तथा सर्वेषु कार्येषु, सारं गृह्णाति बुद्धिमान् ॥ १॥

किं बहुना ? विषमेष्वपि प्रश्नेषु बुद्धिमानेव पुरस्सरो भवति, यतः—

केषांचिदेति मतिरुन्नतिमङ्गभाजां, प्रश्ने प्रकाशमितरावगमैरगम्ये ।
अग्रे यतो लघुक एव चकार सर्व-बीजादिनिर्णयमलं महिमुन्दशाहेः ॥ २॥

तथाहि—**गुर्जरमण्डलमण्डने श्रीचाम्पानेरदुर्गे** बेगडो **वृद्धशाहिश्रीमहिमुन्दनामा**-राजा, तस्य च **लघुकनामा** विप्रो भृशं मान्यः मतिमान् प्रसादपात्रं व्यासोऽजनिष्ट। तं च **लघुकं** सर्वत्र **शाहिना** मान्यमुदीक्ष्य काजि-मुल्ला-शेखमुख्यैः सर्वैरपि मुख्यैर्यवनैः स **शाहिर्विज्ञप्तः**, हे स्वामिन्नात्मनां **कुराणे** हिन्दूनां प्रभाते दर्शनं दोजखनिबन्धनं, तेनास्य **लघुकस्योषसि** दर्शनं न विधेयम्। **शाहिनापि** तेषां पुरतः कथितं, यदहमेतद्विषये तस्य कथयिष्यामि।

अथ यदा **लघुकः** समागतस्तदा शाहिनोक्तं हे **लघुक!**

प्रातस्त्वया मम पुरो नागन्तव्यमित्यभिहिते **लघुको** भूरिखेदमापन्नः यतः—

जे कुलीन[1] केकांण, गालि दीइ अति उच्छलइ ।
जोई जोउ जाण, ते किम सहसिइं तौजणा[2] ॥ ३॥

अथ—स स्वस्थानान्निर्गत्य **कटिग्रामे** तस्थौ। अथ तं **लघुकं** विना भृशं खिन्नेन शाहिनापि तदाकारणार्थं मिषमाधाय तेषां **मुल्ला-काजि-शेखादिनां** पुरः प्रश्नचतुष्टयं पृष्टं, सर्वबीजं, सर्वरसः, कृतज्ञः, कृतघ्नश्चेति चत्वारि चत्वारि वस्तूनि कानीति कथिते ते मूर्खमुख्या अविदन्तः सन्तः स्वं स्वं स्थानं ययुः। अथ द्वितीयस्मिन्नपि दिने तथैव पृष्टास्ते वयं न विद्म इत्यवोचन्। **लघुको**ऽतिचतुरः, तं विना चाऽस्माकं न विनोद इति तेषां प्रत्ययाय बहुमानपुरस्सरं **कटिग्रामतो लघुकमाहूय शाहिना** तेषां पश्यतामेव तथैव पृष्टम्। सोऽपि प्रातरभिधास्यामीत्यभिधाय गृहं गतः। अथोषसि शाहिसभोचितवेषेणाद्भुतश्रीकः सोऽपि पानीयं, लवणखण्डं, श्वानं, जामातरं चाऽऽदाय पर्षदि ययौ, कथितवांश्च हे स्वामिन्! सर्वबीजं जलं, सर्वरसं लवणं, कृतज्ञश्च श्वा, कृतघ्नश्च जामाता। यतः—

द्रुतमानय पानीयं, पानीयं पङ्कजानने !। पानीयेन विना सर्वं, सद्यः शुष्यति दग्धवत् ॥ ४॥
प्राथम्यमुदधिष्वासीत्, सत्यं ते लवणोदधे!। यद्रसेन विना सर्वो, रसो न स्वादमर्हति ॥ ५॥
अशनमात्रकृतज्ञया गुरो-र्न पिशुनोऽपि शुनो लभते तुलाम्।
अपि बहूपकृते सखिता खले, न खलु खेलति खे लतिका यथा ॥ ६॥

क्षणं रुष्टः क्षणं तुष्टो, नानापूजां च वाञ्छति ।
कन्याराशिस्थितो नित्यं, जामाता दशमो ग्रहः ॥ ७॥

जामाता कृष्णसर्पश्च, नापितो दुर्जनस्तथा। उपकारैर्न गृह्यन्ते, पञ्चमो भागिनेयकः ॥ ८॥

इति सर्वप्रश्नार्थं सम्यगवगम्य तेषां सर्वेषां पुरो बहुमानपुरस्सरं तं सुवर्ण-तुरङ्गमदानादिना विशेषतः प्रसादपात्रं विधाय श्रीमहिमुन्दशाहिर्लघुकं प्रीतिभाजनं चकार। ॥ **इति बुद्धिविषये लघुकव्यासकथा ॥ २१३॥**

१. दोजग AHPD। २. = कयकान प्रदेशना घोडा ॥ ३. = चाबुक । म. गु. कोश ॥
४. लुघूक - D प्रतौ सर्वत्र ॥

॥ २१४॥ शीलपालने विजय-विजया कथा ॥

प्रणम्य हरिवंशाब्धि-शशिनं **नेमिनं** जिनम्। ब्रवीमि ब्रह्ममाहात्म्य-कथां कौतुककारिणीम् ॥ १ ॥
मौक्तिकानामिवाम्भोधिः, सरः पङ्केरुहामिव। सौभाग्यसम्पदां नित्यं, निदानं शीलमेव हि ॥ २ ॥

यतः—

दानं दहति दौर्गत्यं, शीलं सृजति सम्पदम्। तपस्तनोति तेजांसि, भावो भवति भूतये ॥ ३ ॥

सीलं धम्मनिहाणं, सीलं पावाण खंडणं भणिअं ।
सीलं जंतूण जए, अकित्तिमं मंडणं परमं ॥ ४ ॥

पाल्यते नियमः कश्चिद्, बाल्येऽप्यादृत उत्तमैः। दम्पतीभ्यामिव ब्रह्म, शुक्लाशुक्लस्वपक्षयोः।
कच्छदेशशिरोरत्न-मासीद्रत्नपुरं पुरम् यत्र नित्यं स्थिता लक्ष्मी, रत्नाकर इवाऽभवत् ॥ ६ ॥
सिंहः सिंह इवौजस्वी, तत्राभूद्भूमिवल्लभः। प्लुष्टा यस्य प्रतापेन, द्विषोऽभूवन् रसोज्झिताः ॥ ७ ॥
तस्यासीत् **श्रीमती**नाम-महिषी श्रीरिवाङ्गिनी। आदर्शेष्वेव सादृश्यं, जज्ञे यद्रूपसम्पदः ॥ ८ ॥
अभवन्नगरश्रेष्ठी, तत्र सत्रमिव श्रियाम्। **अर्हद्दास** इति ख्यातः, सदैवार्हत्सु भक्तिभाक् ॥ ९ ॥
सतीजनशिरोरत्नं, जाया मायाविवर्जिता। तस्यासी**दार्हती**नाम-पद्मा पद्मापतेरिव ॥ १० ॥
रूपश्रीजितचेतोभू-रभवत्तनयस्तयोः। जयदत्त इवेन्द्राणी-वज्रिणो**र्विजया**भिधः ॥ ११ ॥
अधीते स्म गुरोः पार्श्वे, स कलाः सकलाः क्रमात्। वृद्धिं च कलयामास, शशीव प्रियदर्शनः ॥ १२ ॥
क्रमेण बिभरामास, यौवनं पावनं च सः। कामिनीदृक्कुरङ्गाणां, सोऽभूत्पाश इव व्रजन् ॥ १३ ॥
कलाभिः कौमुदीकान्तो, रूपेण मकरध्वजः। पाण्डित्येन सुराचार्य, ऐश्वर्येण महेश्वरः ॥ १४ ॥
गाम्भीर्येण सरित्राथः, सौभाग्येन सुराधिपः। वितन्वन् विश्ववाल्लभ्यं, विजयो वृद्धिमीयिवान् ॥ १५ ॥
युग्मम्।

यतः—

दानं दुरितनाशाय, शीलं सौभाग्यकारणम् ।
तपः कर्मविनाशाय, भावना भवनाशिनी ॥ १६ ॥

तत्रापि ब्रह्ममाहात्म्यं, विशेषाद् गुरुणेरितम्। स चातक इवाम्भोद-पानीयं निपपौ सुधीः ॥ १७ ॥

सीलं उत्तमवित्तं, सीलं जीवाण मंगलं पवरं ।
सीलं दोहग्गहरं, सीलं सुक्खाण कुलभवणं ॥ १८ ॥

जलज्वलनरोगाऽहि-करिकेसरिसम्भवा। भीतिः क्षीयेत शीलेन, मेघमालेव वायुना ॥ १९ ॥
अङ्गीकुर्वन्ति ये नित्यं, सलीलं शीलमङ्गिनः। अवश्यं वश्यमायान्ति, तेषां मन्त्रादिसिद्धयः ॥ २० ॥
अमराः किङ्करायन्ते, सिद्धयः सहसङ्गताः। समीपस्थायिनी सम्पत्, शीलालङ्कारशालिनाम् ॥ २१ ॥
एवं सम्यक् समाकर्ण्य, शीलमाहात्म्यमुत्तमम्। मुमुदे विजयः कामं, कलापीव घनध्वनिम् ॥ २२ ॥
पालनीयं मया पक्षे-ऽवलक्षे शीलमुत्तमम्। अमूढोऽनूढ एवाय-मित्यभिग्रहमग्रहीत् ॥ २३ ॥
जीवितव्यमिवानन्त-गुणानां सेवधिं सुधीः। पालयन् शीलममलं, गमयामास वासरान् ॥ २४ ॥
इतस्तत्रैव नगरे, भवति स्म **धनावहः**। महेभ्यः श्रीमतां मुख्य-स्ताराणामिव चन्द्रमाः ॥ २५ ॥

धनश्रीकुक्षिसम्भूता, दुहिता हितदायिनी। अभवत्तस्य पाथोधेः, पद्मेव प्रेमपेशला ॥ २६॥
पितृभ्यां **विजये**त्यस्या, नाम धाम सुखश्रियाम्। चक्रे गौरीति मेनाऽद्रि-राजाभ्यां दुहितुर्यथा ॥ २७॥

सा कलाः कलयामास, चन्द्रलेखेव बालिका ।
पित्रोः प्रीतिं सृजन्ती च, क्रमेण प्राप यौवनम् ॥ २८॥

युवद्दगृहरिणीपाशं, कामकुञ्जरकाननम्। तां निरीक्ष्योर्वशीरूप-वीक्षाऽऽशाऽपासरन्नृणाम् ॥ २९॥
महिमानमसीमान-मन्यदेषापि शीलगम्। शुश्राव श्रुतिशर्माणं, श्रमणीजनसन्निधौ ॥ ३०॥

[1]निम्महियसयलहीलं, दुहवल्लीमूलउक्खणणकीलं ।
कयसिवसुहसंमीलं, पालय निच्चं विमलसीलं ॥ ३१॥
लच्छी जसं पयावो, माहप्पमरोगया गुणसमिद्धी ।
सयलसमीहियसिद्धी, सीलाउ इह भवे वि भवे ॥ ३२॥
परलोएवि हु सुरनर-समिद्धिमुवभुंजिऊण सीलधरा ।
तिहुअणपणमिअचरणा, अणूणं पावंति सिद्धिसुहं ॥ ३३॥

प्राणभूतं चरित्रस्य, परब्रह्मैककारणम्। समाचरन् ब्रह्मचर्यं, पूजितैरपि पूज्यते ॥ ३४॥
चिरायुषः सुसंस्थाना, दृढसंहनना नराः। तेजस्विनो महावीर्या, भवेयुर्ब्रह्मचर्यतः ॥ ३५॥
[योगशास्त्रे २/१०४-५]

यामिनीनामिवाखण्ड-मण्डलं तुहिनद्युतेः। शीलं हि हरिणाक्षीणा-मचण्डं मण्डनं मतम् ॥ ३६॥

यतः—

नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना शर्वरी ।
शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मन्दिरम् ।
वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः ।
सत्पुत्रेण कुलं वनानि कुसुमैर्नीत्या प्रभुत्वं तथा ॥ ३७॥

तुच्छावि रमणीजाई, पसंसणिज्जा सुराऽसुरनराणां ।
विहिआ महासईहिं, काहिंचिअ विमलसीलाहिं ॥ ३८॥

ज्ञात्वैवं सापि विजया, जयन्तीव मनोरमा ।
कृष्णे पक्षे भविष्यामि, शीलिनीति व्रतं ललौ ॥ ३९॥

घूणाक्षरनयादेव, सूत्रितस्तुल्यरूपयोः। तयोरेव विवाहोऽभू-ल्लक्ष्मी-लक्ष्मीशयोरिव ॥ ४०॥
साथ सज्जितशृङ्गारा, नव्यनेपथ्यशालिनी। बिभ्रती गतिलावण्य-ममरीव महीमिता ॥ ४१॥
प्रथमे यामिनीयामे, यामिकीभूतमन्मथे। दीप्रप्रदीपकोद्दीपं, पतिवासगृहं ययौ ॥ ४२॥ युग्मं॥
स्वर्णमौक्तिकमाणिक्य-भव्याभरणभूषिताम्। विजयो व्याजहारैव-मागतां तां सुलोचनाम् ॥ ४३॥
सेवनीयं ध्रुवं शीलं, शुक्ले पक्षे मयेति यः। पूर्वं गुरूणामभ्यर्णे, गृहीतो नियमः शुभे!॥ ४४॥
नियमस्यावशिष्यन्ते, तस्याथ दिवसास्त्रयः। लीलामनुभविष्याव-स्ततः सम्भोगसम्भवाम् ॥ ४५॥

१. AHDP । निम्मियअसइत्तहीलं - मु.॥

श्रुत्वेति सा भृशं मम्लौ, हिमप्लुष्टेव पद्मिनी। तन्म्लानिकारणं तेन, पृष्टाभाषिष्ट साथ तम् ॥ ४६ ॥
अस्ति मेऽपि कृष्णपक्ष-विषयो नियमः परम्। तत्खेदादस्मि म्लानाह-मिन्दुलेखेव वासरात् ॥ ४७ ॥
तदाकर्ण्य भृशं वीक्षा-पन्नं वीक्ष्याथ वल्लभम्। ब्रूते स्म विजया स्वीय-शीलरक्षाविचक्षणा ॥ ४८ ॥

नाथ भुङ्क्ष्व सुखं भोगान्, परिणीयाऽपरां प्रियाम् ।
पुंसां प्रियाः प्रभूताः स्युः, शीतांशोरिव दक्षजाः ॥ ४९ ॥

वचनं ब्रह्मरचनं, तस्याः श्रुत्वैवमब्रवीत्। विजयोऽनङ्गसंसर्ग-सुधाधामविधुन्तुदः ॥ ५० ॥
प्रिये! प्रागपि दीक्षाया-मभवन्मे मनोरथः। प्रसह्याऽहं परं माता-पितृभ्यां परिणायितः ॥ ५१ ॥
किन्तु संसारकारासु, दारासु विगतस्पृहः। सुखं विषयजं मन्ये, मूलं संसारवीरुधः ॥ ५२ ॥
भवस्य बीजं नरक-द्वारमार्गस्य दीपिका। शुचां कन्दः कलेर्मूलं, दुःखानां खनिरङ्गना ॥ ५३ ॥
[योगशास्त्रे २/८७]
खलस्नेह इव क्लेश-कारणं दुर्गतिप्रदः। तदयं विषयग्रामः, प्रिये! मम न रोचते ॥ ५४ ॥
विषस्य विषयाणां स्या-दिहैव महदन्तरम्। उपभुक्तं विषं हन्ति, विषयाः स्मरणादपि ॥ ५५ ॥

यतः—

कुरङ्ग-मातङ्ग-पतङ्ग-भृङ्गा, मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न दुःखी, यः सेवते पञ्चभिरेव पञ्च ॥ ५६ ॥

आपातरम्यैर्भोक्तुश्च, भोजनैरिव सर्वथा। तेन मे सकलक्लेश-विषयैर्विषयैरलम् ॥ ५७ ॥
मनोवाक्कायसल्लीलं, शीलमाजन्म सुन्दरि !। गाङ्गेयस्येव गाङ्गेय-पावनं मेऽस्तु नित्यशः ॥ ५८ ॥
ज्ञापनीयं हि केषांचि-त्पित्रादीनां न कर्हिचित्। स्वरूपमिदमावाभ्यां, रहस्यमिव हृद्गतम् ॥ ५९ ॥

कोऽपि ज्ञास्यति वृत्तान्त-मिमं चेन्नौ[1] विचिन्तितम् ।
आदास्यावस्तदाऽवश्यं, तपस्यां मुक्तिदूतिकाम् ॥ ६० ॥

इत्थं निश्चयमाधाय, दम्पती तौ समाहितौ। पालयामासतुः शीलं, जीवितव्यमिवाऽनिशम् ॥ ६१ ॥
एकत्र शयने रात्रौ, दम्पत्योः सुप्तयोस्तयोः। नाऽभवन्मदनोन्मादी, मदश्चित्रितयोरिव ॥ ६२ ॥
तयोरेवं परिवारा-ऽपरिज्ञातस्वरूपयोः। सुरूपयोः प्रयान्ति स्म, वासरा ब्रह्मचारिणोः ॥ ६३ ॥
अपि वेश्मस्थयोर्ब्रह्म-वतोः सद्वयसोस्तयोः। प्रशंसनीयमभवत्, शीलं स्वर्गसदामपि ॥ ६४ ॥

यतः—

सम्पत्तौ नियमः शक्तौ, सहनं यौवने व्रतम्। दारिद्र्ये दानमत्यल्प-मपि लाभाय भूयसे ॥ ६५ ॥
दम्पत्योरनयोरेवं, भावचारित्रपात्रयोः। समयो व्यतिचक्राम, लीलाललितशीलयोः ॥ ६६ ॥
अस्मिन्नवसरे **चम्पा**-नगर्यां समवासरत्। उद्याने केवली साधु-**र्विमलो** विमलाशयः ॥ ६७ ॥
देशनान्ते तमप्राक्षी-**ज्जिनदासो** गृही सुधीः। भालं तिलकयंस्तस्य, पादपाथोजपांसुभिः ॥ ६८ ॥
भगवंश्चतुरशीति-सहस्राणामहं मुदा। कारयामि श्रमणानां, पारणं पुण्यकारणम् ॥ ६९ ॥
मनोमनोरथश्चारु-रेष हल्लेखिनो मम। फलेग्रहिः कदा भावी, जलैः सिक्त इव द्रुमः ॥ ७० ॥

१. चेद्वां - PD ॥

एवं पृष्टोऽमुना श्राद्ध-**जिनदासेन** गेहिना। अथाऽयमभिधत्ते स्म, **विमल**: केवली मुनि: ॥ ७१ ॥
एतावतां मुमुक्षूणां, युगपत्सङ्गम: कथम्। भविता ते मरुस्थस्य, सुरावनिरुहामिव ॥ ७२ ॥
इयत्सु कर्हिचिद्दैवा-न्मिलितेष्वपि साधुषु। शुद्धाऽन्नपानसामग्री, दुर्लभाऽम्बरपुष्पवत् ॥ ७३ ॥
पात्रदानाऽभिलाषोऽयं, भव्यभावेन भूषित:। काञ्चनी मुद्रिका रत्न-खचितेव विभातु ते ॥ ७४ ॥
परं श्री**कच्छ**देशस्थ-भावचारित्रिणो: सतो:। विजया-विजयश्रेष्ठि-दम्पत्यो: शालिशीलयो: ॥ ७५ ॥
अशनैर्वसनै रम्यै-रलङ्कारैश्च भावि ते। भक्तिं कृतवतो भूरि, पुण्यं पुण्यमते! तयो: ॥ ७६ ॥ युग्मं ॥
श्रुत्वैवं विस्मयस्मेर-मना: स श्रावकोत्तम:। मुने: केवलिन: प्रीत्या, पृष्टवान् संशयमिदम् ॥ ७७ ॥
गृहस्थयोरपि स्वामिं-स्तयो: कोऽयं गुणोदय:। शशिनेवाम्बुधिर्येन, पुण्यमुल्लासभाग् भवेत् ॥ ७८ ॥
शृण्वतामिभ्यसभ्यानां, पृष्टस्तेनेति कौतुकात्। तद् वृत्तान्तं यथाजात-मवोचत्केवली मुनि: ॥ ७९ ॥
श्रुत्वैवं **जिनदासो**ऽपि, कच्छदेशमुपेत्य च। दम्पत्योरनयोश्चक्रे, भक्तिं वाचामगोचराम् ॥ ८० ॥
तमालोक्य प्रकुर्वाणं, तद्भक्तिमतिशायिनीम्। अपृच्छन्नागरा: सर्वे, भक्तेरतिशयं तयो: ॥ ८१ ॥
तेनापि केवलिप्रोक्ते , कथिते चरिते तयो:। तुष्टिभाक् तत्परिवार:, पीताऽमृत इवाऽभवत् ॥ ८२ ॥
पूर्णप्रतिज्ञौ तौ विज्ञौ, दम्पती साधुसन्निधौ। दीक्षामादाय मुक्तिश्री-भोगभाजौ बभूवतु: ॥ ८३ ॥

श्रीकमलविजयकोविद-शिशुना विबुधेन **हेमविजयेन** ।
विहिता कथेयमनघा, शीलगुणश्रेणिमणिजलधि: ॥ ८४ ॥

इति शीलविषये विजय-विजयाकथा ॥ २१४॥

॥ २१५॥ मतिविषये वृद्धमन्त्रिकथा ॥

विषमेष्वपि कार्येषु पुरस्सरा हि **बुद्धि**रेव, यत:—

चरै: पश्यन्ति राजान:, पशवो घ्राणदर्शिन:। पश्यन्ति पण्डिता बुद्ध्या, चक्षुर्भ्यामितरे जना: ॥ १ ॥

किंचाऽऽपन्निस्तारिणी धीरेव, यत:—

न गूढमप्याशयमङ्गभाजां, विदन्ति कं कं वदतां वरेण्या: ।
मूल्यं त्रयाणामपि पुत्रकाणां, मन्त्री जरीयानपि यच्चकार ॥ २ ॥

तथाहि—मन्दाकिनीकल्लोलव्यालोललीलोद्यानसुन्दरे **सुन्दरे** पुरे **महासेननामा** राजा, तस्मिंश्च सहसैव विसूचिकया मृते तत्पुत्रो **नरसेन**: पैतृकं पदं प्राप्य लघुवया रूपयौवनराज्य-श्रीमदोन्मत्तो निजान् वृद्धान् कुलक्रमाऽऽयातान् बहून् मन्त्रिणोऽवज्ञास्पदं विधत्ते स्म।

अहो! किममी बालका इव लाला: पिबन्ति, बधिरा इव न शृण्वन्ति, गताक्षा इव न पश्यन्ति, मूका इव पृष्टा अपि न जल्पन्ति, किं बहुना? ग्रहिला इवाऽमी विकला: सन्ति, तेन किममीभिर्गलस्तनीगलस्तनैरिव कार्यहीनै:, पर्युषितपुष्पैरिव सौरभरहितैरिति तेन ते तिरस्कृता:।

प्रवर्धमानः पुरुष-स्त्रयाणामुपघातकः। पूर्वोपार्जितमित्रस्य, कलत्रस्य च वेश्मनः ॥ ३॥

अथामी वृद्धा मन्त्रिणो वार्धकफललिप्सवः स्वस्वतीर्थेषु गत्वा विशेषतस्तीर्थसेवां चक्रिरे अथ च तं **महासेननृपं** मृतमाकर्ण्य तत्प्रतिपक्षाः **सिन्धुदेशवासिनो जितशत्रुप्रमुखाः** पञ्च पञ्चानना इव बलोत्कटाः पार्थिवाः सुधीधीसखरहितं तद्राज्यमादित्सवस्तद्देशसीमानं रुरुधुः। तदा च तेषामेको वृद्धो मन्त्री प्रोवाच, हे स्वामिनो! यद्यस्य राज्ये कोऽपि प्रवया मन्त्री स्थितो भविष्यति तदाऽऽत्मनां स्वराज्यादिसम्पत्तिसुखं जीवितं च कुशाग्रगतजलबिन्दुरिव क्षणनश्वरताभाग्भावीति निशम्य सम्यक् परीक्षां कृत्वैवाऽत्र देशे प्रवेशनीयमिति श्रुत्वा तैरनुमतः स मन्त्री तदर्थं सुरूपं[1] सदलङ्कारभासुरं पुत्तलकत्रयं दत्त्वा स्वमेकं वाग्मिनं दूतं प्राहिणोत्[2]।

तत्रागत्य स दूतोऽपि ब्रूते स्म, हे राजन्! **सिन्धुदेशवासिभिर्जितशत्रुमुख्यैस्तव** देशसीमानमागतैः पञ्चभिर्भूपैः प्रहितानाममीषां त्रयाणां पुत्तलानां मूल्यं विधीयताम्। इमं वृत्तान्तमजानन्तो निखिला अपि लघीयांसोऽन्ये मन्त्रिणोऽह्नि तारा इव तदा तिरोदधिरे। राज्ञाऽपि तेषां त्रयाणामपि पुत्तलानां रूपं निभालितं, परं वस्त्राऽलङ्कारजनितः कोऽपि विशेषो न ददृशे, तदा च दिवाकरकरश्लिष्टराजेव राजा म्लानिमापन्नः, किं बहुना? तस्मिन्नवसरे सर्वा सभापि हिमदग्धपद्मिनीव मम्लौ। एतत्स्वरूपं सम्यगवगम्य **धारिणीनाम**राजजननी खिन्ना गृहागतं राजानमाह, हे पुत्र! यद्येकोऽपि कोऽपि मन्त्री इह स्थितो भविष्यति तदा सर्वं सुन्दरमेवेत्यभिहितेन तेन राज्ञा भूमिगृहे स्थितः **सुबुद्धि**नामैको मन्त्री बाढाऽऽग्रहेण पृष्टात् तत्पुत्रादवगतः, पृष्टश्चाऽब्रवीत्। हे नाथ ! प्रातः सर्वं समीचीनमेव भावीत्यभिहितो राजा स्वस्थानं ययौ।

तेन मन्त्रिणा निशि पार्श्वे स्थितानां वस्त्राऽलङ्कारादिना समानत्वेन तेषां पुत्तलानां तुल्यमेव मूल्यं जानताऽऽन्तरस्वरूपजिज्ञासया गाढदृढदवरकप्रान्त एकस्य पुत्तलस्य नयना-ऽऽनन-नासिकादिच्छिद्रेषु निहितः, तत्राऽप्यप्रविशन् स प्रान्तस्तेन तस्य कर्णरन्ध्रे निक्षिप्तः सत्रेकस्मिन् कर्णे प्रविश्याऽपरतः कर्णान्निर्ययौ। लब्धोपायेन मन्त्रिणा तस्याऽङ्गलग्नमणिस्वर्णादिमूल्यं निर्णीतम्। तथैव द्वितीयस्य कर्णेऽपि स प्रान्तो न प्राविशत्, तेन तस्य तु शरीरलग्नवस्तून्यपि मुधेति मन्त्रिणाऽस्य पुत्तलस्य किमपि मूल्यं नेति निर्णीतम्। तृतीयस्य कर्णरन्ध्रे प्रवेशितोऽपि स प्रान्तस्तस्य कुक्षावुत्तार, एवं प्रविष्टः स सर्वोऽपि दवरकस्तस्योदरे।

एतादृशं तं पुत्तलं निरीक्ष्याऽहोऽसौ पुत्तलो महानमूल्यश्चेति तेन निर्णीतम्। अथ प्रभाते पाणौ निबद्धपत्रिकांस्तांस्त्रीनपि पुत्तलान् दत्त्वा स दूतस्तत्स्वामिपार्श्वे प्रहितः, उक्तं चैतेषां मूल्यं करबद्धपत्रिकाः कथयिष्यन्ति। स दूतोऽथ तान् पुत्तलान् स्वस्वामिनामर्पयामास।

१. सरूपरूप AH । २. पुत्रक° PD। एवमग्रेऽपि ॥ ३. राजा = चन्द्रः ॥

ततस्तैः पृष्टः स्वसचिवोऽपि तत्स्वरूपमाह, हे स्वामिनः! एतत्पुत्तलकतुल्यास्त्रयः पुरुषाः यस्यैकस्मिन् कर्णे प्रविश्याऽपरतः कर्णाद्दवरको निर्गतः स गुरूक्तं शृण्वन् शुभं मन्यते, परं तत्किमपि न करोति। यस्य चैकस्मिन्नपि कर्णे दवरको न प्रविष्टः स तु गुरूक्तं शृणोत्यपि न। यस्य च कर्णे प्रविश्योदरे दवरकः प्रविष्टः स गुरूक्तं श्रुत्वा तत्सर्वं सम्यक् करोति। अयमेषां पुत्तलानां विभागः, तेनाऽस्य मन्त्रिणो बुद्ध्याऽऽत्मनामस्य जयो दुष्प्रापः, इत्याकर्ण्य ते पञ्चाऽपि पार्थिवाः स्वस्वस्थानं यान्ति स्म। **नरसेनो**ऽपि तन्मन्त्रिधिया स्वराज्यं चिरं पाति स्म। ॥ **इति मतिविषये वृद्धमन्त्रिकथा** ॥ २१५ ॥

॥ २१६ ॥ नियमपालने क्षेमलाऽऽह्वभिल्लकथा ॥

स्वल्पोऽपि नियमः सम्यक् पालितोऽनर्थं निहन्ति, यतः—

धणमिव चिंतइ धम्मं, जीविअमिव जो वयाइं रक्खेइ ।
सुरतरुमिव सुगुरुपयं, आराहइ तं वरइ सिद्धी ॥ १॥

अपि च—

अल्पीयानपि नियमः, सुखाय सम्यक्प्रपालितो भवति ।
वृषसहितशकटभक्षण-रूपः क्षेमाभिधस्येव ॥ २ ॥

तथाहि—गहनेऽरण्ये **भीषणा**भिधायां पल्ल्यां **भीमो** नाम पल्लीपतिः, तत्र च यमकिङ्करा इव क्रूराः, शर्वरीचरा इव कामं कठोरा बहवश्चौरा वसन्ति स्म। अन्यदा भृशं रौद्रां तामटवीं भ्रमतामीषामेको महात्मा मुनिर्मिलितः, तेन च तेषामनुग्रहार्थं धर्मोऽभिहितः, मांसाऽशन-रात्रिभोजन-सुरापान-परस्त्रीगमन-द्यूतक्रीडा परिहारादिनानानियमास्तैश्चौरैरादिरे। तन्मध्यादेकः **क्षेमला**भिधो भिल्लो हास्यवचनैर्मुनिमूचे, बलिवर्दसूतसहितं शकटमहं न भोक्ष्ये, इति ममापि नियमोऽस्तु। तत् श्रुत्वा ज्ञानिना तेन मुनिना सम्यक् पालनीयोऽयं नियमः इत्यभिधाय तस्मै सोऽपि नियमो ग्राहीतः। अथाऽन्येद्युः कमपि ग्रामं लुण्टयित्वा प्रभूतं सुवर्ण-मणि-रजतादिधन-मादाय व्रजन्तस्ते तस्करा भास्करोदये घूका इव क्वापि वनप्रदेशे निलीय तस्थिवांसः। इतस्ततो भ्रमद्भिः क्षुधार्तैस्तैर्दुर्गादेवीकुले लपनश्रिया निर्मितं वृषभसारथियुक्तं केनापि ढौकितं शकटं दृष्टं। भुक्ता च सा लपनश्रीः स्वनियमभङ्गभीरुणैकेन क्षेमलेन विना सर्वैरपि तैस्तस्करैः। ततः क्षणेन तान् सर्वानपि मृतानवलोक्य तन्निकटवर्तिनि **गोलक**ग्रामे तच्छुद्धिं गवेषयन् स ययौ। तत्र च केनापि द्विजेन पुत्रोपयाचितनिमित्तं सकलपुरजनभोजनार्थं निशि निर्मितां मध्ये निपतितसर्पविषमिश्रां तां लपनश्रियं ज्ञात्वा द्विजपरिवारयुतः सर्वोऽपि पौरवर्गः प्राणप्रदाननिदानं तं क्षेमलं मत्वा वस्त्रालङ्कारदानेन विशेषतो बहुमानपात्रं विधत्ते स्म। सोऽपि स्वनियमाऽनुभावेन लोकानामात्मनश्च जीवितलाभं ज्ञात्वा विशेषतो मांसाशन-सुरापानादिषु बहुषु नियमेषु दृढोऽजनिष्ट ॥ **इति नियमपालने क्षेमलाऽऽह्वभिल्लकथा** ॥ २१६ ॥

॥ २१७॥ दैवविलसिते सर्पगजाऽऽखेटकशृगालकथा ॥

सर्वत्र दैवमेव बलवत्तरं, यतः—

धिक् पौरुषं कुलमपि प्रगुणान् गुणांश्च, दैवं बलीय इति मुञ्च सखे! विषादम् ।
पञ्चाननो गिरिगुहागहनप्रवासी, वासालये वसति भूमिभुजां बिडालः ॥ १॥

लोका अप्येतदेव दैवचरित्रं प्रतिपादयन्ति। यतः—

तृणति वज्र वज्रति तृण कोटिंब बूडइ उगाह तरइ ।
असपति मारिससि सटवइ सिरिओ नहनके छत्र धरइ ॥
रीते भरइ भरे ग्रहि ढोरइ, जो चाहइ तो बुहडि भरइ ।
अलहदहो अलहकी करणी उहु करंति उहु कयान करइ ॥ २॥

दैवं हि मनश्चिन्तितमन्यथा क्षणेन करोति, यतः—

अचिन्त्यमाहात्म्यमयं समेभ्यो, दैवं बलीयो बलवत्तरेभ्यः ।
सर्पद्विपाऽऽखेटकजम्बुकानां, यन्मृत्युरेषां युगपद् बभूव ॥ ३॥

तथाहि—एतेषां कथानकं चैतेभ्यः काव्येभ्योऽवसेयम्।

स्थित्वा रन्ध्रमुखे सुखेन निखिलान् शीतान् सुगन्धीन् मृदून्,
वायून् पानपथे विधाय विधिना तुष्टिं विधास्ये भृशम्।
इत्थं स्वार्थमनोरथप्रथितधीः सर्वंसहासुन्दरी-
वेणीदण्ड इवाऽसितः स्वदरतः काकोदरो निर्ययौ ॥ ४॥
उत्क्षिप्तैः करिणीकरैः सुखकरै रेवाजलैः शीतलैः,
स्नात्वा तत्तटयोः करेणुभिरहं क्रीडां करिष्ये चिरम् ।
ध्यात्वैवं मदगन्धलुब्धमधुपैर्भ्राम्यद्भिरुद्भ्राजितो,
भ्राता विन्ध्यगिरेरिवोन्नतवपुर्विन्ध्यात्करी निर्ययौ ॥ ५॥
हत्वा मत्तमतङ्गजं कमपि तत्कुम्भस्थलाऽऽस्फालना-
दादत्तैर्वरमौक्तिकैर्निजकुलं नेष्यामि तोषं क्षणात्।
एवं लोभभराऽभिभूतहृदयः पाणौ दधानो धनु-
र्व्याधस्तामटवीमटन् करटिनं दृष्ट्वैव हृष्टः स्फुटम् ॥ ६॥
निघ्राणं करिणं तथैव हरिणं क्रोडं तथा कासरम्,
लब्ध्वा तत्पिशितैर्जलाञ्जलिमहं दास्ये क्षुधामात्मनः ।
इत्याशावशवंशविद्धहृदयः सर्वत्र दृष्टिक्रियां,
कुर्वाणो गिरिगर्भगह्वरगृहाद् गोमायुरागाद्वनम् ॥ ७॥

दष्टस्तेन भुजङ्गमेन मृगयुस्तेनापि स भ्रस्यता। सर्पोऽमारि ससंभ्रमं तदिषुणा तेनापि हस्ती हतः।
स व्यापादि गजेन तेन पतता फेरुस्तदेवं ययु-श्चत्वारोऽपि निकेतनं पितृपतेश्चित्रं विधेश्चेष्टितम् ॥ ८॥

इति दैवविलसिते सर्पगजाऽऽखेटकशृगालकथा ॥ २१७॥

॥ २१८॥ मतिविषये पुनानामचाण्डालपुत्रकथा ॥

समीहितमर्थं कामधेनुरिव तात्कालिकी धीरेव सूते, यतः—

जातेन चाण्डालकुलोद्भवेन, दत्तं ह्रिया यद्यवनस्य वित्तम् ।
पश्चाल्लभौ तत्तनयः स्वबुद्ध्या, तात्कालिकी धीः सुखकृन्नराणाम् ॥ १ ॥

तथाहि—**गुर्जरधरित्रीतो मण्डपाचलं** गच्छता केनापि तुरुष्केण **चाम्पानेरदुर्गमार्गान्तरालमण्डपाचलान्तरालपल्लीवासी पुनाऽभिधश्चाण्डालो** वेष्ट्या गृहीतः, भारोद्वाहकत्वेन भृशं तुष्टेन तेन यवनेन मार्गे स चाण्डालः सुखी कृतः, मण्डपाचलं प्राप्तेन तेन च किंचिद्वित्तं दत्त्वा मुक्तः।

तेन वित्तेन शाकव्यापारं कुर्वन् वसति स्म। तेन व्यापारेण धनमुपार्जयन् धान्यहट्टं च मण्डयन् भाग्योदयेन प्रकाममाढ्यो जातः। कस्त्वमिति पृच्छतां लोकानां पुरो वणिजोऽहमिति ब्रुवन् वणिग्वेषधारी स पुनः साधुरिति ख्यातिं लेभे। एवं स जातिहीनोऽपि लक्ष्मीमानासीत्। प्रायो हि श्रीर्जातिरहितानां वेश्मनि वर्धते। यतः—

जाइ-कलियं न इच्छसि, कमलग्गं चयसि अक्कमारूढा ।
विवरीय-सरूव-लच्छि, भमरि तं वंदणिज्जासि ॥ २ ॥

साधुपुनः साधुपुन इति पौरैर्भण्यमानः स कस्याऽपि वणिजो दुहितरमुद्वहति स्म। जातश्च तस्य पुत्रपुत्रीसम्बन्धिप्रमुखो भूयान् परिवारः। एकदा स एव यवनस्तं हट्टस्थितमुपलक्षयति स्म। याचितं च तेन यवनेन धान्य-घृत-तैलादि, तेन पुनेनाऽपि ह्रिया तस्मै विशेषतः सुन्दरं प्रभूतं च धान्यादि वितीर्णम्। एवं प्रतिदिनं यच्छतोऽस्य मासचतुष्टयं जातम्।

एकदा पुत्रेणोक्तं हे तात! यदयं यवनोऽहर्निशं धान्यघृतादि गृह्णाति, परं किमपि धनं नाऽर्पयति तत्किम् ? इति पृष्टः स यथाजातं स्वव्यतिकरं पुत्राग्रे जगौ। बुद्धिमता तेनापि प्रभाते पुनरपि धान्यादिग्रहणार्थमागतः स यवनोऽभिदधे, हे स्वामिन्नस्माकं मासचतुष्टयेन गृहीतस्य धान्यादेर्द्रव्यं देहि, नो चेत्तवाज्ञास्ति शाहेरित्युक्तः सोऽवोचत्, किं न जानीथ ? सर्वं लोकानां पुरो वक्ष्ये। स स्माऽऽह यत्तव कथनीयं तत्कथय, यदि त्वया सह व्यापारो व्यधायि तदा वयं नैकशः श्वपचाः किन्तु शतशः, परमस्माकं द्रव्यं देहीति धिया नियन्त्रितः स यवनः सर्वं धनं दत्त्वा स्वस्थानं ययौ। **॥ इति मतिविषये पुनाह्वचाण्डालपुत्रकथा ॥ २१८॥**

॥ २१९॥ मतिविषये मित्रकथा ॥

मायारहितो हि सखा सर्वत्र सुखकृद्भवति, यतः—

मित्रं शाठ्यरतं कलत्रमसतीं पुत्रं कुलध्वंसिनं,
मूर्खं मन्त्रिणमुत्सुकं नरपतिं वैद्यं प्रमादास्पदम् ।
देवं रागयुतं गुरुं विषयिणं धर्मं दयावर्जितं,
यो नैव त्यजति प्रमादवशतः स त्यज्यते श्रेयसा ॥ १ ॥

सन्मित्रं हि दुर्लभं, यतः—

येन तेन सुकृतेन कर्मणा, भूतले हि सुलभा विभूतयः ।
दुर्लभानि सुकृतानि तानि यै-र्लभ्यते पुरुषरत्नमुत्तमम् ॥ २॥

मित्रधिया विषममपि कार्यं साधयन्ति नराः, यतः—

यस्य मित्रं धियां धाम, स किं कार्यं न साधयेत्। प्रियामुष्ट्रद्वयोपेतां, सुहृद्बुद्ध्याऽऽनयद्वणिक् ॥ ३॥

तथाहि—**श्रावणनगर**वासिनो **धनदत्तस्य** विनयवती रूपसौभाग्यशालिनी **धनश्री**भार्या। धाटीमादाय गतेन **भरमाह्वे**न पल्लीपतिना गृहीता कृता च स्वभार्या। तद्वियोगात्सर्वमपि सांसारिकं सुखं तृणमिव मन्यमानेन **धनदत्ते**न गृहस्थवासोऽपि नरकावास इव विदाञ्चक्रे।

चंदो चंदन पवन जल, च्यारइ जउ वि मिलंति ।
तउ पियमाणसबाहिरा, निश्चय ताप करंति ॥ ४॥

बहुभिरुपायैस्तस्याः शुद्धिं विधाय तामादातुमेकं व्यवहारिणं सहायं कृत्वा चलितः स तत्परीक्षार्थमेकं स्थूलमेकं च कृशं दन्तधावनं तदग्रे मुमोच। तेनापि स्थूले तस्मिन्नादत्ते नाऽसौ लोभी मत्कृत्यकर्तेति तं हित्वाऽन्यं कमप्येकं नरं सहचरं कृत्वा स पुनरचलत्, तस्याऽप्यग्रे धनदत्तो द्वयं लघु द्वयं च महदिति क्रमुकस्य दलचतुष्टयं मुमोच। तेनापि लोभवशान्महति दलद्वये गृहीतेऽसावपि न मदर्थकृद् यतः—

आकरः सर्वदोषाणां, गुणग्रसनराक्षसः। कन्दो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः ॥ ५॥
[योगशास्त्रे ४/१८]

इति एनमपि संत्यज्याऽपरं नरं परीक्ष्य[1] सहायं सहादाय स तां पल्लीं प्राप्तः। कापालिकवेषेण तत्र भ्रमन् नापितप्रिययाऽऽत्मानमागतं तस्यै ज्ञापयामास।

अथ स कृष्णचतुर्दशीमहानिशायां दत्तसङ्केतां तामादाय यियासुरेकघटिकया योजनगामिनीं **टाकनाम्नी**मुष्ट्रीं मूल्येन आदत्ते स्म। सङ्केतितवटस्याऽधस्तादागतां तां गृहीत्वा करभीमारुह्य मित्रयुतः स चचाल। अथ स पल्लीशस्तां गतां ज्ञात्वा घटिकया द्वियोजनयायिनं **सज्ञा**भिधानं करभमारुह्य तत्पदानुसारतस्तत्पृष्ठतो निर्ययौ। तमायान्तं निरीक्ष्य सा पतिं प्राह, हे नाथायमुष्ट्रोऽस्या उष्ट्र्या द्विगुणगामी, तेनायं भिल्ल आत्मनां सत्वरमेव मिलिष्यतीत्यभिहितः स मित्रमाह, हे मित्र! किमथ कर्तव्यम् ? अथ तमासन्नमागतं दृष्ट्वा त्रयोऽपि करभीत उत्तीर्णाः। मतिमान् स सवयाः पादयोः पट्टकं निबध्य, पाषाणादिना च रुधिरं निष्कास्य मृतोऽहं मृतोऽहं चेति जल्पन्नुपविष्टायाः करभ्याः पार्श्वे तस्थौ।

तौ दम्पती तु समीपवर्तिनि बाढं सान्द्रे बदरीजालके तिरोबभूवतुः। उष्ट्रीपार्श्वमागतेन तेन पल्लीशेन रे वराक! तौ वराकौ क्व गताविति पृष्टः स तदाश्रितं जालकं विहायाऽपरं जालकं

१. PD। परीक्ष्य योग्यं च विज्ञाय सहादाय - मु.॥

तस्याऽदर्शयत्। ऊचे च पतितं भग्नशरीरं च मामिहैव मुक्त्वा भवतो भीत्या तौ वराकौ जीवमादाय नष्टौ। अथाऽन्यस्मिन् जालके तस्मिन्प्रविष्टे द्रुतमेव ततो निर्गतौ दम्पती टाकाऽऽह्वामुष्ट्रीमारूढौ। स सवयास्तु तं सञ्चाह्वानमुष्ट्रमारूढ इति ते त्रयोऽपि चेलुः। अथ तान् यातोऽवलोक्य स पल्लीपतिः प्राह— अहोऽमीषां को मिलति यदिमौ **टाकसञ्ज्ञौ** मिलितौ। तेनायमाऽऽभाणकः सर्वत्र प्रथितः **'टाकसञ्ज्ञो मिलियो'** एवं स धनदत्तः करभद्वयोपेतां स्वप्रियामादाय सुखेन स्वस्थानमायातः ॥ **इति मतिविषये मित्रकथा ॥ २१९ ॥**

॥ २२०॥ वचनपालने वेतालभट्टकथा ॥

सतां वचनं हि शैलोत्कीर्णवर्णवदनश्वरमेव, यतः—

प्राणा यान्तु श्रियो यान्तु, यातु राज्यं विनश्वरम्। एका तु स्वमुखेनोक्ता, वाचा मा यातु शाश्वती ॥ १ ॥

येषां वाचो मुखान्निर्गता अन्यथा भवन्ति ते जीवन्तोऽपि मृता एव। यतः—

तावइअं चिअ जंपह, जावय भणिअस्स होइ निव्वाहो ।
वाया मुआण नासइ, मा जीअंता मया होह ॥ २॥

स्ववचनपालनार्थमवसरे सत्पुरुषाः सर्वस्वमपि यच्छन्ति, यतः—

अदेयं दानशौण्डानां, किं चमत्कृतचेतसाम् ।
वेतालस्य ददौ पाण्ड्य-दण्डं यद्विक्रमोऽखिलम् । ३।

तथाहि—**काशी**देशवासी **दैत्याचार्य** इव कविकलाकुशलः, **सुराचार्य** इव विबुधवृन्दपरिवृतः, **सरस्वतीव** सर्वकलाकलापपात्रं, **वेताला**भिधो भट्टः सर्वत्र भ्रमन् **अमरावती**मिव सुपर्वपेशलां, **भोगावती**मिव भोगिभरभासुरां, **अलकामिव** वैश्रमणरमणीयां **पार्वती**मिव महाव्रतिमनोहरां, **द्वारिका**मिव **पुरुषोत्तम**मनोरमां, सरसीमिव **कमला**भिरामां, **मालव**मण्डलमण्डन**मवन्ती**नामनगरीं प्रविश**न्मदनमञ्जरी**वेश्यावासं प्राविशत्।

तस्या द्वारे स्थितं महानिःस्वानं वादयन् स दास्या स्वामिन्यग्रे कथितः, **मदनमञ्जर्या** च कथितं सहस्रदिनारदानेन नरेण मदावासे निशि स्थीयते। अथाऽयमवादीत् हे सुन्दरि! याचितः सन् यद् **विक्रमार्को** मम दास्यति तत्सर्वं तुभ्यं दास्यामि। तयापि तदुक्तेऽङ्गीकृते तस्यां रात्रौ तया सह सम्भोगसुखमनुभूयोषसि शुभवादमाशीर्वादं दत्त्वा विबुधवृन्दशोभनायामिन्द्रसभायामिव **विक्रमादित्य** पर्षदि स तस्थौ। तदा च राज्ञा पानीयपायिनोऽभ्यर्णात्पानीयमयाचि।

स्वच्छं सज्जनचित्तवल्लघुतरं दीनार्थिवच्छीतलं, बालालिङ्गनवत्प्रकाममधुरं तस्यैव सञ्जल्पवत्।
एलोशीरलवङ्गचन्दनलसत्कर्पूरकस्तूरिका-केतक्युत्पलपाटलासुरभितं पानीयमानीयताम् ॥ १ ॥

एतदाकर्ण्य सकर्णशिरोमणिरवसरज्ञो **वेतालो**ऽपि चतुरचित्तचमत्कारकारिकाव्यमिदमपाठीत्—

वक्त्राम्भोजे सरस्वत्यधिवसति सदा शोण एवाधरस्ते ।
वाहिन्यः पार्श्वमेताः कथमपि भवतो नैव मुञ्चन्त्यजस्रम् ।
बाहुः काकुस्थवीर्यः स्मृतिकरणपटुर्दक्षिणस्ते समुद्रः ।
स्वच्छेन्तर्मानसेऽस्मिन् कथमवनिपते! तेऽम्बुपानाभिलाषः ?॥ २॥

सुधारश्मिनाऽम्भोनिधिरिवानेन काव्येन प्रकामोल्लासिना राज्ञाऽस्मै **पाण्ड्यनृपेण** ढौकितोऽसौ सर्वोऽपि दण्डो दत्तः। तद्यथा—

अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ता फलानां तुलाः ।
पञ्चाशन्मदगन्धलुब्धमधुपक्रोधोद्धुराः सिन्धुराः ।
अश्वानामयुतं प्रपञ्चचतुरं वाराङ्गनानां शतं ।
दण्डे पाण्ड्यनृपेण ढौकितमिदं वेतालिकस्याऽर्पितम् ॥ ३॥

सकलमिमं विभवमादाय व्रजन् वेतालः परिजनेनाऽभाणि, हे स्वामिन्! हे विशारदवृन्दशार्दूल! भूयानयं विभवोऽस्यै वेश्यायै कथं दीयते ? यतो वेश्याः सर्वथा निन्द्याः यतः—

कः कोपः कः प्रणयो, नटविटहतमस्तकासु वेश्यासु ।
रजकशिलातलसदृशं, यासां जघनं च वदनं च ॥ ४॥

अपि प्रदत्तसर्वस्वान्, कामुकान् क्षीणसंपदः। वासोऽप्याच्छेत्तुमिच्छन्ति, गच्छतः पण्ययोषितः ॥५॥
[योगशास्त्रे २/९]

एतदाकर्ण्य **वेतालः** प्राह स्ववचनसीमानं पालयद्भिः सत्पुरुषैः किं किं न दत्तं किं किं च न कृतं ? यतः—

वचनच्छलिओ बलिराय, वचन कौरव कुल खोयो-
वचन करण दिओ कवच, वचन पांडव वन सेव्यो ।
वचन-लगिं हरिचंद नीच घरि नीर समप्पउ
वचनलगि श्रीराम लंका जु बिभीषण घेप्पउ ॥
तिणि मुखि अवाज वेताल कहि, कर गहि जीह ज कहिउं
जलि जाकु लच्छि विक्रमतणी, बुहिडन वचन पल दिहिउ ॥ ६॥

इति मत्वा स्ववचनरक्षाविचक्षणो वेतालः सकलोऽप्यसौ दण्डः वेश्यायै वितीर्णवान्।

॥ इति वचनपालने वेतालभट्टकथा ॥ २२०॥

॥ २२१॥ कुगुरुसार्थे न गन्तव्यमित्यर्थेऽकुशलद्विजकथा ॥

निरक्षरो हि गुरुरनर्थहेतुरेव, यतः—

माठो धोरी-ठोठ गुरू, कुइ ते खारुं नीर ।
ग्रामि कुठाकुर घरि कुघरि[णि] पंचइ दहइ शरीर ॥ १॥

अपि च—

हितार्थिभिर्मुद्रितमानसानां, पृष्ठे न गन्तव्यमनक्षराणाम् ।
दिवं व्रजन्तो न्यपतन् द्विजास्ते, यन्मोदकोन्मापकविप्रपृष्टे ॥ २॥

तथाहि—सुरसरित्समीपवर्तिनि **नन्दीसर**ग्रामे लोकव्यवहाराऽकुशलः **कुशला**भिधः पाठको द्विजः, अन्यदा तेन स्वयमुन्नयवक्षेत्रे स्वर्गादुत्तीर्य यवाञ्श्चरन्ती सुरगवी निशि दृष्टे। अथैकस्मिन्नहनि दिवं व्रजन्त्यास्तस्याः पुच्छं पाणिभ्यां दृढमवलम्ब्य स दिवं गतः। तत्र च **वासव** मुख्यान् देवान्, **पौलोमी**प्रमुखा अप्सरसः, **पारिजात**प्रभृतीन् कल्पभूरुहान्, **नन्दन**मुद्यानं, **नन्दीसर**सरः, **उच्चैःश्रवसं** हयं, **ऐरावणं** दन्तिनं, **सुधर्मां** सभां, सुधाभोज्यं, भूरीणि मणिस्वर्णमण्डितानि च विमानानीति सर्वां यथाशास्त्रं स्वर्लोकसमृद्धिं समीक्ष्य स विस्मयमाप।

अहो! धन्याऽसौ गौ र्ययाऽहं जीवन् दिवमानीतः, इत्यात्मानं धन्यं मन्यमानमेनं द्विजन्मानमागतमालोक्य सर्वोऽपि स्वर्लोकलोकः कौतुकेन वस्त्रालङ्कारसत्कारेण बहुमन्यते स्म। अथ मनुष्यलोकमागन्तुमनसोऽस्य देवलोकागमनाऽभिज्ञानार्थं पौलोम्या पीयूषमोदका दत्ताः। तदानीं तान् मोदकानास्वाद्य देवलोकदिदृक्षुस्तन्मोदकस्वादलुब्धश्च तत्परिवारस्तत्र गमनोपायमप्राक्षीत्। आदावहं गोपुच्छं पाणिभ्यां गाढं गृह्णामि, ततो मत्पादावन्यः, तत्पादौ चाऽपरः, एवं सुखेन स्वर्लोकं यास्याम इति मूर्खमुख्यस्याऽस्य धिया दिवं गच्छद्भिस्तत्परिजनैः कियन्मिता मोदका [इति] स पृष्टः, निरक्षरशेखरेण तेनापि सुरगवीपुच्छं हित्वा स्वौ बाहू च वितत्य मोदकप्रमाणे दर्शिते ते सर्वेऽप्युपर्युपरि पतिता मृताश्च। ॥ **इति कुगुरुसार्थे न गन्तव्यमित्यर्थेऽकुशल-द्विजकथा ॥ २२१॥**

॥ २२२॥ प्रागेव पुण्यं कार्यमित्यर्थे कुण्डलश्रेष्ठिकथा ॥

शरीरादिसमाधौ पुंसा स्वहितं कार्यं, यतः—

यावच्छरीरपटुता, यावज्जरा न चेन्द्रियग्लानिः। तावन्नरेण तूर्णं, स्वहितं प्रत्युद्यमः कार्यः ॥ १॥

प्रान्ते तु स्वहितं कर्तुमशक्यमेव, यतः—

युवैव कुर्वीत नरो हितं स्वं, प्रान्ते तु तत्कर्तुमशक्यमेव ।
यत्कुण्डलः काञ्चनशृङ्खलादि-याञ्चापरोऽवञ्चि महेलयाऽन्ते ॥ २॥

तथाहि—**चित्रावासनगरे** धनद इव श्रीमान् **कुण्डलः** श्रेष्ठी, **कनका** च तत्प्रिया। तं चाऽऽकस्मिकरोगवशाद्भृशं मन्दमवलोक्य प्रान्तावस्थोचितपुण्यक्षेत्रधनव्ययविधापनार्थं तत्परिजनस्तमाह। मान्द्यात्कामं क्षामस्वरो मनसा सावधानश्च **कुण्डलः** काञ्चनीयां शृङ्खलामानयेति प्रियां प्राह। श्रेष्ठी किं वक्तीति परिजनेन पृष्टा सा दम्भवती ब्रूते स्म, अधुना भवत्सु स्थितेषु मम सङ्कीर्णता न रोचते। **सांकडुं** इति लोकभाषया ।

अहो! धूर्तैषा इति जानन् कुण्डलः पुनस्तामाह, हे प्रिये! अङ्गुष्ठमुद्रिकामानयेति, **अंगुठी लाव** इति लोकभाषया। पुनरपि परिवारेण तथैव पृष्टा साऽभाषिष्ट, एकस्मिन् पार्श्वे सुप्तस्य ममाङ्गं ज्वलति, तेन मदङ्गमुद्वर्त्तय, **अंगु ठोलोइ** इति लोकभाषया। पुनः स स्माऽऽह 'निधानमानय,' 'धान्यं याचते-'इति तया कथिते पुनः सोऽवोचत्, **लहरीकं** सुवर्णाऽऽभरणविशेष-मानय, लहरी-मूर्च्छा ममायातीति तयोक्ते, सुवर्णमानयेति, तेनोक्ते पुनः सा स्माह-मयि गते सर्वं शून्यमित्येते वदन्तीति तयाऽन्यस्मिन्नन्यस्मिन्नुत्तरं दत्ते श्रेष्ठी दध्यौ—अहो! इयं धूर्ता स्वार्थसाधकतया बहु मृषा भाषते। यतः—

वणिक्पण्याङ्गनादस्यु-द्यूतकृत्पारदारिकाः। स्वार्थसाधकनिद्रालू, सप्ताऽसत्यस्य मन्दिरम् ॥ १ ॥

धिग्मां यत्प्रागेवाऽहं स्त्रीसात्सर्वं धनमकार्षम्। तेन यद्यस्मान्मान्द्यादधुना मम मोक्षो भावी, तदाहमात्महितं विधास्ये, इति ध्यायतस्तस्य पुण्यभावनया रात्र्यां सर्वे रोगाः क्षयं गताः। अथ शनैः शनैः सज्जीभूतः स स्वस्त्रियमाह, हे प्रिये! अस्मिन्मान्द्ये ममाऽऽत्मा भृशं व्याकुलीभूतः, तेन च मया किं जातं? किं जल्पितं? किं च भुक्तं? इति किमपि न ज्ञातं, तयाऽपि पूर्वसम्बन्धी सर्वोऽपि वृत्तान्तः कथितः।

अथ स धीमान् व्यापारकपटेन तां विप्रतार्य सर्वं धनमादाय च दवीयसि देशे गत्वा धनं पुण्यक्षेत्रे उप्त्वा सुगुरोः पार्श्वे तपस्यामाददे। गीतार्थः सन् विहरन् स्वनगरे समागत्याऽऽत्मपरिजनादिपौरवर्गस्य पुरो धर्मं कथयन् स स्वमान्द्यादारभ्य दीक्षाऽवसानं च निजं सर्वं चरित्रं जगौ। तदा चाऽवस्थान्तरं गतांस्तान् गुरूननुपलक्ष्यमाणा सा कनकेति दध्यौ, अहो अमी गुरवो ज्ञानबलेन मम गूढमपि चरित्रं विदन्ति, तेन देशाऽन्तरगतस्य मम पत्युः स्वरूपं पृच्छामीति स्वपतिस्वरूपमप्राक्षीत्।

गुरवोऽभिदधिरे हे भद्रे! तव पतिं वयं विद्मो, यतस्तव पत्या सहाऽस्माकं भेदो नास्ति। स क्वास्तीति तयोक्ते निकटेऽस्तीति गुरूक्तं निशम्य पूर्वाऽभिज्ञानेन लक्षणैश्च गुरूनुपलक्ष्य पृष्टे सति गुरुभिरपि यथाजातव्यतिकरे कथिते सति सा प्रतिबुद्धा प्राव्राजीत्। ॥ **इति प्रागेव पुण्यं कार्यमित्यर्थे कुण्डलश्रेष्ठिकथा ॥ २२२॥**

॥ २२३॥ स्वभावे शोभनश्रेष्ठि-काममञ्जरीवेश्याकथा ॥

न शिक्षितोऽपि प्रकृतिं, नीचो मुञ्चति जातुचित्। राजसेव्यपि मार्जारो, दीपं हित्वाऽऽखुमग्रहीत् ॥ १ ॥

तथाहि—**क्षितिप्रतिष्ठिते** पुरे **जितशत्रुनाम्नो** राज्ञोऽतिमान्यो मतिमान् रूपसौभाग्यभाग्य-सम्पत्तिशोभनः **शोभनः कुमारो** नगरश्रेष्ठी, **काममञ्जरीनामगणिका** च चामरधारिणी। एकदा पर्षदि तस्थुषि नगरश्रेष्ठिनि सा गणिका स्माऽऽह, सुशिक्षिताः प्राणिनो निजां प्रकृतिं हित्वा समीचीनवृत्तयः स्युः, एतदघटमानमनुवारमाकर्ण्य जातेर्ष्यः श्रेष्ठ्यभाषत, यतः—

१. लहरीयउ = [स्त्रीओना कंठनुं] एक आभूषण - मध्यकालीन गुजराती कोश ।

यद्यपि न भवति हानिः, परकीयां चरति रासभे द्राक्षाम् ।
असमञ्जसं तु दृष्ट्वा, तथापि परिखिद्यते चेतः ॥ २ ॥

हे भद्रे! बहुशिक्षितोऽपि नीचः स्वभावं न मुञ्चति। यतः—

यस्य न सहजो बोधः, पुरतः किं तस्य भाषितैर्बहुभिः ।
नलिकाधृतमपि सततं, न भवति सरलं शुनः पुच्छम् ॥ ३॥

एवं चाऽनुदिनं तयोर्विवादे जायमानेऽन्येद्युः पार्थिवेन सा गणिकाऽभाणि, हे चामरधारिणि! स्ववचनसत्यापनार्थं किमपि तादृशं दर्शय, येन तवोक्तं समीचीनमहं मन्ये, अन्यथा श्रेष्ठी सत्यवादी, त्वं तु मृषावादिनी, इत्यभिहिता सा चैकं मार्जारबालं शिक्षयामास। शैशवादपि सुशिक्षितः स ओतुशिशुः सुनिपुणसेवक इव ताम्बूलदान-दीपधरण-चामरवीजन-पानीयपान-वस्त्रपरिधापनादीनि सर्वाण्यपि राजशरीरकृत्यानि करोति स्म। एवं सर्वं कुर्वाणं बिडालमालोक्य राजा तां वेश्यां प्रशंसयामास, अहो! अस्या उक्तं सत्यं, यदसौ शिक्षितो मार्जारः पशुरपि चतुरनर इव सर्वं समीचीनतया विदधते। इति वर्णिता सा वारवर्णिनी मुखमोटनकं कृत्वा राजानं व्याजहार, हे स्वामिन्! हिङ्गु-लवण-तैलादिविक्रयकारिणोऽमी वराका वणिजः किं विदन्ति? यतोऽस्माकमेव कुलं चातुरीमूलम्। यदुक्तं—

देशाटनं पण्डितमित्रता च, पण्याङ्गना राजसभाप्रवेशः ।
अनेकशास्त्राऽर्थविचारणं च, चातुर्यमूलानि भवन्ति पञ्च ॥ ४॥

अथैकदा निशि द्यूतक्रीडां कुर्वाणे राज्ञि दीपं गृहीत्वा च तस्थुषि तस्मिन्मार्जारे शोभनः सहसैव चैकमाखुं तत्र मुमोच।

तं मूषकं दृष्ट्वा स मार्जारः सत्वरमेव दीपं निक्षिप्य तं मूषकमग्रहीत्। पतिते च दीपे तैलेन राज्ञो वर्यवस्त्राणि विनष्टानि, ज्वलितं सिंहासनं, क्रीडा च निहता, राज्ञो भृशमशर्म जातम्। अथ शोभनगिरा शोभनोऽभाषत, हे स्वामिन्! सुशिक्षितोऽपि नीचोऽप्ययमिव स्वां प्रकृतिं न त्यजति, पश्येदं मार्जारविलसितं ? यतोऽनयोर्मार्जारमूषकयोर्वैरं स्वभावजनितं, स्वभावो हि दुस्त्याज्यः, यतः—

यद्यपि मृगमद-चन्दन-कर्पूरप्रभृतिवासितो लशुनः ।
तदपि न मुञ्चति गन्धं, प्रकृतिगुणाज्जातिदोषेण ॥ ५॥

तेन गीत-नृत्य-ज्ञान-विज्ञानादिकलाकौशलं सर्वं शिक्षितमायाति, परं स्वभावो न याति, इति ज्ञात्वा राज्ञा वेश्याऽपमानिता, श्रेष्ठी च बहु मन्यते स्म ॥ **इति स्वभावे शोभनश्रेष्ठि-काममञ्जरीवेश्याकथा ॥ २२३॥**

॥ २२४॥ दानविषये श्रीविक्रमादित्यनृपकथा ॥

दानं हि सर्वेषां गुणानां गृहं, यतः—

दाणं सोहग्गकरं, दाणं आरुग्गकारणं परमं ।
दाणं भोगनिहाणं, दाणं ठाणं गुणगणाणं ॥ १॥

किञ्च श्रियः फलं हि वितरणमेव, यतः—

लक्ष्मीः सर्पति नीचमर्णवपयःसङ्गादिवाम्भोजिनी-
संसर्गादिव कण्टकाकुलपदा न क्वापि धत्ते पदम् ।
चैतन्यं विषसंनिधेरिव नृणा-मुद्भासयत्यञ्जसा,
धर्मस्थाननियोजनेन विदुषा, ग्राह्यं तदस्याः फलम् ॥ २॥

दानं हि केषाञ्चिदेव प्रियं, यतः—

अभिमुखाऽऽगतमार्गणधोरणी - ध्वनितपल्लविताऽम्बरगह्वरे ।
वितरणे च रणे च समुद्यते, भवति कोऽपि पुमान् विरलः पुरः ॥ ३॥

दानिनो हि किमप्यदेयं नास्ति, यतः—

श्रीभोज्यसैन्याऽऽभरणप्रदानि, रत्नानि चत्वारि वितीर्य चक्रे ।
यद्विक्रमो विप्रकुलं सहर्षं, यच्छन्ति सन्तः किमु नाऽन्यतुष्टयै ॥ ४॥

तथाहि—द्विनवतिलक्षग्रामाऽभिरामे श्रीमन्मालवदेशे **श्रीउज्जयिन्यां श्रीविक्रमादित्य**-राजा राज्यं करोति स्म। अन्यदा **सौभाग्यमञ्जर्याः** स्वदुहितुरुद्वाहे **सुरेन्द्र-यम-वरुण-वैश्रवणानां** चतुर्णां लोकपालानामाकारणार्थं प्रत्येकं चतुरो विप्रान् प्राहिणोत्।

एकं च **श्रीकण्ठ**नामानं द्विजन्मानं सकलक्ष्मामण्डलस्य प्राकारतया स्थितत्वेन महोपकारिणो महोदधेराकारणार्थं प्रेषयति स्म। **श्रीकण्ठो**ऽपि पश्चिमाऽम्भोधिरोधसि गत्वा धूप-कुसुम-चन्दन-श्रीफलादिनाऽम्भोधिमभ्यर्च्य समुद्रमन्त्रजापादिपुरस्सरमुवाच, मन्त्रो यथा—

ॐ समुद्रोऽसि रत्नाकरोऽसि मकराकरोऽसि नदीपतिरसि वरुणालयोऽसि यादःपतिरसि सलिलनिलयोऽसि पारावारोऽसि सागरोऽसि साक्षाद् भव भव स्वाहा।

श्रीदुहितरं पाणौ दधानो रत्ननिकरप्राभृतं बिभ्रद् अमृतकुम्भं कलयंश्च समुद्रः प्रादुरासीत्। आयातं च समुद्रदेवं नत्वा **श्रीकण्ठो** राज्ञः शासनमब्रवीत्। भोः **श्रीकण्ठ!** मयि समागते जगत्प्रलयस्तेनाहं स्थानस्थित एव शोभनः। किञ्च मद्भ्रातुः **श्रीविक्रमादित्यस्य** मम नमस्कारो वाच्यः, देयानि चेमानि कामितश्री-भोज्य-सैन्या-ऽऽभरणप्रदानि चत्वारि रत्नानि, इति प्राभृतं दत्त्वा समुद्रे तिरोहिते श्रीकण्ठस्तानि रत्नान्यादाय समेत्य च गृहे निशि सुत-स्नुषा-पत्नीनां पुरो रत्नमहिमानमब्रवीत्। एतदाकर्ण्य पतिं पत्नी प्राह, हे प्राणनाथ! प्रातश्चेत्तुष्टो भूपतिस्तवैकं *दास्यति तदा त्वं कं रत्नमादास्यसि ? तेनोक्तं दौर्गत्यादपरं दुःखं नास्ति, यतः—*

निर्द्रव्यो ह्रियमेति ह्रीपरिगतः प्रभ्रस्यते तेजसा,
निस्तेजाः परिभूयते परिभवान्निर्वेदमागच्छति ।
निर्विण्णः शुचमेति शोककलितो बुद्धेः परिभ्रस्यते,
प्रभ्रष्टः क्षयमेत्यहोऽप्यधनता सर्वाऽऽपदामास्पदम् ॥ ५ ॥

जगत्पूज्यत्वनिबन्धनं श्रीरेव, यतः—

श्रियः परः परो मन्त्रो, नास्ति कार्मणकर्मणि। यद्विश्वरूपगोपोऽपि, पूज्यते श्रीयुतो जनैः ॥ ६ ॥

तेन दौर्गत्यसपत्नरत्नं श्रीप्रदमेव रत्नमहमादास्ये, ततः सा स्माह, हे नाथ! यद्येवं तदा त्वया सह मम गृहवासो नास्ति, यतोऽहं खण्डन-दलन-पेषण-रन्धनादिक्रियया दिवानिशं दग्धास्मि, तेनामरभोज्यप्रदं रत्नं याचनीयं, येनाहममरीव स्वैरं सुखमनुभवामि। एवमनयोर्वचनमाकर्ण्य सुतोऽवदत्, हे तात! सैन्यप्रदमेव रत्नमादेयं, येनाहं चतुरङ्गचमूयुतो राजेव लीलामनुभवामि, यद्येवं न तदाऽऽवयोः पृथग्भावः।

अथ स्नुषा बभाषे-हे ताताऽमीभिस्त्रिभिरपि रत्नैरलं, किं त्वाभरणप्रदमेव रत्नमादेयं, येनाहं मणि-स्वर्ण-मौक्तिकाद्याभरणैरलङ्कृता मूर्तिमती श्रीरिव लीलामनुभवामि। इति चेन्न तदा युष्माकं गृहं हित्वाऽहं पितुर्गृहं यास्यामीति। एवं तस्यां निशि तेषां मिथो महान् विवादोऽभूत्। अथ प्रभाते **श्रीकण्ठ** आशीर्वादपूर्वकं रत्नमाहात्म्यकथनपुरस्सरं रत्नानि दत्त्वा राज्ञः पुरो रात्रिव्यतिकरमवादीत्। एतदाकर्ण्य परदुःखकातर इत्यात्मनो बिरुदं मनसि बिभ्रत् साक्षाच्चिन्तामणिः **श्रीविक्रमादित्यस्तानि** चत्वार्यपि रत्नानि **श्रीकण्ठाय** ददौ। ॥ **इति दानविषये श्रीविक्रमादित्यनृपकथा ॥ २२४॥**

॥ २२५॥ गूहमण्डनं स्त्री इत्यर्थे भीममन्त्रीभार्या-कथा ॥

दानं हि क्वाऽपि निष्फलं न स्यात्, यतः—

पात्रे धर्मनिबन्धनं तदितरे प्रोद्यद्दयाख्यापकं, मित्रे प्रीतिविवर्धनं नरपतौ सन्मानसम्पादकम्।
भृत्ये भक्तिभरावहं रिपुजने वैरापहारक्षमं, भट्टादौ च यशस्करं वितरणं न क्वाप्यहो निष्फलम् ॥ १ ॥

तेन दानं विना कीर्तिर्न भवति, यतः—

अभ्यासकारिणी विद्या, लक्ष्मीः पुण्यानुसारिणी। दानानुसारिणी कीर्ति-र्बुद्धिः कर्मानुसारिणी ॥ २ ॥

अपि च—

कुण्डलद्वयदानेन, पत्युः कीर्तिमवर्धत। भीमभार्या ततः सत्यं, स्त्रियो मण्डनमोकसः ॥ ३ ॥

तथाहि—**गुर्जर**धरित्रीमण्डने श्रीमत्पत्तने महानगरे त्यागतिरस्कृतकर्णः **कर्णः** क्षमापः, तस्य च वणिग्वर्गाऽवतंसो नीतिप्रीतिपार्वतीभीमो **भीम**नामा महामन्त्री, अस्य च दानातिशय-

१. शोकनियतो - PD ॥

सूत्रितजगद्विस्मयां कीर्तिमाकर्ण्य **भीमाद्दानमिच्छुः काशी**वासी **बलभद्राभिधो** भट्टः कविर्गुर्जरधरामागतः। तुरग-रथ-पदातिप्रमुखबहुपरिवारयुतो बलभद्रः पत्तनोपवने **सहस्रलिङ्ग**-तटाकतटे भोजनार्थमुत्तीर्णः। इतश्चाऽकस्मात् कस्मिंश्चिदागसि समुपस्थिते **भीमो** मन्त्री **श्रीकर्णेन** निगडितः, एतां वार्तां बलभद्रः शुश्राव। अथ तस्य महात्यागिनो **भीम**स्य मुखाऽवलोकनमेव महाश्रेय इति स्पृहया **बलभद्रो भीम**गृहमागतो **भीमलदेवी**नाम्नीं भीमभार्यां चोपश्लोकयामास। मार्गणाऽऽगमनमुत्सवमिव मन्यमाना सापि सूर्योढातिथितुल्यप्रतिपत्त्या तं काममन्यत। सोऽपि तस्यास्तां प्रतिपत्तिं प्राप्य तां मूर्तिमतीं श्रियं मेने। अथ प्रभाते मन्त्रिणोऽभ्यर्णे व्रजन्त्या **सुरूपया** दास्या सह गत्वा स मन्त्रिणमाशिषा स्तौति स्म। तथाहि—
चिरं जीव चिरं नन्द, चिरं पालय मेदिनीम्। निःसीमाऽभीमभाग्यश्रीः, श्रीभीमसचिवोत्तम! ॥ ४॥

कर्पूरोत्करपेशलासु महसां पूरैः प्रधानासु न,
छिद्राणि प्रतिभान्ति भाग्यभवन! त्वत्कीर्तिमुक्तासु न ।
हारीकृत्य कथं वहन्ति तदिमा हृद्यास्पदं श्रेयसां,
पाताले धरणीतलेऽमरकुले चैताः कुरङ्गीदृशः ॥ ५॥

अनेनाशीर्वादेन कीर्तिवर्णनातिरेकेण भृशं चमत्कृतचेताः **श्रीभीमो** वलमानां दासीं प्रति स्माह।

हे सुरूपे! ताम्बूलबीटकं दत्त्वाऽमी विसर्जनीयाः, साऽपि स्वामिवचनं स्वस्वामिन्यै निवेदयामास । अथ **भीमल**देव्यपि स्वयं व्यजनधारिणी सती कल्पद्रुमदत्तैरिव मनोरमैर्भोजनैस्तं भोजयित्वा विडम्बितमार्तण्डमण्डलं स्वं वामकर्णकुण्डलं तस्मै ददौ। तत्कुण्डलमादाय द्रुतं चलिते तस्मिन् राहुग्रस्तेन्दुमण्डलमिव विच्छायमेककुण्डलं स्वमुखं दृष्ट्वा सा दध्यौ, मद्भर्ता तु सद्य एव सद्यस्कमपरं कुण्डलं कारयिष्यति, परमस्य मार्गणस्य पत्न्याः परं कुण्डलं क्वेति मत्वा सा तुरगयुग्यरथमारुह्य तत्पृष्ठितस्त्वरितमचालीत्। तामायान्तीं वीक्ष्य रक्षितरथो **बलभद्रो**ऽपि तद्वितीर्णं दक्षिणकर्णकुण्डलं प्राप्य प्रकामं प्रमना इदमवादीत्-

पण्णसुवण्ण रयण कियचुण्णह, मुत्ताहल अरु फोफलवण्णह ।
अर राय जु मागुं सोलह, तोय न पूगे भीम-तंबोलह ॥ ६॥

इति कामं स्फूर्तिमतीं पतिकीर्तिमाकर्ण्य भृशं तुष्टा साऽन्यदपि कनकादि तस्मै दत्त्वा स्वगृहमलञ्चकार। ॥ **इति गृहमण्डनं स्त्री इत्यर्थे भीमनाममन्त्रिभार्याकथा ॥ २२५॥**

इति पण्डितश्रीकमलविजयगणिशिष्य-श्रीपण्डितहेमविजयगणिविरचिते
श्रीकथारत्नाकरे नवमस्तरङ्गः समाप्तः
॥ श्रीरस्तु ॥

॥ १०॥ दशमस्तरङ्गः॥

॥ २२६॥ प्रथम-मूर्खकथा ॥

मूर्खत्वादपरं कष्टं नास्ति, यतः—

मूर्खत्वं खलु कष्टं, कष्टं खलु यौवनेऽपि दारिद्र्यम्। कष्टादपि कष्टतरं, परगृहवासः प्रवासश्च ॥ १ ॥

किञ्च मूर्खाणां प्रतिक्रिया नास्ति, यतः—

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्याऽऽतपो,
नागेन्द्रो निशिताऽङ्कुशेन च महादण्डेन गो-गर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं,
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ २॥

मूर्खा हि विवेकविकलाः स्वार्थभ्रंशभाजो भवेयुः, यतः—

स्वार्थं जनन्यायविहीनचित्ता, मूर्खाः प्रकामं निधनं नयन्ति ।
निदर्शनं साधुवितीर्णधर्मा-ऽऽशीर्वादवादा इह ते विवर्णाः ॥ ३॥

[1]तथाहि—स्वैरं विचरन्तश्चत्वारो महामूर्खाः क्वापि वनदेशे मूर्तिमन्तमनगारं धर्ममिव महात्मानमेकं श्रमणमद्राक्षुः। सोऽपि साधुस्तेषां चतुर्णामपि धर्मलाभं ददौ। अथ पुरतो व्रजन्तस्ते चत्वारोऽपि धर्मलाभो मम दत्तो मम दत्त इति विवदमाना मिथः स्पर्धयाऽधिकमत्सराः पुनरागत्य कस्य धर्मलाभो दत्तः? इति तं भिक्षुहर्यक्षमप्राक्षुः।

अपाण्डित्यपीनं तद्वचनं श्रुत्वा साधुस्तानाह भवतां मध्ये यो मूर्खस्तस्मै मम धर्मलाभाऽऽशीर्वादः। तथाऽप्यहं जडोऽहं जड इति विवदमानांस्तान्मूर्खान् पुनः मुनिः स्माह, भो भद्र! क्वापि पत्तने गत्वाऽऽत्मवादो निर्णीयतामित्यभिहितास्ते **रत्नपुरनामनगरे** गत्वा पौरान् प्राहुः, भोः पौरा अस्माकं मध्ये को मूर्खः? इति विवादो निर्णीयतां, तैरुक्तं स्वं स्वं मूर्खत्वं कथ्यतामितीरितास्ते स्वं स्वं मूर्खत्वमाख्यान्ति स्म। तेष्वेक ऊचिवान् **क्षितिप्रतिष्ठिते** पुरे मम कुरूपस्त्रैणशिरोमणी द्वे रमण्यौ, ते द्वे अपि मम समानमाने प्राणेभ्योऽपि वल्लभे। एकदा निशि द्वयोः पार्श्वयोः सुप्तयोस्तयोः पीनस्तने वक्षःस्थले करद्वयं निधायाऽन्तराले प्रसुप्तस्य मम वामनेत्रोपरि पतितया दीपवर्तिकया नेत्रं दग्धं, परमेकस्मिन्नपि करेऽपसारिते मा भूदेकस्या अपि प्रेमभङ्ग इति ज्वलन्नेत्रमुपेक्षितं मया, न पुनः पाणिनैकेन वर्तिका विध्यापिता ।

ततो दग्धैकलोचनस्य मम विषमेक्षण [काणो] इति नाम प्रथितं, तेनाऽहं मूर्ख इति, यतः स्त्रीभियाऽऽत्मनोऽनर्थकृता मया तुल्यः कोऽप्यस्ति किमन्यो मूर्खः? इति लोक-कौतुककारिणीं स्वां जडिमाऽऽडम्बरधारिणीं कथामभिधाय स वैधेयो[2] व्यरंसीत्। **॥ इति प्रथममूर्खकथा ॥ २२६॥**

---

१. तुला- धर्मपरीक्षा अमितगतिकृता ॥ २. हर्यक्षः = सिंहः ॥ ३. वैधेयः = मूर्खः ॥

॥ २२७॥ द्वितीय-मूर्खकथा ॥

अथाऽपरः प्राह—**पृथिवीतिलके** पुरे मम पापस्वरूपे प्रकामं कुरूपे सर्वदा स्वैरसञ्चारे दुराचारे भीषणभाले कालरात्रिकराले द्वे स्त्रियौ। एका रासभीव निकामं कटुस्वरा, द्वितीया च कज्जलैर्घटितेव भृशं श्यामा, तेन सकलैरपि लोकैराद्या **खरी** द्वितीया च **ऋक्षी**त्यभिधाभ्यामभिहिते। ते द्वे अपि पाणिपादादि सर्वं मद्वपुर्दक्षिण-वामतो धावन-संवाहनादि-शुश्रूषया विभज्य जगृहतुः। रति-प्रीतिभ्यां स्मरस्येव ताभ्यां समं रममाणस्य मम वासराः प्रयान्ति स्म। अथैकदा खरी मम खरीसात्कृतं दक्षिणं चरणं प्रक्षाल्य वामपादोपरि मुमोच, तदा च स्वसात्कृतवामपादोपरि मुक्तं दक्षिणचरणं निरीक्ष्य ऋक्षी खर्यै चुकोप।

हे पापे! हे दुराचारे! मत्सात्कृते वामे चरणे कथं त्वत्सात्कृतः पादस्त्वया मुमुचे? पश्याऽस्याऽपराधस्य प्रचण्डदण्डं फलं, मदायत्तस्य पादस्य यदि त्वयाऽपरपादमोचनजनिता व्यथा व्यधायि, तदाऽहमपि त्वदाऽऽधीनस्य पादस्य पीडां विधास्यामीत्यभिधाय राक्षस्येव दुष्टया तया **ऋक्ष्या** मुशलेन मे दक्षिणोंऽह्रिरभङ्ग, अथाऽऽत्मसात्कृतं दक्षिणं चरणं भृशं भग्नं वीक्ष्याऽतीव कुपिता खर्यपि पाषाणमुद्गरेण तत्सात्कृतं मे वाममंह्रिं बभञ्ज। भग्नपादस्य च मम **कूटहंसगतिरिति** नाम सकलैरपि लोकैरभिदधे, मा भूदेकस्या अपि प्रीतिभ्रंश इति पादभङ्गनं गाढप्रहारपीडां चाऽहमुपेक्षितवान्। तेन मया सदृशः कोऽप्यन्यो नास्ति मूर्ख इति निर्णीयतामित्यात्मनो निखिललोककौतुहलकारिणीं कथां कथयित्वा विरराम ॥ **इति द्वितीयमूर्खकथा** ॥ २२७॥

॥ २२८॥ तृतीय-मूर्खकथा ॥

अथ तृतीयः प्राह-मूर्खचरित्रं हि सर्वेषां हास्यहेतुः यतः—

काव्यं करोतु परिजल्पतु संस्कृतं वा, सर्वाः कलाः समधिगच्छतु वाच्यमानाः ।
लोकस्थितिं यदि न वेत्ति यथाऽनुरूपां, सर्वस्य मूर्खनिकरस्य स चक्रवर्ती ॥ १॥

तथाहि—**वसुधाभूषणे** पुरेऽहं वसामि, एकदा पत्नीपितृगृहे गत्वाऽहं पत्नीमानीतवान्। अन्यस्मिन् दिने निशि शयने सुखसुप्तोऽहं स्त्रियमभ्यधां, हे सुभगे! आवयोर्मध्ये यः कोऽपि प्राग् ब्रूते, तेनाऽन्यस्मै गुडघृतमिश्रा दश पूपा देयाः, इति पणमाधाय द्वावपि दम्पती जागृतावेव निद्रामुद्रितलोचनाविव सुप्तौ। तदा च गृहाऽन्तः प्रविश्य सर्वस्वमाददानं चौरं विलोक्याऽपि नाऽऽवाभ्यां पणभङ्गभयाज्जल्पितम्।

तदा च गृहसर्वस्वमादायाप्यतृप्तेन तेन स्तेनेन मत्स्त्रीपरिधानवस्त्रमाकर्षितम् । तदा परिधानाऽऽकर्षणात्प्रकामं कुपितया तया मत्पत्न्याऽहमुक्तः, रे शठ! रे निस्त्रप! पापिनाऽनेन

चौरेण मत्परिधानवस्त्राऽऽकर्षणेनाऽहं भृशमभिभूता, त्वं चाऽभ्यर्णे सुप्तोऽपि तस्करमेनमुपेक्षसे तेन मूर्खमुख्यं त्वां धिगस्तु । रे मूर्ख ! त्वयि पश्यत्यप्यहमनेन चौरेणेति पराभूता, तथापि त्वया न पौरुषं प्रकटितं, तेन तव जीवितं धिगिति तयोक्तमाकर्ण्य मयाऽभिहितं, हे प्रिये! त्वया हारितं, मया च जितं, तेन दश पूपान् मम देहि ? भोः पौरा इदं मम मौर्ख्यं पश्यन्तु, येन मया सर्वमपि गृहवित्तं गमितम्। तदा च सकलैरपि लोकैर्वोंदन्द इति मम नाम निर्ममे, हे लोका! अस्ति कोऽपि मम सदृशो हास्यकृच्चरित्रो मूर्खः? एवं स्वचरित्रमभिधाय विरते तस्मिंश्चतुर्थः प्राह ॥ **इति तृतीयमूर्खकथा** ॥ २२८ ॥

॥ २२९ ॥ मूर्खचरित्रे चतुर्थविप्रकथा ॥

पण्डितेषु गुणाः सर्वे, मूर्खे दोषास्तु केवलम् ।
तस्मान्मूर्खसहस्रेण, प्राज्ञ एको न लभ्यते ॥ १ ॥

ततः प्राज्ञ-मूर्ख-धनि-निर्धन-स्वामि-दास-स्त्री-पुरुष-बाल-वृद्ध-नृप-भिक्षाचरप्रभृतीनां सर्वेषां मूर्खचरित्रं हास्यनिदानं, तथाहि—**वसुमतीतिलके** नगरे **नगराजनामा** द्विजोऽहं वसामि, एकदा पितृगृहात्पत्नीमानेतुं श्वशुरगृहेऽहं गतः, तदा च पत्नीमात्रा भव्यमपि परिवेषितमशनं लज्जमानो नाऽहं भुक्तवान्। एवं द्वितीये तृतीये दिवसेऽपि मामवलोकनार्थमागतानां ग्राम्यस्त्रीणां त्रपाऽभिभूतो नाऽहं भोजनमकार्षम् । अथ चतुर्थेऽहनि भृशं क्षुधाऽऽर्तोऽहमभवम्।

तेन निशि शयनीये सुप्तोऽदनार्थमितस्ततोऽवलोकयन् पर्यङ्काऽधस्तात्तण्डुलभृतमेकं स्थालमपश्यं, तदा च क्षुधार्तेन मया तैस्तण्डुलैर्यावन्मुखं भृतं, तावदकस्मात्तत्रागतां प्राणप्रियामालोक्य लज्जया तण्डुलभृतमुख एव फुल्लगल्लोऽहमस्थां, तदा प्रफुल्लगल्लं विदीर्णलोचनं च मामालोक्य निर्णीतमहारोगपीडा सा मत्प्रिया स्वमातरमब्रवीत्, हे अम्ब! त्वज्जामातुराकस्मिकः कोऽपि प्राणान्तरोगो जातोऽस्ति। समागता सापि मामीदृशं दृष्ट्वा-हा दैव! हा दैवेति ब्रुवाणा बाढस्वरेण पूच्चक्रे। तत्पूत्कारं श्रुत्वा सर्वोऽपि ग्रामीणवधूवर्गो द्रुतमागत्य शाकिनी-डाकिनी-करालवेताल-मुद्गल-भूत-प्रेत-पिशाच-गोत्रदेवी-क्षेत्रपाल-यक्ष-यक्षिणीप्रमुखदुष्टदेवतादिदोषं शङ्कमानोऽसमानं कोलाहलमकरोत्। सर्वाभिरपि ताभिर्मत्प्रियामात्रा च सम्भूयैकः कोऽपि वैद्यवर आकारितः। सोऽपि कठिनतरौ प्रकामं फुल्लौ मद्गल्लौ दृष्ट्वा हस्तस्पर्शेन मदभ्यर्णस्थितग्राम्यवधूजनप्रश्नेन नाड्यवलोकनेन च मां रोगरहितं मत्वा तण्डुलभृतमुखं मामज्ञासीत्। *ततो महाधूर्तः स वैद्योऽपि जगाद, भूरिद्रव्यमेकां नवप्रसूतां महिषीमेकमङ्गुलीयमेकं च शीर्षवेष्टनं* यदि मे दीयन्ते, तदाऽहमेनं सत्वरमेव नीरोगं करोमि।

ताभिरपि तदुक्ते चाऽङ्गीकृते स वैद्यः शस्त्रेण मद्गाल्लौ विदार्य रुधिररक्तांस्तांस्तण्डुलान् कीटककूटेन दर्शयित्वा तण्डुलीयोऽयं महारोगो मया निराकृत इति प्रतिपन्नं सर्वं मे दीयतामित्यवदत्। ततो भस्मनि निहितेषु तेषु तण्डुलेषु तुष्टाभिस्ताभिर्दत्तं तत्सर्वं लात्वा स वैद्यो ययौ। मया च बाढं गल्लपीडा सोढा, श्वशुरगृहसत्कभूरिधनव्ययश्च कारितः, तेन भो लोका! मत्तुल्यो मूर्खः क्वापि कोऽपि भवद्भिः किं दृष्टः? इति कामं कौतुककारिणीं बाल-गोपालादिलोकहास्यकारिणीं स्वकथामभिधाय विरते तस्मिंस्तैः पौरैस्ते चतुरोऽप्यभिदधिरे, भो भद्राः! सागरस्येव युष्मन्मूर्खत्वस्य पारं प्राप्तुं न वयमलं, तेन स एव साधुरेतद्विषये भवद्भिः पृष्टव्यः। ततस्ते चत्वारोऽपि मूर्खाः साधुतोऽपि सम्यक् प्रत्युत्तरमलभमानाः स्वं स्वं स्थानं ययुः **॥ इति मूर्खचरित्रे चतुर्थमूर्खविप्रकथा ॥ २२९ ॥**

॥ २३० ॥ स्वीकृतप्रतिज्ञापालने श्रीविक्रमादित्यकथा ॥

अङ्गीकृतेषु हि महतां गुणदोषविचारो न स्यात्, यतः—

चन्द्रः क्षयी प्रकृतिवक्रतनुर्जडात्मा, दोषाकरः स्फुरति मित्रविपत्तिकाले ।
मूर्ध्नि तथाऽपि विधृतः परमेश्वरेण, न ह्याश्रितेषु महतां गुणदोषचिन्ता ॥ १ ॥

अपि च—

महेश्वरेणेव कलङ्क्यपीन्दु-रङ्गीकृतं मुच्यत उत्तमैर्न ।
न दौःस्थ्यकृत्पुत्तलकं मुमोच, यद्विक्रमः सत्त्वमनोज्ञमूर्तिः ॥ २ ॥

[1]तथाहि—**मालवदेशशिरोमणिश्रीउज्जयिनीनगरे** द्विनवतिलक्षग्रामाधिपतिः संवत्सर-प्रवर्त्तकः सप्रसादवेतालादिबहुदेवसेवितः सकललोकाऽतिशायिसत्त्वशेवधिः **श्रीविक्रमादित्यो** राज्यं करोति स्म। एकदा स यन्मणि-मौक्तिक-लोह-सुवर्ण-रजत-त्रपु-लाक्ष-घृत-तैलादि वर्यमवर्यं वा केनापि नाऽऽदीयते, तन्मयाऽवश्यमाऽऽदेयमिति सर्वत्र नगरे पटहोद्घोषणापूर्वं स राजा प्रजां पालयति । सर्वत्र च पप्रथैषा वार्ता । यतः—

वार्ता च कौतुकवती विशदा च विद्या, लोकोत्तरः परिमलश्च कुरङ्गनाभेः ।
तैलस्य बिन्दुरिव वारिणि दुर्निवार-मेतत् त्रयं प्रसरतीति किमत्र चित्रम् ?॥ २॥

इमां वार्तां श्रुत्वा **चन्द्रपुरवासी चन्द्रदत्तश्रेष्ठी** तत्परीक्षार्थं दारिद्र्यपुत्तलोऽयमिति ललाटाक्षरयुतं लोहमयं पुत्तलकं विधाप्य गृहीत्वा चोज्जयिन्यां समागत्य विपणिमार्गे तस्थौ। दौर्गत्यमूर्तिरेषा त्रिलक्ष-कनकमूल्यं चाऽस्या इति पृच्छतां लोकानां पुरो वदन् स स्थितः। नगरवासिना केनाऽप्यनादत्ते तस्मिन् पुत्तले सायं राजनरै राज्ञोऽग्रे तद्व्यतिकरो विज्ञप्तः ।

१. तुला- सिंहासनद्वात्रिंशिका कथा ३२ ॥

राज्यं यातु श्रियो यान्तु, यान्तु प्राणा विनश्वराः ।
एका तु स्वमुखेनोक्ता, वाचा मा यातु शाश्वती ॥ ३॥

इति ध्यात्वा राज्ञा तदुक्तं मूल्यं दत्त्वा स लोहनरो जगृहे। तमादत्तं विलोक्य परिजनैः पौरजनैश्च सर्वैरपि राजा निन्दितः, अहो! निपुणेनाऽप्यनेन राज्ञा शोभनं नाऽकारि, यदसौ दौर्गत्यनिबन्धनं लोहनरो जगृहे। इति लोकाऽपवादमसहमानः साहसैकनिधिः स राजा रजन्याः प्रथमे यामे तं दारिद्र्यनरमादाय नगराद् बहिरेकस्य वटतरोरधस्तस्थौ । तदा च कापि कामिनी पुरस्तात्न्यस्तलोहनरं नरेश्वरमाशीर्वादपुरस्सरमवादीत्—

चिरं जीव चिरं नन्द, चिरं पालय मेदिनीम्। श्रीविक्रममहीनाथ!, सत्त्वरत्नमहानिधे!॥ ४॥

पीताम्बराऽऽभरणशालिनीं तां मानिनीं राजा व्याजहार, हे सुन्दरि! कासि त्वं? श्रीरहं दौर्गत्यनरयुतस्य तव गृहे नाऽहं स्थास्यामीत्याकर्ण्य याहीति राज्ञाऽभिहिता सा तिरोऽभूत्। अथ द्वितीयस्मिन्नपि यामे तथैव श्वेताऽम्बरभूषणभूषिता कापि कुरङ्गाऽक्षी राजानमाशीर्वादमभणत्। राज्ञा पृष्टा सापि **सरस्वतीत्य**भिधाय तिरोदधे। एवमेव तृतीयेऽपि यामे रक्ताऽम्बराऽऽभरणधारिणी काऽपि कामिनी क्ष्मापमाशीर्वादमभणत्।

राज्ञाऽभिहिता सापि विश्ववल्लभतादायिनी सौभाग्यश्रीरहमिति कथयित्वा तथैव तस्यां तिरोहितायां चतुर्थे यामे मरकतरत्नरश्मिशोभनतुरगमारूढो महानीलवसन-विभूषणधरः शुकपिच्छवर्णतिरस्कारिशरीरद्युतिपेशलः कोऽपि पुरुषः प्रादुरासीत्। कोऽसि त्वमिति पृष्टोऽयमपि भूपमभाषिष्ट, सकलगुणग्रामवनपल्लवनवनवाहोऽहं सत्त्वनरः, किं तु सर्वापदां निदानं हि दौर्गत्यं, यतः—

निर्द्रव्यो ह्रियमेति ह्रीपरिगतः प्रभ्रस्यते तेजसा, निस्तेजाः परिभूयते परिभवान्निर्वेदमागच्छति।
निर्विण्णः शुचमेति शोकसहितो बुद्ध्या परिभ्रस्यते, प्रभ्रष्टः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥

तेन दारिद्र्यवतस्तवाऽभ्यर्णे स्थातुं नाऽहमलं, तुभ्यमस्तु स्वस्ति याम्यहमन्यत्रेत्युदीर्य सद्यः प्रस्थातुमुन्मुखे तस्मिन् राजाऽब्रवीत्, भो भद्र! तव मम च सहैव सम्भवः सहैव च वृद्धिः, ततोऽसि मम त्वं सहोदरः, किं बहुना ? त्वां विना क्षणमप्यहं प्राणान् धर्तुं नाऽलमित्यभिधाय यावत्क्षुरिकया राजा स्वमुदरं विदारयति तावदकस्माद्मररूपः सोऽवनीपतिमवादीत्।

हे नरशार्दूल! धन्यस्त्वं येन त्वया निजवचनपालनायेदं विषममपि प्रतिपन्नमित्यभिधाय तस्मिंस्तस्थुषि राज्ञः पुरः स्थितः स लोहपुत्तलकः काञ्चनपुरुषः सम्पन्नः। [सत्त्वं च तत्र स्थितं विज्ञाय ता लक्ष्म्याद्या अपि पुनरागत्य राजानं प्रणम्य सेवकीभूय स्थिताः।] अहो! सत्त्वमहो! सत्त्वमिति प्रशंसितो राजा स्वप्रासादमासदत्। ॥ **इति स्वीकृतप्रतिज्ञापालने श्रीविक्रमादित्यकथा ॥ २३०॥**

॥ २३१॥ मतिमद्वचने लघूकव्यासकथा ॥

सर्वत्र मेधाविनामेव माहात्म्यमनर्गलं, यतः—

वक्खाणे राय-आत्थाणे, भासणे गुरु-सासणे ।
नाणे सोहण-विन्नाणे, मेहावी माणमंचइ ॥ १ ॥

किञ्च मतिमन्तो हि विषमेष्वपि प्रश्नेषु न मुह्यन्ति। यतः—

क्या बला आगि लागीति-वाक्यादाकूतमग्रहीत्। लघूको महिमुन्दस्य, किमज्ञेयं हि धीमताम् ? ॥

तथाहि—निखिलमेदिनीमण्डलतिलकोपमे **श्रीअहिम्मदावादे अकमपुरापरनाम्नि** महानगरे सकलक्ष्मामण्डलाऽऽखण्डलस्य **श्रीमहिमुन्दशाहिनरपुरन्दरस्य** सरस्वतीलब्धप्रसाद-श्चतुर्दशविद्याविशारदो **लघूको** नाम व्यासो द्विजन्मा प्रेमपात्रमजनि।

एकदा ग्रीष्मर्तौ गोपुरशिरस्थे गवाक्षे स्थितः स **श्रीशाहिरेकां** वरतुरगसनाथे **रथे** स्थितां सहकारफललम्भनिकां कर्तुं त्रिगोपुरपथे स्वैरं व्रजन्तीं **जयन्ती**नाम्नीं नगरश्रेष्ठिनः **सुतां पश्यति** स्म। तां च मणि-मौक्तिक-माणिक्य-कनकाऽऽभरणां यावकरसरञ्जितकरचरणां **ताम्बूलपूर्णवदनां** घनाऽञ्जनमञ्जुलनयनां स्वच्छतरवरदुकूलाऽम्बरधारिणीं सिन्दूरपूरपूरितसीमन्तहारिणीं रतिमिव रम्यरूपां सरस्वतीमिव सुन्दरस्वरूपां रोहिणीमिव राजमनश्चमत्कारकारिणीं लक्ष्मीमिव पुरुषोत्तमाऽभिप्रायाऽनुसारिणीं स्मरसञ्जीवनौषधीमिव सुन्दराकारां सुभगतरस्मितकटाक्षविलास-प्रपञ्चितपञ्चेषुविकारां पश्यतः प्रादुर्भूतमधुसूनुप्रभूतविकारजनितचित्तोपद्रवस्य तस्य **श्रीमहि-मुन्दशाहे**र्मुखतः 'क्या बला आगि लागी' इति पञ्चदशाऽक्षरप्रमाणाया **मालिनीवृत्तजातेरन्त्य-**सप्ताऽक्षराणि निर्गतानि। तस्यां च श्रेष्ठिसुतायां स्वस्थानं गतायां शाहेः स्वाऽन्तः **स्वस्थीभूतं**, परममी सप्ताऽपि वर्णाः पुनः पुनः पठनपाटवेन मुखे स्थिताः। इतश्च सायं प्रणामार्थं **लघूकः** समेतोऽभिहितश्च भूभुजा, भो **लघूक**! 'क्या बला आगि लागी' इति सप्ताक्षरानुसारेणास्म-न्मनोविजृम्भिताऽर्थसनाथां यवनवचनमयीं संस्कृतभाषामयीं चेमां समस्यां पूरयेति तद्वचः प्रभाते कथयिष्यामीति चाऽभिधाय **लघूको** निशि स्वगृहं ययौ।

अथ पार्थिवमनोविलसिताऽर्थरम्यां मालिनीवृत्तेन समस्यां विधायोषसि सभायां गत्वा च लघूको मङ्गलमयमाशीर्वादं च दत्त्वोपविष्टः, पृष्टश्च अभाषिष्ट—

हर-नयन-हुताश-ज्वालया हो जलाया, रति-रुदित-जलौघैः खाखबाकी **बहायां** ।
तदपि दहति चेतो मामकं भीदुरोगी, मदनशिरसि भूयः क्या बला आगि लागी ॥ ३॥

इति चतुरनरचित्तचमत्कारकारिणीं स्वमनोविकल्पिताऽर्थानुसारिणीमेनां **समस्यामाकर्ण्य** कामं सन्तुष्टः **शाहिः** करि-तुरग-कनक-धन-वसनदानादिना विशेषतो **लघूकं प्रसादपात्रं** विधत्ते स्म। **॥ इति मतिमद्वचने लघूकव्यासकथा ॥ २३१ ॥**

१. AHPD। बणाया - मु. ॥

॥ २३२॥ मतिविषये रविचन्द्रनामककविकथा ॥

कविकलाकलापकौशलाऽवहेलितसुरगुरूणां प्रज्ञागुरूणां कवीनां वचांसि सर्वेषां प्रीतये भवन्ति, यतः—

बलिहारी कविअण-तणी, जस मुख अमिय झरंत ।
नयण मिलें मनडूं ठरे, श्रवणे अमीय झरंत ॥ १॥

अपि च—

यज्जाह्नवीमेवमुदीरितेन, जग्राह दानं द्विगुणं रवीन्दुः ।
तच्चातुरीचोरितचित्तकर्णा-दाश्चर्यकृत्काव्यमहो कवीनाम्! ॥ २॥

तथाहि—**मालव**देशशिरोऽवतंस**मण्डपाचल**समीपवर्ति**धारा**नगरधराधीश**भोजराज**-स्यौदार्यगुणकीर्तिः सर्वत्र प्रथिता, इतश्च धाराधिपः **श्रीभोज**राजः कविकलाचमत्कृतचेता एकश एव दानं दत्ते, न पुनरिति **वाराणसीवासी रविचन्द्र**नामा द्विजन्मा श्रुत्वा दध्यौ, नाऽसौ राज्ञो दोषः, किन्तु कवीनामेवेति मत्वा रविचन्द्रोऽप्यनुक्रमेण भोजसभां समेत्याऽऽशीर्वादं चाऽदत्त्वा स्थितो राज्ञाऽभिदधे, हे कवे! कथमाशीर्वादो नाऽदायि? तेनोक्तं हे देव! सकलक्ष्मापालशिरोरत्नं कीर्तिकौमुदीविशदीकृताऽखिललोकं च त्वां वीक्ष्य चिन्ताचूर्णितचित्तस्य ममाऽऽशीर्वादो विस्मृतः, संशयद्वयं च नष्टम्। कथमिदं संशयद्वयमिति राज्ञाऽभिहितः सोऽभिदधे, निरालम्बने गगनाऽङ्गणे कथमेषा सुरसरित्? श्यामलेष्वपि निःशेषेषु शैलेषु कथमयं कैलासो धवलश्चेति संशयद्वयमाजन्मवर्ति मम समजनि। अथ कथं नष्टं तत्संशयद्वयमिति राज्ञा पृष्टः सोऽब्रवीत्—

धाराऽधीशधराऽधिनाथगणने कौतूहली यामयं,
वेधास्तद्गणनाच्चकार खटिकाखण्डेन रेखां दिवि ।
सा चेयं त्रिदशाऽपगा समभवत्त्वत्तुल्यभूमीधवा—
ऽभावात्तत्त्यजति स्म सोऽयमवनीपीठे तुषाराऽचलः ॥ १॥

अथ श्रीभोजोऽप्यतिचमत्कारकारिणाऽनेन काव्येन प्रकामं प्रमनाः काव्यवर्णसङ्ख्यया सुवर्ण-करि-तुरग-रथ-नगर-कनकलक्षदानेन तं सदकरोत्। अथ रविचन्द्रोऽपि भोजात्तदैव पुनरप्यधिकं दानमादित्सुस्तत्कालसमुत्पन्ननवीनार्थगर्भितं काव्यं बिभणिषुः स्वसमीपे पुरः पृष्ठे वामतो दक्षिणतश्च पश्यन् किं पश्यसीति भूपेन भणितः पुनरवादीत्, हे देव! तव पर्षदि समेतस्य मम समीपे मन्मित्रं मया सममागतमभूत्, स मम सुहृन्न दृश्यते, कः सुहृदिति राज्ञाभिहिते, स स्माह—

यो गङ्गामतरत्तथैव यमुनां यो नर्मदां शर्मदां ।
का वार्ता सरिदम्बुलङ्घनविधौ यश्चाऽर्णवं तीर्णवान् ।

१. काव्यवर्णसाकर्ण्यकरि° P। काव्यवर्णसर्वकरि° D॥

सोऽस्माकं नरनाथ! मस्तकमणेर्दौर्गत्यनामा सुहृत्-
त्वद्दानाऽम्बुनिधिप्रवाहलहरीमग्नोऽद्य सम्भाव्यते ॥ २ ॥

वर्यौदार्यगुणहारिणाऽनेन काव्येन कामं सन्तुष्टो राजा प्राग्दत्तदानमितं दानं पुनरपि तस्मै ददौ। **रविचन्द्रो**ऽपि विशेषतो लब्धराजसन्मानो निजं स्थानमाससाद। ॥ **इति मतिविषये रविचन्द्रनामकविकथा ॥ २३२॥**

॥ २३३॥ मन्त्रशक्तौ मन्त्रादिपरीक्षकचटुवणिक्कथा ॥

मणि-मन्त्र-यन्त्र-तन्त्रौषध्यादीनां माहात्म्यमचिन्त्यं, यतः—

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम् । निर्धना पृथिवी नास्ति, आम्नायाः खलु दुर्लभाः ॥ १ ॥

किं बहुना ? मृतानामपि मन्त्रशक्तिः स्फूर्तिमती भवति, यतः—

मान्त्रिका आत्मनो वैरं, मृता अपि त्यजन्ति न । यन्मृतोऽपि चटुश्चक्रे, भस्मसात् शाकिनीद्वयम् ॥ २ ॥

तथाहि—**मालवदेशवर्तिनि वीचीवाटाख्यविषये गुञ्जालग्रामे वीरचन्द्रो** नाम राजा, तत्र च ग्रामे **चटु**नामा [मन्त्र-यन्त्रादि]परीक्षको वणिक् वसति। तत्र च शाकिनीनामुपद्रवं भूयांसं विलोक्याऽन्यदा मन्त्र-यन्त्र-तन्त्रौषधादिप्रबलशक्तिमान् स **चटु**परीक्षको राज्ञाऽभ्यधायि, भो **चटो**! शाकिनीभिरत्र भूयान् लोकः पराभूतस्तेन तन्निग्रहं कुरु, अत्रार्थे च यथातथा तन्निग्रहं कुर्वतस्तव कोऽपि किमपि न कथयिष्यति। निखिलोपद्रवविधुविधुन्तुदो मम हस्तस्तव मस्तकेऽस्ति। अथ चटुरप्यचिन्त्यमन्त्रशक्तिभिर्निराकृताऽनेकदोषो राजाऽऽज्ञया तद्ग्रामसीमान-मुल्लङ्घ्य चतुर्ष्वपि दिक्षु कीलिका निधाप्य दक्षिणस्यां दिशि महान्तमेकं लोहमयमावासं कारयामास। अथ स चटुस्तत्राऽऽगारे प्रविश्य ज्वलदङ्गारभासुरायां महत्यां गर्तायां स्वं वाममंहिं विमुच्य वह्निमुद्दीपयामास। यथा यथा तत्पादो ज्वलति, तथा तथा तद्ग्रामवासी सर्वोऽपि शाकिनीवर्गो ज्वलदंहिः कामोर्ध्वीकृतपरिधानवस्त्रो मुक्तकेशः प्रकामं पूत्कुर्वंस्तद्गृह-द्वारे स्थितस्तमूचे, हे चटो! वयं यामोऽस्मान्मुञ्चेत्यभिहितः स स्माऽऽह, अस्य ग्रामस्य सीमानमुल्लङ्घ्य गतासु भवतीषु वह्नितोऽहं पादं निष्कासयिष्यामीति तदुक्तमाकर्ण्य गतासु तासु चटुर्गर्तातः पादं निष्कास्य दुग्धेन प्रक्षाल्य च स्वं स्थानमाययौ। अथ कस्यचिन्माता, कस्यचित्सुता, कस्यचिद्भगिनी, कस्यचित्पत्नी, कस्यचिन्मातृष्वसा, कस्यचित्पितृष्वसा चेति सर्वा अपि ताः शाकिन्यः प्रादुर्भूताः सर्वत्र निन्दाऽऽस्पदं बभूवुः। अथ तासां सर्वासां मध्ये भृशमुत्कटं शाकिनीद्वयं **चटु**मादातुं मन्त्रं विधाय शनिदिने स्नात्वा प्रभाते तस्थिवांसं तं **चटुं** प्राह, हे **चटो** ! मया धान्यं विक्रीतं, तन्नाणकमिदमाददामि, विलोक्य समर्पय। सोऽपि तथैवोद्घाटितमूर्धा तामाह, हे सुभगे! शुद्धमिदं नाणकं गृहाण। एवं तेन त्रिरुक्ते चैका शाकिनी तं गृहीत्वा ययौ।

एवं द्वितीयस्यामपि शाकिन्यां गतायां तस्योदरे महती पीडा जाता। अथ बाढं प्रादुर्भूतौदरपीडश्चटुर्दध्यौ, युवां गृह्णीत चेति मद्वचसैवाऽहं शाकिनीभ्यां गृहीतः, तेन मम जीवितव्यं सर्वथा नास्तीति मत्वा दिवसाऽवशेषे स चतुरोऽपि निजान् पुत्रान् प्राह, भोः पुत्राः! अद्याऽर्धरात्रे मम मृतिरिति मम चितायां मनुष्यत्रयदहननिमित्तं काष्ठं निधेयं, मन्मन्त्रिताश्चाऽमी माषा अर्धज्वलिते मयि मच्चिताऽन्तः क्षेप्या इत्यभिधाय मृते च तस्मिंस्तत्सुतैस्तथैव विहिते विकरालाऽऽकारधारिण्यौ प्रकामं पूत्कारकारिण्यौ ते शाकिन्यौ तच्चिताऽन्तः पततः स्म। अहो! अस्य मन्त्रशक्तिरिति लोकैरप्यभिदधिरे। ॥ **इति मन्त्रशक्तौ मन्त्रादिपरीक्षकचटुवणिक्कथा** ॥ २३३ ॥

॥ २३४॥ एकेनैवोत्तरेण बहूनां संशयानां निराकरणे फूलडीकथा ॥

एकमप्यर्हद्वचनं जीवा-ऽजीव-पुण्या-ऽपुण्येहलोक-परलोक-स्वर्गा-ऽपवर्ग-सुख-दुःखादिनानासंशयान् सर्वेषां नरा-ऽमर-तिरश्चां युगपन्निराकरोति। यतः—

अप्येकमर्हद्वचनं जहार, यत्संशयाऽऽलिं युगपज्जनानाम् ।
श्रुत्वा कथां वल्लववल्लभाया, भिल्लस्य च स्यात् किमु तत्र चित्रम् ? ॥ १ ॥

तथाहि—**संगधरग्रामे** गो-महिषी-वृषभादिबहुपशुश्रीमान् **बूढणाह्व** आभीरः, तस्य च **फूलडी**प्रमुखाः पञ्चदश कलत्राणि, तासां सर्वासां परस्परं भूयसी प्रीतिः, तेनैताः सर्वा अपि **फूलडी**मेव बहुमन्यन्ते, सर्वत्र तस्या एव वचनमेताः सर्वाः प्रमाणीकुर्वते। **बूढणो**पि **फूलडी**मेव प्रतिदिनं बहुमन्यते। एकदा शरत्काले गोश्चारयितुं गतो **बूढणः**, तदा सर्वा अपि ता वनविनोदविलोकनोत्सुकास्तदर्थं भक्तमादाय पुरपरिसरे पतिपार्श्वे जग्मुः। तदा च भोजनं कुर्वता **बूढणेन फूलडी**प्रमुखास्ताः सर्वा अप्यनुक्रमेणाऽभिदधिरे।

कथमद्य क्षिप्रचटिका भूयसी राद्धा? १, कथमद्य तक्रे मधुरिमा स्तोकः? २, सा प्रातिवेश्मिकी सश्मश्रुः स्त्री गृहे वर्तते? ३, अथ तव समाधिरस्ति? ४, कथमद्य कर्कोटकशाकोऽयमक्षतः पाचितः? ५, कथमियं शुनी व्याजुघोट? ६, सा महिषी गर्भवती जाता? ७, त्वमद्य मार्गे श्रान्ताऽसि न वेति ? ८, अथ सत्रागारे भोजनं दीयते ? ९, कथमद्याऽनेन वाहेन पयः प्रचुरमेवेति? १०, तव धम्मिलः सज्जीकृतोऽस्ति ? ११, कर्णयोः कुण्डलद्वयं परिहितं? १२, तस्य दिवाकीर्तेर्गृहं ज्ञातं ? १३, गृहाणाऽमूनि फलानि १४, एता अजा गणिताः? १५, इति क्रमेण पृष्टानां सर्वासामासां भृशं माननीयवचना **फूलडी** सर्वेषाममीषां प्रश्नानामुत्तरं युगपदेकेन शब्देन दत्ते स्म। '**पाली नत्थि** इति' तथाहि तद्व्यक्तार्थस्त्वयं—

कथं क्षिप्रचटिका बह्वी राद्धा इत्यत्र तन्मानविषयिणी पाली नास्ति, मापकपात्रविशेषः पाली इति लोके गीयते, इत्येकप्रश्नोत्तरं १, तक्रे मधुरिमा कथं स्तोक इत्यत्र बदरीबब्बुलादिपत्र-भवस्तिर्यग्भक्ष्यविशेषः पालिरिति सा नास्ति इति द्वितीय० २, सश्मश्रुकास्त्री पालिरिति तेन सा

गृहे नाऽस्तीति तृतीय० ३, अद्य तव समाधिरस्तीत्यत्र वेलैकान्तरादिज्वरवारकः पाली इति तेनाद्य पालिर्ज्वरवारको नास्तीति चतुर्थ० ४, कर्कोटकशाकविषये क्षुरिका पालिरिति पालिर्नास्ति, तेन विना चाऽमी कर्कोटका अक्षताः पाचिता इति पञ्चम० ५, कथं शुनी व्याजुघोटेत्यत्र पालिरिति पोषिता लोकभाषया, तेनैषा शुनी पोषिता नास्तीति षष्ठ० ६, महिषी गर्भवतीति गोमहिष्यादिगर्भकालः पालिरिति लोके, तेनाऽधुना समयो नास्तीति सप्तम० ७, मार्गे श्रान्ताऽसीत्यर्थे रथादिवाहनं विना व्रजन्ती स्त्री पालि इति लोके, तेनैषा पालिर्नास्तीति रथमारूढा समागताऽस्तीत्यष्टम० ८, सत्रागारे भोजनमित्यर्थे सत्रवेश्मनि यत्कल्पितं भोजनं दीयते तत्पालिरिति तेन पालिर्नास्तीति नवम० ९, कथं पयः प्रचुरमेतीत्यर्थे पालिः सेतुरिति, तेन पालिः सेतुरत्र नास्तीति दशम० १०, धम्मिल्लः सज्जीकृत इत्यत्र मम मस्तके पालिर्यूका नाऽस्तीति मत्केशपाशः प्रगुण एवास्तीत्यैकादश० ११, कर्णयोः कुण्डलपरिधानमित्यत्र पालिः कर्णलतिका, तेन पालिर्नास्ति, तां विना च कर्णभूषणपरिधानं नेति द्वादश० १२, दिवाकीर्तेगृहं ज्ञातमित्यत्र पालिश्चिह्नं, तेन तद्गृहे पालिश्चिह्नं नास्तीति त्रयोदश० १३, गृहाणाऽमूनि फलानीत्यत्र पालिरुत्सङ्गवस्त्रं नाऽस्तीति चतुर्दश० १४, एता अजा गणिता इत्यत्र पालिः प्रान्तः, तेनैतासां भूयसीनामजानां पालिः प्रान्तो नाऽस्तीति पञ्चदशप्रश्नोत्तरम् १५, इति तदभिहितमेकेनैव शब्देन स्वप्रश्नोत्तरं सम्यगवगम्य मुमुदे बूढणः। **इत्येकेनैवोत्तरेण बहूनां संशयानां निराकरणे फूलडीनामाऽऽभीरभार्याकथा ॥ २३४॥**

॥ २३५॥ एकोत्तरेण शंसयत्रयनाशे शार्दूलकथा ॥

[1]अत्राऽर्थे द्वितीयाऽपि भिल्लकथा, तथाहि—**मालवदेशवागडदेशयोरन्तरालवर्तिनि हेवडाख्यपर्वतपरिसरे पूरणग्रामे पार्थ** इव कोदण्डकलाकुशलः **कंसारिरिव** श्यामलः **कालिन्दिसोदर** इव प्रकामं क्रूरः, कलिकाल इव प्रोन्मूलितपुण्याङ्कुरः **कीचकारातिरिव** सदैव प्रचण्डः, **चाणूर** इव भृशमुद्दण्डः **शार्दूलनामा** भिल्लो वसति स्म। तस्य च **वीरमती-धीरमती-श्रीमतीनाम्न्यस्तिस्रः** स्त्रियः, सर्वदा ताश्च परस्परं प्रीतिपरायणाः। एकदा मृगयाव्यापारखिन्नस्य प्राणनाथस्य पार्श्वे स्थितास्ता महानिशीथे क्रमेणैवमूचिरे, हे नाथ! मम मनोविनोदकरणप्रङ्कं गानं विधेहीत्येका, हे स्वामिन्नहं बाढं क्षुधार्त्ताऽस्मीति नवीनमामिषमानय, यतस्तद्भोजनेच्छा मम महीयस्यस्तीति द्वितीया, हे स्वामिन्! मम प्रकामं पिपासा लग्नाऽस्ति, ततः सज्जनस्वान्तमिव निर्मलं, बालालिङ्गनमिव शीतलं, धूलिधूसरशिशुवचनमिव मधुरं, चकितमृगलोचनालोचना-ऽवलोकनमिव बन्धुरं सलिलं मम पाययेति प्रेमपल्वलभूदारोदाराणां तेषां दाराणां क्रमेण पृथक् पृथक् वचनमाकर्ण्य **'सरो नत्थि'** इत्येकेनैव वचसा स शार्दूलः सर्वासां तासामुत्तरं वितत्तार।

१. तुला - उपदेशप्रासादे ल्या. १ ॥

'सरो नत्थीति' स्वरो नाऽस्ति, स्वरेण विना गानमविगानं न स्यात्, यतः—

मूर्खस्य काव्यकरणं, गीतमकण्ठस्य ललितमधनस्य ।
वृद्धस्य विषयवाञ्छा, परिहास्यपदानि चत्वारि ॥ १॥

इत्याद्याया उत्तरम्। शरो बाणो नास्ति, तेन विना च हरिण-सूकरादिश्वापदहननं न स्यादिति द्वितीयस्याः प्रत्युत्तरः। सरः पद्माकरो नास्ति, तेन विना च नीराऽऽनयनं दुष्करमिति तृतीयस्याः प्रतिवचः। इति युगपदेकेनैव वचनेन स्वं स्वमुत्तरमुपलभ्य तास्तिस्रोऽपि मुमुदिरे। **॥ इति पूर्वोक्तार्थे द्वितीया कथा ॥ २३५॥**

॥ २३६॥ न्यायनिपुणतायां रत्नसारश्रेष्ठिकथा॥

न्यायो हि प्रसिद्धिनिबन्धनं, यतः—

सम्बन्धी प्रणयैः सरः कुवलयैः सेना च रङ्गद्धयैः
स्त्रीबाहुः वलयैः पुरी च निलयैर्नृत्यं च नाना-लयैः ।
गन्धर्वश्च रयैः सभा सहृदयैरात्तव्रता वाङ्मयैः
शिष्यौघो विनयैः कुलं च तनयैराभाति भूपो नयैः ॥ १॥

न्यायेषु हि केषामेव प्रागल्भ्यं, यतः—

विषमेष्वपि न्यायेषु, न मुह्यन्ति मनीषिणः। अत्र श्रेष्ठी रत्नसारो, निदर्शनमजायत ॥ २॥

तथाहि—**पुराणपुरे** पुरे **जितारिराजस्य** विशेषतो बहुमानभाजनं **रत्नसारः** श्रेष्ठी, तं च कन्या-गो-भूम्यलीकन्यासादिषु सर्वत्र विवादे न्यायं विदधानं विलोक्य **धनवसुना** पुत्रेणाऽभाणि—

हे तात! न्यायं कुर्वाणस्य क्वचिद्यदि वैषम्यं स्यात्तदा वाणिजानामात्मनां धन-कुटुम्ब-गृह-परिवारादिहानिः स्यात्, तेनाऽऽत्मनामिदं नाऽर्हति, किंच न हि सर्वं सममेव स्यात्, क्वापि प्रेम-राज-मान-भय-पारवश्यादिना वैषम्यमपि स्यात्, तेन मुच्यतां सर्वत्र न्यायकरणम्। इति बाढमभिहितोऽपि पिता तदुक्तं नाऽङ्गीचकार। तदा रोषवशाद् गृहान्निर्गत्य परदेशं यियासुर्निशि निकटवर्तिनि **सूरणग्रामे पुण्यसार**व्यवहारिणो गृहे शेते स्म। तस्य च व्यवहारिणः पत्नीद्वयमस्ति, एका वृद्धा **पुण्यवती** सुन्दराऽऽचारा, द्वितीया च **धनवती** स्वैरिणी दुराचारा। पत्यौ च देशान्तरं गते सा **धनवती** तस्यामेव निशि लघुं स्वमर्भकं पालनके सुप्तं विमुच्य केनाऽप्युपपतिना सह रेमे। तदा च मातरं विना बाढं रुदन्तं तं बालं श्रुत्वा तां जारो व्याजहार, हे सुभगे! बाले रुदति नाऽऽवयोः सम्भोगः श्रेयान् तेनाहमितो व्रजन्नस्मि।

तेनेत्यभिहिता सा पापा पुत्रं व्यापाद्याऽऽगत्य च भूयो रन्तुं प्रवृत्ता। तया पापया बालं हतं ज्ञात्वा धिक् त्वां बालहत्याविधायिनीमिति भूयो भूयो वदन् स निर्ययौ। अथोभयभ्रष्टा सा स्वैरिणी सविलापमिदमूचे, भो! भो! लोका! धावत धावत, अनया पापया सततं वैरिण्या मम

सपत्न्या प्राणप्रियो देवकुमारतुल्यो मम सुतो निजघ्ने, इत्याकर्ण्याऽऽगता लोका धिक् त्वामधर्मकर्मकारिणीं बालमारिणीं सततदुराचारिणीं कुलकलङ्कविस्तारिणीमिति तां पुण्यवतीं तर्जयन्ति स्म। तथा तथा स्वैरिण्यपि स्वां स्त्रीचरित्रकलां मञ्जुलां मन्यमानाऽतिशायिरोदना-ऽऽक्रन्दन-निपतन-विलपन-मूर्च्छन-दैवोपालम्भदानाऽऽदिप्रभूतदुःखचेष्टां कुर्वाणा स्वं मूर्धानं हृदयं च पाणिभ्यां युगपन्निजघान। अथ च ते उभे अपि मिथः कलहं कुर्वाणे प्रातः **पुराणपुरे रत्नसारस्य** श्रेष्ठिनो गृहमागते। सम्यगवगततच्चरित्रो **धनवसु**रपि स्वपितुर्न्यायकरणकौशलं जिज्ञासुः स्वगृहमाययौ।

तदा च बाढं विवदमानयोरनयोर्दुरवबोधं विवादं पश्यति पौरवर्गे, पुत्रेऽपि च पुरस्तस्थुषि श्रेष्ठ्यभाषिष्ट - हे भद्रे! युवयोर्मध्याद्या काचिद्वस्त्राणि हित्वा यथाजाता भूत्वा महान्तमेनं न्यग्रोधपादपं त्रिःप्रदक्षिणीकरोति सा निर्दोषा, अन्या च सदोषा बालहत्याविधायिनी, इति श्रेष्ठिवचः श्रुत्वा **पुण्यवती** प्राह, हे तात! बालहत्यापातकं ममाऽस्तु, अहं पापिनी, मया दुराचारिण्या महदकृत्यमेतदकारि, तेनाऽहं निग्रहमर्हामि, मम च राजदण्डो विधीयताम्, एतत्सर्वमस्तु परमहं स्त्रीणां भृशमनुचितमेतत्कर्म न करिष्यामीत्यभिधाय स्थितायां तस्यां द्वितीया कैतवेन विलापं कृतवती **धनवती** स्माऽऽह, हे तात! त्रिःप्रदक्षिणाप्रदानमास्तां किन्त्वेकविंशतिशो न्यग्रोधमिममहं प्रदक्षिणीकरोमि, का भीतिर्निर्दोषाया ममेति प्रतिपाद्य सद्य एव तथैव विधातुमुद्यतां तामियमेव शिशुवधविधायिनीति श्रेष्ठी निरणैषीत्। **धनवसु**रपि यथाभूतं सद्भूतमेनं न्यायं कुर्वाणं पितरं निरीक्ष्य मुदमधात्। ॥ **इति न्यायनिपुणतायां रत्नसारश्रेष्ठिकथा ॥ २३६ ॥**

॥ २३७॥ धर्मतो जयाऽधिगमे सुरूपाश्रेष्ठिनीकथा॥

धर्मादेव जयः, सदा यतः—

जयसिरिवंछियसुहए, अणिट्ठहरणे तिवग्गसारंमि ।
इहपरलोगहियट्ठे, सम्मं धम्मंमि उज्जमह ॥ १ ॥

अपि च—

प्रायः पुण्यवतामेव, जयः कीर्तिमयः सखे!। तैलान्तःपतितस्फार-रत्नहारकथा यथा ॥ २॥

तथाहि—**समिआण**दुर्गपरिसरे **महेवान**नगरे **सुरत्राण**श्रेष्ठिनो **धनश्री**गेहिनी, **सुरूपा** नाम च तस्या वयस्या। अन्यदा सर्वदा सुकृतस्वरूपायां तस्यां **सुरूपा**यां **धनश्री**वेश्मनि सखीस्नेहाऽऽलापार्थं समेतायां भित्तिकीलके लम्बितोऽधस्तात् स्थिततैलपात्रः सपादलक्षकनक-मूल्यो द्वात्रिंशद्रत्नैर्निर्मितो हारो बलिना महताऽऽखुना कृत्तस्तत्तैलाऽन्तर्न्यपतत्। निर्विकल्पा **सुरूपा** स्वगृहमगात्। धनश्रीरपि तत्र तं हारमपश्यन्तीति दध्यौ, नूनं मदीयं हारं **सुरूपा** जग्राह।

यतो मां सुरूपां च विनाऽन्यः कोऽपि मद्गृहेऽधुना समेतो नास्तीति महता धननाश-व्यसनेन हिमेन दग्धा पद्मिनीव सा भृशं म्लानमुखी बभूव। अथ धनश्रिया भोक्तुमागतस्य स्वभर्तुर्हारव्यतिकरोऽभिदधे, तेनाऽपि सुरूपायाः पत्युः, तदैव सुकृतवती सुरूपापि स्वपतिसमीपतो हारस्वरूपं ज्ञात्वा भृशं खेदं दधौ, एतत्पतिरपि निर्दोषां स्वयोषां मत्वा रहसि सुरत्राणश्रेष्ठिनमभाषिष्ट, हे मित्र! तव हारो मम स्त्रिया गृहीतो नास्ति, त्वच्चेतसि च यदि सत्यमस्ति यन्नूनमनया हारो जगृहे, तदा तत्समानमूल्यो मम हारोऽयमादीयतामित्यभिधाय तेन स्वस्त्रीहारस्तस्मै दत्तः, तेनापि च स गृहीतः, सर्वोऽप्यसौ व्यतिकरो रहसि सम्पन्नः।

अथ क्रमेण तस्मिंस्तैले विक्रीते, तैलमलाऽपकर्षणे [कृते] हारे च निर्गते **सुरत्राण**-श्रेष्ठी भृशं शुशोच। अहो! पापिना दुर्मतिना मया सा साध्वी मुधा कलङ्किता, हारं चाऽऽददानेन मया श्वपचकुलोचितं व्यधायि, यतः—

[सदाचारप्रवृत्तानां, स्युः समीहितसिद्धयः। असम्पदः सम्पदः स्युः, पुंसां सत्यप्रभावतः ॥ ३ ॥]

सदा सदाचारयोरनयोरभ्याख्यानदोषो मया विनिर्ममे। अथ च प्रत्यहं पुण्यपुण्य-योरनयोः पादपाथोजप्रणमनपुरस्सरं तद्धारं प्रत्यर्पयामीति मत्वा सुरत्राणस्तथैव विदधे। पुण्यवती **सुरूपा**पि हारप्राप्तितो निजदूषणनिराकरणं चिन्तामणिमिव बहुगुणं मन्यमाना पतियुता तपस्यामादाय विहितदुस्तपतपा दिवं ययौ। ॥ **इति धर्मतो जयाऽधिगमे सुरूपा-श्रेष्ठिनीकथा।** ॥ २३७ ॥

॥ २३८ ॥ ललाटलिखितादधिकं जीवो नाप्नोतीत्यर्थे पितापुत्रपत्नीकथा ॥

भाललिखितं हि केनाऽप्यन्यथा कर्तुं न शक्यते, यतः—

आरोहतु गिरिशिखरं, समुद्रमुल्लङ्घ्य यातु पातालम् ।
विधिलिखिताऽक्षरमालं, फलति कपालं न भूपालः ॥ १ ॥

प्राप्नोति तुष्टदेवोऽपि, न दैवादधिकं पुमान्। श्रूयतां हि कथात्रार्थे, पितुर्मातुः सुतस्य च ॥ २ ॥

तथाहि—एकस्मिन् विजने वने पिता माता सुतश्चेति विप्रत्रयं प्रकामं दुर्गतं वसति, भृशं भगवद्भक्तिकुर्वाणास्ते त्रयोऽपि वासरान् गमयन्ति।

अन्यदैकं **पुरुषोत्तम**नामानं द्विजन्मानं पुरो गच्छन्तं ते त्रयोऽपि प्रोचिरे, हे पुरुषरत्न! त्वं क्व यासि? भगवतोऽभ्यर्णं यामीति तेनोक्ते पुनरपि तेऽभिदधिरे, हे द्विज! वयं भगवद्भक्तिं कुर्वाणाः स्म, परं त्रयाणामप्यस्माकमेकमेव धौतिकमस्ति, तेन च वयं तादृशी परमेश्वरपर्युपास्तिं कर्तुमशक्ताः, तेनाऽस्मद्वचनं श्रीभगवतो वाच्यं, यथा स भगवानस्माकमपरं धौतिकद्वयं दत्ते। अथ तत्राऽऽगतेन विप्रेण विज्ञप्तो भगवानाह- हे पुरुषोत्तम! तेषामेकमप्यम्बरमहं लास्यामि, यतस्तद्भालेऽधिकं लिखितं नास्तीति भगवदुक्तं तेन तेषां कथितं, तदाकर्ण्य ते त्रयोऽपि खेदमापन्नाः। अथाऽन्यदा पुनरपि तेषां विज्ञप्तिस्तेन भगवतः पुरो विहिता, भगवानूचिवान् हे पुरुषोत्तम! तेषामेकमेवाऽम्बरं घटते, यतस्तेषां तदेवोचितं, यतः—

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं,
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ च नाऽतोऽधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः,
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ ३॥

तेन पुरुषोत्तमेन पुनः पुनः कथनेन तुष्टो भगवांस्तेषां प्रत्येकमेकैकं वरमिति वरत्रयं वितीर्णवान्। अथ सा विप्रपत्नी श्यामा स्थूलोदरी दन्तुरा लम्बोष्ठी बहुपतितपयोधरा काककटुस्वरा विषममुखी दुःस्पर्शकरा कलिकालभूपालस्य पट्टराज्ञीव प्रकामं कुरूपेति रूपदुःखेन पराभूता स्वेनैकेन वरेण परमेश्वरस्य पुरो रूपसौभाग्यमयाचिष्ट।

अथ तत्कालमेव भगवतः प्रसादात्सा सुरूपा जाता। वरीयस्तरवसनां पक्वदाडिम-बीजोपमदशनां प्रोत्तुङ्गपीनपयोधरां प्रत्यग्रप्रवालजित्वराऽधरां प्रकामोत्तुङ्गनासावंशां श्रवणयुगल-धृष्टांऽसदेशां स्मेरसरोजमञ्जुलकरचरणां दिव्याऽऽभरणां कलकण्ठकमनीयस्वरां सर्वावयवबन्धुरां पूर्णपार्वणेन्दुवदनां चकितमृगशावनयनां तप्तचारुचामीकरवपुर्वर्णां जिह्वापराभूतनवीनचूतपर्णां लक्ष्मीमिव पुरुषोत्तमप्रियां, पौलोमीमिव विबुधाऽधिराजवल्लभां, पार्वतीमिव सदैव सर्वज्ञप्रणयिनीं, रतिमिव कामानन्दविधायिनीं, सावित्रीमिव प्रीतलोकेशां, रोहिणीमिव द्विजेशसुखदायिनीं, रत्नादेवीमिव मित्रप्रमोदपटीयसीं, रम्भामिव सुमनोविलासिनीं तां विलोक्य मृगयार्थं वने भ्रमन् कोऽपि राजपुत्रस्तां जहे।

तद्वियोगार्तौ तौ पितापुत्रौ भृशमशर्म लभेते स्म। अथ स द्विजस्तां तादृशीं राजसूनुना सह रममाणामालोक्य कुपितः स्वार्थध्वंसविधायिनीं तां स्वेनैकेन वरेण ग्रामसूकरीं चकार। अथ सा प्रत्यहं पौरपुरीषपूरपूर्णवदना बाष्पपटलकर्दमितभूभागा भृशं शोकाऽऽकुला स्वपुत्राग्रे समेत्य रुदति स्म। सोऽपि प्रकामं पीडातुरां सकललोकनिन्दासमुद्भूताऽशर्मकातरां स्वां मातरं विलोक्य स्वेनैकेन वरेण पूर्वस्वरूपां कुरूपामेव तां विनिर्ममे। इति ते त्रयोऽपि तादृशा एव तस्थिवांसः। ॥ **इति ललाटलिखितादधिकं जीवो नाऽऽप्नोतीत्यर्थे पितापुत्रपत्नीकथा ॥ २३८ ॥**

॥ २३९॥ सङ्गप्राधान्ये प्रजापालनृपकथा॥

संवासादेव हि नृणामधम-मध्यमोत्तमगुणाः सञ्जायन्ते, यतः—

सन्तप्ताऽयसि संस्थितस्य पयसो नामापि न ज्ञायते, मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।
स्वातौ[1] सागरशुक्तिसम्पुटगतं तज्जायते मौक्तिकं, प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते ॥ १ ॥

अपि च—

यादृशैः क्रियते वास-स्तादृशोऽभ्याससङ्गमः। संवसन् सुदृशा सार्धं, योगी यत्स्मरवानभूत् ॥ २ ॥

तथाहि— रत्नपुरे पुरे प्रजापालनामा राजा, स चैकदा दुर्विनीततुरगाऽपहृतो गहने वने भ्रमन्नेकं महन्मठान्तर्निविष्टं भूरिभस्मभराऽभ्यङ्गभासुरं शूथकन्थालिङ्गितगलकन्दलं मृगशृङ्ग-

१. स्वात्यां सागरशुक्तिमध्यपतितं सन्मौक्तिकं जायते- इति भर्तृहरिशतके ॥

शोभितकण्ठं कामोत्कटकपटकार्पटिकवेषविषममूर्तिं ध्याननिमीलितलोचनं त्रिलोचनमिव भैरवाकारं योगिनं निरीक्ष्य पञ्चाङ्गस्पृष्टभूपीठो नमति स्म, ब्रूते स्म च— हे नाथ! सङ्गो बलवान् ज्ञानयोगो वा ? ज्ञानं बलवत्तरमिति ज्ञानपक्षे तेन योगिनाऽङ्गीकृते राजा सङ्गो बलीति प्रतिशुश्राव। हे नाथ! किमजागलस्तनतुलितेन वराकेण ज्ञानेन? सङ्गो हि बलवत्तरः, यतः—

उत्तमजणसंसग्गो, सीलदरिद्दंपि कुणइ सीलड्ढं ।
जह मेरुगिरिविलग्गं, तणंपि कणगत्तणमुवेई ॥ ३॥

अपि च—

कर्णारुन्तुदमन्तरेण रणितं गाहस्व काकस्त्व ।
माकन्दं मकरन्दसुन्दरतरं त्वां कोकिलं मन्महे ।
शोभन्ते स्थितिसौष्ठवेन कतिचिद्वस्तूनि कस्तूरिकां ।
नेपालक्षितिपालभालफलके पङ्केन शङ्केत कः ॥ ४॥

इति सङ्गं बलीयांसं मत्वा सद्यः समागते स्वकटके गत्वा स राजा रतिमिव रूपवतीं स्वामेकां दासीं योगिनोऽभ्यर्णे प्राहिणोत्।

का त्वमिति योगिना पृष्टा साऽभाषिष्ट, मत्पितृगृहान्मामादाय मत्पतिः स्वगृहं व्रजन्मार्गे तस्करभयान्मां हित्वा काकनाशमनश्यत्। तेन श्रेष्ठिवधूरहमेकाकिनी मृगीव वने भ्रमन्ती त्वत्समीपे समेताऽस्मीति प्रतिपाद्य सा तन्मठे तस्थौ। अथ सायं दिव्यनेपथ्यधारिणी स्मरविकारकारिणी सा मायया तं योगिनं मोहयति स्म। स्त्रीणां हि मायाप्रपञ्चः सुलभः, यतः—

अन्नं रमइ निरिक्खइ, अन्नं चिंतेइ भासए अन्नं ।
अन्नस्स देइ दोसं, कवडकुडी कामिणी विअडा ॥ ५॥

अथ स योग्यपि सन्ध्यासमये रहोदेशे रूपयौवनवतीं स्मरसञ्जीवनजीवातुमिवैनां दृष्ट्वा क्रमेण कन्दर्पपीडितः समजनि। अथ सा स्वसमीपार्द्धङ्गिकामहिफेनं कनकबीजानि चेत्यादि मदनमदोद्दीपकं वस्तु तस्मै दत्ते स्म। स योगी च तेषां वस्तूनां भक्षणात्तस्याः करस्पर्शाद्रहोदेशाच्च स्मरातुरः कामचेष्टां प्रादुरकरोत्। तं च भृशमनङ्गसङ्गविह्वलं विलोक्य सा नष्टा तस्य मठस्य परितो भ्रमति, तस्याः पृष्ठ स योग्यपि।

अथ सा तं प्रकामं कामातुरं निरीक्ष्य मठाऽन्तः प्रविश्य तद्द्वारं पिधाय शृङ्खलां च दत्त्वा मध्ये तस्थौ। अथ स योगी तन्मठान्तः प्रवेशमलभमानः षट्पदः पद्मिनीमिव तामीहमानश्च मठोपरिष्टाच्चटति स्म। ततो मठोपरि च छिद्रं कृत्वाऽधस्तान्निपतन् स तीक्ष्णतरतद्वंशकोटिविद्धकटीतटोऽन्तराल एव कुष्माण्डफलवल्लम्बमानस्तस्थिवान्। अवश्याऽशर्मविधायिनीं स्मरस्य दशमीं दशां प्राप्त इव स योगी चतुरोऽपि यामिनीयामानेवमेव

१. भृङ्गिका = अतिविषनी कली । अहिफेन = अफीण

गमयति स्म। अथ प्रभाते स राजा तत्र समागत्य तादृगवस्थं तं योगिनं प्राह, हे योगिन्! किं त्वदुक्तं मदुक्तं वा समीचीनमिति श्रुत्वा स योग्यपि राज्ञः पक्षमङ्गीचकार। ॥ **इति सङ्गप्राधान्ये प्रजापालराजकथा ॥ २३९॥**

॥ २४०॥ पण्डित्पाण्डित्ये सरस्वतीकुटुम्बकथा॥

विशारदै र्हि तदभिप्रायप्रादुष्करणेन सुरा अपि तोषं नीयन्ते, यतः-

सुरैः कृता अपि प्रश्नाः, प्रोत्तीर्यन्ते विशारदैः। स्त्रीपुंवच्चेति निर्णीतं, पुरा ब्रह्मकुलेन यत् ॥ १॥

तथाहि—**गौड**देशवासिनो माता-पिता-पुत्र-स्नुषाश्चत्वारोऽपि मेधाविनः सरस्वतीकुटुम्बक-मिति प्रसिद्धिभाजो लघुकाश्मीरबिरुदधारिण्यां **धारानगर्यां** राज्यं कुर्वाणं **श्रीभोज**राजं दिदृक्षवः समुपेयिवांसः। तेऽथ चत्वारोऽपि **भोज**राजमिति स्तुवन्ति स्म।

चत्वारः पुरुषोत्तमस्य नियताः स्वःसद्गुरोर्द्वादश ।
द्विःपङ्क्तिप्रमिता निशाचरपतेर्भानोः सहस्रं कराः ।
नैषः कोटिसहस्रलक्षनियमः स्वामिन्! प्रतापस्य ते ।
निःसङ्ख्यारिमहीभुजां हि युगपद्यः श्रीकरानग्रहीत् ॥ २॥
शश्वद्वैरिजनाऽभिमानसमिधां सम्भारसम्पूरितः ।
सिक्तस्तत्कमलेक्षणेक्षणपतद्बाष्पैकतैलोत्करैः ।
हृष्यद्बन्दिविनोदिवाक्यविसरस्फाराऽनिलैः फूत्कृतः ।
कामं स्फातिमुपैति पिङ्गलमहा युष्मत्प्रतापाऽनलः ॥ ३॥

और्वो याति समुन्नतिं जलनिधेर्नीरन्ध्रनीरे वसन्। विद्युद् वृद्धिमुपैति जीवनमुचः पाथः प्रवाहैः प्लुता। अस्ति द्वेषिवधूविलोचनजलैः प्लुष्टः प्रतापश्च ते। तेनैषां पटुरेक एव हि कलाचार्यस्त्रयाणामभूत् ॥ ४॥

युष्मत्प्रतापमाहात्म्य-मस्मद्वाचामगोचरः। अस्त्रप्राश्चक्रिरे येन, जीवन्तोऽपि हि वैरिणः ॥५॥

इति कविकलाकौमुदीसमुल्लासितस्वान्तसागरः क्षोणिरमणः स्माऽऽह, के यूयं? कुतः समागताः?, तैरुक्तं हे राजन्! **गौड**देशवासिनो वयं सरस्वतीकुटुम्बमिति प्रसिद्धिभृतस्त्वन्नगरीं दिदृक्षवः समेताः स्मः। सकलपौरपाण्डित्यं दर्शयितुं तत्कुटुम्बधनिकमादाय रात्रिचर्योचितरचितवेषः श्रीभोजो निजनगर्यां सायं बभ्राम।

तत्राऽऽदौ कापि गमनेनाऽवगतभूपस्वरूपा रूपाजीवा जगौ—

श्रीमन्मुञ्जकुलप्रदीप! निखिलक्ष्मापालचूडामणे!। युक्तं सञ्चरणं तवाऽत्र नगरे च्छत्रेण रात्रावपि ।
मा भून्मद्वदनावलोकनवशाद् व्रीडाविलक्षः शशी। मा भूच्चेयमरुन्धती भगवती दुःशीलताभाजनम् ॥६॥

पुरतो यान्तं धुरन्धरगमनेन ज्ञातं राजानं प्रति मृगयुवधूराह—

देव! त्वं जय काऽसि लुब्धकवधूर्हस्ते किमेतत्पलं ।
क्षामं किं सहजं ब्रवीमि नृपते! यद्यस्ति ते कौतुकम् ।
गायन्ति त्वदरिप्रियाऽश्रुतटिनीतीरेषु सिद्धाङ्गनाः ।
गीतान्धा न चरन्ति भोज! हरिणास्तेनामिषं दुर्बलम् ॥

१. नष्टचर्योचित° PD ॥

अथ जटिलयोगिवरोचिताऽऽशीर्वादेन तत्कालप्राप्तवैधव्यायाः कस्याश्चित्कुविन्ददयिताया गृहे गत्वा **श्रीभोजो** भिक्षामयाचिष्ट। यतः—

'भिक्षां मे पथिकाय देहि सुभगे!' 'हा हा गिरो निष्फलाः।'
'कस्माद् ब्रूहि शुभे!' 'प्रसूतकमभूत्' 'कालः कियान् वर्तते?'।
'मासः शुद्धिरभून्न शुध्यति विभो! जातस्य मृत्युं विना।'
'को जातो ?' 'मम सर्ववित्तहरणो दारिद्र्यनामा सुतः' ॥ ८॥

पुनः पुरो गच्छन् श्रीभोजः सान्द्रे तमसि स्वैरं व्रजन्तीं कांचित्स्वैरिणीमभणत्, यतः—

'क्व प्रस्थिताऽसि करभोरु! घने निशीथे,' 'प्राणाऽधिपो वसति यत्र मनःप्रियो मे।'
'एकाकिनी वद कथं न बिभेषि बाले!' 'नन्वस्ति पुंखितशरो मदनः सहायः' ॥ ९॥

इत्थं लोहकार-कुम्भकार-चित्रकार-रजकप्रभृतिप्रभूतपौरपाण्डित्याऽवगमप्राप्तविस्मयं **सरस्वती**कुटुम्बधनिकं सहाऽऽदाय स्वामास्थानीमागत्य **श्रीभोजः** स्माऽऽह, हे पुरुषोत्तम! हे पण्डितोत्तम! एवं सकलविशारदलोकैः पूर्णायां मन्त्रगर्यां भवदवस्थानोचितं स्थानं नास्ति, तेन भवतां वासः क्व मया दीयते? अथ तत्पाण्डित्यदर्शनार्थं सकलकोविदरम्यायां सभायां भूपः पुनरेनां समस्यामप्राक्षीत्। 'किणि मुखि पाउं नीर' सद्य एवैनां समस्यां पण्डितः पूरितवान्—

जणि दिनि रावण जनमीओ, दसमुख एक शरीर ।
तस जणणी संशय पडी, किणि मुखि पाउं नीर ? ॥ १०॥

अहो एतावन्तं कालमेषा समस्या केनापि न पूरिता, अनेन तु सपद्येवाऽपूरि, तदसौ महान् कविः, इति चमत्कृतेन **श्रीभोजेन** विशेषतः सत्कृते तस्मिन् पण्डिते प्रकामं स्पर्धां दधानैः सर्वैः पुरपण्डितैः कुपितदेवमारितबहुविशारदोपद्रवकलिते कस्मिंश्चित्सौधे वासो दापितः। अन्येषु प्रसुप्तेषु धनिके च यामिकत्वं विदधति सति प्रथमे प्रहरे तत्सौधाधिपसुरः पूर्वं प्रभूतैरपि पण्डितैरपूरितामिति समस्यामप्राक्षीत् 'स्त्रीपुंवच्चेति' पण्डितस्तु सत्वरमेव तत्पदपूर्तिं विधत्ते स्म—['स्त्री पुंवच्च] प्रभवति यदा तद्धि गेहं विनष्टम्'।

भृशं सन्तुष्टः स देवो द्रुतं तिरोऽभूत्। अथ तथैव द्वितीयस्मिन् प्रहरेऽपि स देवः 'वृद्धो यूनेति' समस्यां तत्पुत्रं प्रति पृच्छति स्म। असावपि सद्य एव ['वृद्धो यूना] सह परिचयात्त्यज्यते कामिनीभिः' इत्यपूरयत्।

तथैव तृतीयेऽपि यामे स 'एको गोत्रे' इति समस्यां तत्पत्नीमपृच्छत्। साऽपि तां त्वरितमेव पतिवत्पूरयति स्म, ['एको गोत्रे] स भवति पुमान् यः कुटुम्बं बिभर्ति।' अथ चतुर्थेऽपि यामे 'सर्वस्य द्वे' इति समस्यां तत्स्नुषां पप्रच्छ। सापि शीघ्रमेव पूरयामास, ['सर्वस्य द्वे] सुमति-कुमती पूर्वकर्मा-नुचीर्णे' कादम्बिन्या मयूर इवाऽनया समस्यापूर्त्या भृशं प्रमनाः स सुमनाः कुसुम-कनक-वसन-धनदानादिना तान् सर्वानपि सत्कृत्य तिरोदधे। अथ राजापि रात्रिव्यतिकरं ज्ञात्वा तेन देवेन सत्कृतांस्तांश्च दृष्ट्वा कनक-करि-तुरग-नगरादिबहुसम्पत्तिदानबहुमानैः प्रसादपात्रं कृत्वा स्वस्मिन्नेव नगरे वासयामास **॥ इति पण्डितपाण्डित्ये सरस्वतीकुटुम्बकथा ॥ २४०॥**

१. *तुला - प्रभावकचरिते बप्पभट्टिसूरिचरितमध्ये श्लो. ८५६, पृ. १८ ॥*

॥ २४१॥ कदाचिद् बालस्यापि कौशलमित्यर्थे श्रेष्ठिसुमतिकुमारकथा ॥

अवसरे वणिक्पुत्र-पुत्रपत्नी-प्रेष्यादयोऽपि प्रतिबोधाय भवन्ति, यतः—

लघीयांसोऽपि बोधाय, भवन्ति महतामपि। पित्रवज्ञापरो वत्सा, सूनुना बोधितो यतः ॥ १॥

तथाहि—**कम्बोडग्रामे गुणाऽऽढ्यो** वणिग्वरो व्यवहारी, तस्य **श्रीमती**कुक्षिसम्भवः **सुराख्यो**ऽङ्गजन्मा, स च भाग्योदयतः श्रीमानासीत्, परं पितरि प्रीतिमात्र । तस्य च **सुमतिनामा** पुत्रः, स च बाल्यादपि यथार्थनामा विनीतः सौभाग्यवांश्च। एकदा कलिकाल इव करालेशीतकाले प्रसर्पति शीतेनाऽऽर्तो गुणश्रेष्ठी पुत्रं प्रति शीतत्राणपटमयाचिष्ट, हे पुत्र! शीतेन ममाऽसवो यान्ति, तेन तत्त्राणार्थं मम वस्त्रं प्रयच्छ ।

अनाकर्णितमिव पितृवचनं तन्वन् स बहु बहु तेन वृद्धेन पित्रा भणितः स्वसुतं सुमतिमूचे, हे पुत्र! स्वपितामहस्य सा जीर्णयवनिका देया, एतदाकर्ण्य मतिमान् **सुमतिर्दध्यौ**, अहो! धिक् पितुः कौशलं, यः स्वपितर्यपि न प्रणयी, तेन मम पितरं प्रतिबोधयामीति मत्वा पितामहाय तदर्धं ददौ, तदर्धं च रक्षितवान्। तदर्धेनाऽहतशीतः स श्रेष्ठी पुनरपि वस्त्रार्थं पुत्रं प्राह, हे पुत्र! वृद्धं मां शीतमतिशयेन बाधते, इत्यभिहितः स पुनरपि पुत्रं प्रोचे, हे सुमते! किं त्वया पितामहाय वस्त्रं न दत्तं? येन सोऽभीक्ष्णमम्बरमीहते। अथ सुमतिराह— हे तात! यवनिकाऽर्धं मया तस्मै दत्तमस्ति, तर्हि अर्धं त्वया किमर्थं रक्षितमस्तीति भणितः सुमतिर्ब्रूते स्म, हे तात! अग्रे वार्धकवतां भवतां कृते तदर्धं मया रक्षितमस्ति, यतो यादृशी स्वपितुर्भक्तिर्भवद्भिः क्रियते तादृशी भवतामपि मया विधास्यते, यतः—

उप्यते यादृशं बीजं, लूयते तादृशं फलम्। सर्वत्र कृषिकर्मादौ, स्पष्टमेतन्निदर्शनम् ॥ १॥

अहो! लघुनापि सूनुना सारथिना रथ इवाहमुन्मार्गं व्रजन्मार्गं नीत इति मत्वा सर्वत्र भोजन-वसन-स्नान-पानादौ पितुरुपचर्यां विधाय स सुरो व्रतमादाय च दिवं ययौ ॥ **इति कदाचिद् बालस्यापि कौशलमित्यर्थे श्रेष्ठिसुमतिकुमारकथा ॥ २४१॥**

॥ २४२॥ अभयमन्त्रिकारित-श्वेतश्यामचैत्यकथा ॥

प्रायो हि जगति पापिनामेव बाहुल्यं, यतः—

सर्वत्राप्यधिगम्यन्ते, पापिनो नेतरे जनाः। भूयांसो वायसाः सन्ति, स्तोका यच्चाषपक्षिणः ॥ १॥

अपि च—

धर्मिभ्यः सन्ति भूयांसः, प्रायशः पापिनो नराः। अत्राऽभयकृतश्वेत-श्यामचैत्यकथा स्फुटम् ॥ २॥

तथाहि—**श्रीराजगृहे** नगरे **श्रेणिक**राजा, मन्त्री चाऽभयकुमारः। एकदा श्रेष्ठि-सेनापति-सार्थवाह-दूत-दौवारिक-राज-युवराजा-ऽमात्य-महामात्य-किङ्करप्रभृतिसकललोकसनाथायां श्रीश्रेणिकराजपर्षदि धर्मिणः पापिनो वा बहव इत्येकदा धर्मा-ऽधर्मविवादे जायमाने सर्वैरपि सभासद्भिः पापिनो बहवो, धर्मिणश्च स्वल्पा इत्यभिहिते सनिर्बन्धं राज्ञा पृष्टोऽभयो मन्त्री भणति स्म।

हे देव! बहवो धर्मिणः पापिनोऽल्पीयांसश्च, कथमेतदिति गाढमाग्रहेण भणितो मन्त्री श्वेतं श्यामं चेति चैत्यद्वयं पुराद्बहिरचीकरत्। धर्मवद्भिर्धवले प्रासादे, पापवद्भिश्च श्यामले प्रासादे समागन्तव्यमिति पडहोद्घोषणां सकलेऽपि पुरे त्रिक-चत्वर-राजमार्ग-महापथादिष्वभयो मन्त्री कारयति स्म। अथ स्वस्वसम्पदनुसारेण विहितवेषा अशेषा अपि पौरा धवलं प्रासादमुपेयिवांसः, द्वौ मातुल-भागिनेयौ तु श्यामलं प्रासादं समेतौ। अथ स्वपरिवारपरिवृतोऽभयेन मन्त्रिणाऽनुगम्यमानो राजा तत्र प्रासादपार्श्वे प्राप्तः, सकलमपि पौरवर्गं धवले प्रासादे दृष्ट्वाऽभाषिष्ट, भोः पौराः! कथं सर्वेऽपि यूयं श्वेते चैत्ये प्राप्ताः ? अथ तेऽभ्यधुः, हे राजेन्द्र! स्वस्वकुलक्रमागताऽऽचारकरणेन वयं **सम्यग्धर्मिणः**, तेन चाऽत्र प्रासादे समेताः स्मः। अहो! प्राणातिपात-मृषावादा-ऽदत्तादान-परदारागमन-द्यूतादिसप्तव्यसनाद्यशेषदोषखानयः सर्वेऽप्यमी धर्मवन्तः।

एवं च समीचीनमेवाऽजनि वचनमभयस्य मन्त्रिण इति मत्वा राजा श्यामप्रासादे प्राप्तः, तत्र च तौ द्वावेव मातुल-भागिनेयौ दृष्टौ पृष्टौ च, कथं युवामत्र चैत्ये प्राप्तौ? ताभ्यामुक्तं हे स्वामिन्नाऽऽवाभ्यां पुरा **श्रीसुधर्मस्वामिनो**ऽभ्यर्णे सुराया मांसस्य चेति पृथक् पृथक् नियमावङ्गीकृतौ, किंत्वावयोस्तयोर्नियमयोर्भङ्गोऽभूत्, तेनाऽऽवां महापापिनौ, यतः—

[वरमग्गिंमि पवेसो, वरं विसुद्धेण कम्मुणा मरणं ।
मा गहियव्वयभंगो, सया अखंडियसीलस्स ॥ १ ॥]

व्रतलोपी महापापी अतः कारणादावामिह प्रासादे प्रविष्टौ। अथाऽभयो बभाषे, हे देव! परमार्थतस्तु धर्मिणः स्तोका इमौ मातुल-भागिनेयाविवेति मन्त्रिवचनं समीचीनं मन्यमानाः सर्वेऽपि पौरा राजा च स्वं स्वं स्थानं यान्ति स्म। ॥ **इत्यभयमन्त्रिकारितश्वेत-श्यामचैत्यकथा** ॥ २४२ ॥

॥ २४३ ॥ गुरुनिरीहत्वे श्रीसिद्धसेनसूरि-श्रीविक्रमादित्यभूपतिकथा ॥

सन्तोषो हि नराऽमरादिसंवननौषधं, यतः—

सन्निधौ निधयस्तस्य, कामगव्यनुगामिनी। अमराः किङ्करायन्ते, सन्तोषो यस्य भूषणम् ॥ १ ॥
[योगशास्त्रे २/११५]

किं बहुना? सन्तोषजुषां सर्वं समीचीनमेव, यतः—

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात्, मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते, यत्स्वान्तेऽखिललोकवल्लभतमः सन्तोषपोषः सखे !॥ २ ॥

सन्तोषवतां सन्तोषोऽन्येषामपि धर्मप्राप्तिहेतुः, यतः—

निरीहता संयमिनां प्रकामं, धर्मप्तिहेतुः किल कस्य न स्यात् ? ।
श्राद्धोऽभवद्विक्रमराड् निरीहं, निरीक्ष्य राज्येऽपि हि सिद्धसेनम् ॥ ३॥

तथाहि—**'विद्याधरगच्छे श्रीपादलिप्ताचार्यसन्ताने श्रीस्कन्दिलाचार्यपार्श्वे गृहीतदीक्षो वृद्धो मुकुन्दाभिधो** विप्रो बाढस्वरेण रात्रौ भणन् गुरुणेति निषिद्धः, हे वत्स! आत्मनां रात्रौ बाढस्वरेण भणनं नोचितम्। अथ स दिवसेऽपि बाढस्वरेण भणन् श्रावकैरभाणि, किमसौ प्रवयाः पठित्वा

१. तुला - प्रभावकचरित्रे, पृ. ५४, प्रबन्धकोशे पृ. १५ प्रबन्धचिन्तामणौ विक्रमार्कप्रबन्धे ॥

मुशलं पुष्यापयिष्यति? इति श्रावकोपहासेन भृशं खेदमापन्नो **मुकुन्दो** मुनिर्जैनौकसि बहुभिस्तपोभिः **सरस्वती**माराध। सन्तुष्टा सा सकलविद्यास्तस्मै दत्त्वा तिरोदधे। लब्धविद्यावरः सोऽपि सङ्घसाक्षिकं गुरोरभ्यर्णे [समागत्येदं श्लोकमपाठीत्—]

अस्मादृशा अपि जडा, भारति! त्वत्प्रसादतः। भवेयुर्वादिनः प्राज्ञा, मुशलं पुष्यतां तदा ॥ ४॥

इति श्लोकमन्त्रेण स मुशलं पुष्यापयामास। स्कन्धस्थेन तेनैव मुशलेन स सर्वत्र ग्रामादौ भ्रमति भणति चेति—

पन्नमवलंबिअं तह, जो जंपइ फुल्लए न मुसलमिह ।
तमहं निराकरित्ता, फुल्लइ मुसलं ति ठावेमि ॥ ५॥

मद्गोः शृङ्गं शक्रयष्टिप्रमाणं, शीतो वह्निर्मारुतो निष्प्रकम्पः ।
यस्मै यद्वा रोचते तत्र किञ्चिद्, वृद्धो वादी भाषते कः किमाह ॥ ६॥

अप्रतिमल्लो वादी स **वृद्धवादी श्रीस्कन्दिला**चार्यपूज्यैः स्वपदे स्थापितः। इत**श्चोज्जयिन्यां**—

अवलोअणे सहस्सं, आलावे चेव दससहस्साइं ।
हसिऊण देइ लक्खं, परिओसे विक्कमो कोडिं ॥ ७॥

इति ख्यातदानगुणस्य **विक्रमादित्य**स्य राज्ये **कात्यायन**गोत्राऽवतंसस्य **श्रीदेवर्षि**विप्रस्य **देवसिका**कुक्षिसम्भवः **सिद्धसेनः** पुत्रः, सुराचार्यस्येव तस्य प्रज्ञा विश्वाऽतिशायिनी, सतां प्रतिभायाः प्रमाणं नाऽस्ति, यतः—

मिता भूः पत्यापां स च पतिरपां योजनशतं, सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः, सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ ८॥

यो मां वादे जयेत्तस्याऽहमनुचरः शिष्यो भविष्यामीति प्रतिज्ञां वहन् **सिद्धसेनो** वादे सर्वत्राऽप्यप्रतिहतान् **श्रीवृद्धवादिसूरी**नाकर्ण्य तत्संमुखं धावति स्म। क्रमेण श्वेताऽऽतपत्रछत्रोपशोभितः सुखासनाऽऽरूढः स **भृगुपुर**ङ्गतो वादार्थं **वृद्धवादिसूरी**नूचे, एवमस्तु परं चाऽत्र के सभ्या? इति सूरिभिरभिहिते **सिद्धसे**नस्तत्रैव नगरगोचरे गोपदारकान् सभ्यान् विधाय कर्कशतरतर्कवादेनाऽनल्पं जल्पं कुरुते स्म। ततः क्रमेणाऽस्मिन् स्थिते गोपैरभाणि अहो! असौ वाचाटः किमपि न वेत्ति, केवलं कासर इव पूत्कारं कुर्वाणः कर्णौ पीडयति, तेनेमं धिग् धिग्। हे वृद्ध! त्वं ब्रूहि, सुखयाऽस्माकं कर्णौ, अथाऽवसरज्ञः **श्रीवृद्धवा**दिसूरिः कच्छां दृढां बद्ध्वा **झीमिणी**छन्दसा पठति नृत्यति च, तथाहि—

नवि मारीयें नवि चोरीयें, परदारगमण निवारीयें। थोवुं थोवुं देइयें, टगमग सरगें जाइएं ॥ ९॥
कालो कंबल अनुनी चांटु, छासिहिं[1] भरिओ देवड पाटु ।
अइवड पडीओ नीलइ झाडी, अवर किसर गह सिंगु निलाडी ॥ १०॥
गोहुं गोरस गोरडी, गज गुणिअण ने गांन। छए गगा जो इहां मले, तो क्युं सरगविमान ॥ ११॥
उन्नु! अन्न ने घृत घणुं, सारुं सरस पशाक। जीमंतां जोई करी, सरग नमाडुं नाक ॥ १२॥
काली काठी कूतरा, कामणीकूचकपास। कूट्या पीड्या आहण्या, पील्या पींज्या खास ॥ १३॥
चूडो चमरी चुंदडी, चोली चरणुं चीर। छ चच्चें सोहे सदा, सोहवि-तणुं शरीर ॥ १४॥

१. छासिहिं खालडु भरिउ नि पाटु – इति प्रबन्धकोशे पृ. १६ ॥

घारी घेवर घीअरस, घोल घणेरुं होय। घरघरणी छांदा करे, सरग न वांछे कोय ॥ १५॥
छासी छमको छांहडी, छांदाबोली नारी। छायलओढणी छत्र सिर, ए छए पुण्य विचारि ॥१६॥
कुंकुम कज्जल केवडो, कंचन कूर कपूर। कोमल कप्पड कव्वरस, एहि ज पुण्यअंकूर ॥१७॥
भूख भलप्पण भावतुं, भडवीर भलो ज भाय ।
भामिणी भोयण भोगभर, ए नव पुण्यपसाय ॥ १८॥
बाई बंभण बारहट, बोडा बहिरा बाल। छए बबा तो जे घरे, तिण घर बंधु ज चाल ॥ १९॥
खांडुं खेती खीचडी, खडकी खारेक खीर। तूठो तुं ततखिण दीए, ए छए वीठल वीर ॥ २०॥

एवमादिकं दोधकशतं **वृद्धवा**दिपठितं श्रुत्वा हृष्टा गोपाला लपन्ति स्म, अहो! असौ **वृद्धो वादी** सर्वज्ञः, यतोऽसौ श्रुतिसुखमवसरोचितं च पठति, **सिद्धसेन**स्त्वसारकः, तेनाऽनेन **वृद्धवादिना**ऽसौ **सिद्धसेनो** जितः, इति तैर्निन्दितः **सिद्धसेनः** स्माह, हे भगवन्! पूर्णप्रतिज्ञं मां प्रव्राजय, तव शिष्योऽहं भवामीत्याग्रहपरोऽसौ सूरिभिस्तदैव दीक्षितः, **कुमुदचन्द्र** इति चास्याभिधा व्यधायि, क्रमेण **सिद्धसेनदिवाकर** इति नामविधानपुरस्सरं च सूरिभिः सूरिपदे स्थापितः।

एकदा सकलमप्यागमं संस्कृतं करोमीति वचनेनाऽनन्ततीर्थंकर-गणधर-पूर्वधराणामाशातनासञ्जातपातकपरः परं **पाराञ्चि**तनाममहाप्रायश्चित्तमङ्गीकृत्यसुगुप्तमुखवस्त्रिकारजोहरणादिसाधुस्वरूपः प्रकटिताऽवधूतरूपश्चरिष्यामीत्यभिग्रहवान् स **सिद्धसेनो** गच्छचिन्तां हित्वा ग्रामादिषु विहरन् द्वादशे वर्षे **श्रीमदुज्जयिन्यां महाकाल**संज्ञमहेश्वरप्रासादमधितस्थौ। तत्रापि महत्कौतुकदिदृक्षाऽर्थमागतस्य पौरवर्गस्य साक्षिकं श्री**कल्याणमन्दिर**महास्तोत्रविधापनेन प्रादुर्भूतं श्री**पार्श्वनाथ**बिम्बमालोक्य विस्मितोऽर्हन् देवः सत्य इति मन्यमानः **श्रीविक्रमादित्य**भूपः श्री**सिद्धसेनगुरो**रभ्यर्णे देवतत्त्वशुद्धिं विधत्ते स्म।

अथ मुकुलितकरकमलो राजाऽर्हन्तमिति स्तौति स्म—

प्रशमरसनिमग्नं दृष्टियुग्मं प्रसन्नं, वदनकमलमङ्कः कामिनीसङ्गशून्यः ।
करयुगमपि यत्ते शस्त्रसम्बन्धवन्ध्यं, तदसि जगति देवो वीतरागस्त्वमेव ॥ २१ ॥

देवोऽनेकभवार्जितोर्जितमहापापप्रदीपाऽनिलो, देवः सिद्धिवधूविशालहृदयाऽलङ्कारहारोपमः ।
देवोऽष्टादशदोषसिन्धुरघटानिर्भेदपञ्चाननो, भव्यानां विदधातु वाञ्छितफलं श्री**पार्श्वनाथ**श्चिरम् ॥ २२ ॥
मूर्तिस्ते जगतां महार्त्तिशमनी मूर्तिर्जनानन्दिनी, मूर्तिर्वाञ्छितदानकल्पलतिका मूर्तिः सुधास्यन्दिनी।
संसाराम्बुनिधिं तरीतुमनसां मूर्तिर्दृढा नौरियं, मूर्तिर्नेत्रपथं गता जिनपते! किं किं न कर्तुं क्षमा ॥ २३ ॥
ये मूर्तिं तव पश्यतः शुभमयीं ते लोचने लोचने, या ते वक्ति गुणावलिं निरुपमां सा भारती भारती।
या ते न्यञ्चति पादयोर्वरदयोः सा कन्धरा कन्धरा। यत्ते ध्यायति नाथ वृत्तमनघं तन्मानसं मानसम् ॥ २४ ॥
यक्ष्माद्युग्ररुजां विकारनिकरध्वंसैकधन्वन्तरिः, फुल्लद्बालतमालतालफलिनीनीलोत्पलश्यामलः ।
अस्ति स्वस्तिमनोमनोरथमहादानैकदेवद्रुमः, प्रत्यग्रः प्रथितः प्रियः प्रकटितः **पार्श्वप्रभुः** पातु वः ॥ २५ ॥
दर्शनाद् दुरितध्वंसी, वन्दनाद्वाञ्छितप्रदः। पूजनात्पूरकः श्रीणां, जिनः साक्षात्सुरद्रुमः ॥ २६ ॥

१. PD। °पानलो-मु. सकलार्हत्स्तोत्रे च ॥

एवमत्यन्तमनोज्ञ-स्फाराथैरष्टोत्तरशतनमस्कारैः श्रीपार्श्वनाथमभिष्टुत्य प्रत्यहं भगवद्भक्ति-भावितमनाः प्रमनाः श्रीविक्रमादित्यो राजाऽर्हत्पूजा-तीर्थयात्रा-रथयात्रादिधर्मकर्मकर्मठश्चिरं क्षोणीं पाति स्म। इतश्च कवित्वशक्तिचमत्कृतेन राज्ञाऽतीवसंस्तुताः श्रीसिद्धसेनसूरयोऽपि पाराञ्चितप्रायश्चित्तान्ते द्वादशवर्षान्ते निजगच्छभारमङ्गीकृत्य मौक्तिकैः कामिनीकुचस्थलमिव स्वचरणरेणुभिः क्षोणीतलं भूषयन्तो मालवेष्वोङ्कारं नगरं प्रापुः।

तत्राऽर्हद्भक्तैः श्रावकैः सूरिर्विज्ञप्तः, हे भगवन्! वयमत्र वसामः, परमिहाऽऽर्हतं चैत्यं नास्ति, यतो गाढमिथ्यात्वमूढा भरटका इहाऽर्हत्प्रासादं कर्तुमस्माकं न प्रयच्छन्ति। आर्हतमनोमनोरथलताविताने सेचनैकधाराधरस्त्वमेवात्राऽर्थे बलवत्तरः, तेन तथा कुरु? यथाऽत्रत्यतन्महेशप्रासादतः प्रोत्तुङ्गजिनचैत्यं कुर्महे। इति तेषां विज्ञप्तिमवधार्य स सर्वज्ञशासनोन्नतिपद्मिनीपद्मिनीप्राणनाथः सूरीन्द्रश्चतुःश्लोकी निर्माय श्रीमदुज्जयिनीमागत्य सकल-क्ष्मामण्डलाऽऽखण्डलस्य श्रीविक्रमराजस्य सभाद्वारमेत्य च द्वाःस्थेन राजानमचीकथत्। तेन द्वाःस्थेनापि सूरिदत्तोऽयं श्लोको राज्ञे वितीर्णः, तथाहि—

दिदृक्षुर्भिक्षुरायात-स्तिष्ठति द्वारि वारितः। हस्तन्यस्तचतुःश्लोको, यद्वागच्छति गच्छति ? ॥ २७॥

इमं श्लोकमवगम्य तद्बन्धचारुत्व-शब्दचारुत्वचमत्कृतो राजेति प्रतिश्लोकमचीकथत्, तथाहि—

दीयतां दशलक्षाणि, शासनानि चतुर्दश। हस्तन्यस्तचतुःश्लोको, यद्वागच्छतु गच्छतु॥ २८॥

सूरिणाप्यस्य प्रतिश्लोकस्यार्थं ज्ञात्वा द्वाःस्थद्वारेण पुनरभाणि, भिक्षुः क्षमापदर्शनमेव समीहते, नाऽर्थमिति। ततो राज्ञाऽऽहूताः सामोदां सरोजिनीं राजहंसा इव सूरयो राजसभां भूषयन्ति स्म। अथ राज्ञोपलक्ष्योक्ताश्च ते सूरयः, हे पूज्याः! कथमहमद्य चिरेण स्वदृशा सम्भावितः? कार्यवशादित्यभिधाय श्लोकचतुष्टयं शृणु चेति राजानमभिदधिरे सूरयः। अथ राज्ञि शृण्वति पूर्वादीनां चतसृणां दिशामनुक्रमेण राज्ञः पुरो भूत्वा सूरयश्चतुरोऽपि श्लोकान् पठन्ति स्म। तथाहि—

अपूर्वेयं धनुर्विद्या, भवता शिक्षिता कुतः। मार्गणौघः समभ्येति, गुणो याति दिगन्तरम् ॥ २९॥
सरस्वती स्थिता वक्त्रे, लक्ष्मीः करसरोरुहे। कीर्तिः किं कुपिता राजन्, येन देशान्तरे गता ? ॥ ३०॥
कीर्तिस्ते जातजाड्येव, चतुरम्भोधिमज्जनात्। आतपाय धरानाथ, गता मार्तण्डमण्डलम् ॥ ३१॥

अथवा पाठान्तरेणाऽत्रासौ श्लोकः—

आहते तव निःस्वाने, स्फुटितं रिपुहृद्घटैः। गलितं तत्प्रियानेत्रै, राजंश्चित्रमिदं महत् ॥ ३२॥
सर्वदा सर्वदोऽसीति, मिथ्या संस्तूयसे जनैः। नाऽरयो लेभिरे पृष्ठिं, न वक्षः परयोषितः ॥ ३३॥

इति श्रुत्वा प्रकामं मुदितेन राज्ञैकैकेन श्लोकेनैकैकस्या दिशो राज्ये दीयमाने गुरवोऽभ्यधुः—

शयीमहि महीपीठे, जीर्णवासो वसीमहि। भुञ्जीमहि वयं भैक्ष्यं, कुर्वीमहि किमीश्वरीम् ॥ ३४॥

एवममीषां गुरूणां निरीहत्वं निरीक्ष्य भृशं सन्तुष्टो राजा व्याजहार, अहो! अमी अखण्डितचारित्रा महानुभावाः, यदमी करि-तुरग-कनक-कामिनी-काननादिकेलिकलिते-ऽपि राज्ये विगतस्पृहाः, तेनामी एव गुरवो नत्वन्ये। यतः—

महाव्रतधरा धीरा, भैक्ष्यमात्रोपजीविनः। सामायिकस्था धर्मोपदेशका गुरवो मताः ॥ ३५॥

[योग शास्त्रे - २/८]

धर्मोऽप्येतदभिहित एव करणीयः, इति तन्निरीहत्वेन सम्यग्देव-गुरु-धर्मरूपां मुक्तिमार्ग-प्रदीपिकां रत्नत्रयीमादत्य राजा तेषां सूरीणामुपदेशेनौङ्कारपुरे नगरे प्रोत्तुङ्गमर्हच्चैत्यं कारयित्वा तैरेव गुरुभिस्तत्प्रतिष्ठामचीकरत्। गुरवोऽप्येवमर्हत्प्रवचनप्रभावनां कृत्वाऽनशनेन दिवमलञ्चक्रुः **॥ इति गुरुनिरीहत्वे श्रीसिद्धसेनसूरिश्रीविक्रमादित्यभूपतिकथा ॥ २४३॥**

॥ २४४॥ कैतवे मदिरावेश्याकथा ॥

सदैव सूत्रितपापाऽऽवेशासु वेश्यासु प्रीतिः सतां नोचिता,
कः कोपः कः प्रणयो नटविटहतमस्तकासु वेश्यासु ।
रजकशीलातलसदृशं यासां जघनं च वदनं च ॥ १॥

अपि च—

मनस्यन्यद् वचस्यन्यत्, क्रियायामन्यदेव हि । यासां साधारणस्त्रीणां, ताः कथं सुखहेतवे ? ॥

[योगशास्त्रे २/८८]

किं बहुना ? गणिकानां दम्भो हि दुरुत्तरः। यतः—

स्वीकृत्य दम्भमतिदुष्टमरिष्टनिष्ठा, धूर्ताः परान् परमतीनपि वञ्चयन्ति ।
यन्मृत्युदम्भमधिगम्य विलासवध्वा, नीतो वशं मदिरया मकरन्दनामा ॥ ३॥

तथाहि—**हर्षपुरे** नगरे बहुधन-धान्यादिपरिग्रहेण प्राप्तपरमानन्दस्य **श्रीमदानन्दस्य** श्रेष्ठिनो **मकरन्दनामा** पुत्रः, एकदा तेन श्रेष्ठिना **कनकसेना** वृद्धा कुट्टिनी भणिता, हे सुभगे! मम पुत्रं स्त्रीणां चरित्रे कलासु च निपुणं कुरु— हे श्रेष्ठिन् ! भवतः सुतं सर्वत्र स्त्रीचरित्रे विदग्धं विधास्यामि, परं जीवन्तीनां तासां भेदमसौ ज्ञास्यति, किन्तु मरणदम्भेन ताः स्त्रियो यद्वञ्चनं करिष्यन्ति तन्नाहं वेद्मि, तेन मरणदम्भेन कृतं कैतवकौशलमयं न ज्ञास्यतीति प्रतिपाद्य सा तं मकरन्दं द्वादशाऽब्दैः सर्वत्र स्त्रीचरित्रे चतुरं चकार। पण्याङ्गनानां गृहेषु हि चातुर्यमिति नीतिवचनं, यतः—

देशाटनं पण्डितमित्रता च, पण्याङ्गना राजसभाप्रवेशः ।
अनेकशास्त्राऽर्थविचारणं च, चातुर्यमूलानि भवन्ति पञ्च ॥ ४॥

श्रेष्ठिनाऽपि तस्यै बहुकनकादिधनदानमदायि । यदि तव पुत्रः क्वापि स्त्रीणां मरणकैतवं विना कपटसङ्कटे पतितोऽनर्थभाक् स्यात् तदा भवद्दत्तं धनं सव्याजं प्रत्यर्पयिष्यामीति प्रतिज्ञां कृत्वा सा स्वं स्थानं ययौ। अथ मकरन्दोऽपि घनं सुवर्णादिधनमादाय व्यापारं विधित्सुः **सोपारक**पत्तनं प्राप्तः तत्र च स्वसौभाग्यप्राग्भारपराभूतपुरुहूतनितम्बिन्यः प्रभूताः पण्यनितम्बिन्यो वसन्ति स्म। तत्र चैता ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादीनां चतुर्णामपि वर्णानां स्वस्ववर्णवर्तित्वेन भोग्याः, किंच

इति प्रियप्रयाणावसरोचितवचनैस्तमभिनन्द्य सा स्माह, हे प्राणनाथ! किं सोपचारेण बहुकथनेन? कदाचिदप्यहं वराकी स्मृतिगोचरं नेयेति। अथ स वस्त्राभरणादिना तां बहुमानविषयीकृत्य तद्वितीर्णमणिमौक्तिकाद्यपि स्वाङ्गसङ्गे कृतार्थीकृत्य च राज्ञा सन्मानितः स स्वस्थानमागत्य **महमल्ला**माह—

'स्मर्तव्या वयमिन्दुसुन्दरमुखि! प्रस्तावतोऽपि त्वया,'
'स्यादेवं यदि नाथ दास्यति विधिर्जातिस्मृतिं मे पुनः ।'
'एकस्मिन्नपि जन्मनि प्रियतमे! जातिस्मृतिः सा कुतः?,'
'प्राणाः पान्थ! समं त्वयैव चलिताः कुत्रास्ति जन्मैकता ?'॥७॥

इति तद्वचनचारुतरचातुरीचमत्कृतचेताश्चरणचारी स चरणचारिण्या तया **महमल्लया** संप्रेषणार्थमनुगम्यमान**श्चित्रकूटादु**त्तीर्णस्तामाह, हे सुभ्रु!
नदीतीरे गवां गोष्ठे, क्षीरवृक्षे जलाशये। आरामे कूपकण्ठादा-विष्टबन्धून् विसर्जयेत् ॥८॥

इति हेतोरत्र वटाधस्तिष्ठेति तेनाऽभिहिता नीतिशास्त्रज्ञा सा तत्र वटाधस्तस्थौ। वटवासिवधूमिव तत्र वटतरुतले तस्थुषीं तां सुमुखीं वलितकन्धरं पश्यन् सोऽपि पुरतः प्रतस्थे। अथ यथा यथा स दृक्पथादतिचक्राम, तथा तथा सा तं वटमारुह्योपर्युपरि चटति स्म। किं बहुना? तमीक्षमाणा सा पक्षिणीव वटस्योपरिशिखामारुरोह। यदा स दृग्मार्गादति-क्रान्तस्तदा सा प्राणैर्मुमुचे। सोऽपि परावर्तितग्रीवं चेलाञ्चलचालनात् प्रह्वां तां पश्यन् पुरश्चलंश्च निश्चलां तां विलोक्य चकितो व्याजुघोट। मामालोक्य सदैवोत्थानादि प्रतिपत्तिमेषा कृतिनी कृतवती, साम्प्रतं तु किं वटान्नोत्तरतीति काममाकुलः स तं वटमारुरोह। जीवन्तीमिव तां पाणिना स्पृशन् स मृतामज्ञासीत्। अस्यां मृतायामहं जीवन्नस्मीति त्रपैषा मम भूयसीति चिन्तयन् सोऽपि तत्क्षणमेव परासुरासीत्। तदा च तौ द्वावपि सहैव वटस्याधस्तात्पतितौ। अथ पुत्रस्यानागमनाद् भृशं चकितः पितान्यं परिवारं पुरतश्चलन्तं कृत्वा स्वयं तस्य वटस्याधस्तादागतस्तौ च तत्र मृतौ पतितौ प्रेक्ष्य पतन् रुदन् विलपन् मूर्च्छन् प्रोच्चैरिदमपाठीत्—
नातें नेह न होय, प्रीतें तो पउमल भणे। इक जोह्मण न जोय, मा जीवे महल्ला मरें ॥९॥

इति दोधकं विधाय तयोः संस्कारं कृत्वा च स स्वस्थानं ययौ। ॥ **इति स्नेहे जोह्मणचारणकथा ॥ २५०॥**

॥ २५१॥ मनःपरिणामे घृतचर्मव्यापारकारिवणिक्कथा ॥

कर्मबन्धस्त्वभिप्रायवशात्, न तु व्यापारदर्शनात्, यतः—
मन एव मनुष्याणां, कारणं बन्धमोक्षयोः। तेनैवालिङ्ग्यते कान्ता, तेनैवालिङ्ग्यते सुता ॥१॥

गमनं, तेन यदि चाऽथ **मदिरा** मिलति तदाहमवश्यं तद्वचः करोमीति। अथ यदा मदिराप्रेमपूर्णमनाः स तद्वेश्मनि समेति तदा निष्कृतिकृत्तिनी तदम्बा रोदति। यतः—

प्रकटयति हृदयदाहं, पुरुषः प्रायेण सज्जने मिलिते ।
ग्रावा दग्धः सलिले, पतितः पुनरुद्वमत्यग्निम् ॥ ११॥

सोऽपीति ब्रवीति, हे अम्ब! यदि कथञ्चनापि मम **मदिरा** मिलति, तदाऽहमवश्यं तया सह विषयसुखमनुभवामीति पुनः पुनस्तद्वचः श्रुत्वाऽवगतसम्यक्तन्निश्चया सा स्माह, हे स्वामिन्! स्वयमागतायां मत्सुतायां **यम**देवो विशेषतस्तुतोष, तेनाद्य कल्ये वा मम पुत्री समेष्यतीति केनापि महानिमित्तज्ञेन कथितमस्तीति। अथ द्वादशेऽहनि गृहमागतं मकरन्दं प्रति कुट्टिनी स्माह, हे सुभग! **मदिरा** समागता, क्वास्ति क्वास्तीति वादिनि तस्मिन् यथोचितरचित-षोडशशृङ्गारा पार्वतीव महेश्वरप्रिया रम्भेव विबुधाऽधीशतुष्टिदायिनी पद्मेव पुरुषोत्तमवल्लभा अभ्राद्विद्युदिव सा भूमिगृहादाविरासीत्। हे स्वामिन्! स्वयमागतां मां धर्मराजो निजां दुहितरमिव बहु मन्यते स्म, तेनैतानि कनक-मणिमयानि आभरणानि, दिव्यानि एतानि च वसनानि वितीर्णानीति वादिनी सा भूयो भूयस्तत्पादौ प्राणमत्। सोऽपि सद्यः प्रादुर्भूतनूतननिबिडतरस्नेह-पाशकीलित इव प्रेमदृशा पश्यन् रत्या स्मर इव तया समं रमते स्म। यतः—

विरहो वसन्तमासो, नवनेहो पढमजुव्वणारंभो ।
पंचमगीयस्स झूणी, पंचग्गीं को जणो सहइ ॥ १२॥

क्रमेण मायया तन्मयेव सा तदीयं धन-वसनादि सर्वं जग्राह। ततः सर्वथा-गृहीतसर्वस्वोऽसौ तया गृहान्निष्कासितः स्वगृहमाययौ। अवगतपुत्रस्वरूपेण पित्रा सा **कनकसेना** कुट्टिनी भृशमुपालब्ध्या प्रोवाच, हे श्रेष्ठिन्! मरणकैतवेन तयाऽसौ वञ्चितः, तेन मदुक्तं त्वं स्मर, किं करोमि? स्त्रीणां मरणदम्भविलसितं दुरवबोधं, तथापि तव लज्जया तव धनं तस्याः पार्श्वादानेष्यामीति प्रतिपद्य सा किञ्चित्स्तोकं धनं दत्त्वा मकरन्दं पुरत एव **सोपारके** प्राहिणोत्। तदनु चाण्डालवेषौ करगृहीतकैटोलतालौ चाण्डालभाषया च गानं सृजन्तौ तौ द्वावपि दम्पतीव मिथो विनयेन गच्छन्तौ प्रभाते **मदिराद्वारे** दन्तधावनं विदधतो मकरन्दस्य पुरस्तस्थतुः। सोऽपि मम पितरौ समेताविति पुनः पुनर्वदन् सहसोत्थाय तयोः परिष्वङ्गं विधत्ते स्म। विद्युत्पातादिव तत्परिष्वङ्गविलोकनाद्भीता मदिरा दध्यौ, हा! हा! पापिनाऽमुनाऽहं भृशं विगोपिता, अथ यदि राजा ज्ञास्यति तदा सर्वस्वहरणदण्डेन विडम्ब्य मां सैमवर्तिनोऽभ्यागता करिष्यतीति मत्वा सा तावप्राक्षीत्, कौ युवामयं च कः? तदा सद्य एव प्राक्कृतसङ्केतो मकरन्दोऽभिदधे, एतौ मम माता-पितरावहं चानयोरङ्गज इत्याकर्ण्य भृशं भीतां तां पितराविव मकरन्दमातापितरौ करे गृहीत्वोचतुः, हे पीतयौवनोन्मादमदिरे **मदिरे**! यद्यात्मनः कल्याणमीहसे तदाऽस्मत्पुत्रसत्कं पूर्वगृहीतं धनादिकं सत्वरमर्पय, न चेत्तदा राज्ञः पुरस्तात्सर्वमेनं व्यतिकरं व्याकरिष्यावः, इति निशम्य सर्वस्वनाशविधुरा **मदिरा** द्रुतमुद्धारके गृहीतमिव सव्याजं तस्य धनं वितरति स्म। अथ

१. *कटोल=चाण्डाल । ताल=कांस्यवाद्य । २. यमस्याभ्यागता-मु. ॥*

ससुतः श्रेष्ठी स्वस्थानमागत्य तां च **कनकसेनां** कुट्टिनीं धनादिना सत्कृत्य सुखभाग्बभूव। ॥ **इति कैतवे मदिरावेश्याकथा ॥ २४४॥**

॥ २४५॥ कलाकौशले धर्माऽभिधशाकुनिककथा॥

एकाऽपि सदभ्यस्ता कला पुंसां श्रीदायिनी भवति, यतः—

किमेकापि कला पुंसां, सदभ्यस्ता सुखाय न। शकुनान्मुष्टिमुक्ताज्ञो, राज्ञाऽमानि धनैर्यतः ॥ १॥

तथा हि—**धनोरग्रामे सुमतिराजस्य धर्माभिधो** वृद्धोऽतीवावगतशकुनशास्त्रः शाकुनिकः। स च राज्ञः प्रसादपात्रं, एकदा **सुबुद्धिना** मन्त्रिणा राज्ञेऽभाणि, हे देवाऽयं प्रवयाः शाकुनिको भवतां भूरिग्रामादिधनं भुङ्क्ते, तेनाऽस्य शकुनविषये कलाकौशलं विलोक्यते। यदि चास्य शकुनविज्ञानमात्मनां मनसि चमत्कारकारि स्यात्तदाऽस्य दानं रम्यं, न चेत्किमस्य दानेन ? इति विमृश्यैकदा राज्ञा मुष्टिमुद्रां विधाय स धर्मोऽभ्यधायि, हे शाकुनिकशिरोमणे! किमस्ति मम मुष्टिमध्ये ? शकुनं विलोक्य वक्ष्ये इत्यभिधाय मुद्रितमुष्टिं राजानं प्रणम्य स सभातो बहिर्ययौ। अथ शकुनज्ञानतो निर्णीतक्षितिनाथमुष्टिमध्यवस्तुस्वरूपः स समागत्य राजानमभणत्, हे देव! युष्मन्मुष्टिमध्ये मौक्तिकानि सन्तीत्यभिहिते राजा पुनरूचे, किं तानि मौक्तिकानि विद्धान्यथवा तान्यविद्धानि सन्तीत्याऽऽकर्ण्य स पुनर्बहिर्गत्वाऽऽगत्य चाऽविद्धानि सन्तीति राजानमवादीत्।

कथमवगतमेतदिति राज्ञा पृष्टः सोऽभाषिष्ट, हे स्वामिन्नितो बहिर्गच्छता मया पुरतः प्रथममेव गृहोपेरिभूमौ मज्जनं विधायोत्थिताया: कस्याश्चिन्मृगीदृशः केशेभ्यः पतन्तः श्वेततराः पयोबिन्दवो वीक्षाञ्चक्रिरे, तेन मया मौक्तिकानि ज्ञातानि। विद्धत्वाऽविद्धत्वनिर्णयश्च कथं व्यधायि?। सा सारङ्गशावाक्षी परिणीता नास्तीति पुनस्तत्स्वरूपज्ञानेनैतानि मौक्तिकान्यविद्धानि सन्तीति तन्निर्णयमहमकार्षम्। अहो! अस्य प्रवयसोऽपि शकुनज्ञानम्! अहो! अस्य बुद्धिधनम्! अहो! अस्य कौशलमित्यभीक्ष्णमभिनन्दितः स राज्ञा, किं बहुना? तद्दिवसतो विशेषेण स राज्ञा धन-कनक-ग्रामादिदानेन प्रतिदिनं सदकारि। ॥ **इति कलाकौशले धर्माऽभिधशाकुनिककथा ॥ २४५॥**

॥ २४६॥ पुण्यप्रभावे पत्तनाऽधीशभीमनृपकथा॥

पुण्यादेव हि पुंसामीप्सितार्थसिद्धिः, यतः—

धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं, धर्मेणैव भवन्ति निर्मलयशोविद्यार्थसम्पत्तयः ।
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते, धर्मः सम्यगुपासितो भवति हि स्वर्गाऽपवर्गप्रदः ॥ १॥

मन्त्र-यन्त्र-तन्त्रौषधादीनामपि सिद्धिः पुण्यैरेव स्यात्, यतः—

वैद्यैरनुक्तादपि भेषजात्स्या-द्रोगक्षयः पुण्यवशेन पुंसाम् ।
यन्मर्तुकामस्य महीभुजोऽभू-दीक्षोर्दलेनाऽपि रुजो विमुक्तिः ॥ २॥

तथाहि—सप्तदशसहस्रग्राममण्डितश्रीगुर्जरात्रदेशाधिराजः **श्रीभीमनामा** महीपतिः पत्तने राज्यं करोति स्म। तस्य च पूर्वोपार्जितकर्मवशेन महान् कुरोगः प्रादुरासीत्। स च रोगः प्रभूतैरपि मन्त्र-यन्त्र-तन्त्रौषधैरुपचरितोऽपि न शान्तिमेति स्म। तेन रोगेण रात्रौ उपरोममूलं कृमयः स्युः, तत्पीडितस्य राज्ञः सर्वथा निशि निद्रा नैति। किं बहुना?

तेन रोगेण पराभूतः स राजा कालकूट-कण्ठपाश-शस्त्रघात-कूपपातादिभिर्मरणोपायै-र्मुमुर्षुरजनि। अन्येद्युस्तस्य राज्ञः पर्षदीति किंवदन्ती भवति स्म, **चित्रकूटदुर्गे करणसिंहस्य** राज्ञः प्रसादपात्रं **गोविन्दसंज्ञो** महावैद्योऽस्ति। जीवातुरिव स भिषग्वरेण्य आयुषः सन्धानं विना सकलानपि

महतो रोगान्निराकरोतीति जनश्रुतिं श्रुत्वा स बहुमानं **भीमेन** राज्ञा समाहूतः, **करणसिंहेन** राज्ञा प्रेषितश्च स गोविन्दः सुखासनाऽऽरूढः पत्तनं प्राप। तेन भिषजा राज्ञः स्वरूपं प्रातः सायं च विलोक्य कथितं, हे राजन्नस्य महारोगस्य क्षयो नास्ति, तेन तुभ्यमस्तु स्वस्ति, अहं च गच्छन्नस्मि स्वस्थानमित्यभिधाय स निजनगरमागत्य **करणसिंहराजस्य** पुरो **भीमराजस्य** रोगस्वरूपं जगौ।

अथ **भीम**भूपोऽपि शक्राऽशनिनेव तेन महारोगेण पराभूतः कनक-धन-धान्य-करि-तुरगादिवितरणेन सकलमपि लोकं सन्तोष्य **सिद्धपुर**परिसरवाहिनीं **सरस्वतीं** नदीं महातीर्थं मत्वा तत्तीरे मर्तुकामः पत्तनतो निर्ययौ। अश्रान्तमश्रुबिन्दुकर्दमिताऽखिलाऽचलातलेन सकलेनाऽन्तःपुरपरिवार-प्रधानपौरपरम्परा-प्रमुखेण लोकेनानुगम्यमानो राजा वर्त्मनि महदेकमीक्षुशकटमागच्छदीक्षाञ्चक्रे। सञ्जातेक्षुभक्षणेच्छः स राजा महतीमेकामीक्षुयष्टिं मूल्येनाऽऽदाय तत्खण्डमेकमत्ति स्म। पीयूषपानादिव तस्य रसस्वादादेव राज्ञो रोगः क्षीयते स्म। किं बहुना? बहुभिरहोभिस्तस्यामेव निशि राज्ञो निद्रासुखमजायत। अथ प्रभाते राजा सर्वथाऽऽत्मानं नीरुजं मत्वा सुवर्णादि बहु धनं वितरन् ततः पश्चाद्ध्याजुघोट। महोत्सवपुरस्सरं पूरितपुष्पप्रकरं नानावर्णध्वजधोरणीतोरणरमणीयं पत्तनं महानगरं प्रविश्याऽद्य लब्धाऽवतार इव राजा महान्तमुत्सवमसूत्रयत्। अथ मिथः सौहार्दहृद्यहृदयः **श्रीभीम**भूपः स्वसुहृदश्चित्रकूटाऽधिपस्य **करणसिंहस्य** राज्ञः स्वसमाधिसूचकं लेखं करि-तुरगादिवर्धापनिकां च प्रेषयामास।

लेखादवसितभीमसमाधिना तेन स **गोविन्द**वैद्य इत्युपालब्धः, रे गोविन्द! रे वैद्याऽधम! भवता मत्पुरस्तादित्यभाणि यद्भीमस्याऽऽरोग्यं न भविता, अहो! एतादृशेन वैद्यकलाकौशलेनाऽस्मदीयं ग्रामादिधनं भवता भुज्यते? अहो! राजवैद्यत्वं त्वदीयं! येन त्वया तस्य रोगोऽपि नाऽज्ञायि, [तर्हि] कुतः प्रतिक्रिया? अथ स वैद्यो वदति स्म, हे देव! भवता मुधैवाऽहमुपालब्धः, यतोऽहमिहाऽस्मि, स रोगस्तु तत्र शान्तिं गतः, तेनात्र स्थितोऽपि किंचिन्महत्कौतुकं वच्मि शृणु, नूनं तस्य रोगस्य शान्तिरीक्षोर्भक्षणेन जातास्ति। किं तदा तत्रेक्षोः प्राप्तिर्नासीदिति पुनः स्वामिनाऽभिहिते स स्माह, 'यस्येक्षोर्मूले भुजङ्गी प्रसूता भवति, तस्येक्षो रसास्वादेन स रोगः शाम्यति। परमसम्भाव्यं न वक्तव्यमिति नीतिवचनं जानता मया तद्भेषजं नाऽभ्यधायि, यद्भेषजमाकाशकुसुममिव खरविषाणमिव च दुर्लभं, तद्भेषजकथनेन भिषजां महती त्रपा स्यात्, अथ च भवतां विनोदस्तर्हि तस्य शुद्धिर्विधीयतामिति श्रुत्वा **करणसिंहेन** राज्ञापि यस्मिन् ग्रामे यस्मिन् क्षेत्रे यस्मिंश्च केदारे स ईक्षुरुत्पन्नस्तस्य शुद्धिं गवेषणापुरस्सरं तत् सम्यगवगम्य गो**विन्दो** विशेषतो बहुमेने। **॥ इति पुण्यप्रभावे पत्तनाधीशभीमनृपकथा ॥ २४६ ॥**

॥ २४७॥ महद्भिः सह परिचयेऽपि हिताऽवाप्तिरित्यर्थे कुरुनामचाण्डालकथा॥

अपि विरुद्धवचनं वदतां महतां संस्तवोऽवश्यं श्रेयसे, यतः—

द्वेषोक्तिरपि महतां, ध्रुवं भवति सिद्धये। यद्धीरोक्तार्कदुग्धेन, चक्षुः सज्जमभूत्कुरोः ॥ १ ॥

तथाहि— **देवकुलग्रामे** परमार्हतः पुण्यवान् वैद्यविज्ञानविज्ञो विशेषतो नेत्रचिकित्सानिपुणः श्रीमान् **धीराह्वः** श्रावकः। तत्रैव ग्रामे पापकर्मकर्मठः **कुरुना**मा चाण्डालः, स चैकेन चक्षुषा जन्मतोऽन्धः, द्वितीयमपि तस्य चक्षुः पूर्वकर्मनिर्मितेन रोगेण निस्तेजोऽजनिष्ट। ततः स पुत्रपाणिलग्नः प्रत्यहं समेत्य **धीरवैद्य**मेवं वक्ति, हे महानुभाव! मदीयमेकं चक्षुः सज्जं विधेहीत्यभीक्ष्णं वदति

१. तुला- 'इक्षुगण्डिकां वा भक्षयेत् कृष्णसर्पेण दंशयित्वा, वल्लीफलानि वा, मूलकं वा।' इति आष्टाङ्गसङ्ग्रहे अध्याय १७। चरकसंहिता चि. अध्य. १३ • अपि द्रष्टव्या ॥

तस्मिन् **धीरो** दध्यौ, एतादृशाः पापिनो गताक्षा एव वरं, तेन जानन्नप्यस्य दृग्भेषजं न वक्ष्ये। पापिनां हि बधिरत्वा-ऽन्धत्व-मूकत्व-पङ्गुत्वादिदोषाः परापवाद-परस्त्रीमुखावलोकन-परावर्णवर्णन-परधन-हरणाद्यनर्थहेतवो न इति मत्वा स भेषजं पृच्छतस्तस्य प्रत्युत्तरमपि न दत्ते।

तथा दृग्भेषजं ब्रूहि दृग्भेषजं ब्रूहीति प्रतिदिनं कुरोः कथनेन अतिमथनेन चन्दनाद्वह्निरिव कुपितस्य तस्य **धीरस्य** मुखाद् याहि याहि त्वच्चक्षुष्यर्कतरोर्दुग्धं निक्षिपेति कठिनं वचनं निर्ययौ। श्रावकत्वेन सत्यवादिनस्तस्य वचनं समीचीनं मन्यमानः स सत्वरं ततो गत्वा स्वगृहपृष्ठस्थस्य गुरोरर्कतरोर्दुग्धं स्वचक्षुषि निक्षिपति स्म। सुधाऽञ्जनेनेव तेन दुग्धेनाऽञ्जितं तन्नयनं निर्मलतरमजनि। किं बहुना ? नक्तमपि दिवेव पश्यन् स समजनिष्ट। अथैकदा स कुरुचाण्डालः सुवर्णादिनाणकं युग्मं च वरवसनयोः श्रीफलदशकं च प्राभृते **धीराह्वस्य** श्रावकस्य पुरो मुमोच। किमर्थमिदं मदग्रे प्राभृतीक्रियते ? इति त्वदुक्तेन भेषजेन मन्नेत्रं निष्पटलमभूदित्यनृणत्वाय मयैतदुपदीक्रियते, तत् श्रुत्वा यदि चाऽर्कदुग्धेन चक्षुः स्फुटति, तदा कथमस्य चक्षुः सज्जमासीदिति मत्वा तेन नेत्रचिकित्साशास्त्र-पुस्तकमीक्षितं,[1] धरान्तर्निहिते निभृतघृतभृते मृद्भाजने प्ररूढस्याऽर्कतरोर्दुग्धेन चक्षुःपटलं सपदि प्रयातीति सम्यग् ज्ञात्वा धीरेण चाण्डालपाटके तद्गृहपृष्ठे तत्राऽर्कतरोरश्च गत्वा तत्तथैव निरणायि, उक्तश्च कुरुरिति, हे भद्र! तवानेन प्राभृतेनालमेतत्पश्चाद् गृहाण, किंत्वद्यप्रभृति त्वया दया पालनीयेति हितोपदेशैः स श्रावकस्तं सर्वथा प्राणाऽतिपातविरतं विधत्ते स्म ॥ **इति महद्भिः सह परिचयेऽपि हिताऽवाप्तिरित्यर्थे कुरुनामचाण्डालकथा ॥ २४७ ॥**

॥ २४८ ॥ बालाः स्वकदाग्रहं न त्यजन्तीत्यर्थे सुमतिमन्त्रिकथा॥

यस्य तस्यापि कदाग्रहो मोचयितुमशक्यः, तत्र च बालानां कदाग्रहस्तु विशेषतो मोचयितुमशक्यः, यतः—

नारीणामिव बालानां, दुरुत्तारः कदाग्रहः। यन्नोदतारि भूपेन, सोऽभींभूतस्य मन्त्रिणः ॥ १ ॥

तथाहि—**बलाज** पुरे पुरन्दरस्य राज्ञः परम्परागतः प्रवयाः **सुमति**नामाऽमात्यः, तस्य मन्त्रिणो वार्धक्ये पुत्रो जातः, स च सूनुर्वार्धक्ये जातत्वेन पितुः प्राणेभ्योऽपि प्रेयान्, यतः—

वडपणि पूतपूतमनि मायउद्धाल इव वरतरु अरच्छाय
तरस्यानीर मोर मनिमेह प्रगटा पांचइ वल्लभ एह ॥ २ ॥

तेन तल्लालनपालनखेलनजनितव्यग्र्यवशतो राजसेवावसरमतिक्रम्याऽतिक्रम्य स मन्त्री सभायामायाति। इत्थं मन्त्रिणोऽवसराऽतिक्रमेण राजकार्याणि सीदन्ति स्म। सचिवोऽपि सुतलालन-लीलाविलासेन स्वजन्म सफलं विदन् दिने दिने बहु बहु विलम्बं विदधे। यतः—

पियं महिलामुहकमलं, बालमुहं धूलिधूसरच्छायं ।
सामिमुहं सुपसन्नं, न हुंति थोवेहिं पुन्नेहिं ॥ ३॥
डिंभाण रवो तुरियाण, सद्दो मग्गणजणाण करपसरो ।
गुहिरविलोअणसद्दो, धन्नाण घरे समुच्छलइ ॥ ४॥

१. तुला- अर्कक्षं मूलमापोथ्य, मुहूर्तं वारिणि न्यसेत् । एतदाश्च्योतनं दृष्टं नयनामयनाशनम् । इति वङ्गसेने *नेत्ररोगाधिकारे*

अथैकदा तेन पुरन्दरेण राज्ञा मन्त्री प्रोचे, कथं त्वया राजसभायामवसरे नाऽऽगम्यते ? हे देव! देवपादप्रसादादधुना वार्धके तनुजो जातोऽस्ति, स च स्तनन्धय आडकं मण्डयति रोदति च, सुखभक्षिका-कमनीयक्रीडनकादिके बहुवस्तुनि दत्तेऽप्याडकं स न मुञ्चति, कटौ क्रोडे स्कन्धे मूर्धनि चाध्यारोपितोऽपि न मन्यते, तेन भूयान् विलम्बो भवतीति किं करोमि?

हे सचिव! शिशुर्यद्याचते तद्वितीर्यते, तदा किं दुष्करं डिम्भानामाडकस्य भञ्जनम्? इति श्रुत्वा हसित्वा च सचिवोऽवोचत्, हे देव! शिशुरहं, भवन्तश्च वसारः, तेन शिशोर्ममाऽऽडकं भञ्जयतु तात इत्यभिहिते वरमिति राजा स्माह । अथ सोऽपि शिशुरिव लालां मुञ्चन् बाष्पबिन्दूनुज्झरन् रिङ्खन् गाढं गालीर्ददद्धूलीरुच्छालयंश्च श्मश्रु-कचाकर्षणं कृत्वा मन्मयैर्वचनैरेवमूचे, हे बप्प! सम्पूर्णोभयकोटिमञ्जुलराजभोग्यतण्डुलैः पक्वं, निस्तुषमुद्गदालीसारं, गवीननवीनघृतधारं, माषपर्पटपेशलं, सुसंस्कृतशाकाऽविरलं, पुण्याङ्कुरं कूरं भोक्ष्ये। किं च नानामणिकच्चोलकसनाथायां सुवर्णस्थाल्यां सकलशाक-पर्पट-घृतगर्भितकूर-दालीकवलं कृत्वा स्वयं हस्तेन मां भोजयेति भूपोऽपि सकलं तत्तथैव सूपकारेण सत्वरमचीकरत्। ततः स्वयं च तादृशं कवलं तन्मुखे मुञ्चन्नर्भीभूतेन मन्त्रिणा भूमौ निपत्य रोदनपुरस्सरं राजा व्याजहे, हे बप्प! कूरं घृतं शाकं पर्पटं दालीं च पृथक् पृथक् कुरु, चूर्णितं शाकादिमिश्रमहं ग्रासं न भोक्ष्ये, इत्यभिधाय मुखमुद्रणं च विधाय भूमौ निपत्य स बाढं रुरोद। अथ पार्थिवः प्राह— हे मन्त्रिन्! सुनृतं बालानामाडकः शक्रेणापि भङ्क्तुं न शक्यते, सचिववचनं समीचीनमिति ब्रुवन् राजा तं मन्त्रिणः पुत्रं स्वपुत्रवल्लालयति स्म।

॥ इति बालाः स्वकदाग्रहं न त्यजन्तीत्यर्थे सुमतिमन्त्रिकथा ॥ २४८ ॥

॥ २४९ ॥ धनबले मूषककथा॥

पुंसां सर्वाऽखर्वगर्ववनकुल्यातुल्यं हि धनमेव, यतः—

वर्षा नदीनां ऋतुराट् तरूणा-मर्थो नराणां पतिरङ्गनानाम् ।
न्यायप्रधानश्च नृपः प्रजानां, गतं गतं यौवनमानयन्ति ॥ १ ॥

सम्पत्तिर्हि मनुजानामुन्मादाय स्यात्, यतः—

यौवनं धनसम्पत्तिः, प्रभुत्वमविवेकिता। एकैकमप्यनर्थाय, किं पुनस्तच्चतुष्टयम् ?॥ २ ॥

पुमानास्तां, पशुरपि धनेनोन्मादं धत्ते, यतः—

पशूनामपि दर्पाय, जायते सम्पदां भरः। दत्तफालः क्षितेरादत्, यदाखुरपि चूरिमम्॥ ३ ॥

तथाहि—**वधोटकग्रामे देवशर्मा** तापसः, स च स्वभक्तलोकेभ्यो याचितैर्गोधूमै-र्गृहीतघृत-गुडेन गोधूमपूपिकाचूरिमं विधायाऽर्धं वैकालिकार्थं सिक्के विमुच्य तदर्धं च प्रातरत्ति।

तस्मिंस्तापसे च गोधूममार्गणार्थं क्षेत्र-खलादौ क्वापि समुपेयुषि सिक्कोपरि विमुक्तमर्धं चूरिमं विस्तारिणा गन्धोद्गारेण ज्ञात्वा महानेको मूषकः क्षितेः फालं दत्त्वा नित्यमत्ति स्म।

१. आडक=हठ ॥

देवशर्माप्यागतश्चूरिममदृष्ट्वा खिन्नश्चेति दध्यौ, अहो! निरुद्धप्रवेशनिर्गमद्वारं विहितमस्ति, तदा केन मम चूरिमं जग्धमिति मत्वा निरुद्धशरीरव्यापारः स द्वाररन्ध्रेण तथैव विदधानमाखुमालोक्येति चिन्तयाञ्चकार, यदयं मूषकः क्षितेः फालं दत्त्वा पुरुषदध्नमूर्द्ध्वसिक्कतश्चूरिममत्ति, तन्नूनमस्य बिलान्तर्निहितं किमपि सुवर्णादि भूरि धनमस्ति, तस्य धनस्य बलेनायमाखुर्मम चूरिममत्ति। ततः प्रवेशनिर्गमेन तद्बिलनिर्णयं विधाय स तापसस्तद्बिलतः कनकादि धनं घनमादत्ते स्म। तस्मिन् धने च गृहीते स वज्रदग्धो भग्नकटिरिव फालं दातुमलं नाऽभूत्। ॥ **इति धनबले मूषककथा** ॥ २४९ ॥

॥ २५० ॥ स्नेहे जोह्लणचारणकथा ॥

प्रीतिर्हि चित्ताऽनुरागजाता शस्ता, न पुनः सम्बन्धसम्भवा, यतः—

प्रेम स्यान्न हि सम्बन्धात्, किन्तु चित्ताऽनुरागतः ।
जीवत्यम्बा गते पुत्रे, महमल्ला च संस्थिता ॥ १ ॥

तथाहि—**सौराष्ट्र**देशमण्डने **वामनस्थली**ग्रामे **पउमल**स्य चारणस्य **प्रीतिमती**-भार्याकुक्षिसम्भवो **जोह्लण**संज्ञः पुत्रः, स च द्वासप्ततिकलाकुशलो विशेषतो **भरतपिङ्गल**शास्त्रे निपुणो यौवनमापन्नः पित्रा **कच्छ**देशवासिनः **करणदत्त**स्य चारणस्य जयन्तीमिव रूपसौभाग्यवतीं **जयन्ती**नामकन्यां परिणायितः, **रोहिण्या** हिमरश्मिरिव तया भृशमासक्तः स गृहकार्यविमुखो वासराणि गमयति स्म। प्रकामं कामाऽऽसक्तं पुत्रमेकदा जनको जगौ, हे पुत्र! कामे भृशमासक्तस्य पुंसः सर्वपुरुषार्थसार्थपाथोरुहभास्करोऽर्थरूपः पुरुषार्थः क्षयं याति, तस्मिंश्च क्षीणे सर्वं विनष्टमेव। अस्मिंश्च सत्यसन्तोऽपि गुणाः प्रादुर्भवन्ति। यतः—

यस्याऽस्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ते ॥ २ ॥

जाई विज्जा रूवं, तिण्णिवि हिंडंतु कंदरे कुहरे ।
अत्थुच्चिय पाडुच्चो, जेण गुणा पायडा हुंति ॥ ३ ॥

प्रियतमाप्रेमपाशनिबद्धोऽपीति पित्रा शिक्षितः स पितरावनापृच्छ्य स्वस्त्रियं चाऽनुज्ञाप्य निश्येकाकी गृहान्निर्गतः क्रमेण **चित्रकूट**मायया। तत्र **मदनसिंह**राजस्याऽऽशीर्वादं वदन्नेवमवादीत्—

आत्तः शत्रुपरम्परावधकृते खड्गः प्रतापाय ते, शश्वत्तीव्रतराय तेन तनुते राजन्नुपालम्भनम्।
तैले तोयमिवात्र यत्प्रसरिता नीताः कथाशेषतां, सर्वेऽपि त्वयकाऽरयस्तदनृणो भर्तुर्भवेयं कथम् ॥ ४ ॥

इति तत्काव्यकलाकौशलचमत्कृतचेताः स राजा तं करि-तुरग-कनक-ग्रामाऽऽदिभिर्बहुसत्कृत्य भ्रातरमिव प्रेमदृशा पश्यन्नहर्निशं बहु मेने ।

विशेषतस्तस्य सङ्गीतगीतकलाकलापेन प्रीतस्वान्तो राजा तं भोजना-ऽऽच्छादन-शयना-ऽऽसन-गमनादिषु सकलेष्वपि कृत्येषु सहभागिनं कुरुते स्म। तस्य च राज्ञो **महमल्ले**ति पात्रं, सा चोर्वशीव नृत्यकलाकुशला, रतिरिव रूपसौभाग्यपेशला, लक्ष्मीरिव पुरुषोत्तमचित्तहारिणी, पार्वतीव महेश्वरस्वान्तवशकारिणी, रोहिणीव राजमनःप्रसादिनी, वसन्तश्रीरिव कामोन्मादिनी, **जोह्लणे**न सममन्तःपुरान्तस्तस्थुषो राज्ञोऽग्रे नित्यं नृत्यं करोति। **जोह्लणो**ऽप्याऽऽहार्य-वाचिका-ऽऽङ्गिक-सात्विकप्रभृतिचतुर्विधाभिनयसूचिताशेषवस्तुविस्तारं ग्रामत्रयाभिरामषड्जादिषट्स्वर-पेशलालापप्रपञ्चिताशेषस्वान्तचमत्कारं तत-घन-शुशिरा-नद्धादिचतुर्विधातोद्यहृद्यं गीतानेक-पुरातनपुरुषप्रधानप्रबन्धपद्यं विहिताप्सरोजनकलाहास्यं लास्यं विदधानं महमल्लाभिधानं भूपपात्रं वीक्ष्य **जोह्लणो**ऽपि प्राप्तपरमानन्द इव मुदा मेदस्वी बभूव। महमल्लापि ताण्डवाडम्बरगुणज्ञं तं मत्वा विशेषतो निजनृत्यविज्ञानमदीदृशत्। किं बहुना ? सा पात्रं, पात्रगुणज्ञश्च स इत्येतौ द्वावपि मिथो मनसा दृशा च सङ्गतौ। अन्येद्युस्तयोः कौशलेन प्रमनाः पार्थिवः पार्वतीमहेशयोरिव तयोः परस्परं प्रभूतं प्रेम मत्वा, यावदिह त्वं तिष्ठसि तावदियं तव कलत्रमित्यभिधाय तां तस्मै ददौ, अथैतौ निशङ्कं रेमाते। रम्भया समं जम्भारेरिव तया सह कामभोगान् भुञ्जानस्य तस्य कलेव द्वादशाब्दी व्यतिचक्राम।

इतश्च पतिशुद्धिमलभमाना सा जयन्ती श्वशुरमाह, हे तात! सौभाग्यपराभूतश्रीसुतस्य तव सुतस्य शुद्धिर्नास्ति, तेनाहं वराकी कथं भवामीति स्नुषावचनैरुज्जागरितप्रबलशोकाङ्कुरः स स्नुषां बभाषे, हे पुत्रि! अद्यप्रभृति पुत्रस्यावश्यं शुद्धिं करिष्यामीत्यभिधाय तस्थुषस्तस्यैकदा **चित्रकूटा**दागतः कोऽपि भट्ट मिलितः, त्वं कुतः समागा इति पृष्टोऽसावभाषिष्ट चित्रकूटादिति तेनोक्ते, तत्र किमस्ति कौतुकमिति पृष्टः स पुनरभ्यधात्—

नाट्यपात्रं महामल्ला, जोह्लणश्चारणो गुणी। चित्रकूटगिरीन्द्रस्य, दृग्युग्ममिदमद्भुतम् ॥ ५ ॥

इति तद्वचसा पुत्रशुद्धिं प्राप्य स्नुषां पत्नीं च पृष्ट्वा क्रमेण स चित्रकूटमाययौ। पितरमागतमुदीक्ष्य **जोह्लणो**ऽप्युत्थानस्नानभोजनादिना बहु सदकरोत्। वस्त्राभरणादिभिर्गोत्रदेव-मिव पितरं संतोष्य स पितुरागमनं राज्ञः पुरो जगौ।

राजापि तत्पितरं तमिव कामं मन्यते स्म। पितुराग्रहेण ततो निजगृहं यियासुः स राजानमप्राक्षीत्, हे देव! चिरविरहिते मम पत्नीमातरौ खेदं कुरुतः, तेन यदि युष्मदादेशः स्यात्तदाहं निजं पुरं व्रजामीति भणितस्य राज्ञः सनिर्बन्धनिदेशेन स्वगृहगमनोत्सुको निशि **महमल्ला**माह स्म, हे सुन्दरि! यदि त्वं मन्यसे तदाहं स्वमातुर्मिलनाय यामि। पविपातेनेव तद्वचनेन हृदि हता सा वचना-ऽऽकारेङ्गितैः सर्वथा स्वपुरगमनोत्सुकं तं मत्वाऽब्रवीत्—

पाधोरे पंथें जजो, वेहेलेरा वलजो। डुंगरजीवी जीवजो, उंबर जिम फलजो ॥ ६ ॥

१. प्रीतिमती श्व० PD ॥

या उच्चवर्णा पण्यवर्णिनी धनलोभेन यदि नीचवर्णं नरं सेवते, तदा सा सर्वस्वहरणलक्षणं राजदण्डमर्हति, यदि च यः प्रोच्चवर्णः कामी पुमान् रम्यरूप-लावण्य-तारुण्यादिगुणमूढमना नीचवर्णां गणिकां भजते, तदा सोऽपि तादृशमेव राजदण्डमर्हतीत्येषा चिरकालीना व्यवस्थाऽस्ति।

तत्र चाऽस्ति सकलगाणिक्यमाणिक्यं **मदिरा** नाम पण्यमदिरेक्षणा, रतिरिव कामानन्द-विधायिनी सा वसन-कनक-मौक्तिकादिवस्तुग्रहणार्थं मकरन्दस्य हट्टे समायान्ती तेन सह परिचयं प्रगुणयति स्म। किंचास्या अनिर्वर्ण्यवर्ण-लावण्य-तारुण्य-रूप-सौभाग्यादिगुणगणं ज्ञात्वापि स मकरन्दो मुनिरितैतस्यां विकृतमना मनागपि नासीत्। अथ चैषा दध्यौ, अहोऽहं मन्मथस्य सर्वस्वं, यतः—

ईर्ष्या कुलस्त्रीषु च नायकस्य, निःशङ्केलिर्न पराङ्गनासु ।
वेश्यासु चैतद् द्वितयं प्ररूढं, सर्वस्वमेतास्तदहो स्मरस्य ॥ ५॥

किञ्च मदवलोकन-जल्पन-संस्तवन-हसन-गमनैरकामाः साधवोऽपि स्मरातुराः स्युः, यतः—

कुप्यत्पिनाकिनेत्राग्नि-ज्वालाभस्मीकृतः पुरा।उज्जीवितः पुनः कामो, मन्ये वेश्याविलोकितः ॥६॥

असौ तु सामोदां चम्पककलिकां मधुकर इव मां मनसापि नेहते, तदाहमेवाऽऽदावेनं प्रार्थयामि, किञ्च प्रथमप्रार्थनायामस्माकं न मन्दाक्ष्यमिति मत्वा सान्येद्युः—

स्त्री कान्तं वीक्ष्य नाभिं प्रकटयति मुहुर्विक्षिपन्ती कटाक्षान्,
दोर्मूलं दर्शयन्ती रचयति कुसुमापीडमुत्क्षिप्य पाणिम् ।
निःश्वासस्वेदजृम्भाः श्रयति कुचतटस्रंसि वस्त्रं विधत्ते,
सोत्कण्ठं वक्ति नीवीं शिथिलयति दशत्योष्ठमङ्गं भनक्ति ॥ ७॥

इति **कामशास्त्रो**क्तरक्तस्त्रीचिह्नं सृजन्ती सा तं प्रार्थयाञ्चक्रे। तयेत्यभ्यर्थितोऽसौ चिन्तयाञ्चकार धिगेताः, यतः—

आनन्दयन्ति युक्त्या ताः, सेविता घ्नन्ति चान्यथा।दुर्विज्ञेयाः प्रकृत्यैव, तस्माद्वेश्या विषोपमाः ॥ ८॥
वेश्यासौ मदनज्वाला, रूपेन्धनसमन्विता। कामिभिर्यत्र हूयन्ते, यौवनानि धनानि च ॥ ९॥

कुष्ठिनोऽपि स्मरसमान्, पश्यन्तीं धनकाङ्क्षया ।
तन्वन्तीं कृत्रिमस्नेहं, निःस्नेहां गणिकां त्यजेत् ॥ १०॥ [योगशास्त्रे २/९२]

एवं वेश्यासु सर्वथा विरक्तचित्तं तं मत्वा कपटपटीयसी सा तमाह स्म, हे प्राणनाथ! यदि त्वं मां नाऽङ्गीकरिष्यसि, तदाऽहमवश्यमग्नौ प्रवेशं करिष्यामीत्यभिधाय मायाप्रपञ्चचतुरा मकरन्दप्रभृतिपौरसाक्षिकं मामसौ मकरन्दो न भजते, तेनाहमेवं साहसं विदधामीत्यभिधाय ज्वालापटलमालिनि ज्वलने प्रविश्य सा मध्ये विहितसुरङ्गाप्रयोगेण स्वगृहमेत्य भूमिगृहे सुखेनाऽस्थात्।

धिगेनं स्त्रीहत्याकारिणं दुरन्तदुरितधारिणमिति नागरैर्निन्दितो मकरन्दोऽपि स्वस्थानमेत्येति दध्यौ, हा! मया पापिना शोभनं नाऽकारि, यतः स्त्रीहत्यापातकमलिनात्मनो ममावश्यमधोगतौ

तथा च श्रीमुनिसुन्दरसूरिपादाः—

प्रसन्नचन्द्रराजर्षे-र्मनःप्रसरसंवरौ। नरकस्य शिवस्यापि, हेतू भूतौ क्षणादपि ॥ २॥

अपि च—

अभिप्रायवशात्पाप-ध्यानं नो वस्तुदर्शनात्। वाच्यात्र विदुषां मुख्यै-र्घृतचर्मवणिक्कथा ॥ ३॥

[1]तथाहि—**महानगरे** नगरे घृतचर्मव्यापारकारिणौ द्वौ वणिजौ वसतः स्म। एकदा तौ द्वावप्याषाढमासे स्वस्वव्यापारचिकीर्षया ग्रामान्तरयियासू स्वनगरान्निर्गतौ, महापत्तनं पुरं च प्रविष्टौ। तत्र च **धनवत्या** रन्धनकारिण्याः श्राविकाया गृहेऽन्नपाकं कारयितुमनसौ प्राप्तौ। कृतजोत्कारौ तौ कौ युवां? किंकिं व्यापारविधायिनाविति तया पृष्टौ तावूचतुः।

हे मातः! श्रावकावावां, किंचैको घृतव्यापारकारी द्वितीयश्च चर्मव्यापारकारीति सम्यक् तदभिहितमाकर्ण्य धीमती सा दध्यौ, नूनं यो घृतव्यापारं चिकीर्षुः स पुण्यवान्, यतो मेघा वर्षन्ति, तृणान्युद्गच्छन्ति, तद्भक्षणेन गावो महिष्यश्च प्रभूतदुग्धदायिन्यः स्युः तदा च घृतानि समर्घाणि सुलभानि भूयांसि भवन्तीत्यस्य ध्यानं श्रेयस्तरमिति। यो हि चर्मव्यापारचिकीर्षुः स हि पापवान्। यतो घनाघना न वर्षन्ति, तदा तृणानि नोद्गच्छन्ति तदप्राप्त्या च बहवः पशवो म्रियन्ते, तदा च चर्माणि समर्घाणि सुलभानि भवन्तीत्यस्य च मनःपरिणामो न श्रेयानित्यसौ पापवानिति च मत्वा सा श्राविकामतल्लिका सर्पिर्व्यापारचिकीर्षोरासनं गृहमध्ये चन्द्रोदयाधस्तादमण्डयत्। द्वितीयस्य चासनं गृहाद्बहिराकाशे च । अथ तौ स्वं स्वं यथोचितमन्नं भुक्त्वा स्वस्वसमीहितं ग्रामं च गत्वा निजं निजं व्यापारं कृत्वा च वलमानौ तत्र नगरे तस्या एव श्राविकाया गृहे भोजनार्थं प्राप्तौ।

कृतज्ञोत्कारौ तया पृष्टसुखव्यापारौ भुङ्क्तेरवसरे व्यत्ययेन निवेशितौ च तौ तां पृथक् पृथक् कथयति स्म। हे मातर्व्यापारार्थं गच्छतोरावयोस्त्वयोचितमकारि, यतो घृतव्यापारो हि सर्वव्यापारेभ्यः श्रेयान्, तेन तत्कारिणो मम गृहान्तरासनमण्डनादिप्रतिपत्तिः शुभा व्यधायि, अथान्यः प्राह चर्मव्यापारो हि सर्वत्र सतामतिनिन्दनीयः, सर्वव्यापारेभ्योऽधमतमश्च, तेन तद्विधायिनो मम बहिरासनमण्डनादिदुःप्रतिपत्तिरुचिता व्यरचि। साम्प्रतं यदावयोरासन-मण्डनादिषु वैपरीत्यं तत्किं कारणम्? अथ सा स्वयं प्राक्चिन्तितमभिधायाऽधुना विहितस्य वैपरीत्यस्य कारणमाह, हे पुत्रौ! शृणुत, घृतव्यवसायिनो हि स्वान्तवृत्तिरिदानीमशुभा, यतोऽयं घृतं महार्घमीहते, घृते महार्घता हि पशूनामुपद्रवेणैव स्यात्, मेघाऽभावेन तृणानामनुद्गमः, तृणाऽनाप्त्या हि पशुपरासुता, किं बहुना? एवं चिन्त्यमाने हि जगतोऽपि द्रोहः। अथ चर्मव्यापारकारिणो हि मनोवृत्तिरधुना श्रेयसी, यतोऽयमधुना चर्माणि महार्घाणि समीहते,

१. तुला- उपदेशप्रासादे व्या. १५३॥ फलमाह-PD॥

चर्मणां महार्घता हि पशूनामारोग्येन बाहुल्येन च स्यात्, मेघा वर्षन्ति, तृणान्युद्गच्छन्ति तदा च पशूनामारोग्यं बाहुल्यं च, एवं हि जगतोऽपि कल्याणम्। हे भद्रौ! तेनैषा युवयोः प्रतिपत्तिविपरीतता, यतोऽहं श्राविका,

जं जं समयं जीवो, आविस्सइ जेण जेण भावेण ।
सो तंमि तंमि समए, सुहासुहं बंधए कम्मं ॥ ४ ॥ [उपदेशमाला]

इति तीर्थंकरवचनानि जानानाऽस्मि। यादृशी यस्य मनोवृत्तिस्तस्य तादृशी प्रतिपत्तिर्मया विधीयते। इति निशम्यैतत्सर्वमुचितं मन्यमानौ तौ स्वस्थानं जग्मतुः ॥ **इति मनःपरिणामे घृतचर्मव्यापारकारिवणिक्कथा ॥ २५१ ॥**

॥ २५२॥ वचनमाधुर्ये वैकुण्ठविप्रकथा ॥

विधुरितसुधामधुरिमा वचसां विलासो हि केषाञ्चिदेव, यतः—

वाङ्माधुर्यं सुधाधुर्यं, केषाञ्चित्स्याद्वपुष्मताम्। श्रेष्ठिस्वप्नफलं दुष्ट-मपि शिष्टं जगौ द्विजः ॥ १ ॥

तथाहि— स्वश्रीसञ्चयसम्भूषिताऽम्भोधितटे **बेन्नातटे** नगरे **पुण्यभद्र**श्रेष्ठी, स चैकदा-ऽऽधि-व्याधि-मलमूत्रादिपीडारहितः सुखसुप्तस्तुरीये यामिनीयामेऽनिष्टफलसूचकं स्वप्नमद्राक्षीत्। सद्यः प्रबुद्धेन मेधाविना तेनेति चिन्तयाञ्चक्रे, अहो! अयमत्यन्तानर्थदुष्टफलः स्वप्नो मया दृष्टः। नूनमनेन दुष्टस्वप्नेन ममाऽचिरेण किमप्यनिष्टं भवितेति मत्वा प्रभाते दुष्टस्वप्नशान्तिसज्जं मज्जनं कृत्वा कृतकौतुकमङ्गलः पुष्प-फल-तण्डुलादिपरिपूर्णपाणिपुटः स श्रेष्ठी **श्रीकण्ठ**नाम्नो द्विजन्मनो गृहं ययौ। यतः—

रिक्तपाणिस्तु नो पश्ये- द्राजानं दैवतं गुरुम् ।
नैमित्तिकं विशेषेण, फलेन फलमादिशेत् ॥ २॥

पुरः प्राभृतीकृतफलादिना श्रेष्ठिना स्वप्नफलं पृष्टः स द्विजो दध्यौ, नूनमनेन दुष्टः स्वप्नो दृष्टः—

दुष्टस्वप्नैः प्रकृतिगै-र्दुर्निमित्तैश्च दुर्ग्रहैः। हंसचारान्यथात्वेन, ज्ञेयो मृत्युः समीपगः ॥ ३ ॥

अतोऽनेन दुःस्वप्नेनास्य मृत्युः समीपवर्ती जातोऽस्तीति मत्वा सोऽवोचत्। व्याकरणादिसकलशास्त्रकुशलोऽपि स कटुकभाषी स्वप्नस्याऽस्य सत्यं फलं बभाषे। हे श्रेष्ठिन्! पुत्र-कलत्र-मित्रादिसर्वपरिवारात्प्रथममेव तव मरणमिति पविपातादपि कठिनतरेणाऽनेन वचनेन कामं दूनः सोऽचिन्तयत्, अहोऽनेन दुरात्मना कटुतरभाषिणा भृशं दुष्टमभाणि, तेनाऽलमनेन पापिना परुषभाषिणा, पृच्छाम्यन्यं कमपि कोविदमस्य स्वप्नस्य फलमिति मत्वा गृहमागत्य च गृहीतपुष्प-फलादिपूर्णपाणिः स पुनर्**वैकुण्ठ**नाम्नो द्विजन्मनो गृहं ययौ।

सर्वशास्त्रविशारदो मधुरतरभाषी च स द्विजो विनयवताऽनेन फलादिढौकनपूर्वं पृष्टः स्वप्नफलं, दुष्टोऽयं स्वप्न इत्यस्य मरणमासन्नं ज्ञात्वापि मधुरभाषित्वेन स द्विजो मधुरतरं बभाषे, हे श्रेष्ठिन्! स्वप्नोऽसौ शोभनतमः, तेन त्वं त्वत्पुत्र-कलत्र-मित्र-मातृ-पितृप्रभृति-निखिलपरिच्छदयुतश्च दुःखभाग् न भविष्यसीति श्रुत्वा मुदितमनस्कः स श्रेष्ठी यथोचितं विधत्ते स्म। **इति वचनमाधुर्ये वैकुण्ठविप्रकथा ॥ २५२॥**

॥ २५३॥ शीलपालने सुरूपानामश्रेष्ठिवधूकथा ॥

शीलं हि सर्वेषामपि भूषणं, यतः—

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो ।
ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता ।
सर्वेषामपि कीर्तिकारणमिदं शीलं परं भूषणम् ॥ १॥

अपि च—

मुखमंडण साचुं वयण, विण तंबोलह रंग ।
शील शरीरइ आभरण, सोनइ भरिउं अंग ॥ २॥

किं बहुना ? स्वर्गापवर्गादिसुखं शीलादेव, यतः—

व्याघ्र-व्याल-जला-ऽनलादिविपदस्तेषां व्रजन्ति क्षयं,
कल्याणानि समुल्लसन्ति विबुधाः सान्निध्यमध्यासते ।
कीर्तिः स्फूर्तिमियर्ति यात्युपचयं धर्मः प्रणश्यत्यघं,
स्वर्निर्वाणसुखानि सन्निदधते ये शीलमाबिभ्रते ॥ ३॥

तेन ये केऽपि पुण्यभाजः स्वशीलमुपायै रक्षन्ति ते धन्याः, यतः—

रक्षन्त्युपायैः स्वशीलं, धन्या काश्चित् सुलोचनाः। पक्षिप्रेषणतोऽरक्षि, यत्स्वशीलं सुरूपया ॥४॥

तथाहि—**धारावासे** नगरे **मणिशूरस्य** राज्ञो **धनचन्द्रो** नगरश्रेष्ठी, तस्य च **वीरचन्द्रः** पुत्रः, तस्य च **मणिसारेण** राजसूनुना समं मैत्री। एकदा **वीरचन्द्रे** ग्रामान्तरं गते द्विधा **सुरूपाममुष्य वीरचन्द्रस्य** गृहिणीं गवाक्षस्थां राजपुत्रोऽपश्यत्।

इन्दुकलामिव निष्कलङ्कां तामालोक्य समुल्लसितरागसागरः स सर्वत्र सञ्चारिण्याः स्वसञ्चारिण्या हस्तेन ताम्बूल-कनक-कङ्कण-कुसुम-चीनचेलादि शोभनं वस्तु तद्गृहे प्राहिणोत्। सतीनां परपुरुषप्रहिततामूलाद्यमरक्षणीयमपि सा मत्पतिमित्रमयमिति धिया तत्सर्वं प्रतिजग्राह। इति दूतीकरेण प्रहितं तत्सर्वमाददानायास्तस्याः पक्षद्वयी व्यतिचक्राम। सुभगशिरोमणिर्मणिसारः क्षमापकुमारस्त्वत्सम्भोगमीहते इति दूत्यैकदाभिहिते शीलालङ्कारशालिनी सा सुरूपा भूपसूनोः शिक्षां दातुमनाः कपटेनेति तामाह, इतः सप्तमेऽहनि ममौकसि

भवतागन्तव्यमिति तदुक्तेन सङ्केतेन स सायं तत्राऽऽगतः, सतीमतल्लिकया तया भोजितवटकः स तोयस्थाने स्वच्छां मदिरां पपौ।

अथ मद्यमदमुद्रितहृशं तं मुण्डितमस्तकमुखं कृत्वा गाढकम्बलग्रन्थौ निबध्य च सा ग्रामाद् बहिश्चिक्षेप। अथ निशीथे गतमद्यबलः पिहितमुखमस्तकः स स्वगृहमागत्य प्राणप्रियं पुरोहितपुत्रं स्वमित्रमाहूय प्रोचे, हे मित्र! मयेदमनुष्ठितं, पश्य मम स्वरूपमित्यभिहितः स सुहृद् निजधिया दुःसाध्यरोगमिषेण तं गाढं पूत्कुर्वन्तं कारयित्वा तस्य शिरसि मुखे च घुसृणमसृणश्रीखण्डद्रवलेपं कृत्वा इमं कलङ्कं निराकरोत्। कतिचिद्वासरैः पुनः प्ररूढमुख-मस्तकचिकुरः स तां स्मरन् स्वसञ्चारिणीं तदभ्यर्णे प्राहिणोत्। अहो! के के पुरुषाः कामेन न विडम्बिताः! यतः—

उरअंतर-वाहणए थण-पव्वय-रोमराय वणगहणे।
सुर-नर-गण-गंधव्व, नग्गविआ मयण चोरेण ॥ ५॥

विकलयति कलाकुशलं, हसति शुचिं पण्डितं विडम्बयति ।
अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ॥ ६ ॥

पुनरागतायास्तस्या दूत्याः करे सा साध्वी तैर्मस्तकमुखकेशैः सहिते पञ्जरे पक्षिणमेकं निक्षिप्य प्रेषयामास, स्माह च हे भद्रे! वाच्यं स्वभर्तुरिति, पञ्जरस्थवस्तूनि कामं रहसि विलोक्य वस्तुनोऽनुसारतस्त्वया विधेयम् । अथाऽनया तथैवाभिहिते सोऽपि सद्यः तथैव निर्म्ममीते स्म । पञ्जरान्तःपक्षिणं केशांस्तांश्च विलोक्य स दध्यौ, अहो! तया धीमत्या मम किं ज्ञापितमिति तस्याश्चेतश्चिन्तितमविदन् स स्वं तन्मित्रमाकार्य तद्वस्तुदर्शनपुरस्सरमवोचत्, मदीयैस्तैः केशैः कलितमिमं पक्षिणं प्रेषयन्त्या तया पण्डितया किं मम ज्ञापितम्?

केशास्त्वागतास्तव मुखमस्तकयोः प्ररूढत्वात्, यतो मुण्डितानाममीषां पुनरुद्गमः, इति केशप्रेषणाभिप्रायः, पक्षिणस्त्वण्डजाः, अण्डजानां च पञ्चेन्द्रियत्वेऽपि न केषाञ्चिदपि कर्ण-घ्राणाऽऽकृतिर्दृश्यते, तेनैतत्तुल्यं कर्णघ्राणरहितं त्वां करिष्यामीति पक्षिणं प्रेषयन्त्या तया सूचितमस्ति, तेन यथाऽऽयतिसुन्दरं भवति तद्विधेहीति मित्रवचनमवधार्य स राजसूनुराकाशकुसुममिव तदङ्गभोगं दुर्लभं मत्वा तस्या विषये नीरागोऽजनिष्ट। ॥ **इति शीलपालने सुरूपानामश्रेष्ठिवधूकथा ॥ २५३॥**

॥ २५४॥ शीलमाहात्म्ये साधुश्रीसंग्रामसौवर्णिककथा ॥

शीलप्रभावतो हि देवदानवा अपि दास्यभाजो भवन्ति, यतः—

हरति कुलकलङ्कं लुम्पते पापपङ्कं, सुकृतमुपचिनोति श्लाघ्यतामातनोति ।
नमयति सुरवर्गं हन्ति दुर्गोपसर्गं, रचयति शुचि शीलं स्वर्गमोक्षौ सलीलम् ॥ १ ॥

अपि च—

किं विश्वविश्वत्रयचारुशीलं, शीलस्य माहात्म्यमुदीरयामः ।
सङ्ग्रामसाधोः स हि सङ्गमाप्य, वन्ध्योऽपि सद्यः फलति स्म चूतः ॥ २॥

तथाहि—सकल**मालव**मण्डललक्ष्मीलतामण्डपे श्री**मण्डपाचले श्रीग्यासुदीनपात-शाहि**राज्ये आनन्द इव श्रावकश्रेणिग्रामणीः श्रेष्ठिश्री**सुदर्शन** इव शीलवन्मस्तकमणिः साधुश्री-**संग्राम**सुवर्णकारः सर्वराज्याधिकार्यासीत्। स च देवपूजा-दया-दान-जिनशासनप्रभावनादिसर्व-धर्मकर्मसु कर्मठः शुद्धश्रावकत्वं पालयति।

एकदा काननश्रीलास्यलीलावितानोत्ताले पुष्पकाले समुपेयुषि तेन साधुश्रीसंग्रामादि-परिवारेण परिवृतः श्रीग्यासुदीनपातशाहिर्वसन्त इवोद्यानभूम्याभरणीबभूव।तत्र च काममविरल-दलपटलपेशलं ग्रीष्म-शीत-प्रावृट्-कालोपद्रवनिराकरणकुशलं सकललोकाऽमन्दाऽऽनन्दरस-रसवतीसूपकारं महान्तमेकं सहकारं विलोक्य छायामिच्छुः स **शाहिस्तं**स्य तले समुपविशन् परिवारेणाऽभाणि, हे देव! वन्ध्यस्याऽस्य सहकारस्याधस्तात्पार्थिवानामवस्थानं न स्थाने, इति निशम्य **शाहि**राह, अहो! किमनेनाऽवकेशिना वनाऽवनिविनाशविधायिनेति समूलोऽय-मुन्मूल्यतामिति। कर्णकटु तद्वचः श्रुत्वा परमार्हतः स संग्रामसौवर्णिको दध्यौ, अमी म्लेच्छा निष्करुणाः, अतोऽसौ **शाहि**स्त्वेनं महातरुमवश्यमुन्मूलयिष्यति, अत एनं तरुमहं रक्षामीति मत्वा स तं **शाहि**माह, हे स्वामिन्नथ फलिष्यति न वेति गत्वाहं पृच्छाम्येनकमाम्रं, **शाहि**नापि प्रतिश्रुते स सहकारतले समेत्य स्वपाणिना तं स्पृशन्नेवमवोचत्, यदि मम शीलं सम्यक्त्वं च सम्यक् स्यात्, तदासौ सहकारः फलेग्रही भूयादित्युक्त्वा निजपाणिना स्पृष्ट्वा द्रुतमागत्य **शाहि**मब्रवीत्। हे देव! अयमाम्रो मन्मुखेनैतद्विज्ञपयति यदहमागामिनि वर्षे फलिष्यामि, न चेत्तदा **शाहि**ना यथारुचि विधेयमिति श्रुत्वा भूपः स्वस्थानमुपेयिवान्।

अथ सौवर्णिकेनापि द्वितीयस्मिन्नहनि तत्र तरुमूले गत्वा दुग्धेनाऽऽलवालं पूरयित्वेद-मवादि – हे माकन्दमहातरो! मया त्वं रक्षितोऽसि, त्वयापि यथा मद्वचः समीचीनं भवति तथा विधेयमिति, कथितं मालाकाराणां च फलितेऽस्मिन् सहकारे मम वर्धापनिका देयेति। अथोपेयुषि वर्षे प्रकामं फलितं तमाम्रमुदीक्ष्य मालाकारैर्वर्धापितः सौवर्णिकः, सोऽपि तस्य पेशलैः फलैः कनकस्थालं भृत्वा **शाहि**पुरः प्राभृतीकृतवान् ऊचे हे स्वामिंस्तेनाम्रेणैतानि फलानि ढौकितानि सन्तीति **शाहि**नापि स्वपुरुषैस्तन्निर्णयं विधाय ततः प्रभृति स संग्रामसौवर्णिको विशेषेण बहुमेने। ॥ **इति शीलमाहात्म्ये साधुश्रीसंग्रामसौवर्णिककथा ॥ २५४॥**

॥ २५५॥ परोपकारकरणे श्रीविक्रमादित्यनृपकथा ॥

सन्तो हि सर्वदा परोपकारकरणपरायणाः स्युः, यतः—

कस्यादेशात् क्षपयति तमः सप्तसप्तिः प्रजानां ?,
छायां कर्तुं पथि विटपिनामञ्जलिः केन बद्धः ?।

१. तस्य तलोत्तिष्ठासुः परिवारेमा° PD॥

अभ्यर्थ्यन्ते नवजलमुचः केन वा वृष्टिहेतो-
र्जात्यैवैते परहितविधौ साधवो बद्धकक्षाः ॥ १ ॥

किं बहुना? परोपकारप्रह्वा हि विश्वमपि स्वैरुपकारैस्तोषयन्ति। यतः—

मनसि वचसि काये पुण्यपीयूषपूर्णा-स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं, निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ?॥ २ ॥

अपि च—

परोपकाराय पयोधराणा-मिव प्रवृत्तिर्महतामिह स्यात् ।
हसन् रुदन् विप्रसुतो ह्यतोषि, कन्याप्रदानान्नृपविक्रमेण ॥ ३ ॥

तथाहि—एकदा **मालवा**धिराजः परदुःखकातरः परनारीसहोदरः **श्रीविक्रमादित्यो** राजा निशि निजसौधान्तः सुखसुप्तो निशीथे हसन्तं तस्मिन्नेव क्षणे च तमेव रुदन्तमेकं नरमज्ञासीत्। अहो! प्रकाशान्धकारयोरिव हसनरोदनयोर्मिथो महान् विरोधः, तदा कथमेकस्मिन्नेव क्षणे हसनं रुदनं च कुर्वन्नरः श्रूयते ? इति मत्वा सत्वरमेव स सत्त्वशेवधिः करवालकरः स्वसौधतो निर्गत्य शब्दानुसारेण तदभ्यर्णमागतस्तथैव हसन-रोदनपरं नरं विलोक्य स राजा हर्ष-शोकसूचकं हसन-रोदनकारणमप्राक्षीत्। अथ सोऽब्रवीत्, हे पुरुषोत्तम! मम हर्ष-शोकनिदानं वक्तुमशक्यं, तथापि महापुरुषस्य तव पुरः किञ्चिद्वच्मि।

तथा चेहत्योऽहं द्विजपुत्रः **पुण्डरीक**नामा भ्रमन्नत्र कानने प्रौढमिमं प्रासादमद्राक्षम्। कौतुकोत्कण्ठितमना अहं तदन्तः प्रविशन् द्वारमुखबद्धेन महावृषभेण भणितो मा याहि पुरः किन्तु प्रथमं मामारोह यथा तवाखिलमपि करस्थाऽऽमलकमिव पाताललोकं दर्शयामीति तेनाऽभिहितोऽहं तमारूढो घटिकामात्रेण सकलमपि पाताललोकमालोक्य तत्पृष्ठस्थस्तत्रैवागतोऽहं तस्मादवरुह्य प्रथमां भूमिं चारुह्य द्वितीयां भूमिकां चटंस्तत्र द्वारस्थेन तुरगेणाऽहमभिहितः, हे नरोत्तम! मामारोह यथाहं तव सर्वमपि मनुष्यलोकं स्वपाणिस्थरेखापटलमिव दर्शयामीति श्रुत्वा मया तथैव विहिते सोऽपि मम निखिलमपि मनुष्यलोकमदीदृशत्। अहमपि तथैव तृतीयभूमिकां चटंस्तत्र बद्धेन महागजेनाऽभिदधे— हे नरशार्दूल! किं ममाऽवज्ञया पुरस्ताद् व्रजसि? तेन मत्पृष्ठमारोह, यथाहं तव मुकुरसङ्क्रान्तस्वमुखमिव निखिलमपि त्रिदशलोकं दर्शयामीति तदुक्तेन मया सत्वरमेव विहिते तमारूढोऽहं सर्वमप्यमरलोकमद्राक्षम्।

तथैव ततश्चतुर्थीभुवामारूढोऽहममरीमिव रमणीयरूपां भृशं सुभगस्वरूपां लक्ष्मीमिव मणिमौक्तिकसुवर्णादिमहार्घभूषणभूषितां पाणिपादादिसर्वशरीराऽवयवैरदूषितां कनकसिंहासनस्थां *वयःस्थामेकां कन्यामपश्यम्। अथ तया सह सरागप्रेमालापादिविधित्सया तदभ्यर्णे गच्छन्नहं* तत्सिंहासनवामपादबद्धेनैकेन खरस्वरेण [खरेण] भणितः, हे नर! मामारोह, यथाहं तव

युगपत्सकलामपि त्रिलोकीं द्रुतं दर्शयामीति। तथैव तमारूढोऽहं तेन पापिना खरेण गवाक्षद्वारेण नीत्वा स्वपृष्ठतः काममुल्लाल्य गोमयपिण्डमिवात्र कठिनप्रदेशे पातितः, तथोच्चैस्तरगवाक्षद्वारतः पततो मम भ्रष्टपर्पटवदस्थीनि भग्नानीति। तेन स्वर्ग-मर्त्य-पातालत्रयीदर्शनकुतूहलेन सञ्जातहर्षेण हसन्नस्मि, किं च यदहं साक्षात्पातकनिभेन तेन गर्दभेन पातितस्तत्पीडया च रुदन्नस्मीति निशम्य राज्ञा सोऽभिदधे, हे भद्र! सत्यन्ने बुभुक्षेव सत्यम्भसि पिपासेव परदुःखकातरे मयि सति किमिदं रोदनम्? इति मुञ्च बहुदुःखमूलं रोदनम्। अथ सोऽवदत् हे पुरुषोत्तम! यदि सौभाग्यश्रिया तर्जिताऽमररमणीजातया तया सह मम विवाहः स्यात्तदा विलापं त्यजामि, नाऽन्यथेति।

अथ तत्तुष्टये राजा सौधं प्रविवेश, तथैव च वृषभ-तुरग-गजानारुह्य पाताल-मर्त्य-स्वर्गलोकानालोक्य कन्यासमीपं व्रजन् खरेण भणितः स स्माह, हे वाहनाधम! धिक् त्वां, यश्च त्वामारोहति तमपि धिक्। यतः—

गर्दभयानमसंस्कृतवाणी, बालसखित्वमकारणहास्यम् ।
स्त्रीषु विवादमसज्जनसेवा, षट्सु नरो लघुतामुपयाति ॥ ४॥

किं तेन त्रिलोक्यवलोकनेन? यत्त्वामारुह्य विधीयते! किं तेन पायसेन? यच्चाण्डालगृहे भुज्यते! किं तेन पयसा? यद् भषणेनार्धपीतं पीयते! इति बाढं भर्त्सिते तस्मिन् खरे तथैव तस्थुषि, विद्युत्पुञ्ज इव तेजसा स्फुरन्मणिकुण्डलाद्यनेकाभरणभूषितः पुरः कोऽपि सुरः प्रादुरासीत्, स्माह च, हे राजन्नहमस्याः पिता द्विजन्मा मृत्वा च सुरोऽभूवं, अस्या मातापि परासुरभूत्। तेनाहं निबिडनिगडसदृशेन स्नेहेन अस्याः सुखाय पतिपरीक्षार्थं सौधादि सर्वमिदं व्यधाम्। परं त्वां विनाऽत्राऽऽगताः सर्वेऽपि खराऽऽरोहणं विदधिरे, तेन ते सर्वेऽपि गवाक्षद्वारेण बहिः क्षिप्ताः, अथास्या मम सुतायाश्चिन्ताकारस्त्वमेव, अतस्त्वदुत्सङ्गे मयेयं न्यधायीति प्रतिपाद्य तिरोहितसौधादिसर्वविस्तारः स सुरः कनकादिना राजानं पुत्रीं च सत्कृत्य तिरोऽभूत्। अथ राज्ञा मनःकामकामितां तां कन्यां स द्विजपुत्रः परिणायितः, दत्तं **खान**देशस्य राज्यं च। ॥ **इति परोपकारकरणे श्रीविक्रमादित्यनृपकथा** ॥ २५५॥

॥ २५६॥ मूर्खचेष्टिते खेमाख्यकुटुम्बिकथा ॥

मूर्खा हि निजैरेव दुश्चेष्टितैरशर्मभाजो भवन्ति। यतः—

कार्यैर्निजैरेव भवन्ति मूर्खाः, पदे पदे दुःखशताभिभूताः ।
विक्रीय निद्रां जगृहे जडेन, नोज्जागरः कामितमिच्छुना किम् ? ॥ १॥

तथाहि— **पटोलग्रामे खेतसीति** राजपुत्रः, तस्य चैको हयः, स च तुरगः सदैव नवीनत्वेन हेषारवमेव कुर्वन्नास्ते। तेन स्वामिना च तस्य **'उज्जागर'** इति नाम निर्ममे, सर्वोऽपि ग्रामलोकस्तं तुरगमुज्जागरमेव भणति। इतश्च तत्रैव ग्रामे **खेमा**ऽऽख्यस्य कुटुम्बिनो

महिषी, सा च लघ्वी श्यामवर्णा प्रभूतपयःप्रदा भाद्रपदकादम्बिनीव प्रीतिदायिनी। किं चेयं महिषी तृण-खल-कर्पासादिकं भक्ष्यं भूरि भुङ्क्ते, तेन च सा नित्यं निद्रामुद्रितनेत्रैव तिष्ठति।

तेन धनिकेन '**उंघ**' इति तस्या नाम निर्ममे। ततः सर्वोऽपि ग्रामलोकस्तां महिषीं **उंघ** इति कथयति। तस्याः प्रसादेन बहुदुग्ध-दधि-घृतलाभमाप्य स कुटुम्बी सदैव सुखमश्नुते। इतश्चाऽस्य ग्रामस्य परिसरसीमनि तस्करा बहुवृषभ-महिष-महिषीमिश्रं गोवर्गमादाय यान्तीति निशम्य तमेवोज्जागरनामानं तुरगमारुह्य स **खेतसी** राजपुत्रस्तेषां पृष्ठे धावति स्म। हयारूढं तमायान्तं निरीक्ष्य त्रस्तास्ते तस्कराः स्वं गोवर्गं तत्रैव हित्वा काकनाशमनश्यन्। निर्धनिकं तं गोवर्गमादाय स **खेतसी** स्वं ग्राममाययौ। अथ सर्वोऽपि स गोवर्गस्तेन सर्वेषामपि ग्रामलोकानां विभज्य दत्तः। 'यो हि दत्ते स देव' इति धिया सर्वैरपि ग्रामलोकैरय-मभ्युत्थानाऽऽसनमण्डनाऽऽशीर्वादादिना प्रत्यहं सत्क्रियते स्म। इति सकलैर्लोकैः पदे पदे पूज्यमानं तं निरीक्ष्य **खेमाख्यः** स कुटुम्बीति दध्यौ, यदसौ राजपुत्रः सर्वत्र पौरैः पूज्यते सन्मान्यते च देवतेव, तन्नूनमस्य हयस्य महिमा, तुरगप्रसादादेव तेनाऽसौ गोवर्गोऽपि समानीतः, तदिमां महिषीमेनं दत्त्वा तं वाजिनमाददामीति मत्वा, महिषीमिमामादाय तुरङ्गमोऽयं दीयतामिति स कुटुम्बी तं राजपुत्रं जगौ। स राजपुत्रोऽपि तदभिहितं प्रतिश्रुत्य तमुज्जागरं तुरगं दत्त्वा तां **उंघा**भिधानां महिषीमादत्ते स्म। अथ तस्य राजपुत्रस्य वेश्मनि तस्या महिष्या भूरिणा दुग्ध-दधि-घृत-तक्रादिगोरसेन नित्यं दीपालिकामहोत्सवोऽजनि। किं बहुना? सर्वोऽपि तस्य परिच्छदः कलितस्वर्लोकाऽवतार इव सुखभाग्बभूव। यद्गृहे तक्रबिन्दुरपि नासीत् तद्गृहे तु प्रचुरपयःप्रदायिनी सा महिषी दुग्धकादम्बिनी बभूव, अतस्तन्मन्दिरं नित्योत्सवमयं जातम्।

अथ तस्य **खेमाख्यस्य** कुटुम्बिनो वेश्मनि तत्तुरङ्गमच्छलान्मूर्त्तं दौर्गत्यमवतीर्णं, तेनाऽऽस्तां दुग्ध-दधि-घृतादिगोरसस्वादः, तक्रार्थं तद्गृहिणी हि प्रतिगृहं पर्यटनं चकार। तस्य शिशवो हि दुग्ध-दधिरहिताः काममसुखभाजोऽभवन्। स्वयं च तस्य तुरगस्य चरणार्थं महत्तृणभाराऽऽनयनादिव्यसनजन्यविडम्बनां सहमानो भृशमसुखमनुभवति। अथैकदा मध्याह्ने महान्तं तृणभारं मूर्धनि दधानं ज्वलत्पावकेनेव प्लुष्टे पथि व्रजन्तं तं कोऽपि तत्सम्बन्धिजनोऽभिदधे। हे भ्रातः ! असि सुखीति तेनाऽभिहितः स स्माह, कुतः सुखं मम? येन दुर्मतिना मया कामधेनुरूपा सा उंघमहिषी विक्रीता, अयमुज्जागरः पापमूलं तुरगश्च जगृहे। '**उंघ वेंची उजागरो लीधउ**' इत्यभीक्ष्णं भणन् स बाष्पप्लावितलोचनो जातः। ततो लोके 'उंघ वेंची उजागरो लीधउ'। इत्यसावाभाणकः प्रथितः सर्वत्र। ॥ **इति मूर्खचेष्टिते खेमाऽऽख्यकुटुम्बिकथा ॥ २५६ ॥**

१. तुला- चन्द्रशेखररासे । मध्यकालीन गु. कथाकोशे च ॥

॥ २५७॥ अवश्यभाविविषये भाविनीराज्ञीकर्मरेखराजकथा

दैव-देव-पार्थिव-परिवारादिसामग्रीबलात्कर्म बलवत्तरं, यतः—

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे, विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः, सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥१॥

तेन पुरातनप्रौढपण्डितैर्दैवविधीन् विमुच्य कर्मभ्य एव नमस्कारश्चक्रे। यतः—

नमस्यामो देवान् ननु हतविधेस्तेऽपि वशगा, विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः।
फलं कर्मायत्तं यदि किममरैः किञ्च विधिना, नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥२॥

अपि च—

दैववश्यं वृथा कार्यं, विधातुं शक्नुवन्ति के। दैवादेव हि सङ्गोऽभू-द्भाविनी-कर्मरेखयोः ॥३॥

तथाहि— **मनोरमे** नगरे **रिपुमर्दननामा** राजा, अपुत्रिणस्तस्य **भाविनी**नामपुत्री, सा च पितुः प्राणेभ्योऽपि प्रेयसी, तेनैतस्याः स्नानभोजनमज्जनादिप्रह्वायामेव राजा स्नान-भोजन-मज्जनादि करोति। किं बहुना? तन्मुखावलोकनमेव परमं पुण्यं मन्यमानः स प्रजापतिः। सा भाविनी **पुण्यदत्तस्य** कलाचार्यस्य समीपे चतुःषष्टिकलाभ्यासं करोति स्म। इतश्च अत्रैव नगरे सर्वथा निर्धनस्य **धनदत्तस्य** श्रेष्ठिनः सप्तपुत्रोपरि जातः **कर्मरेखाख्यः** पुत्रः, स च लघीयस्त्वेन पितुः प्रकामं प्रियः, सोऽपि तस्यैव गुरोः पार्श्वे कलाभ्यासं विधत्ते।

अधीतकलाजातया तया चैकदा कर्मरेखे पार्श्वे स्थिते स गुरुरपृच्छि, हे तात! मम को वरो भावी ? इति। तेनापि लग्नमवलोक्य कर्मरेखोऽयं भवत्या भर्ता भविष्यतीति श्रुत्वा वज्रहतेव खेदमापन्ना सेति दध्यौ, हा हा! असौ वराको दौर्गत्यपुत्रको मम पतिस्तदा मम मृतिरेव श्रेयसी, किंचाऽस्मिन् संस्थिते नूनमन्यो मम भर्ता न भवितेति विचिन्त्य कोपगृहं गत्वा निःश्वासत्रस्तलोहकारभस्त्रा बाष्पपूरप्लावितकञ्चुका सा स्वं मुखं पिधाय सुष्वाप। अथ भोजनाऽवसरे क्व गता **भाविनी**ति राज्ञा गवेषिता, क्वाप्योकसि सुप्तां तां विज्ञाय तत्राऽऽगतस्तादृशीं भाविनीमुत्सङ्गसङ्गिनीं कृत्वा राजा दुःखनिदानमप्राक्षीत्। स्वचिन्तिते तयाभिहिते राज्ञा किङ्कर्तव्यमिति सर्वेऽपि स्वसचिवाः पृष्टाः, ते प्रोचुर्हे मनुजाधिराज! निष्कारणं मनुजमारणं तु राज्ञां नोचितं, तेनाऽस्य पितैवाऽऽकारणीयः, यथा तस्यैव किञ्चिद्वितीर्य स तत्सुतो गृह्यते, पश्चात्स्वमीप्सितं विधास्यते, तथा च नाऽऽत्मनामनीतिरिति श्रुत्वा राज्ञा स **धनदत्तः** समाहूतः पृष्टश्चाऽऽत्मचिन्तितं, पविपातादपि कठिनतररचनं तद्वचनं श्रुत्वा साऽश्रुलोचनो **धनदत्तो**ऽभिधत्ते स्म। हे देव! के सुताः? का स्त्री? कश्चाऽहमिति सकलोऽपि मत्परिवारस्तावकीन एवास्तीति यथारुचि विधीयताम्। राजापि इतो व्याघ्र इतस्तटीति न्याये

१. तुला उपदेशप्रासादे व्या. २३१ ॥ C प्रतौ पार्श्वभागे अयं श्लोकः दृश्यते-

उदयति यदि भानुः पश्चिमायां दिशायां, प्रचलयति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताऽग्रेशिलायां, न चलति विधिविशेषं, भाविनी-कर्मरेखः ॥

पतितः **कर्मरेख**मादाय वधाय सायं चाण्डालानां ददौ। बालहत्या नाऽस्माकमुचितेति ध्यात्वा तेऽपि तत्स्थाने मृतकं **कर्मरेखसदृशं** बालं शूलायां निधाय तं मुमुचिरे। ज्ञातभूपाभिप्रायः सोऽपि सायं शृगालनाशमनश्यत्। इतश्च **श्रीपुरे** पुरे **श्रीदत्तः** श्रेष्ठी, अपुत्रस्य तस्य चैका **श्रीमती**संज्ञा सुता, तं श्रेष्ठिनं निशि तद्गोत्रदेवी स्वप्नान्तरिति ब्रवीति स्म, प्रभाते ग्रामाद्बहिरुत्तरस्यां दिशि वर्त्मनि सुप्तस्य यस्य बालस्य पार्श्वे तव कृष्णा गौस्तिष्ठति, तस्मै गृहश्रीयुता **श्रीमती** देयेति। अथ स कर्मरेखोऽपि सर्वस्यामपि निशि चलनान्निकामं श्रान्तः पुरासन्नमागत्य शेते स्म। **श्रीदत्तेनापि** गोत्रदेवीवचनेन तत्तथैव वीक्ष्य स्वगृहमानीय स स्वसुतां परिणायितः, वितीर्णा च करमोचनाऽवसरे सर्वापि गृहश्रीः। तत्र च तेनापि **कर्मरेखेण रत्नचन्द्र** इति स्वं नाम प्रकटितम्।

एकदा स श्रीदत्ताज्ञया यानपात्रेणाऽब्धौ जगाम। तत्र चोपार्जितभूरिवित्तो वर्त्मनि समागच्छन् भग्ने प्रवहणेऽम्भोनिधौ निपतितो गलितश्च मीनेन महता। तटे पतितस्य तस्य मीनस्योदरं विदार्य धीवरैर्गृहीत्वा स **भृगुपुर**पतेः प्राभृतीचक्रे। तेनाप्यपुत्रेण राज्ञा पुत्रत्वेन स रक्षितः परिणायितश्च **कुण्डिनपुर**स्वामिनः **कनकश्रि**यं सुताम्। रम्भया जम्भारातिरिव तया समं सुखमनुभवन् स कालं गमयति स्म। इतश्च **रिपुमर्दने**न तेन राज्ञा **भाविन्याः** स्वसुतायाः स्वयंवरमण्डपमहोत्सवे बहवो राजानो राजपुत्रा मन्त्रिणो मन्त्रिपुत्राः श्रेष्ठिनः श्रेष्ठिपुत्राः सार्थवाहाः सार्थवाहपुत्राश्च समाहूताः। तदा च **भृगुपुरस्वामिनः** सूनू **रत्नचन्द्रो**ऽपि चतुरङ्गिणीसेनया परिवृतः पुरन्दर इव सर्वश्रीसुन्दरस्तं स्वयंवरमण्डपमलञ्चकार। क्रमेण सकलराजमण्डलमतिक्रम्य **रोहिण्या** शशीव तया **भाविन्या** स एव वृतः, **रिपुमर्दनराजेनापि** कनककरितुरगादिकं दत्त्वा विसृष्टः स तां भाविनीं भामिनीमादाय स्वपुरमाययौ। रतिप्रीतिभ्यां मन्मथस्येव ताभ्यां **कनकश्रीभाविनी**भ्यां विलसतस्तस्य सुखेन कालो याति स्म। अथैकस्मिन्नहनि सुवर्णस्थाले स्वर्भोज्यमिव रम्यमन्नं भुञ्जानस्याऽस्य वातूलपूलेन प्रेरितान् रेणूनन्नमध्ये पततो विलोक्य तालवृन्तपाणिः पुरःस्थिता **भाविनी** तद्भोजनं स्वेन नवीनपट्टकूलाञ्चलेन सद्यः पिधत्ते स्म।

इति निरीक्ष्य **रत्नचन्द्रो** दध्यौ, एकः सोऽयमवसरो यत्राऽहमनया शूलायामारोपायितः एकश्चाऽयमवसरो यत्रैषेति वेत्ति मा प्राणपतेरस्य शरीरेऽपि पांशुस्पर्शो भूयादिति विस्मयं मन्यमानः स इषत्स्मितं चकार। तदा निपुणा सा **भाविनी** चकिता चिन्तयति स्म, यत्स्मितं तु मादृशां मृगीदृशां घटते, न त्वेतादृशां पुंसां, किञ्च कारणं विना नैतादृशाः सन्तः पुमांसो हास्यं सृजन्तीति ध्यात्वा सा तत्स्मितकारणं तमपृच्छत्। कान्ताकठोरतरकदाग्रहपतितः सोऽवोचत्— हे सुन्दरि! मामुपलक्षयसि त्वं? अथ सा वक्ति स्म— *ओमिति यत्त्वं मे प्राणपतिरहं च त्वत्प्रेयसी। तेनोक्तं हे प्रियेऽयं सम्बन्धस्तु विश्वस्मिन्नपि विश्वे प्रसिद्धः,* परमन्यःकोऽपि सम्बन्धोऽस्तीति त्वं न वेत्सि। किं न वेद्मीति तयाऽभिहिते सोऽवादीत्, हे

सुभ्रु! योऽहं स एव कर्मरेखाख्यो धनदत्तश्रेष्ठिनः सुतः, सैव त्वं **भाविनी**ति पूर्वजातमन्यदपि रहस्यं तदुक्तं श्रुत्वा सा प्रकामं त्रपाऽधोमुखी जाता। अथैनां प्रेमवचनैराश्वास्य सोऽब्रवीत्— त्रपायाः पद्मपत्राक्षि !, तन्नास्त्यवसरोऽधुना। लोकोक्तिरपि यद्विप्रै-र्नाऽतीता वाच्यते तिथिः ॥ ४॥

इति नीतिवचनैस्त्यक्तत्रपां तामादाय क्रमेण **मनोरमे** नगरे समागत्य **रिपुमर्दनस्य** राज्ञोऽप्येवं वृत्तान्तमभिधाय स स्वजनकस्य पादौ प्रणमति स्म। अथ **श्रीपुरनगरतः** श्रीमती पत्न्यपि तेन समानीता। एवं **श्रीमती-कनकश्री-भाविनीभिस्तिसृभिः** पत्नीभिः स वैषयिकं सुखं भुङ्क्ते स्म। अपुत्रिणा **रिपुमर्दनेन** राज्ञापि स्वराज्यं जामातुरेव दत्तम्। **कर्मरेखो** राजापि प्रान्ते परिव्रज्य सुगतिभाग्बभूव। ॥ **इत्यवश्यभाविविषये भाविनीराज्ञी-कर्मरेखराजकथा** ॥ २५७॥

॥ २५८॥ श्रीशीलविषये सीता-सतीकथा ॥

शीलं हि सर्वेषां धर्माणां मूलं, यतः—

सीलं धम्मनिहाणं, सीलं पावाण खंडणं भणिअं ।
सीलं जंतूण जए, अकित्तिमं मंडणं परमं ॥ १ ॥

तेन शीलवान् हि विपत्तिस्थानेऽपि सम्पत्तिमाप्नोति। यतः—

तोयत्यग्निरपि स्रजत्यहिरपि व्याघ्रोऽपि सारङ्गति,
व्यालोऽप्यश्वति पर्वतोऽप्युपलति क्ष्वेडोऽपि पीयूषति ।
विघ्नोऽप्युत्सवति प्रियत्यरिरपि क्रीडातडागत्यपां-
नाथोऽपि स्वगृहत्यटव्यपि नृणां शीलप्रभावाद् ध्रुवम् ॥ २ ॥

अपि च—

जायते शीलमाहात्म्या—दसम्भाव्यमपि ध्रुवम् ।
नासीद् ग्रहः किं सीताया, ज्वलदङ्गारखातिका ॥ ३॥

तथाहि—अखर्वगर्वपर्वताऽधिरूढत्वेन सदैवोन्नतकन्धरं दशकन्धरं निहत्य निजप्राणप्रियामादाय च **श्रीरामोऽयोध्यां** प्रविशति स्म। अन्यदा प्रादुर्भूतप्रभूतसद्भूतस्पर्धाभिः सपत्नीभिः कपटेन कारित**रावण**चरणाऽर्चनदर्शनत उदीरिताऽऽमर्षदोषवशतश्च कुपितः **श्रीरामोऽष्टापदतीर्थ**यात्रायामुत्पन्नदोहदां गुर्विणीं सतीमपि **सीतां कृतान्तवदन**सारथिना तीर्थयात्राकरणमिषेण महाभीमायां सिंहनादयुतायामटव्याममूमुचत्। सा साध्वी अकस्माद्विद्युत्पातादपि मरणादपि चैतद्दुःखं दुस्सहतरं मन्यमाना मूर्च्छिता शीतलतमवनवातैश्च लब्धसंज्ञा गाढं रुरोद। तदा च तत्र गजग्रहणाय समागतः श्रावकः **पुण्डरीक**पुराधीशो **वज्रजङ्घा**भिधो राजा गाढं तस्या आक्रन्दनमाकर्ण्य स्वसेवकानिति वदति स्म। यदियं राजपत्नी राजपुत्री सती गर्भवती कापि विलासवती रोदिति, किञ्चाऽस्या उदरे दारकद्वयमस्तीति किञ्च राजसुता, किञ्च कस्यापि

महाराजस्य प्रेयसी, किञ्च आसन्नप्रसवा सुलोचना भृशमशर्मदधती रोदिति इति स्वस्वामिनाभिहितस्वरूपां तां दिदृक्षूनागच्छतां(त)स्तत्सेवकान्निरीक्ष्य सा सतीमतल्लिका मा माममी स्पृशन्त्विति धिया प्रागेवाभरणानि त्यजन्ती मा भैषीरिति तैरभाषि। तेषु तत्सेवकेष्वेवं वदत्सु **वज्रजङ्घो**ऽपि तत्र सपद्येव समुपेयिवान्।

हे भगिनि! श्रावकोऽहं तेन मदग्रे वद, काऽसि त्वं? कस्याऽऽत्मजा? कस्य प्रियतमा चेति। तेनेति पृष्टा सा रहसि कस्यापि पुरस्त्वया न वाच्यमित्यभिधाय यथाजातं सर्वमात्मनः स्वरूपं जगाद। स्वसृत्वेन तेनाऽङ्गीकृता तद्वेश्मनि समेता सा शुभेऽहनि **मदनाङ्कुश-लवणाङ्कुशनामानौ** द्वौ सुतौ प्रसूते स्म। अथैतौ **सिद्धार्थनाम्नः** सिद्धपुत्रस्य समीपे द्वासप्ततिकलाः कलयतः स्म। क्रमेण तौ कामकेलिवनं यौवनं प्राप्तौ। आद्यः **श्रीवज्रजङ्घ**-राजस्य सुताः परिणीतवान्। अज्ञातवंशस्य पुत्री न देयेति **नारदेन** कोपितस्य, **रामसुतो**ऽयमिति च **नारदेनैव** तोषितस्य **पृथोः** क्ष्मापस्य सुता अपरः पर्यणैषीत्। अथ तौ बलप्रबलबलौ दिग्विजयं विदधानौ क्रमेणाऽयोध्यां राजधानीं रुरुधतुः। **राम-लक्ष्मणा**वपि ताभ्यां समं संग्रामं चक्रतुः। एतौ सीताप्रसूतौ श्रीरामसुताविति नारदेन भेदं नीता **विभीषण-भामण्डलादय** उदासीना एवाऽवतस्थिरे। तदा च हल-मुशल-चक्रेषु शस्त्रेषु मुधा जातेषु किं **वासुदेव-बलदेवा**विमाविति विषादमापन्नं श्रीराममेतौ भवत्सुतौ, को हर्षस्थाने विषाद इति नारदो जगाद। अथ तौ द्वौ भ्रातरौ पितृ-पितृव्याभ्यां सङ्गतौ। सर्वेऽप्यमी सङ्गताः परां प्रीतिमापुः। अस्मिन्नवसरे तत्र स्थिता सती **सीता**पीति दृष्ट्वा स्वयं पुण्डरीकपुरं ययौ। लोकोत्तरेण दिव्येन सकललोकसाक्षिकं शुद्धामेव सीतामहमङ्गीकरिष्यामीति प्रबलप्रतिज्ञापरेण रामेण प्रहिता बिभीषणभामण्डलादयो विहितदिव्यैवाहमयोध्यामेष्यामीतिदृढनियमप्रह्वां तामयोध्यामानयन्ति स्म।

